शान्ति पर्वान्तर्गत

राजधर्म पर्व:

2

श्री॰
म॰भा॰
टी॰
१

श्रीगणेशायनमः श्रीगोपीजनवल्लभायनमः श्रीमद्गोपालमानस्यश्रीलक्ष्मणपदानुगः नीलकंठभावदीपंकुरुतेशांतिपर्व-
णि १ यत्सायनेषुकृत्यार्थमितिहासोयमीरितः धर्मार्थकाममोक्षास्तेसम्यगत्रनिरूपिताः धर्मादित्रयमर्थकामकरणप्रीत्यर्थमि-
त्यल्पका धीशुद्धिकृतजीवनार्थकतयानुकृत्यर्थमित्युत्तमाः एतत्पांडवधार्त्तराष्ट्रचरितव्याख्याभिधादर्शितंयेनासौनिजवाक्यजातहृ-
दयंमहत्संददात्वादरात् २ तत्रतावच्छांतौराजधर्मापद्धर्ममोक्षधर्माख्याःकांडास्त्रयःक्रमेणविश्वस्यापन्नस्यविरक्तस्यचोपकारकास्तेषुमध्या-
हित्वात्प्राथम्यंराजधर्माणां राजशब्दार्थश्चात्रप्रकरणात्तदुत्तरत्रारंजनकाम्ययेतिवक्ष्यमाणनिर्वचनानुसारेणच समानप्रकरणेसर्वा

ॐनारायणंनमस्कृत्यनरंचैवनरोत्तमं देवींसरस्वतींचैवततोजयमुदीरयेत् १ वैशंपायनउवाच
कृतोदकास्तेसुहृदांसर्वेषांपांडुनंदनाः विदुरोधृतराष्ट्रश्चसर्वाश्चभरतस्त्रियः १ ॥

रंजयतिप्रजाइतिमनूक्ते यथातोनृपतेर्धर्मवक्ष्याभिहितकाम्ययेतिहृदुपराशरेणापिसर्ववर्णसाधारणान्नृपतिशब्दप्रयोगाच्चयःप्र-
जारंजनंकरोतिसएवबोध्यः सचक्षत्रियोऽक्षत्रियोवा उत्थानेनसदापुत्रेत्यादिनावक्ष्यमाणानुत्थानादीन्धर्माननुतिष्ठेत् तत्रा-
पियःकामलोभादिहीनोऽत्यंतनिर्विघ्नःकेवलंप्रजापालनजंधर्ममात्रंकामयतेसएवराज्यार्हइतियुधिष्ठिरोदाहरणेनप्रथमंनिरूपय-
ति कृतोदकास्तेसुहृदामित्यादिना नमोधर्मायमहतइत्यंतः प्राक्तनेनग्रंथेन कृतोदकाःकृतप्रेततर्पणाः सुहृदामित्यनेनैवदुर्योध- १
नादीनामपिग्रहणं मरणांतानिवैराणीतिन्यायेनतेषामपीदानींसुहृत्त्वात् १ ॥

तत्रगंगातीरे पुराद्बहिर्मासमात्रवासस्यप्रयोजनंतुयत्क्वचित्क्षमयुद्धंकृतंतज्जन्यदोषनिर्हरणेनशुद्धिसंपादनं तदेतदुक्तंशौचंनिर्वर्तयि
ष्यंतइति ननुत्रयाणांवाशौचशुद्धिर्मासमात्रेणेतिविवक्षितं दशाहाच्छुध्यतेविप्रोद्वादशाहेनभूपतिः वैश्यःपंचदशाहेनशूद्रोमासेनशु-
ध्यतीतिमनुवाक्यविरोधात् नचैतेशूद्राःयेनमासमाशौचंकुर्युः किंचउच्यतेराहवेशस्त्रैःक्षत्रधर्महतस्यच सद्यःसंतिष्ठतेयज्ञस्तथा-
शौचमितिस्थितिरितिसंग्रामहतानांसपिंडाःसद्यएवशुध्यंतीत्युक्तंमनुना तेनद्वादशाहमपिनैषामाशौचंमासस्तुदूरनिरस्तइतिप्रती

तत्रतेसुमहात्मानोन्यवसन्पाण्डुनंदनाः शौचंनिर्वर्तयिष्यंतोमासमात्रंबहिःपुरात् २ कृतोदकांस्तुरा
जानंधर्मराजंयुधिष्ठिरं अभिजग्मुर्महात्मानःसिद्धाब्रह्मर्षिसत्तमाः ३ द्वैपायनोनारदश्चदेवलश्चमह
र्षिः देवस्थानश्चकण्वश्चतेषांशिष्याश्चसत्तमाः ४ अन्येचवेदविद्वांसःकृतप्रज्ञाद्विजातयः गृहस्थाः
स्नातकाःसंतोददृशुःकुरुसत्तमं ५ तेभिगम्यमहात्मानःपूजिताश्चयथाविधि आसनेषुमहार्हेषु
विविशुस्तेमहर्षयः ६ ॥

यते यद्यासौतिकेपञ्चवत्हतानांस्वयुद्धाद्द्वादशाहमाशौचमस्तितेनयुद्धदिनेषुअष्टादशाहपर्यंतंप्रत्यहमाशौचप्राप्तिःसद्यःशुद्धिः अं
त्यदिनप्राप्तस्याशौचस्यद्वादशाहेननिवृत्तिरितिमासंशौचसंपादनोक्तिर्युज्यते २ ३ ४ वेदविद्वांसःवेदार्थविदः कृतप्रज्ञाःवेदोक्ता
चारनिष्ठाः स्नातकाःब्रह्मचारिणः संतःअभयदक्षिणाप्रदाःसंन्यासिनः ५ तेराज्ञाऽभिगम्यप्रत्युद्गमनमस्कारादिनापूर्वंपूजिताःसं
तआसनेषुविविशुरितिसंबन्धः ६ ॥

श्री॰
म॰ रा॰
टी॰
२

कृष्णाद्यैर्वादिकाः परिवार्य पर्युपासन् परिवृत्तः उपविष्टवंतः तदा भावस्यार्थः ८ आश्वासयंतः हे तौशात् प्रत्ययः आश्वासनार्थं पर्युपासन्ति।
त्यर्थः ९ कालेवसरे संभाष्य एकमत्यं कृत्वा अब्रवीत् १० भवतस्त्वमितिबहूतया ठेपूर्वं मयर्मेण क्रांतासतीयमवनिरिदानींत्वद्बलेनमाय

प्रतिगृह्य ततः कृष्णः तत्कालसदृशीं तदा पर्युपासन्यथान्यायं परिवार्य युधिष्ठिरं ८ गुणेभागीरथीतीरे।
शोकव्याकुलचेतसम् आश्वासयंतो राजेंद्रं विप्राः शतसहस्रशः ९ नारदस्त्वब्रवीत्काले धर्मपुत्रं युधि
ष्ठिरं संभाष्य मुनिभिः सार्द्धं कृष्णद्वैपायनादिभिः १० भवता बाहुवीर्येण प्रसादान्माधवस्य च जि
तेयमवनिः कृत्स्ना धर्मेण युधिष्ठिर ११ दिष्ट्या मुक्तस्त्वं संग्रामादस्माल्लोकभयंकरात् क्षत्रधर्मरत
श्चापि कच्चिन्मोदसि पांडव कच्चिच्च निहतामित्रः प्रीणासि सुहृदो नृप कच्चिच्छ्रियमिमां प्राप्य न त्वां
शोकः प्रबाधते १२ युधिष्ठिर उवाच विजितेयं मही कृत्स्ना कृष्णबाहुबलाश्रयात् ब्राह्मणानां प्र
सादेन भीमार्जुनबलेन च १३ इदं तु मे महद्दुःखं वर्तते हृदि नित्यदा कृत्वा ज्ञातिक्षयमिमं महांतं
लोभकारितं १४ सौभद्रं द्रौपदेयांश्च घातयित्वा सुतान् जयोऽयमजयाकारो भगवन्प्रतिभाति मे १५

बलसहायेन धर्मेण कर्त्री जिता युवाभ्यां त्वत्प्रसादेन शोकः तेसतिधर्मः प्रादुरभूदित्यर्थः ११ दिष्ट्या भाग्येन कच्चिदिति कामप्रवेदने अनेनक
र्मणा त्वं मोदसि सुहृत्प्रीणानेविशोकत्वं च कामयमानः त्वां पृच्छामीत्यर्थः १२ १६ ॥ २

किंत्ववदत्पतीति वधूः कनिष्ठभ्रातृभार्या त्वात्स्नुषाभूता वार्ष्णेयीसुभद्रामेमांप्रति किंत्ववदत्पति राज्यलोभेनत्वयामत्पुत्रोघातितइति
वदत्पत्येवेतिभावः तथामधुसूदनंहरिंइतः द्वारकांप्रतिगतंसंतंप्रति वासिनीभ्रष्टजयश्रवणोत्सुका द्वारका द्वारकावासिजनसमू
हः किंत्ववदत्पतीतिसंबंधः खलहंत्राखजनपीडापहर्त्रात्वयासाधुःस्वीयः सोभद्रः कथंघातितइतिवदत्पत्येवेतिभावः पतत्स्वह

किंत्ववदत्पतिवार्ष्णेयीवधूर्मेमधुसूदनं द्वारकावासिनीकृष्णमितःप्रतिगतंहरिं १७ द्रौपदीहतपुत्रेयं
कृपणाहतबांधवा अस्मत्प्रियहितेयुक्ताभूयःपीडयतीवमां १८ इदमन्यच्चभगवन्नयत्त्वांवक्ष्यामिनाा
रद मंत्रसंवरणेनास्मिकुंत्याडःखेनयोजितः १९ यश्चनागायुतबलोलोकेप्रतिरथोरणे सिंहखे
लगतिर्धीमान्घृणीदान्तायतव्रतः २० आश्रयोधार्तराष्ट्राणांमानीतीक्ष्णपराक्रमः अमर्षीनित्या
संरंभीक्षेप्तास्माकंरणेरणे २१ शीघ्रास्त्रश्चित्रयोधीचकृतीचाद्भुतविक्रमः गूढोत्पन्नःसुतःकुंत्याा
भ्राताःस्माकमसौकिल तोयकर्मणितंकुंतीकथयामाससूर्यजं २२ ॥

लस्यमधुसूदनंहरिंइतिमिविशेषणाद्वयसामर्थ्यादेवलभ्यते १७ यतोहतपुत्राहतबांधवातःकृपणादीनाःतिडःखितेत्यर्थः प्रियंस्व
खकरंहितंपथ्यं प्रियंचतद्धितंचतस्मिन्नर्थेयुक्तासंनद्धा १८ मंत्रसंवरणेनगूढोत्पन्नस्यास्मद्भ्रातुःकर्णस्याप्रकाशनेन १९ तदेवाह
त्रिभिःयःसइति सिंहस्येवखेलाप्रुढक्रीडागतिर्गमनंचयस्यसतथा घृणीदयालुः २० अमर्षीपरोत्कर्षासहिष्णुः नित्यसंरंभी

सद्वोपवान ५५ ॥

पुत्रस्त्वस्येतिशेषः अवकीर्णत्यक्तं २३ मातृजः मातृसंबंधेन २४ २५ श्वेतवाहनोऽर्ज्जुनः पांडवक्तं त्वं च पुत्रो ममेत्यब्रवीदितिशेषः
२६ २७ कामोऽभिलषितं मातरिमातरं इति अवोचत्कार्णइतिशेषः नः अस्माभिः श्रुतं २८ नृशंसत्वं संकटे मित्रत्यागान्निर्दयत्वं

पुत्रं सर्वगुणोपेतमवकीर्णं जलेपुरा। मंजूषायां समाधाय गंगास्रोतस्यमज्जयत् २३ यं सूतपुत्रं लो
कोयं राधेयं चाप्यमन्यत। सज्येष्ठपुत्रः कुंत्यावैभ्राताऽस्माकं च मातृजः २४ अजानता मया भ्राता राज्य
लुब्धेन घातितः। तन्मे दहति गात्राणि तूलराशिमिवानलः २५ नहि तं वेद पार्थोपि भ्रातरं श्वेतवाहनः
नाहं न भीमो न यमौ स तु स्मान्वेद सुव्रतः २६ गता किल पृथा तस्य सकाशमिति नः श्रुतं अस्माकं शम
कामा वै त्वं च पुत्रो ममेत्यथ २७ पृथायास्तु न कृतः कामस्तेन चापि महात्मना। अथ पश्चादिदं मातर्यवोचा
दिति नः श्रुतं २८ न हि शक्ष्याम्यहं त्यक्तुं नृपं दुर्योधनं रणे। अनार्यं च नृशंसं च कृतघ्नं च हि मे भवेत्
२९ युधिष्ठिरेण संधिं हि यदि कुर्यां मते तव। भीतो रणे श्वेतवाहादिति मां मंस्यते जनः ३० सोऽहं विजि
त्य समरे विजयं सहकेशवं। संधास्ये धर्मपुत्रेण पश्चादिति च सोऽब्रवीत् ३१ तमुवाच किल पृथा पुनः पृ
थुलवक्षसं। चतुर्णामभयं देहि कामं युध्यस्व फाल्गुनं ३२ सोऽब्रवीन्मातरं धीमान्वेपमानो कृतांजलिः

कृतघ्नत्वं उपकर्तृष्वपकारित्वं प्रसिद्धमित्यतोऽनार्यत्वमेव स्पष्टीकरोति भीतइति २९ ३० विजयमर्ज्जुनं ३१ पृथुलवक्षसं कपाटवक्षसं ३२

ग्रामान्विषह्याश्वत्तरोनहनिष्यामितेहतान् ३३

वेपमानांअर्ज्जुननाशभीत्या विषह्यानुवशागान् ३३ ॥

३४ पुत्रगृद्धिनी पुत्रलोभवती ३५ विसृज्य कर्णमिति शेषः ३६ ३८ दूयते उपतप्यते ३९ ४२ कारणं सादृश्यहेतोस्तज्जन्यत्वस्य ज्ञापकं ४३ कथंतु इति प्रकृतप्रश्ने चक्रं रथचक्रं ४४ सर्वविद्विद्वेत्तः विद्वानिति आत्मज्ञ इत्यर्थः अतएव हंत कार्येऽप्र

पंचैव हि सुता देवि भविष्यंति तव ध्रुवाः सार्जुना वा हते कर्णे सकर्णा वा हतेर्जुने ३४ तं पुत्रगृद्धि
नी भूयो माता पुत्रमथाब्रवीत् आत्मनः स्वस्ति कुर्वीथा येषां स्वस्ति चिकीर्षसि ३५ एवमुक्त्वा कि
ल पृथा विसृज्योपययौ गृहान् सोर्जुनेन हतो वीरो भ्राता भ्रात्रा सहोदरः ३६ न चैव विवृतो मंत्रः पृ
थायास्तस्य वा विभो अथ शूरो महेष्वासः पार्थेनाजौ निपातितः ३७ अहं त्वज्ञासिषं पश्चात्स्व
सोदर्यं द्विजोत्तम पूर्वजं भ्रातरं कर्णं पृथाया वचनात्प्रभो ३८ तेन मे दूयते तीव्रं हृदयं भ्रातृघा
तिनः कर्णार्जुनसहायोहं जयेयमपि वासवं ३९ सभायां क्लिश्यमानस्य धार्तराष्ट्रैर्दुरात्मभिः
सहसोत्पतितः क्रोधः कर्णं दृष्ट्वा प्रशाम्यति ४० यदा ह्यस्य गिरो रूक्षाः शृणोमि कटुकोदयाः
सभायां गदतो द्यूते दुर्योधनहितैषिणः ४१ तदा नश्यति मे क्रोधः पादौ तस्य निरीक्ष्य ह कुंत्या
हि सदृशौ पादौ कर्णस्येति मतिर्मम ४२ सादृश्यहेतुमन्विच्छन् पृथायास्तस्य चैव ह कारणं ना
धिगच्छामि कथंचिदपि चिंतयन् ४३ कथं नु तस्य संग्रामे पृथिवी चक्रमग्रसत् कथं तु शप्तो

हंत कारणं च वेद जानाति ४५ इति नैलकंठीये भारतभावदी· राजधर्मेषु प्रथमाध्यायार्थप्रकाशः १ ॥ भ्राता मे तत्त्वं वक्तु

मिहार्हसि ४४ श्रोतुमिच्छामि भगवंस्त्वत्तः सर्वं यथातथं

भवान्हि सर्वविद्विद्वांल्लोके वेदकृताकृतं ४५ इति श्री
भारते राजधर्मे कर्णाभिज्ञाने १ ॥

सएवमिति उक्तः११ः १ कर्णार्जुनसहाययोर्हंजयेयमपिवासवमित्युक्तमनुमोदते एवमेतदिति २ तर्हिकिमर्थमनयोर्वैरंदैवकृ
त्यादितमित्याशंक्याह गुह्यमिति संघर्षजननोवैरान्युद्दीपकः कन्यागर्भोदेवैःक्षत्रस्यस्वर्गगमनायनिर्मितइत्यर्थः ४ चकारेत्या

वैशंपायनउ॰ सएवमुक्तस्तुमुनिर्नारदोवदतांवरः कथयामासतत्सर्वंयथाशप्तःससूत
जः १ नारदउवाच एवमेतन्महाबाहोयथावदसिभारत नकर्णार्जुनयोःकिंचिदविषह्यं
भवेद्रणे २ गुह्यमेतत्तुदेवानांकथयिष्यामितेनघ तन्निबोधमहाबाहोयथावृत्तमिदंपुरा ३
क्षत्रंस्वर्गंकथंगच्छेच्छस्त्रपूतमितिप्रभो संघर्षजननस्तस्मात्कन्यागर्भोविनिर्मितः ४ सो
बालस्तेजसायुक्तःसूतपुत्रत्वमागतः चकारांगिरसांश्रेष्ठाद्धनुर्वेदंगुरोस्तदा ५ सबलंभी
मसेनस्यफाल्गुनस्यचलाघवं बुद्धिंचतवराजेंद्रयमयोर्विनयंतथा ६ सख्यंचवासुदेवेन
बाल्येगांडीवधन्वनः प्रजानामनुरागंचचिंतयानोव्यदह्यत ७ ससख्यमकरोद्बाल्येराज्ञा
दुर्योधनेनच युष्माभिर्नित्यसंद्विष्टोदैवाच्चापिस्वभावतः ७ सर्वाधिकमथालक्ष्यधनु
र्वेदेधनंजयं द्रोणंरहस्युपागम्यकर्णोवचनमब्रवीत् ८ ॥

धीतवान् अंगिरसांश्रेष्ठात् ५ ६ दैवाच्चापिस्वभावतइति दैवात्देवानांसंकल्पात्पूर्वोक्तात् स्वभावतःवीर्याधिकोनीचकुलो
ङ्भवःसंगेनसमेधितः महाजनैःस्पर्धमानोहंतिराष्ट्रंसराजकमितिश्लोकोक्तात् ८ ॥

ब्रह्मास्त्रमिति बहस्यंतत्प्रसादनविधिः निवर्त्तनंउपसंहारः ताभ्यांसहितंसरहस्यनिवर्त्तनं ९ १० ११ ब्रह्मास्त्रमिति त्वंतब्रह्म दत्रेतरत्वान्नविद्यार्हइत्यर्थः १२ १३ गुरुरेवपितेत्यभिसंधायाहब्राह्मणोभार्गवोस्मीति १४ १५ १६ समुद्रांतेदक्षिणसमुद्रसमी

ब्रह्मास्त्रंवेत्तुमिच्छामिसरहस्यनिवर्त्तनं अर्जुनेनसमंचाहंयुद्धेयमितिमेमतिः ९ समःशि ४
ष्येषुचस्नेहःपुत्रेचैवतवध्रुव त्वत्प्रसादान्नमांब्रूयुरकृतास्त्रंविचक्षणाः १० द्रोणस्तथोक्तः
कर्णेनसापेक्षःफाल्गुनंप्रति दौरात्म्यंचैवकर्णस्यविदित्वातमुवाचह ११ ब्रह्मास्त्रंब्राह्मणो
विद्यात्यथावच्चरितव्रतः क्षत्रियोवातपस्वीयोनान्योविद्यात्कथंचन १२ इत्युक्तोंगिरसा
श्रेष्ठमामंत्र्यप्रतिपूज्यच जगामसहसारामंमहेंद्रंपर्वतंप्रति १३ सतुराममुपागम्यशिरसा
भिप्रणम्यच ब्राह्मणोभार्गवोस्मीतिगौरवेणाभ्यगच्छत १४ रामस्तंप्रतिजग्राहपृष्ट्वागोत्रा
दिसर्वशः सउक्तःस्वागतंचेतिप्रीतिमांश्चाभवद्भृशं तत्रकर्णस्यवसतोमहेंद्रेपर्वतोत्तमे
१५ गंधर्वैराक्षसैर्यक्षैर्देवैश्चासीत्समागमः सतत्रेष्वस्त्राण्यवाप्याथ प्रियश्चाभवदत्यर्थं
देवदानवरक्षसां सकदाचित्समुद्रांतेविचचाराश्रमांतिके १७ एकःखङ्गधनुःपाणिःपरि
चक्रामसूर्यजः सोग्निहोत्रप्रसक्तस्यकस्यचिद्ब्रह्मवादिनः १८ जघानाज्ञानतःपार्थहोमधेनुं
यदृच्छया तदज्ञानकृतंमत्वाब्राह्मणायन्य

पे १७ होमधेनुंकर्णपर्वोक्तदिशोवत्सवधप्रकारेणेवयोज्यः २० ॥

वेदपा ५१ कर्णः प्रसादसंप्रेक्षमिक्षपवीडदः ४

२१ २६ अव्याहृतंमेव्याहृतंतत्रागमःपाठःअनुक्तंतद्वदन्यथेत्यर्थः केवलंतूष्णींयथास्यात्तथा यत्तेकार्यंतदासमाचरेत्यर्थः २७ द्वि-
तीयोऽध्यायः २ कर्णस्येतिपाठऽनुरागेण दमेनइंद्रियजयेन १ कृत्स्नंसरहस्यंनतुमंत्रमात्रं अखिलंग्राह्यंमन्त्रदेवताराधनसहितं

अबुद्धिपूर्वंभगवन्धेनुर्वत्साहतातव मयातत्रप्रसादंचकुरुष्वेतिपुनःपुनः २१ तंसविप्रोऽब्रवीत्क्रु-
द्धोवाचानिर्भर्त्सयन्निव दुराचारवधार्हस्त्वंफलंप्राप्नुहिदुर्मते २२ येनविस्पर्द्धसेनित्यंयदर्थंचेष्ट-
सेभृशं युध्यतस्तेनतेपापचक्रंभूमिर्ग्रसिष्यति २३ ततश्चक्रेमहीग्रस्तेमूर्द्धानंतेविचेतसः पातयि-
ष्यतिविक्रम्यशत्रुर्गच्छनराधम २४ यथेयंगौर्हतामूढप्रमत्तेनत्वयामम प्रमत्तस्यतथारा-
तिःशिरस्तेपातयिष्यति २५ श्रमःप्रसादयामासततस्तंद्विजसत्तमं गोभिर्धनैश्चरत्नैश्चसचै-
नंपुनरब्रवीत् २६ नहिमेव्याहृतंकुर्यात्सर्वलोकोपिवैमृषा गच्छवातिष्ठवायद्वाकार्यंतत्ते
समाचर २७ इत्युक्तोब्राह्मणेनाथकर्णोदैन्यादधोमुखः राममभ्यगमद्भीतस्तदेवमनसास्मर-
न् २८ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेकर्णशापः २ नारदउ॰ कर्णस्यबाहुवीर्ये-
णप्रश्रयेणदमेनच ततोषभृगुशार्दूलोगुरुशुश्रूषयातथा १ तस्मैसविधिवत्कृत्स्नंब्रह्मा-
स्त्रंसनिवर्तनं प्रोवाचाखिलमव्यग्रंतपस्वीतत्तपस्विने २ विदितास्त्रःततःकर्णोरममाणोऽश्र-
मेभृगोः चकारवैधनुर्वेदेयत्नमद्भुतविक्रमः ३ ॥

अव्यग्रंयथास्यात्तथातपस्वीएकाग्रचित्तः २ अश्रमेश्रमवर्जितआश्रमेइत्यर्थः ३ ॥

४ विस्रंभोविश्वासः ५ ६ तेसंहरीकर्तुंभयात्‌निद्राभयात्‌निद्राभंगभयात्‌ ७ ९ ११ सूचीभिरिवतीक्ष्णैःरोमभिःसंवृतं

ततःकदाचिद्रामस्तुचरन्नाश्रममंतिकात्‌ कर्णेनसहितोधीमानुपवासेनकर्षितः ४
सुष्वापजामदग्न्योवैविस्रंभोत्पन्नसौहृदः कर्णस्योत्संगआधायशिरःक्लांतमनागुरुः ५
अथकृमिःश्लेष्ममेदोमांसशोणितभोजनः दारुणोदारुणस्पर्शःकर्णस्याभ्याशमागतः
६ सतस्योरुमथासाद्यबिभेदरुधिराशनः नचैनमशकत्क्षेप्तुंहंतुंवापिगुरोर्भयात्‌ ७
संदश्यमानस्तुतथाकृमिणातेनभारत गुरोःप्रबोधनाशंकीतमुपैक्षतसूर्यजः ८ कर्ण
स्तुवेदनांधैर्यादसह्यांविनिगृह्यतां अकंपयन्नव्यथयन्धारयामासभार्गवं ९ यदास्वरु
धिरेणांगपरिस्पृष्टोभृगूद्वहः तदाबुध्यततेजस्वीसंतप्तश्चेदमब्रवीत्‌ १० अहोस्म्यशु
चितांप्राप्तःकिमिदंक्रियतेत्वया कथयस्वभयंत्यक्त्वायाथातथ्यमिदंमम ११ तस्यकर्ण
स्तदाचष्टकृमिणापरिभक्षणं ददर्शरामस्तंचापिकृमिंसूकरसन्निभं अष्टपादंतीक्ष्ण
दंष्ट्रंसूचीभिरिवसंवृतं रोमभिःसंनिरुद्धांगमलर्कंनामनामतः १२ सदृष्टमात्रोरामेणकृ
मिःप्राणानवासृजत्‌ तस्मिन्नेवासृक्क्लिन्नस्तदद्भुतमिवाभवत्‌

संनिरुद्धांगंत्रासेनसंकुचितांगंनामतोनाम्ना १३ असृक्क्लिन्नःशोणिते १४ ॥

श्री·
म·पा·
टी·
६

विश्वरूपः कामरूपी करालवान् मेघवाहनो मेघोपरिस्थः १५ १८ देवयुगे सत्ये १९ नक्कुशलं अमलं २३ २४ कामया स्वरसेन २५

ततोऽन्तरिक्षे ददृशे विश्वरूपः करालवान् रासभो लोहितग्रीवः कृष्णाङ्गो मेघवाहनः १५ सदा
मे प्राञ्जलिर्भूत्वा बभाषे घूर्णमानसः स्वस्ति ते भृगुशार्दूल गमिष्यामि यथागतं १६ मोचितो
नरकादस्माद्भवता मुनिसत्तम भद्रं चैतेस्तु वंदे त्वां प्रियं मे भवता कृतं तमुवाच महाबाहुर्जा
मदग्न्यः प्रतापवान् कस्त्वं कस्माच्च नरकं प्रतिपन्नो ब्रवीहि तत् १८ सोऽब्रवीदहमासं प्राग्दंशो
नाम महासुरः पुरा देवयुगे तात भृगोस्तुल्यवया इव १९ सोऽहं भृगोः सुदयितां भार्यामप
हरं बलात् महर्षेरभिशापेन कृमिभूतोऽपतं भुवि २० अब्रवीद्धि स मां क्रोधात्तव पूर्वपिताम
हः मूत्रश्लेष्माशनः पाप निरयं प्रतिपत्स्यसे २१ शापस्यान्तो भवेद्ब्रह्मन्नित्येवं तमथाब्रुवं भ
विता भार्गवाद्रामादिति मामब्रवीद्भृगुः २२ सोऽहमेतां गतिं प्राप्तो यथा न कुशलं तथा त्व
या साधो समागम्य विमुक्तः पापयोनितः २३ एवमुक्त्वा नमस्कृत्य ययौ रामं महासुरः रामः
कर्णं च सक्रोधमिदं वचनमब्रवीत् अतिदुःखमिदं मूढ न जातु ब्राह्मणः सहेत् क्षत्रियस्यैव
ते धैर्यं कामया सत्यमुच्यतां २४ तमुवाच ततः कर्णः शापभीतः प्रसादयन् ब्रह्मक्षत्रान्तरे जा

ब्रह्मक्षत्रयोरंतरे अन्यत्र जातं तदेवाहमतं मां विद्धीति २६ ॥ तं सूतं मां विद्धि भार्गव २५ ॥ ६

कथंतर्हिब्रह्मणोभार्गवोस्मीतिमिथ्यावचनंत्वयोक्तमित्यतआह पितागुरुरिति २८ २९ तस्मादिति हेमूढएतेतववयका
लादन्यत्रब्रह्मास्त्रंनप्रतिभास्यतीतितिन: किंतुवयकालएवनप्रतिभास्यतिकालांतरेतुप्रतिभास्यत्येवेत्यर्थः ३० सदृशोऽर्जु

राधेयःकर्णइतिमांप्रवदंतिजनाभुवि प्रसादंकुरुमेब्रह्मन्नस्त्रलब्धस्यभार्गव २७ पितागुरुर्न
संदेहोवेदविद्याप्रदःप्रभुः अतोभार्गवइत्युक्तंमयागोत्रंतवांतिके २८ तमुवाचभृगुश्रेष्ठःस
रोषःप्रहसन्निव भूमौनिपतितंदीनंवेपमानंकृतांजलिं २९ यस्मान्मिथ्योपचरितोह्यस्त्रलो
भादिहत्वया तस्मादेतन्नतेमूढब्रह्मास्त्रंप्रतिभास्यति ३० अन्यत्रवधकालात्तेसदृशेनसमेयु
षः अब्राह्मणेनहिब्रह्मध्रुवंतिष्ठेत्कदाचन ३१ गच्छेदानींनतस्थानमनृतस्येहविद्यते नत्वा
यासदृशोयुद्धेदत्रियोभवितायुधि ३२ एवमुक्तःसरामेणन्यायेनोपजगाम्ह दुर्योधनमुपा
गम्यकृतास्त्रोस्मीतिचाब्रवीत् ३३ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेकर्णास्त्रप्राप्तिर्न्तृ
तीयोध्यायः ३ नारदउ० कर्णस्तुसमवाप्यैवंशस्त्रंभार्गवनंदनात् दुर्योधनेनसहितोमुमुदेभ
रतर्षभः १

नौस्मृरेणुरतःस्थितेसमेयुषः युध्यमानस्यसमित्याजिसमियुधइतिसंपूर्वस्येणोयुद्धार्थत्वदर्शनात् ३१ ध्रुवंम
रणावधिनतिष्ठेतब्रह्मब्रह्मास्त्रं ३२ न्यायेनअभिवंदनादिपूर्वकंउपजगामदुर्योधनमितिशेषः ३३ तृतीयः ३ कर्णस्तुसमवा

श्री· म·शा· टी· ७

विषयेदेशे २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ वर्षवरःषंढः १३ १४ १५ ॥

ततःकदाचिद्राजानःसमाजग्मुःस्वयंवरे कलिंगविषयेराजन्राज्ञश्चित्रांगदस्यच २ श्रीमद्राज
पुरंनामनगरंतत्रभारत राजानःशतशस्तत्रकन्यार्थंसमुपागमन् ३ श्रुत्वादुर्योधनस्तत्रसमेता
न्सर्वपार्थिवान् रथेनकांचनांगेनकर्णेनसहितोययौ ४ ततःस्वयंवरेतस्मिन्संप्रवृत्तेमहोत्सवे
समापेतुर्नृपतयःकन्यार्थेनृपसत्तम ५ शिशुपालोजरासंधोभीष्मकोवक्रएवच कपोतरोमा
नीलश्चरुक्मीचदृढविक्रमः ६ शृगालश्चमहाराजःस्त्रीराज्याधिपतिश्चयः अशोकःशत
धन्वाचभोजोवीरश्चनामतः ७ एतेचान्येचबहवोदक्षिणांदिशमाश्रिताः म्लेच्छाचार्याश्चराजा
नःप्राच्योदीच्याश्चभारत ८ कांचनांगदिनःसर्वेशुद्धजाम्बूनदप्रभाः सर्वेभास्वरदेहाश्चव्याघ्राइव
बलोत्कटाः ९ ततःसमुपविष्टेषुतेषुराजसुभारत विवेशरंगंसाकन्याधात्रीवर्षवरान्विता १० ततः
संश्राव्यमानेषुराज्ञांनामसुभारत अत्यक्रामद्धार्तराष्ट्रंसाकन्यावरवर्णिनी ११ दुर्योधनस्तुकौर
व्योनामर्षयतलंघनं प्रत्यषेधच्चतांकन्यामसत्कृत्यनराधिपान् १२ सवीर्यमदमत्तत्वाद्भीष्मद्रोणा
वुपाश्रितः रथमारोप्यतांकन्यामाजुहावनराधिपः १३ तमन्वयाद्रथीखड्गीबद्धगोधांगुलित्रवा
न् कर्णःशस्त्रभृतांश्रेष्ठःपृष्ठतःपुरुषर्षभ १४ ततोविमर्दःसुमहान्राज्ञामासीद्युयुत्सतां संनह्य
तांतनुत्राणिरथान्योजयतामपि १५ ॥ ७

१६ १९ व्यपेयुः व्यपगताः २० २१ चतुर्थः ४ आविष्कृतेति १ २ ४ बाजकंटकयुद्धेन बाजकंटकं केतकपत्रं तद्वद्यत्र बलि
नाड्बलस्य शरीरं पाट्यते तद्बाजकंटकं नाम युद्धं यथोक्तं पक्षांजंघां पदाक्रम्य परां गृह्य पाट्यते कतकीपत्रवच्छस्त्रुद्धं तत्

ते भग्ना यावंतः सर्वे योधाः कर्णदुर्योधनावुभौ शरवर्षाणि मुंचंतौ मेघाः पर्वतयोरिव १६ कर्णस्ते
षामापततामेकैकेन शरेण ह धनूंषि च शरांश्चान्यान्पातयामास भूतले १७ ततो विधनुषः ।
केचित्केचिदुद्यतकार्मुकान् केचिदुद्वहतो बाणान्रथशक्तिगदास्तथा १८ लाघवादा
कुलीकृत्य कर्णः प्रहरतां वरः हतसूतांश्च भूयिष्ठान्स विजिग्ये नराधिपान् १९ ते स्वयं वाह
यंतोस्मान्याहि याहीति वादिनः व्यपेयुस्ते रणं हित्वा राजानो भग्नमानसाः २० दुर्योधनस्तु
कर्णेन पाल्यमानोभ्ययात्तदा हृष्टः कन्यामुपादाय नगरं नागसाह्वयं २१ इति श्रीमहाभारते
शतसाहस्र्यां शांतिपर्वणि राजधर्मे दुर्योधनस्वयंवरः ४ नारद उ० आविष्कृतबलं कर्णं ज्ञा
त्वा राजा समागधः आह्वयद्द्वैरथेनाजौ जरासंधो महीपतिः १ तयोः समभवद्युद्धं दिव्यास्त्र
विदुषोर्द्वयोः युधि नानाप्रहरणैरन्योन्यमभिवर्षतो २ क्षीणबाणौ विधनुषौ भग्नखड्गौ महीं
गतौ बाहुभिः समसज्जेतामुभावपि बलान्वितौ ३ बाजकंटकयुद्धेन तस्य कर्णोथ युध्यतः वि

बाजकंटकमिति जरासंधस्य संधी यो देहस्तस्य संधिं विभेद ४ ॥

श्री० म० शा० टी० ८

विकारं पाटनरूपं ५ ६ ८ ९ रथस्यार्धानुकीर्तनात् शल्यात्तेजोवधादिति संबंधः १२ १३ १५ पंचमः ५ एतावदुक्त्वेति दध्यौ ध्या

स विकारं शरीरस्य दृष्ट्वा नृपतिरात्मनः प्रीतोस्मीत्यब्रवीत्कर्णं वैरमुत्सृज्य भारत ५ प्रीत्या ददौ स
कर्णाय मालिनीं नगरीमथ अंगेषु नरशार्दूल स राजासीत्सपत्नजित् ६ पालयामास चंपां च क
र्णः परबलार्दनः दुर्योधनस्यानुमते तवापि विदितं तथा ७ एवं शस्त्रप्रतापेन प्रथितः सोभवत् क्षि
तौ त्वद्धितार्थं सुरेंद्रेण भिक्षितो वर्मकुंडले ८ स दिव्ये सहजे प्रादात् कुंडले परमार्चिते सहजं क
वचं चापि मोहितो देवमायया ९ विमुक्तः कुंडलाभ्यां च सहजेन च वर्मणा निहतो विजयेनाजौ
वासुदेवस्य पश्यतः १० ब्राह्मणस्याभिशापेन रामस्य च महात्मनः कुंत्याश्च वरदानेन मायया
च शतक्रतोः ११ भीष्मावमानात्संख्यायां रथस्यार्धानुकीर्तनात् शल्यात्तेजोवधाच्चापि वासु
देवनयेन च १२ रुद्रस्य देवराजस्य यमस्य वरुणस्य च कुबेरद्रोणयोश्चैव कृपस्य च महात्मनः १३
अस्त्राणि दिव्यान्यादाय युद्धे गांडीवधन्वना हतो वैकर्तनः कर्णो दिवाकरसमद्युतिः १४ एवं श
प्तस्तव भ्राता बहुभिश्चापि वंचितः न शोच्यः स नरव्याघ्रो युद्धे हि निधनं गतः १५ इति शांतिपर्व
णि राजधर्मे कर्णवीर्यकथनं पंचमोऽध्यायः ५ वैशंपायन उ० एतावदुक्त्वा देवर्षिर्विरराम स नार
दः युधिष्ठिरस्तु राजर्षिर्दध्यौ शोकपरिप्लुतः १ ॥

त्वं वधजं दोषं चिंतितवान् १ ॥

पर्यश्रुनयनं परितोऽश्रुव्याप्तनयनं २ मधुराम्राभाषाभाषणं यस्याः सा तथा ३ पनं कार्णं ४ यतितः प्रवर्त्तितः तव तत्र भ्रं
भ्रातः कर्मकनिष्ठानां परिपालनं ज्ञापयितं त्वया सौभ्रात्रं युधिष्ठिरादिभ्यः प्रदर्शनीयमित्यभ्यर्थितत्र इति ५ ६ प्रत्यनुने

तं दीनमनसं शुभ्रं शोकोपहतमातरं निश्वसन्तं यथा नागं पर्यश्रुनयनं तथा २ कुन्ती शोकप
रीताङ्गी ङः खोपहतचेतना अब्रवीन्मधुराभाषा कालेवचनमर्थवत् ३ युधिष्ठिर महाबाहो नै
नं शोचितुमर्हसि जहि शोकं महाप्राज्ञ शृणु चेदं वचो मम ४ यतितः स मया पूर्वं भ्रात्र्यं ज्ञापयि
तं तव भास्करेण च देवेन पित्रा धर्मभृतां वर ५ यद्वाच्यं हितकामेन सुहृदा हितमिच्छता तथा
दिवाकरेणोक्तः स्वप्नान्ते मम चाग्रतः ६ न चैनमशकद्भानुरहं वा स्नेहकारणैः पुरा प्रत्यनुनेत
वा एकतां त्वया ७ ततः कालपरीतः स वैरस्योद्धरणे रतः प्रतीपकारी युष्माकमिति चोपेक्षि
तो मया ८ इत्युक्तो धर्मराजस्तु मात्रा बाष्पाकुलेक्षणः उवाच वाक्यं धर्मात्मा शोकव्याकुलचे
ततः ९ भवत्या गूढमन्त्रत्वात्पीडितोस्मीत्युवाच तां शशाप च महातेजाः सर्वलोकेषु योषितः
१० न गुह्यं धारयिष्यन्तीत्येवं दुःखसमन्वितः १० ॥

तं शमयितं ७ कालपरीतः मृत्युग्रस्तः उद्धरणे शत्रूणां निःशेषनाशेन उन्मूलने ८ ९ १० ॥

श्री॰
म॰ भा॰
टी॰
६
तथा

सराजेति कर्मणिषष्ठीउद्विग्नहृदयः उद्विग्नचेतनोबभूव ध्यायतीवलेलायतीवेतिश्रुतेः बुद्धोध्यायंत्यांचेतनोपिध्यायती
वेत्यादिवदर्थः १ निर्वेदंराज्यादौवैराग्यं १२ षष्ठः ६ युधिष्ठिरस्तु १ उः खेदेहेंद्रियादीनांतापः शोकस्तत्कृतंवैकल्यं ता
भ्यामाविष्टोव्याप्तःकर्शितःकृशीकृतः २ यत्तयदिमेत्वमाचीर्णंस्यात्तर्हिज्ञातिवधजाङर्गतिर्नप्राप्तास्यादित्यर्थः लिङ्नि

सराजापुत्रपौत्राणांसंबंधिसुहृदौ स्मरन्नुद्विग्नहृदयोबभूवोद्विग्नचेतनः १ ततःशोकपरीता
त्मासधूमइवपावकः निर्वेदमगमद्धीमान्राजासंतापपीडितः १२ इतिश्रीमहाभारतेराजधर्मे
षष्ठोऽध्यायः ६ वैशंपायनउ॰ युधिष्ठिरस्तुधर्मात्माशोकव्याकुलचेतनः शुशोचदुःख
संतप्तःस्मृत्वाकर्णंमहारथम् १ आविष्टोदुःखशोकाभ्यांनिःश्वसंश्चपुनःपुनः दृष्ट्वार्जुनमुवाचे
दंवचनंशोककर्शितः २ युधिष्ठिरउ॰ यद्भैक्षमाचरिष्यामोवृष्ण्यंधकपुरेवयं ज्ञातीन्निःपुरु
षान्कृत्वानेमांप्राप्स्यामदुर्गतिं ३ अमित्रानःसमृद्धार्थावृत्तार्थाःकुरवःकृताः आत्मानमात्मना
हत्वाकिंधर्मफलमाप्नुमः ४ ॥

मितेलङ्क्रियातिपत्तौ ३ यतोवयंह ... त्तार्थाःसंदिग्धपुरुषार्थाःज्ञातिवधेनहृता
भाग्याःस्मस्ततोनोऽस्माकं अमित्राःसमृद्धार्थाइत्यर्थः ज्ञातिवधोप्यस्माकंधर्मएवेत्याशंक्याहात्मानमिति धर्मफलंयशः १
स्वर्गोवाकिंप्राप्नुमःउभयमपिनास्तीत्यर्थः ४ ॥

सत्यपि शास्त्रदृष्टे फले वीभत्सत्वान्निंद्य एवायं धर्म इत्याह धिगिति बलं साहाय्यादि पौरुषं पराक्रमः अमर्षः क्रोधः येन
आचारादिना आपदं शोकं ५ तर्हि को धर्मः श्रेष्ठ इत्यत आह साधिति तमादिकमेव श्रेष्ठ इत्यर्थः ६ ७ ननु युद्धे जयश्चे-
द्राज्यलाभो मृतश्चेत्स्वर्गलाभ इत्युभयलोकहितं युद्धमित्याशंक्यायं निरस्यति त्रैलोक्यस्येति ८ ९ हीनार्थं त्वमे

साधुत्वमार्दवं शौचं समवैराग्यमत्सरः अहिंसा सत्यवचनं नित्यानि वनचारिणां ६ वयं तु लोभा-
न्मोहाच्च दंभं मानं च संश्रिताः इमामवस्थामापन्ना राज्यलाभबुभुत्सया ७ त्रैलोक्यस्यापि राज्येन
नास्मान्कश्चित्प्रहर्षयेत् बान्धवान्निहतान्दृष्ट्वा पृथिव्यां विजयैषिणः ८ ते वयं पृथिवीहेतोरवध्या-
न्पृथिवीसमान् संपरित्यज्य जीवामो हीनार्था हतबान्धवाः ९ आमिषे गृध्यमानानामशुभं वै
नः शुनामिव आमिषं चैव नो हीष्टमामिषस्य विवर्जनं १० न पृथिव्या सकलया न हिरण्यस्य रा-
शिभिः न गवाश्वेन सर्वेण ते त्याज्या य इमे हताः ११ काममन्युपरीतास्ते क्रोधहर्षसमन्विताः मृ-
त्युयानं समारुह्य गता वैवस्वतक्षयं १२ ॥

वाह आमिष इति आमिषे राज्यनिमित्ते अशुभं ज्ञातिद्रोहाच्छ्व शु-
नामिव इतरेषां भवति इष्टं च आमिषस्य विवर्जनं चेति द्वयमपीष्टं एतदेव विभजते १० न पृथिव्या इति पृथिव्यादेरामिषस्य वर्ज-
नमिष्टं वयं तु रूपेणामिषमिष्टमेव वयं तामर्थ्ये सर्वं त्याज्यमित्यर्थः ११ कामेति मृत्युयानं मृत्युमार्गं युद्धे मृतानां स्वर्गोपि नास्ति
किं तु कामाद्याक्रान्तत्वान्नरक एवास्तीत्यर्थः १२ ॥

म॰ शा॰ रा॰ टी॰ ९

एवंहत्वएणापापंहतानांनरकंचापपाद्य हतसंबंधिनांशोकंचसमुत्पादयति बहुकल्याणेत्यादिना १३ ब्रतानि गौरीब्रतादीनि
कौतुकानि डमरोत्सवादीनि मंगलानि लक्ष्मीनारायणशिलादीनि तैः १४ १५ १६ अनपहाय अपरित्यज्य अनवहायेति पाठे
अपरिशोध्य पितृभ्य इति षष्ठ्यर्थे चतुर्थ्यौ १७ यद्देषामिति अर्जुनेन सह वदन्नपि संनिहितां मातरं उत्तार्थं संवादाय संबोधयति
हे अंबेति पितरौ मातापितरौ गांधारीधृतराष्ट्रौ यद्देवजातकामौ तद्देव तेन्नृपाः दुर्योधनप्रभृतयो हताः १९ संयुक्ता इति का

बहुकल्याणसंयुक्तान्निर्घ्नंतिपितरः सुतान् तपसा ब्रह्मचर्येण सत्येन च तितिक्षया १३ उपवासैस्त
थेज्याभिर्व्रतकौतुकमंगलैः लभंते मातरो गर्भांस्तन्मासान्दश बिभ्रति १४ यदि स्वस्ति प्रजायंते
जाता जीवंति वा यदि संभाविता जातबलास्ते दद्युर्यदि नः सुखं १५ इह वामुत्र वै चेति कृपणाः फ
लहेतुकाः तासामयं समारंभो निर्वृत्तः केवलोफलः यदासां निहताः पुत्रा युवानो मृष्टकुंडलाः
अभुक्त्वा पार्थिवान्भोगानृणान्यनपहाय च १७ पितृभ्यो देवताभ्यश्च गता वैवस्वतक्षयं १८ यद्दे
षामंब पितरौ जातकामावुभावपि संजातबलरूपेषु तद्देव निहता नृपाः १९ संयुक्ताः काममा
न्युभ्यां क्रोधहर्षासमंजसः न ते जन्मफलं किंचि द्धि जन्म जात काब्धिवि[illegible] ॥ २० ॥

मोर्थस्याभिलाषः मन्युस्तदलाभे दैन्यं क्रोधः कामप्रतिबंधेषु
न्नमता हर्षो लाभे सत्युत्फुल्लतातैः असमंजसाः क्वचित्पाठेऽसमंजस इति कारांतः शब्दः विषमाः येषु कष्टास्ते जयफलं भूमेः स्व ९
र्गस्य वा जयेन यत्फलं तन्न भोक्तारो न मोदंते जातु कदाचित् जीवने मरणे वा कर्हिचित्कश्चिद्देश इह परत्र वा २० ॥

ननुयेहतास्तेस्वर्गभोक्तारस्तएवेत्याशंक्याहपंचालानामिति येहतास्तेहताएवनतुस्वर्गंगताः कामाद्युपेतत्वाद्युक्तेर्हेतोः एवं
नचेत् अयंहतास्तेनैवकर्मणानिमित्तेनस्वर्गंगतान्तान्पश्येत्नचपश्यतीतिलोकायतमतमाश्रित्योक्तं २१ तत्सर्वविनाशका
रणत्वंप्रतिपर्यवस्यति वयंराज्यलोभाद्विनाशेऽवांतरकारणंमुख्यकारणंतुअस्मद्राज्यापहारात्धार्तराष्ट्रएवेतिभावः २२
एतदेवाहसदैवेत्यादिना निकृतिर्वचनं तन्निष्ठैवप्रज्ञायस्येतिनिकृतिप्रज्ञः मायाकपटद्यूतादितदेवोपजीवनंयस्यसतथा मि

पंचालानांकुरूणांचहताएवहिमेहताः नचेत्सर्वाननयंलोकानपश्येतस्वकर्मणा २१ वयमे
वास्यलोकस्यविनाशेकारणंस्मृताः धृतराष्ट्रस्यपुत्रेणनिकृत्यावंचितावयं २२ सदैवनि
कृतिप्रज्ञोद्वेष्टामायोपजीवनः मिथ्यावृत्तश्चसततमस्मास्वनपकारिषु २३ नस्मकामावयं
तेचनचास्माभिर्नतैर्जितं नैतैर्भुक्तमयमवनिर्ननार्योगीतवादितं २४ नामात्यसुहृदांवाक्यं
नश्रुतवंताश्रुतं नरत्नानिपरार्ध्यानिनभूर्नद्रविणागमः २५ अस्मद्द्वेषेणसंतप्तःसुखंविनले
षुविवर्णोहरिणःकृशः २६ धृतराष्ट्रश्चनृपतिःसौबलेननिवेदितः तंपितापुत्रगृद्धित्वाद
नुमेनेनयंस्थितं २७ अनवेक्ष्यैवविदुरंगांगेयंचमहामतिं असंशयंराजायथैवाहंतथा

थ्याविनीतश्चधृतराष्ट्रएवात्रग्राह्यःसर्वमूलत्वात् २३ युध्यतांलोकद्वयनाशमुपयायोपसंहरत्यर्द्धेन गतः २८
नस्मकामाइति २४ श्रुतवंतःपंडितानां रत्नानीत्यादौभक्तानीत्यादिर्यथालिंगशेषः २५ तत्रहेतुरस्मदितिहरिणःपांडुरः
२६ २७ तथागतोबुद्धमुनिःक्षाणिकबुद्धिरितियावत् यथाहमनस्थितबुद्धिस्तथाधृतराष्ट्रोपीत्यर्थः २८ ॥

श्री॰
म॰ भा॰
टी॰
११

एतत्फलमाह अतियम्येति २९ प्रतिष्ठ्यगतइतिशेषः ३० युयुत्सुर्योद्धुकामः वाक्यं अस्मद्द्वेषात्पांडवानष्टइत्येवंरूपं ३१ नदेवा-
र्थितआह आत्मनइति दुर्योधनेषूपचारादात्मपदप्रयोगः आत्मनोदुर्योधनस्य ३२ अप्रहृष्टहृद्बंधनंगतःप्राप्तः नोऽस्माभिः ३३
अवध्यानां अवध्यकल्पानांभीष्मादीनांशस्त्राद्यावध्यानर्हाणां ३४ विषयःआमिषं ३५ नोऽस्माकंसर्वेषामन्युःक्रोधस्तान्

अतियम्याशुचित्तलब्धंपुत्रकामवशानुगं पतितोयशसोदीप्तान्घातयित्वामहोदरान् २९ अ-
मोहितैर्हिशोकाग्नेःप्रतिष्ठ्यमस्ययोयतनः अस्मत्प्रद्वेषसंतप्तःपापबुद्धिःसदैवहि ३० कोहिबंधुः
कुलीनःसंस्तथाब्रूयात्सुहृज्जने ३१ यथास्मावुक्तवान्वाक्यंयुयुत्सुःकृतसन्निधौ ३१ आत्म
नोहिवयंदोषाद्विनष्टाःशाश्वतीःसमाः प्रदहंतोदिशःसर्वाभास्करा इवतेजसा ३२ सोऽस्माकंवैर
पुरुषोदुर्मतिःप्रग्रहंगतः दुर्योधनकृतेह्येतत्कुलंनोविनिपातितं ३३ अवध्यानांवधंकृत्वालो
केप्राप्ताःस्मवाच्यतां कुलस्यास्यान्तकरणंदुर्मतिंपापकारिणं ३४ राजाराष्ट्रेश्वरंकृत्वाधृतरा-
ष्ट्रोद्यशोचति हताःशूराःकृतंपापंविषयःस्वोविनाशितः ३५ हत्वानोविगतोमन्युःशोकोमां
रुंधयत्यसौ धनंजयकृतंपापंकल्याणेनोपहन्यते ३६ त्याज्येनानुतापेनदानेनतपसापिवा
निवृत्त्यातीर्थगमनात्श्रुतिस्मृतिजपेनवा

हत्वाविगतः मांत्वेकःशोकोरुंधयति रुणद्धिरोधयतीतिवावक्त
व्येरुंधयतीतिप्रयोगोवक्तुर्वैक्लव्यंसूचयति कल्याणेनउपकारेण ३६ निवृत्त्यात्यागेन ३७ ॥ ११

एतेषु त्यागमेव प्रशंसति त्यागवानिति श्रुतिस्त्यागेनैके अमृतत्वमानशुरिति यदा यत आह ३८ तस्मात्प्राप्तवर्त्मा लब्ध
योगमार्गः कृतमतिः श्रवणमननादिनाहं ब्रह्मास्मीति निश्चितबुद्धिः ब्रह्म अविद्यानंदं संपद्यते ऐक्येन प्राप्नोति स इति पूर्वं
त्यागफलं ज्ञानमुक्तं निर्द्वन्द्वः परिग्रहशून्यः मुनिर्ध्याननिष्ठः ज्ञानेन ब्रह्मात्मैक्यविषयेण समन्वितो भवितुमिच्छुः ३९ स
मन्वितः सन्नेवाहं वनं गमिष्यामि कृत्स्नो धर्मः योगेनात्मदर्शनं यदाह याज्ञवल्क्यः इज्याचारदमाहिंसादानस्वाध्यायक

त्यागवांश्च पुनः पापं नालं कर्तुमिति श्रुतिः त्यागवाञ्जन्ममरणे नाप्नोतीति श्रुतिर्यदा ३८ प्रा
प्तवर्त्मा कृतमतिर्ब्रह्म संपद्यते तदा स यत्र न जयति निर्द्वन्द्वो मुनिर्ज्ञानसमन्वितः ३९ वनमाश्रम्य वः
सर्वान्गमिष्यामि परंतप न हि कृत्स्नतमो धर्मः शक्यः प्राप्तुमिति श्रुतिः ४० परिग्रहवता तन्मे
प्रत्यक्षमरिसूदन मया सृष्टं तु पापं हि परिग्रहमभीप्सता ४१ जन्मत्रयनिमित्तं च शावाकं प्राप्त
मिति श्रुतिः स परिग्रहमुत्सृज्य कृत्स्नं राज्यं तथैव च ४२ गमिष्यामि विनिर्मुक्तो विशोको विज्व
रस्तथा प्रशासितुमिमामुर्वीं देमानिहतकंटकां ४३ ॥

मेण अयं तु परमो धर्मो यद्योगेनात्मदर्शनमिति कृत्स्नतमो धर्मस्तु पार्थ इति किं जीवन्मुक्तिसुखं व ४० परिग्रहवताः गृहस्थेन प्राप्तं श
कं एतेन याज्ञवल्क्यादिवत्स्वस्यापि विद्वत्संन्यासेऽधिकारो दर्शितः ४१ परिग्रहस्यैव दोषमाह परिग्रहसंगात्पापकरणात्ततश्च
जन्मादिहेतोर्मोहस्य पुनः प्राप्तिरित्यर्थः अत्र श्रुतिः तस्यैव भयं विदुषोऽमन्वानस्य तदेव ब्रह्म भयहेतुर्विदुषोऽपि अमन्वानस्य ध्या
नशून्यस्येति श्रुत्यर्थः फलितमाह इतीति ४२ गमिष्यामि निर्विद्य तेन ध्यानसिद्ध्यर्थं क्वचिदिति ज्ञात्वा देशान्तं दर्शितं ४३ ॥

षष सप्तमः ७ अथार्जुनः दृष्टो युक्तिशास्त्रयुतो वाक्‌पराक्रमौ उक्तिविक्रमौ यस्य स तथा १ २ अमानुषमिति छेदः डुःखं विसृजनव
यात् द्विषद्‌परवीरजयात् वैक्लव्यं मोहं धर्मं लब्धस्य त्यागादित्यादि ३ शत्रूनिति शत्रून् घातयित्वा हनन्परान् हत्वाघविनाशाय शत्रून्।
घातयितव्यान् स्वीयान् हत्वा घातयित्वेति च द्वयोरेकेन वा केन न संग्रहः एतदेव स्पष्टयति ४ क्लीबस्य स्वीयवधे कातरस्य दीर्घसूत्रस्य प

न मम अर्थोऽस्ति राज्येन भोगैर्वा किं च सत्तम इत्येवमुक्त्वा वचनं धर्मराजो युधिष्ठिरः व्युपारमत
तं पार्थः कनीयानत्यभाषत ६६ इति महाभारते शान्तिपर्वणि राजधर्मे युधिष्ठिरपरिदेवने
सप्तमोऽध्यायः ७ वैशंपायन उ॰ अथार्जुन उवाचेदमधिक्षिप्त इवाक्षमी अभिनीततरं वाक्यं
दृढवादपराक्रमः १ दर्शयन्स्तदात्मानमुग्रपराक्रमः स्मयमानो महातेजाः सृक्किणी प
रिसंलिहन् २ अर्जुन उ॰ अहो दुःखमहो कृच्छ्रमहो वैक्लव्यमुत्तमं यत्कृत्वामानुषं कर्म
त्यजेथाः श्रियमुत्तमां ३ शत्रून्हत्वा महीं लब्ध्वा स्वधर्मेणोपपादितां एवंविधं कथं सर्वं त्य
जेथा बुद्धिलाघवात् ४ क्लीबस्य हि कुतो राज्यं दीर्घसूत्रस्य वा पुनः किमर्थं च महीपाला
नवधीः क्रोधमूर्छितः ५ ॥

वधेऽत्वमस्य एवं चेत् महीपालान् उभयपती
यान् उभयकिमर्थमवधीः अतो विक्लवोऽसीत्यर्थः ५ ॥

योऽह्नीति सार्धश्लोको वाक्यं हि प्रसिद्धं यः पुमान् हतस्वस्तिः नष्टकल्याणः अकिंचनो दरिद्रः अत एव क्रमात् सर्वलोकेषु न विख्यातः
पुत्रपशुसंहितः पुत्रादिभिराश्लिष्टश्च न भवति स भैक्ष्यं आजिजीविषेत् उपजीवितुमिच्छेत् स कर्मणा पौरुषेण कस्यचिदपि परस्य
समारभ्यंत इति समारंभा अर्थास्तान् नैव बुभूषेत नैव प्राप्तुमिच्छेत् त्वं तु प्राप्तकल्याणः संपन्नः ख्यातः पुत्राद्याश्लिष्टश्च पौरुषेणार्थान्
लब्ध्वा भैक्षेणाजीवितुमिच्छसीति विपर्यस्तबुद्धिरसीति भावः ६ कापालीं भिक्षापात्रवतामिमां वृत्तिं जीविकां राज्यं संत्यज्य जीव

योऽह्नाजिजीविषुर्भैक्ष्यं कर्मणा येन केनचित् समारंभान् बुभूषेत हतस्वस्तिरकिंचनः सर्व
लोकेषु विख्यातो न पुत्रपशुसंहितः ६ कापालीं नृप पापिष्ठां वृत्तिमासाद्य जीवतः संत्यज्य
राज्यमृद्धं ते लोकोऽयं किं वदिष्यति ७ सर्वारंभान् परित्यज्य हतस्वस्तिरकिंचनः कस्मादा
शंससे भैक्ष्यं कर्तुं प्राकृतवत् प्रभो ८ अस्मिन् राजकुले जातो जित्वा कृत्स्नां वसुंधरां धर्मा
र्थावखिलौ हित्वा वनं मौढ्यात् प्रतिष्ठसे ९ यदिमानि हवींषीह विमथिष्यन्त्यसाधवः भ
वता विप्रहीणानि प्राप्तं त्वामेव किल्बिषं १० आकिंचन्यमनाशास्यमिति वै नहुषोऽब्रवीत्

तस्ते इति संबंधः ७ सर्वारंभान् धर्मादीन् प्राकृतवत् मूढवत् ८ दृष्ट्वा नृशंसं ह्यधने धिगस्त्वधनतामिह ११ ॥
९ धर्महानिं व्युत्पादयति यदीति अस्माकं राज्येऽनधिकारात् अधिकारिणस्तवैव धर्मलोपजं किल्बिषं भवतीत्यर्थः १० अर्थस्तु धर्मादीनां च
तुर्णामपि मूलमिति सर्वथा सन्नत्याज्य इत्याह आकिंचन्यमित्यादिना आकिंचन्यं मुनीनां च राज्यादप्यधिकं मतमिति यत् वाक्यं तदुद्दिश्य नहु
षो राजा अधने नतामिह धिगस्त्विति अब्रवीत् अधनेऽधनाभावे निमित्ते सति अगस्त्यशापात्सर्पीभावदशायां नृशंसं निर्दयं भीमसेनादिमनुष्यग्रा

श्री॰ म॰ रा॰ टी॰ १३

एतदपि क्षत्रियाणामेवोचितं न राज्ञामित्याह अस्मत्तनमिति, वयमेवास्य लोकस्य विनाशे कारणं स्मृता इति यदुक्तं तत्राह यदिममित्यादि १२
वयं तत्रियाः कस्य भ्रातुः पितुर्वा उपरायं तमेम हि न कस्यापीत्यर्थः १३ तमायं दोषमाह अभिशस्तमिति शंसितं प्रशंसितं १४ १५ १६

अस्मत्तनमृषीणां हि विद्यते वेद तद्भवान् यदिमं धर्ममित्याहुर्धनादेष प्रवर्तते १२ धर्मं संहर
तेतस्य धनं हरति यस्य मः क्रियमाणो धनेराजन् वयं कस्य क्षमेमहि १३ अभिशस्तं प्रपश्यन्ति
दरिद्रं पार्श्वतस्थितं दारिद्र्यं पातकं लोके न तच्छंसितुमर्हति १४ पतितः शोच्यते राजन् निर्धनश्चा
पि शोच्यते विशेषं नाधिगच्छामि निर्धनस्यावरस्य च १५ अर्थेभ्यो हि विवृद्धेभ्यः संभृतेभ्यस्तत
स्ततः क्रियाः सर्वाः प्रवर्तन्ते पर्वतेभ्य इवापगाः १६ अर्थाद्धर्मश्च कामश्च स्वर्गश्चैव नराधिप
प्राणयात्रापि लोकस्य विनार्थं न प्रसिध्यति १७ अर्थेनेह विहीनस्य पुरुषस्याल्पमेधसः वि
छिद्यन्ते क्रियाः सर्वाः ग्रीष्मे कुसरितो यथा १८ यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः १९ अधनेनार्थकामेन नार्थः शक्यो विधित्सि
ता अर्थैरर्था निबध्यन्ते गजैरिव महागजाः २० ॥

प्राप्नोति सुहृत्त्वं प्राणयात्राप्यर्थाधीनेति मोक्षोप्यर्थादेव भवतीत्याशयः १७ १८ १९ २० ॥ १३

२१ २४ कृशाश्वः दीणाश्च २४ यत्त्वत्तं ज्ञातीनां परस्परयुद्धे हतानां हननाच्च श्रेयो नास्तीति तत्त्विशिष्टाचारप्रदर्शनेन दूषयति एवेत्य स्वत्यादिना २५ एवेत्य स्वत्यादिना २५ अन्यस्य परस्य धनं चेन्न हर्त्तव्यं तत्तर्हि राजा कथं धर्ममाचरेत् तस्य हर्तव्यत्तराभावान्न कथंचिदि

धर्मः कामश्च हर्षश्च धृतिः क्रोधः श्रुतं मदः अर्थादेतानि सर्वाणि प्रवर्त्तन्ते नराधिप २१ धनात्कु
लं प्रभवति धनाद्धर्मः प्रवर्द्धते नाधनस्यास्त्ययं लोको न परः पुरुषोत्तम २२ नाधनो धर्मकृत्यानि
यथावदनुतिष्ठति धनाद्धर्मः प्रभवति शैलादभि नदी यथा २३ यः कृशाश्वः कृशगवः कृशभृ
त्यः कृशातिथिः स वै राजन्कृशो नाम न शरीरकृशः कृशः २४ एवेत्य स्वयथान्यायं पश्य देवासु
रं यथा राजन्किमन्यत्ज्ञातीनां वधाद्दृध्यन्ति देवताः २५ न चेद्धर्तव्यमन्यस्य कथं तद्धर्ममारभेत्
एतावानेव वेदेषु निश्चयः कविभिः कृतः २६ अध्येतव्या त्रयी नित्यं भवितव्यं विपश्चिता सर्वथा
धनमाहार्यं यष्टव्यं चापि यत्नतः २७ द्रोहाद्देवैरवाप्तानि दिवि स्थानानि सर्वशः द्रोहात्किमन्य
त्ज्ञातीनां गृध्यन्ते येन देवताः २८ इति देवा व्यवसिता वेदवादाश्च शाश्वताः अधीयते ध्यापयन्ते
याजयन्ति च २९ कृत्स्नं तद्देवतं श्रेयो यद्यादद्तेन्यतः न पश्यामोनपकृतं धनं किंचित्क्वचिद्वयं

त्यर्थः २६ आहार्यं स्वधर्मेणार्जनीयं तस्य च प्रयोजनं यष्टव्यं इत्युक्तं २७ २८ ननु परद्रव्यापहारे दोषोस्तीत्याशंक्याह कृत्स्नमिति यदेव धनं राजा
नः परस्मादाददते तदेवतेषां श्रेयः श्रेयस्करं अन्यथाः न पक्कतं अपकारवर्जितं धनं राज्ञां नास्त्येवेत्यर्थः यज्ञार्थं पशुबीजादिवत् यादिव परद्रव्यापहा

महाभारतशांतिपर्वणिमोक्षः

३१ निरुच्यतेउत्कृष्टत्वेनकीर्त्यते स्यंदेतिप्रस्रवंति ३२ ३४ किंचपरवित्तापहारोऽस्यपरोहरणार्थएवेत्याह येषामिति येषांमाण्डलिकानांप्रा
जादीनांचद्रव्यापहर्तारोराजायजतेतेसर्वेतद्वश्यत्वेप्सुताभवंतीत्यर्थः ३५ विश्वरूपइति ब्रह्मणोब्राह्मणमालभइत्यादिनाभूतानांस्वदेहस्यच।

एवमेवहिराजानोजयंतिपृथिवीमिमां जित्वाममेयंब्रुवतेपुत्राइवपितुर्धनं ३१ राजर्षयोपिते
स्वर्ग्यायधर्मोह्येषांनिरुच्यते यस्यैवपूर्णादुदधेःस्यंदंत्यापोदिशोदश ३२ एवंराजकुलाद्वित्तंपृ
थिवींप्रतितिष्ठति आसीदियंदिलीपस्यनृगस्यनहुषस्यच अंबरीषस्यमांधातुःपृथिवीसा
त्वयिस्थिता सत्वांद्रव्यमयोयज्ञःसंप्राप्तःसर्वदक्षिणः ३४ तंचेन्नयजसेराजन्प्राप्तस्त्वंराज्य
किल्बिषं येषांराजाश्वमेधेनयजतेदक्षिणावता उपेत्यतस्यावभृथंपूताःसर्वेभवंतिते ३५ वि
श्वरूपोमहादेवःसर्वमेधेमहामखे जुहावसर्वभूतानितथैवात्मानमात्मना ३६ शाश्वतोयंभूति
पथोनास्यांतमनुशुश्रुम महान्दाशरथःपंथामाराजन्कुपथंगमः ३७ इतिश्रीमहाभारतेशां
तिपर्वणिराजधर्मेअर्जुनवाक्येअष्टमोध्यायः ८ ॥

होमःयज्ञार्थंक्रियतेतत्रक्रियान्द्रव्यापहारइतिभावः ३६ एवमनादिरनंतश्चायंयज्ञियःपंथाइत्याहशाश्वतइति दाशरथःएकःपशुःद्वौपत्नीयज ५
मानौत्रयोवेदाःचत्वारऋत्विजइतिदशरथाश्चप्रवर्तंतियत्रयस्मिन्सदशरथः सएवदाशरथः ३७ अष्टमः ८ ॥

मुहूर्तं त्वमपि मदुक्तं निवृत्तिमार्गमपि श्रुत्वा मुहूर्तं अंतरात्मनि हृदयपुंडरीके मनः श्रोत्रे बाह्याभ्यंतःकरणे धारयन् स्थिरीकुर्वन् तावदादौ
एकाग्रो भवेति शेषः यस्मात् मम वचनं त्वं अरोचेत त्वद्रुचये भवेत् अंतर्मुखस्यैव निवृत्तिमार्गो मिष्टो न बहिर्मुखस्येति भावः श्रोत्रं त्विति संधि

युधिष्ठिर उ॰ मुहूर्तं तावदेकाग्रो मनः श्रोत्रेऽन्तरात्मनि धारयस्त्वपि तच्छ्रुत्वा रोचेत वचनं मम १ साधुग
म्यमहं मार्गं न जातु त्वत्कृते पुनः गच्छेयं तं गमिष्यामि हित्वा ग्राम्यसुखान्युत २ क्षेम्यश्चैकाकिना ग
म्यः पन्थाः कोऽस्तीति पृच्छ मां अथवा नेच्छसि प्रष्टुमपृच्छन्नपि मे शृणु ३ हित्वा ग्राम्यसुखाचारं त
प्यमानो महत्तपः अरण्ये फलमूलाशी चरिष्यामि मृगैः सह ४ जुह्वानोऽग्निं यथाकालमुभौ काला
वुपस्पृशन् कृशः परिमिताहारश्चर्मचीरजटाधरः ५ शीतवातातपसहः क्षुत्पिपासाश्रमक्षमः
तपसा विधिदृष्टेन शरीरमुपशोषयन् ६ मनःकर्णसुखा नित्यं शृण्वन्नुच्चावचा गिरः मुदितानामर
ण्येषु वसतां मृगपक्षिणां ७ आजिघ्रन्पेशलान् गंधान् फुल्लानां वृक्षवीरुधां नानारूपान्वने पश्य
न्रमणीयान्वनौकसः ८ वानप्रस्थजनस्यापि दर्शनं कुलवासिनां नाप्रियाण्याचरिष्यामि किं पु
नर्ग्रामवासिनां ९ एकांतशीली विमृशन् पक्वापक्वेन वर्तनं पितॄन्देवांश्च वन्येन वाग्भिरद्भिश्च तर्प
यन् १० एवमारण्यशास्त्राणामुग्रमुग्रतरं विधिं सेवमानः प्रतीक्षिष्ये देहस्यास्य समापनं ११

गार्थः १ साध्विति उत अपि चाहं ग्राम्यसुखं विहित्वा साधुगम्यं मार्गं गच्छेयं न पुनस्त्वत्कृते जातु तत्र राज्यं गमिष्यामि स्वीकरिष्यामि २ राज्यमेव सा
धुगम्यो मार्ग इति चेत्तत्राह क्षेम्य इति ३ तत्र तावद्वनस्थधर्माननुष्ठास्य इत्याह हित्वेत्यादिना ४ ५ ७ पेशलान् रम्यान् ८ ९ १० ११ ॥

यतेर्धर्माननुष्ठानं प्रतिजानीते अथवेति १२ १४ आत्मारामः योगेनात्मन्येव रममाणः प्रसन्नात्मा शुद्धसत्त्वः केनचिन्निमित्तेन संविदं संवादं न कुर्वा
णः कृत्याभावात् १५ चतुर्विधान् जङ्गमस्य जरायुजाण्डजस्वेदजभेदेन त्रैविध्यात् स्वयथर्मस्थाः प्राणभृतः इन्द्रियपोषकाश्च प्रजाः प्रति समः

अथवैकोऽस्मिन्नेकस्मिन्वनस्थितो चरन्नेवं मुनिर्मुक्तः त्यक्ताधिष्ठानकलेवरं १२ ग्रामेभिः समभिक्षन्नः शू
न्यागारप्रतिश्रयः वृक्षमूलनिकेतो वा त्यक्तसर्वप्रियाप्रियः १३ न शोचन्न प्रहृष्यंश्च तल्पनिद्रात्मा
संस्तुतिः निराशीर्निर्ममो भूत्वा निर्द्वन्द्वो निःपरिग्रहः १४ आत्मारामः प्रसन्नात्मा जडान्धबधिराकृ
तिः अकुर्वाणः परैः कांचित्संविदं जातु कैरपि १५ जङ्गमाजङ्गमान्सर्वान्नहिंसंश्चतुर्विधान् प्रजाः
सर्वाश्चयथर्मस्थाः समः प्राणभृतः प्रति १६ न चाप्यवद्यसन्कंचितन्न कुर्वन्भ्रुकुटीं क्वचित् प्रस
न्नवक्त्रो नित्यं सर्वेन्द्रियसुसंयतः १७ अपृच्छन्कस्यचिन्मार्गं प्रव्रजन्नेव केनचित् न देशं न दिशं
कांचिद्गन्तुमिच्छन्विशेषतः १८ गमने निरपेक्षश्च पश्चादनवलोकयन् ऋजुः प्राणिहितो गा
च्छन्नु त्रसस्थावरवर्जकः १९ ॥

त्यन्वयः १६ १७ केनचिन्मार्गेण १८ एवं यत्याश्रमधर्मानुक्त्वा ऽन्त्याश्रमधर्ममाह ऋज्विति कामक्रोधादिशून्यः प्राणिहितां तन्मोक्षवे
त्रस्यतीति त्रसं भयादिधर्मकं लिङ्गशरीरं मरणकाले ऽत्रैव तिष्ठतीति स्थावरं स्थूलशरीरं तयोर्वर्जकः स्थूलसूक्ष्मशरीराभिमान। १५
शून्य इत्यर्थः १९ ॥

एवंरूपस्य कथं देहयात्रानिर्वाहः स्यादित्याशंक्याह स्वभाव इति स्वभावः देहादीनां पूर्वसंस्कारः कटवेष्टनवत्प्रारब्धकर्मोपस्थापितदेहनिर्वाहार्थं अग्रे व्रजति पुरस्कृतो भवति ननु एवं स्वसुप्तावपि यात्रा स्यादित्याशंक्याह प्रभवं तु अशनान्यपीति यथा प्रसुप्तः शिशुः स्तनं पिबति संस्कारवशात् एवं देहद्वयाभिमानहीनोऽहमपि भोजनादिकं करिष्यामीत्यर्थः हृष्टादिशुद्ध्या निविष्टहान्यपमानाल्पभोज्यादीनि तान्यचिंतयन् १९ पूर्वाला

स्वभावस्तु व्रयात्यग्रे प्रभवं त्वशनान्यपि हृष्टानि च विकृष्टानि तानि सर्वाण्यचिंतयन् १९ अल्पं वा स्वा
दु भोज्यं वा पूर्वालाभेन जातचित् अन्वेषयिचरन् लाभमलाभे समप्रवर्तयन् २० विधूमे न्यस्तमुशले
व्यंगारे भुक्तवज्जने अतीतपात्रसंचारे काले विगतभिक्षुके २२ एककालं चरन् भैक्षं त्रीन् अथ द्वे च पंच
वा स्पृहापाशं विमुच्याहं चरिष्यामि महीमिमां २३ अलाभे सति वा लाभे समदर्शी महातपाः न जि
जीविषुवत्किंचिन्न मुमूर्षुवदाचरन् २४ जीवितं मरणं चैव नाभिनंदन्न च द्विषन् वास्येकं तक्षतो बा
हुं चंदनेनैकमुक्षतः नाकल्याणं न कल्याणं चिंतयन्नुभयोस्तयोः २५ याः काश्चिज्जीवता शक्याः
कर्तुमभ्युदयक्रियाः सर्वास्ताः समभित्यज्य निमेषादिव्यवस्थितः २६

भेन पूर्वस्मिन् गृहे ऽलाभेन हेतुना जातचि
तः अन्वेषयि गृहेषु लाभं लब्धव्यमन्नं चरन् समेतयन् २१ भैक्ष्यकालमाह विधूमे इति शेषः २२ त्रीन् गृहान् २३ जिजीविषुवत् यत्नादिसंग्रहे
मुमूर्षुवत् अन्नादित्यागं २४ वासीन तक्षतो युंजतया २५ या इति निमेषोन्मेषाशनपानादि शरीरनिर्वाहमात्रकर्मण्यवस्थित इत्यर्थः २६ ॥

तेष्वपि कर्मसु असक्तः अपरित्यक्तः नित्यं वशीकृतः संकल्पो मनः क्रिया येन दृढमना इत्यर्थः नास्तिपरित्यक्तः संकल्पो यस्मादन्य इति
वा हुतनिर्णिक्तात्मकल्मषः सम्यक् दूरीकृतधीमलः २७ वागुराः स्नेहपाशान् २८ चिकीर्षितमाह वीतरागा इति २९ एके मूढाः का
र्यकारणसंश्लिष्टं स्वस्वत्वेन निमित्तभूतेन संलग्नं स्त्र्यादिकं बिभ्रति आत्मोपकाकारत्वेन पुष्णंति तथा च श्रुतिः न वा अरे पत्युः कामाय

तेषु नित्यमसक्तश्च त्यक्तसर्वेंद्रियक्रियः अपरित्यक्तसंकल्पः हुतनिर्मुक्तात्मकल्मषः २७ विमु-
क्तः सर्वसंगेभ्यो व्यतीतः सर्ववागुराः न वशो कस्यचित्तिष्ठन्मथमीमांतरिक्षतः २८ वीतरागाश्च ये त्वे-
वं त्वहिं प्राप्स्यामि शाश्वतीं इत्यलयाद्दिमहत्पापमज्ञानादस्मि कारितः २९ कुशलाकुशलान्येके
कृत्वा कर्माणि मानवाः कार्यकारणसंश्लिष्टं स्वजनं नाम बिभ्रति ३० आयुर्यांते प्रदायेदं क्षीणप्राणे
कलेवरं प्रतिगृह्णाति तत्पापं कर्तुः कर्मफलं हि तत् ३१ एवं संसारचक्रेऽस्मिन् व्याविद्धे रथचक्रवत् समे
ति भूतग्रामोऽयं भूतग्रामेण कार्यवान् ३२ जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतं अपारमिव चास्वस्थं
संसारं त्यजतः सुखं ३३ ॥

पतिः प्रियो भवत्यात्मनस्तु कामाय पतिः प्रियो भवति इति ३० अनात्मीयेष्वात्मीयत्वबुद्ध्या तत्पोषणार्थं कृतं कर्म मरणांते पि न मुंचतीत्याह १६
आयुरिति ३१ व्याविद्धे भ्राम्यमाणे समेति संयोगमेति ३२ अस्वस्थं आत्मनि अश्रयासंविना रज्ज्वां भुजंगवदविद्यमाने ३३ ॥

पेहिकार्थानांत्यागोह्यवश्यत्याः शुष्मिकाणामपित्यागोनदस्तीत्याह दिवइति भवेनस्वर्गैश्वर्याणांकारणामविद्यात्तस्मात्तदुःखमयत्वंत
द्वित् ३४ ज्ञात्वाहीतिविविधंसामाद्युपायवत् विविधलक्षणांनानाविधंकपटादिरूपंकर्मज्ञात्वास्वल्पैः पार्थिवैः क्षुद्रराजभिर्नृपतिर्मा
हाराजोबध्यतेकारणैः स्वायमानादिभिर्हेतुभिः बहवोमिलित्वापकंमहान्तंघ्नंतीत्यर्थः ३५ यस्माद्दुःखमयंतत्पिल्लचैपश्वर्यंतस्मात्

दिवः पतत्सुदेवेषुस्थानेभ्यश्चमहर्षिषु कोहिनामभवेनार्थीभवेत्कारणतत्त्ववित् ३४ ज्ञात्वा
हिविविधंकर्मतत्तद्धिविधलक्षणं पार्थिवैर्नृपतिःस्वल्पैःकारणैरेवबध्यते ३५ तस्मात्प्रज्ञामृत
मिदंचिरान्मांप्रत्युपस्थितं तत्प्राप्यप्रार्थयेस्थानमव्ययंशाश्वतंध्रुवं ३६ एतयासततंवृत्त्याचरन्न
वंप्रकारया जन्ममृत्युजराव्याधिवेदनाभिरर्दितं देहंसंस्थापयिष्यामिनिर्भयंमार्गमाश्रि
तः ३७ इतिशांतिपर्वणिराजधर्मेषुयुधिष्ठिरवाक्यंनवमोध्यायः ९ भीमसेनउ॰ श्रोत्रियस्येवतेरा
जन्मंदकस्याविपश्चितः अनुवाकहताबुद्धिर्नैषातत्त्वार्थदर्शिनी १ आलस्येकृतचित्तस्यराज
धर्मानसूयतः विनाशेधार्तराष्ट्राणांकिंफलंभरतर्षभ २

स्थानंमोक्षं अव्ययंअपचयशून्यं शाश्वतंअनादि
ध्रुवंसदैकरूपं ३६ संस्थापयिष्यामिसमापयिष्यामि ३७ नवमोध्यायः ९ श्रोत्रियस्यवेदपाठकस्यमंदत्वाद्देवाविपश्चितः अर्थज्ञानशून्यस्य
अनुवाकेननित्यपाठेनहतानष्टा १ आलस्यएवनतुपरमार्थेकृतचित्तस्यतव २ ॥

त्वदंतरेत्वत्तोन्यत्र ३ ४ ५ प्राणस्यप्राणवतोबलिष्ठस्यइदंसर्वंअन्नमिवान्नभोग्यं वीरभोग्यावसुंधरेतिस्मृतेः अतएवतस्यैवभोजा
नंभुज्यतेपाल्यतइतिव्युत्पत्यापालनीयमिदं यद्यप्येतत्प्राणोपासनाप्रकरणेऽक्तंतथापिसर्वस्यात्मार्थत्वमित्यंशेनसाम्याडदा

त्वमानुकंपाकारुण्यमानृशंस्यंनविद्यते त्वात्रमाचरतोमार्गमपिवंयोत्वदंतरे ३ यदीमांभवा
तोबुद्धिंविद्यामवयमीदृशीं शस्त्रंनैवग्रहीष्यामोनवधिष्यामकंचन ४ भैक्ष्यमेवाचरिष्यामशरीर
स्याविमोक्षणात् नचेदंदारुणंयुद्धमभविष्यन्महीक्षितां ५ प्राणस्यान्नमिदंसर्वमितिवैकवयो
विदुः स्थावरंजंगमंचैवसर्वंप्राणस्यभोजनं ६ आददानस्यचेद्राज्यंयेकेचित्परिपंथिनः हंतव्या
स्तइतिप्राज्ञाःक्षत्रधर्मविदोविदुः ७ तेसदोषाहतास्माभीराज्यस्यपरिपंथिनः तान्हत्वाभुंक्ष्वधर्मे
णयुधिष्ठिरमहीमिमां ८ यथाहिपुरुषःखात्वाकूपमप्राप्यचोदकं पंकदिग्धोनिवर्तेतकर्मेदं
नस्तथोपमं ९ यथारुह्यमहावृक्षमपहृत्यततोमधु अप्राप्यनिधनंगच्छेत्कर्मेदंनस्तथोप
मं १० यथामहांतमध्वानमाशयापुरुषोव्रजन् सनिराशोनिवर्तेतकर्मैतन्नस्तथोपमं ११ ॥

हृतं ६ ७ हतास्माभिरितिसंधिरार्षः तान्धर्मेणाहत्वानिघ्नन्त्वंराज्यंभुंक्ष्व हंतेरन्येभ्योपिदृश्यतइतिक्वनिप् अनुनासिकलो
पः कृत्वस्येतितुक् ८ तेनप्रकारेणउपमीयतइतितथोपमं ९ पतनरूपंक्षत् १० ११ ॥ ७

१२ १४ अशक्तयः शक्तिहीनाः १५ अगतीकगतीननाथरक्षकान् देर्ध्यधार्थ ईदृशानपिनष्टार्थानदृष्ट्वाजनाइतरेपिअर्थसिद्ध
येकथंनानुपश्येयुरपितुआलोचयेयुरेव पततयादृशंममवचनंतादृशंपश्यतयुक्तंवेतिपरीक्षतेत्यर्थः समर्थैःस्वार्थसिद्धर्थयति
तव्यमेवेतिभावः ननुसंन्यासएवनःश्रेयानित्युक्ततत्राहआपदिति वृंसितेनदुर्गतिंप्रापितेन १७ इहलत्रयोनोत्यागंचलभेदंश्रुति

यथाशत्रूनघातयित्वापुरुषःकुरुनंदन आत्मानंघातयेत्पश्चात्कर्मेदंनस्तथाविधं १२ यथानंत
यितोलब्ध्वानभुंजीयाधहृच्छया कामीचकामिनींलब्ध्वाकर्मेदंनस्तथोपमं १३ वयमेवात्रगर्ह्याहि
यद्वयंमंदचेतसः त्वांराजननुगच्छामोज्येष्ठोयमितिभारत १४ वयंहिबाहुबलिनःकृतविद्यामनस्
स्विनः क्लीबस्यवाकेतिष्ठामोयथैवाशक्तयस्तथा १५ अगतीकगतीनस्मान्नष्टार्थानर्थसिद्धये
कथंवैनानुपश्येयुर्जनाःपश्यतयादृशं १६ अपत्कालेहिसंन्यासःकर्तव्यइतिशिष्यते जरयाभिप
रीतेनशत्रुभिर्व्यंसितेनवा १७ तस्मादिहकृतप्रज्ञास्त्यागंनपरिचक्षते धर्मव्यतिक्रमंचैवमन्यंते =
सूक्ष्मदर्शिनः १८ कथंतस्मात्समुत्पन्नास्तन्निष्ठास्तदुपाश्रयाः तदेवनिंदांभाषेयुर्धातातत्रनगर्ह्यते २/

र्मेउ इत्युक्तविधंसंन्यासंनपरिचक्षतेनपरिचक्षतेनप्रशंसंति तत्रहेतुःधर्मेति शुक्लजानामयंधर्मेवैषलवलिंगधारणं बाह्यजातोस्मा =
जातानांधर्मोविधीयतइतिस्मृतेः क्षत्रियस्यमौंज्यादिकंनिषिद्धंतस्याचरणंधर्मव्यतिक्रमोस्त्येवेतिभावः १८ ननुहिंसोयंक्षत्रधर्मोनिंद्य २/
एवेत्याशंक्याह कथमिति हिंसार्थमुत्पन्नाक्षत्रयोनौजाताःहिंसैकजीवनास्तदेवतसेवहिंस्यधर्मस्यनिंदांकथंभाषेयुः कथंवाक्षत्रधा
तानस्यधर्मस्यस्वधानंनिंद्यते याह्यविहितत्वात्सहजत्वाच्चनासौधर्मोनिंद्यइत्यर्थः यदाहभगवान्सहदोषमपिकौंतेयसहजंकर्मनत्यजेदि ८

श्री॰ म॰ रा॰ टी॰ १८

कथं तर्हि जाबालोपनिषदि अथ परिव्राड् मुण्डो विवर्णवासा इत्युपक्रम्य भरत रैवतक प्रभृतयोऽनुन्मत्ता उन्मत्तवदाचरंत इति भरतादीनां त
त्रियाणां मौंड्यमुन्मत्तचर्या च श्रूयते इत्याशंक्याह क्रियेति ऋचः सामानि यजूंषि सा हि श्रीरमृता सतामिति श्रुतेः क्रिया त्रय्याविद्यया
त्रय्याविद्यया हीनैः अर्थैर्नैर्लक्ष्म्या च हीनैः इदमन्यत्प्रवर्तितं वेदयतीति वेदो विधिस्तस्य वादोऽर्थवादस्तात्पर्येण विधिविज्ञानं संन्यासविधि
स्तत्पर्यं भरतादिकीर्तनं प्रजापतिवयोत्वननवदर्थवादो न तु तावता मौंड्ये त्रियस्याधिकारः सिद्ध्यतीति भावः २० यत्तु क्षत्रः प्राणिहितो

क्रियाविहीनैरथैर्नास्तिकैः संप्रकीर्तितं वेदवादस्य विज्ञानं सत्याभासमिवानृतं २० शक्यं तु मौंड्यमा
स्थाय बिभ्रतात्मानमात्मना धर्मच्छद्म समास्थाय च्यवितुं न तु जीवितुं २१ शक्यं पुनररण्येषु सुखमे
केन जीवितुं अबिभ्रता पुत्रपौत्रान्देवर्षीनतिथीन्पितॄन् २२ नेमे मृगाः स्वर्गजिता न वराहा न पक्षि
णः तथान्येन प्रकारेण पुण्यमाहुर्नतेजनाः २३ यदि संन्यासतः सिद्धिं राजन्कश्चिदवाप्नुयात्
पर्वताश्च द्रुमाश्चैव क्षिप्रं सिद्धिमवाप्नुयुः २४ ॥

गच्छन्ति यात्राश्रमं तु कार्त्स्न्येन दूषयति श क्यं त्विति आत्मानं देहं आत्मना स्वेने
व बिभ्रता निश्चलं स्थापयता धर्मच्छद्मकपटयोगमास्थाय च्यवितुं मर्तुमेव शक्यं न जीवितुं केवलप्राणिधानेन शरीरनाशो भवेदित्यर्थः
२१ यत्तु स्वभावस्तत्र जात्यग्र इति स्तनबालस्तनपानवद्देहयात्रासिद्धिरुक्ता तां दूषयति द्वाभ्यां शक्यं पुनरिति पुत्राद्यभरणेन पशुसाम्येन
च तत्रापि दोषोऽस्तीत्यर्थः अथेत्यतः शास्त्रार्थं तं पकाचर्यं अन्येन प्रकारेण एकचर्याविनानपुण्यं श्रेयो मंत्राजः सा च स्वर्गो नास्तीति तेन तयो ८
र्विशेष इति भावः २२ २३ संन्यासयुक्तमेकाकित्वमपि तिरस्यति द्वाभ्यां यदीति २४ ॥

२५ ननुपश्वादयः कर्मयोनयोनभवंतिकिंतुपूर्वकृतमेवतेभुंजते अहंतुकर्मार्थिकृतः स्वयत्नेनभ्रुवंपदंप्राप्स्यामीतिचेत्तत्राह अथचेति आत्मभाग्येषुस्वसंपत्सुअन्येषांसिद्धेःपरकर्मार्जितंफलंनाश्नुतेकिंतुस्वकर्मार्जितमेवाश्नुतेतर्हिकर्मैवकुर्वित्यर्थः सिद्धिर्मोक्षः २६ ननुमनुष्याणांदेहभरणाव्यतिरिक्तंकर्मनापेक्षितमित्यतआहऔदकाइति उदकेभवाः मीनादयः सृष्टयः

पतेहिनित्यसंन्यासाद्दश्यंतेनिरुपद्रवाः अपरिग्रहवंतश्वसततंब्रह्मचारिणः २५ अथचेदात्म भाग्येषुनान्येषांसिद्धिमश्नुते तस्मात्कर्मैवकर्तव्यंनास्तिसिद्धिरकर्मणः २६ औदकाः सृष्टय श्चैवजंतवः सिद्धिमाप्नुयुः येषामात्मैवभर्तव्योनान्यः कश्चनविद्यते २७ अवेक्षस्वयथास्वैःस्वैःक र्मभिर्व्यापृतंजगत् तस्मात्कर्मैवकर्तव्यंनास्तिसिद्धिरकर्मणः २८ इतिश्रीमहाभारतेशांतिपर्व

अर्जुन॰ णिराजधर्मेभीमवाक्यंदशमोध्यायः १० अत्रैवोदाहरंतीममितिहासंपुरातनं तापसैः सहसंवादं ॥ शक्रस्यभरतर्षभ १ केचिद्गृहान्परित्यज्यवनमभ्यागमन्द्विजाः अजातश्मश्रवोमंदाः कुलेजाताः ३ प्रवव्रजुः २ धर्मोयमितिमन्वानाः समृद्धाब्रह्मचारिणः त्यक्त्वाभ्रातृन्पितृंश्चैववनानिंद्रोन्वकृपायत ८

स्थावरास्तेषामपिदेहआत्मैवदेहएवभर्तव्योनान्यइतितेपिमुच्येरन् २७ लोकदृष्ट्यापिकर्मैवकर्तव्यमित्याह अवेक्षस्वेति २८ दशमोऽध्यायः १० एवंसंन्यासःश्रेयानितिधर्मस्यपक्षः गार्हस्थ्यंश्रेयइतिभीमस्यपक्षः तत्राद्यस्यश्रेष्ठमत्वाऽनधिकारिकृतंसं न्यासापेक्षयागार्हस्थ्यमेवश्रेयइत्याख्यायिकामुखेनसमर्थयन्नर्जुनउवाच अत्रैवेत्यादिना १ प्रवव्रजुः पुनर्गृहंप्रतिनगंतव्यमिति

प्रकर्षेणगताइत्यर्थः २ ३ ॥

श्री॰
म॰भा॰
टी॰
९

विघसाशिभिः महायज्ञावशिष्टभोजिभिः ४ ५ शास्ति ज्ञापयति विघसतोघसो ऽन्नायस्यतदन्नं विघसं शीर्णत्वात्पर्णफलादिकं
तदद्नशीलास्तु वयमेवातो विघसाशिनः श्रेयांसः स्मइतिमतिरेवेत्यर्थः ६ पंकदिग्धान्रजस्वलान्नित्यागोतकस्वाभाविक
दोषयुक्तत्वमुक्तंक्रमेण ७ उच्छिष्टभोजिनइतिप्रायेणशीर्णत्वात्पर्णफलानिमृगकीटपदस्पृष्टान्युच्छिष्टानिभवंतितद्भोजिनो

तानाबभाषेभगवान्पक्षीभूत्वाहिरण्मयः सुदुष्करंमनुष्यैश्चयत्कृतंविघसाशिभिः ४ पुण्यं
भवतिकर्मैतत्प्रशस्तंचैवजीवितं सिद्धार्थास्तेगतिंमुख्यांप्राप्ताधर्मपरायणाः ५ ऋषयऊचुः
अहोवतायंशकुनिर्विघसाशान्प्रशंसति अस्मान्नूनमयंशास्तिवयंचविघसाशिनः ६
शकुनिरुवाच नाहंयुष्मान्प्रशंसामिपंकदिग्धान्रजस्वलान् उच्छिष्टभोजिनोमंदान्नैवोविघ
साशिनः ७ ऋषयऊचुः इदंश्रेयःपरमितिवयमेवाभ्युपास्महे शकुनेब्रूहियच्छ्रेयोभृशंतेश्रद्द
ध्महे ८ शकुनिरुवाच यदिमांनाभिशंकध्वंविभज्यात्मानमात्मना ततोहंवःप्रवक्ष्यामियाथा
तथ्यंहितंवचः ९ ॥

मंदान्मूढान् ७ तेनववचइतिशेषः ८ श्रद्दध्मानोन्यो ऽवक्तात्मा शंकितान्योमंतात्मेतिस्यात्मन्येवायंविभागोविषमभागा
द्वयं यदिपूर्वोनभविष्यतीत्यर्थः ९ ॥ ९
रामायनमः ॥

पंथानः श्रेयोमार्गाः ९ मंत्रो मंत्रोक्तसंस्कारः श्मशानेति पदं यतितिनिधनव्याहृत्यर्थः ११ कर्माणि स्वर्ग्यः पंथा इति न चेन्नर्हि कथं मे
मत्समर्त्तं मदर्थं वा कर्माणि च क्रिये प्रोच्चः स्वर्गार्थिन इति शेषः अतस्तानि स्वर्ग्याण्येवेति भावः मंत्रसिद्धानि मंत्रैः प्रकाशितानि १२ आ
त्मानमिति दृढवादी दृढनिश्चयः पुमान् यथात्मानं इति प्रतिगुणाभावश्चार्थः यद्देवतारूपं जानीते अयमहमस्मीति सोऽवधिव इति तत्थे
वेहलोके शास्त्रेवासिद्धिस्तद्देवतातादात्म्यरूपा इष्यते तं यथा यथोपासते तत्थैव तः प्रेत्य भवतीति श्रुतेः अथागमो यां यां देवतां निराह
तस्याः स्ताद्गात्म्यमत्र भवतीति स्मृतेश्च तत्र कति प्रकारा सिद्धिरित्यत आह मासेति माघादिभिर्मासैः शुक्लैरर्द्धमासैः शिशिरादिभिर्ऋत

ऋषय ऊचुः शृणु मन्येवनस्तात पंथानो विदितास्तव नियोगेनैव धर्मात्मन् स्यात्तु मिच्छाम शा
थिनः ९ शौनक उवाच चतुष्पदां गौः प्रवरा लोहानां कांचनं वरं शब्दानां प्रवरो मंत्रो ब्राह्मणा
हि पदावरः १० मंत्रोयं जातकर्मादि ब्राह्मणस्य विधीयते जीवतोपि यथाकालं श्मशाननिध
नादिभिः ११ कर्माणि वैदिकान्यस्य स्वर्ग्यः पंथाः क्रतूत्तमः कथं मे सर्वकर्माणि मंत्रसिद्धानि च
क्रिये १२ आत्मानं दृढवादीति तथा सिद्धिर्विहन्यते मासार्द्धमासऋतवः आदित्यशशितारकं १३

भिश्च आदित्यमार्गप्राप्तिरूपा एका सिद्धिः क्रममुक्तिस्थानभूतब्रह्मलोकावाप्तिफला तथा श्रावणादिभिर्मासैः कृष्णैरर्द्धमासैः वर्षादि
भिर्ऋतुभिः शशिमार्गप्राप्तिरूपा द्वितीया सिद्धिः पुनरावृत्तिस्थानभूतस्वर्गलोकावाप्तिफला तथा मार्गद्वयानपेता आध्यात्मिकमाधि
भौतिकं वाऽविमुक्तमुपासीनानां देहान्ते तारकब्रह्मावाप्तिरूपा तृतीया सद्योमुक्तिफला तथा च श्रुतयः सपतान् ब्रह्म गमयति न स पुन
रावर्त्तते इति तथा एतमेवाध्वानं पुनर्निवर्त्तते इति तथाऽत्र हि जंतोः प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मो
क्षी भवतीति चक्रमणेनेयाः १३ ॥

ईहंतइति तदिदंआदित्यशशितारकात्मकंसिद्धित्रयंकर्मसंचितंकर्मफलत्वेनाभिहितंईहंतेकामयंतेसर्वभूतानि तस्मात्क
र्माधिकारस्थानंगार्हस्थ्यमेवसिद्धितेत्रयपुण्यमायमाश्रमोमहांश्च ८ अन्यथादोषमाहाद्येति निंदातःनिंदांकृत्वाकापथ्येनउ
त्क्रम्यागमार्गेयेगताःतेषांपुनःपापंविद्यते ९६ आदित्यशशितारकाख्यसिद्धित्रयानादेवादिगतिमाहदेवेति वंशइववंशोऽर्चिरा
दिपर्वोपेतत्वान्मार्गःदेववंशोदेवयानमार्गःतथापितृवंशःपितृयानमार्गःब्रह्मवंशोब्रह्मावाप्तिमार्गःतत्राप्युपायबहुत्वात्त्र
यकंबहुवचनं पथांत्यागेनअश्रुतीपथ्येत्वद्वंद्वसूकादियोनिर्याति श्रुतीतिदेवीमार्थ ९ पततकर्मवःयुष्माकमस्तुतत्तपो

ईहंतेसर्वभूतानितदिदंकर्मसंचितं सिद्धितेत्रमिदंपुण्यमयमेवाश्रमोमहान् ८ अथयेकर्म
निंदातोमनुष्याःकापथंगताः मूढानामर्थहीनानांतेषांमेनसंविद्यते ९६ देववंशान्पि
तृवंशान्ब्रह्मवंशांश्चशाश्वतान् संत्यज्यमूढावर्तंतेतेतोयान्त्यश्रुतीपथं ९ पतद्वोस्तुतपो
युक्तंददामीत्यृषिचोदितं तस्मात्तन्नियमावस्थानंतपश्चितपश्चितपउच्यते ९८ ॥

यत्क्तंउपासनायुक्तं उपास
नाचात्रद्विविधाऽध्यात्मंअधियज्ञंच तत्रयज्ञांगेऽग्न्यादौविराड्दृष्टिरूपाद्याअस्यस्यमेधस्यशिरइत्यादिनाविहितांत्या आद्यत्वविशुक्तो
पासनासोविशुक्तउपास्यइत्युपक्रम्य कतमआत्मस्थानंभुवोत्रीणास्यचयःसंधिरित्यादिनाविहिता पतेनद्विविधाप्युपासनाकर्मसमुच्चि
तैवकर्तव्येतिदर्शितं किंभूतंपततकर्मददामीतिऋषिणामंत्रेणचोदितं तथाचेंद्रवाक्यकर्मकांडेदद्मिमेददामितइति देवतोद्देशेनद्रव्यत्या
गरूपंयागंकुरुतश्रेयंचाहंपत्रपशुस्वर्गादिकंफलंदास्यामीतिमंत्रार्थः यस्मादेवंतस्मात्तत्ततत्तत्रमार्गोव्यवस्थानंनिष्ठापूर्विकास्थि

तः तदेवतपश्चितपदउच्यतेतन्नायकमोक्षमार्गादि ॥ ९

देवेति अंगोपास्तियुक्तं वा केवलं वा विमुक्तोपास्तियुक्तं वा देवं वंशादिशब्दोपलक्षितं कर्म गुरोः चर्यापरिचर्यासंविभज्य प
रस्पराविरोधेन दिननाडीविभागेन नित्यं क्रियमाणं कुडुक्षकरंडः साध्यमुच्यते विद्वद्भिः इत्थमेव कर्तव्यमिति भावः १९ एतदेव
परकृत्याद्रक्ष्यति देवा इति २० तपःकर्मैव प्रजानां मूलमतः श्रेष्ठं यतः अनेन ब्रह्मौदोमयदृष्टेन कुडुंबविधिना कुडुंबेश्चो
देशा स्वाध्यायमधीयान इत्यादिना यस्मिन्गृहस्थकर्मणि सर्वं प्रतिष्ठितं तथा च सूत्रं कात्स्न्यभावात्तु गृहिणोपसंहार इति स

देवं वंशान्ब्रह्मवंशान्पितृवंशांश्च शाश्वतान् संविभज्य गुरोश्चर्यां तद्वै कुडुक्षकरमुच्यते १९ देवा वै कु
डुक्षकं कृत्वा विभूतिं परमां गताः तस्माद्गार्हस्थ्यमुद्धोष्य कुडुक्षकं प्रब्रवीमि वः २० तपः श्रेष्ठं प्रजानां वै
मूलमेतन्न संशयः कुडुंबविधिनानेन यस्मिन्सर्वं प्रतिष्ठितं २१ एतद्धि कृत्तपो विप्रा द्वंद्वातीता
विमत्सराः तस्मात्तन्मध्यमं तत्र लोकेषु तप उच्यते २२ डुरायर्थपदे चैव गाच्छेति विघसाशिनः
सायं प्रातर्विभज्यान्नं स्वकुडुंबे यथाविधि २३ दत्वातिथिभ्यो देवेभ्यः पितृभ्यः स्वजनस्य च अवा
शिष्टानि ये भुंजंति तानाहुर्विघसाशिनः २४ तस्मात्स्वधर्ममास्थाय सुव्रताः सत्यवादिनः लोक =
स्य गुरवो भूत्वा ते भवंत्यनुपस्कृताः २५ त्रिदिवं प्राप्य शक्रस्य स्वर्गलोके विमत्सराः वसंति शाश्वता ४
वैश्यामाश्रमाणां धर्मा गृहे एव संति न त्वन्यत्रेहि हेतोर्ब्रह्मौदोमये कुडुंब इत्यादि अकृत्या गृहिणो न्वर्षानजना डुक्षकारिणः
वविधोपसंहारः कृत इति सूत्रार्थः २१ व्रतं ब्रह्मचर्याद्युपेतमध्ययनं मध्यमं च तद्रहितं यज्ञादि च तपःशब्देनोच्यते २२ तयोर्द्वितीयं
स्तोति डुरायर्थेति विघसाशिपदं व्याचष्टे सायमिति सार्धेन २३ २४ अनुपस्कृताः निःसंशयाः २५ २६

श्री म० भा० टी० २१

तत इति तेन कृष्णाः संन्यासं चिकीर्षव उत्सृज्य नास्तीति गताः आश्रमान्तरे सिद्धिर्नास्तीति तेन उत्सृज्य गता इति योज्यं २७ फा
लितमाह तस्मादिति २८ राजधर्मार्थप्रकाशे एकादशः ११ एवमर्जुनवाक्यात्कर्मणामवश्यकर्त्तव्यत्वे सिद्धे संगं कर्तृत्वाभि
मानं फलाशां च त्यक्त्वा तानि कर्तव्यानीति नकुलवाक्येन प्रतिपादयिष्यन्नारभते अर्जुनस्येत्यादिना १ ताम्रास्यः ऊः विना
विवर्णमुखः २ विषाणे वृषपे देवे त्र विशेषे देवानां देवैः अग्नयः अग्निस्थापनार्थानि स्थण्डिलानि चिताः इष्टकाभी रचिताः अ

अर्जुन उ० तत स्तेन तद्वचः श्रुत्वा धर्मार्थसहितं हितं उत्सृज्य नास्तीति गता गार्हस्थ्यं समुपाश्रि
ताः २७ तस्मात्त्वमपि धर्मज्ञ स्थैर्यमालम्ब्य शाश्वतं प्रशाधि पृथिवीं कृत्स्नां हतामित्रां नराधि
प २८ इति शान्तौ राजधर्मेषु ११ वैशंपायन उ० अर्जुनस्य वचः श्रुत्वा नकुलो वाक्यमब्रवीत् रा
जानमभिसंप्रेक्ष्य सर्वधर्मभृतां वरः १ अनुरुध्य महाप्राज्ञो भ्रातुश्चित्तमरिंदमः व्यूढोरस्को
महाबाहुस्ताम्रास्यो मितभाषिता २ नकुल उवाच विषाणे वृषपे देवानां सर्वेषामग्नयश्चिताः
तस्माद्विद्धि महाराज देवाः कर्मफले स्थिताः ३ अनास्तिकानां भूतानां प्राणदाः पितरश्च ये ते
घापि हश्यंते तेन देवत्वमपि कर्मफलमेव पि कर्मैव कुर्वन्ति विधिं संप्रेक्ष्य पार्थिव ४ ॥ त्यर्थः कर्मणा पितृलोको वि
द्यदेवलोक इति श्रुतेश्चयना श्रितविद्याबलात् ब्रह्मलोकं गता ये ते त्र देवाः ३ तथाग्ने केवलकर्मणा स्वर्लोकं गता ये ते त्र पितर इ
ति बोध्यं अनास्तिकानां आस्तिक्यभूयानामपि पाठान्तरे स्पष्टार्थः प्राणदाः वृष्टिद्वाराऽन्नप्रदाः अन्नं हि प्राणा इति श्रुतेः विधिं २१
अग्निर्वा अकामयतेत्यादिं अग्न्यादिभावस्य कर्मसाध्यत्वज्ञापकं ४ ॥

वेदवादोऽपविद्धस्त्यक्तो येन स तान् ५ देवयानेन मार्गेण पृष्ठं उपरिभागं ब्रह्मलोकमित्यर्थः अयं गृहाश्रमः सर्वानाश्रमान्
अति अतिक्रान्तः तेभ्यः श्रेष्ठ इत्यर्थः ६ तान् ब्राह्मणान् गतान् निबोध बुध्यस्व अवासृजन् समर्पयन् ७ कृतात्मा जितचित्तः अहं
ममाभिमानशून्य इत्यर्थः सत्यागी सात्विक इति शेषः ८ स्वावादानं गार्हस्थ्यस्य स्वभोगं ऊर्ध्वं वनादौ प्रतिष्ठितो निष्ठावान् स
नयः आत्मत्यागी देहत्यागी स तामसो मतः अनधीत्य द्विजो वेदाननुत्पाद्य सुतानपि अनिष्ट्वा शक्तितो यज्ञैर्मोक्षमिच्छन् व्रज

वेदवादापविद्धांश्च तान्विद्धि भृशनास्तिकान् नहि वेदोक्तमुत्सृज्य विप्रः सर्वेषु कर्मसु ५ देव
यानेन नाकस्य पृष्ठमाप्नोति भारत अत्याश्रमानयं सर्वानित्याहुर्वेदनिश्चयाः ६ ब्राह्मणाः श्रु
तिसंपन्नास्तान्निबोध जनाधिप वित्तानि धर्मलब्धानि क्रतुमुख्येष्ववासृजन् ७ कृतात्मा
स महाराज स वै त्यागी स्मृतो नरः ८ अनवेक्ष्य सुखादानं तथैवोर्ध्वं प्रतिष्ठितः आत्मत्यागी
महाराज स त्यागी तामसः प्रभो ९ अनिकेतः परिपतन् वृक्षमूलाश्रयो मुनिः अयाचकः
सदा योगी स त्यागी पार्थ भिक्षुकः १० ॥

त्यय इति मनूक्त्यनभिज्ञत्वात् तामसोऽयं त्यागीति भावः ९ परिपतन् भिक्षार्थं पर्यटन् यतोऽयाचकः योगी निरुद्धसर्ववृत्तिः
भिक्षुक इति याञ्चा धर्मो ब्राह्मणः स्मृतः सोऽयं ब्राह्मणकल्पः धर्मः शुभोऽपि प्रजापरिपालनक्लेशासहेन क्षत्रियेणाश्रित इति =
राजसत्वाद्दोषमूलः तथा च श्रुतिः यदा वै क्षत्रियाय पापं भवति ब्राह्मणकल्पोऽस्य प्रजायामाजायत इति माभूद्वयाचको भिक्षुकः ९

सन्न्यसेत्सर्वकर्माणिवेदंतत्परित्यजेत् नियतोवेदमभ्यस्यत्वैश्वर्येसुखंवसेदितिमनूक्तंवेदसंन्यासमकृत्वाआत्मराज्येनि
वत्स्यामीत्याशंक्याह क्रोधेति विप्रइतिनेनायमपिधर्मोब्राह्मणस्यैवविहितोधिकारादितिदर्शितं तेनायंत्यागोराजसम्प
वत्सर्ववदितिसिद्धं ११ १२ समीक्ष्येति आश्रमान्तरेस्वर्गप्राप्तिनकामः गार्हस्थ्येतूभयमस्तीत्ययमेवमार्गोगतिश्चेत्यर्थः

क्रोधहर्षावनादृत्यपैशुन्यंचविशेषतः विप्रोवेदानधीतेयः सत्यागीपार्थभिक्षुकः ११ आश्रा ॥
मांस्तुलयासर्वान्धृतानाहुर्मनीषिणः एकतस्तेत्रयोराजन्गृहस्थाश्रमएकतः १२ समीक्ष्यते ॥
लयापार्थकामंस्वर्गंचभारत अयंपन्थामहर्षीणामियंलोकविदांगतिः १३ इतियःकुरुतेभा
वंसत्यागीभरतर्षभ नयःपरित्यज्यगृहान्वनमेतिविमूढवत् १४ यदाकामान्समीहेतधर्म
वैतंसिकोनरः अथैनंमृत्युपाशेनकण्ठेबध्नातिमृत्युराट् १५ अभिमानकृतंकर्मनैतत्फल
वदुच्यते त्यागयुक्तंमहाराजसर्वमेवमहाफलं १६ शमोदमस्तथाधैर्यंसत्यंशौचमथार्जवं
यज्ञोधृतिश्चधर्मश्चनित्यमार्षोविधिःस्मृतः १७ पितृदेवातिथिकृतेसमारम्भोत्रशस्यते अत्रैव
हिमहाराजत्रिवर्गःकेवलंफलं १८ एतस्मिन्वर्तमानस्यविधावप्रतिषेधिते त्यागिनःप्रसृतस्य दूनोच्छित्तिर्विद्यतेक्वचित् १९ ॥

१३ इतीति आवश्यकमेवेदंममेतिभावंकृत्वायःसंगफलेप्सारहितःकरोतिसत्यागीनान्यइत्यर्थः १४ वनेपिकामस्मरणांचेत्तप
नत्येवेत्याह धर्मवैतंसिकोधर्मध्वजी १५ अभिमानःकर्ताहमित्येवंरूपस्तेनकृतंकर्मफलवन्नगतिप्रदंनत्यागोपेतं १६ आर्षःऋ चीर्णाहितैः १७ अत्रगार्हस्थ्ये १८ इहवियोप्रस्तस्यनिष्ठावतः १९ ॥

२० २१ तच्चकर्मगृहस्थाश्रमिणोविरोधकं निगडवद्विशेषेणरोधकं २२ एतत्त्यागेदोषमाहनतदिति २३ अपरेयोगिनः महाय
ज्ञानितिबहुवचनंवितर्कविचाराद्यवांतरयोगभेदापेक्षं २४ २५ त्रिषुपियज्ञेष्वधीतीतिकालः उपस्थितंमध्यमस्तुतंछंदांत्यस्या

असृजद्धिप्रजाराजन्प्रजापतिरकल्मषः मांयक्ष्यंतीतिधर्मात्मायज्ञैर्विविधदक्षिणैः २० वीरुधश्च
वृक्षांश्चयज्ञार्थंवैतथौषधीः पशूंश्चैवतथामेध्यान्यज्ञार्थानिहवींषिच २१ गृहस्थाश्रमिणस्त
च्चयज्ञकर्माविरोधकं तस्माद्गार्हस्थ्यमेवेहदुष्करंदुर्लभंतथा २२ तत्संप्राप्यगृहस्थायेपशुधान्य
धनान्विताः नयजंतेमहाराजशाश्वतंतेषुकिल्बिषं २३ स्वाध्याययज्ञाऋषयोज्ञानयज्ञास्तथाप
रे अथापरेमहायज्ञान्मनसैववितन्वते २४ एवमन्तःसमाधानंमार्गमातिष्ठतोनृप द्विजातेर्ब्र
ह्मभूतस्यस्पृहयंतिदिवौकसः २५ सरत्नानिविचित्राणिसंहृतानिततस्ततः मखेष्वनभिसंत्यज्य
नास्तिक्यमभिजल्पसि २६ कुटुंबमास्थितेत्यागंनपश्यामिनराधिप राजसूयाश्वमेधेषुसर्वमेधे
षुवापुनः २७ येचान्येक्रतवस्तातब्राह्मणैरभिपूजिताः तैर्यजस्वमहीपालशक्रोदेवपतिर्यथा
२८ राज्ञःप्रमाददोषेणदस्युभिःपरिमुष्यतां अशरण्यःप्रजानांयःसराजाकलिरुच्यते २९
अश्वान्गांश्चैवदासीश्चकरेणूश्चस्वलंकृताः ग्रामान्जनपदांश्चैवक्षेत्राणिचगृहाणिच ३० ॥

वार्त्तांकुर्वतस्तेनास्तिक्यंस्पृहामित्याह सइति २६ पूर्वंवेदसंन्यासेपितृवाधिकारोनास्तीत्युक्तंइदानींवेदसंन्यासएवनसंभवतीत्य
र्थेनाहकुटुंबमिति कुत्रतर्हित्यागंपश्यसीत्यतआहराजसूयेति २७ फलितमाहयेचेति २८ प्रमादोराज्याकरणं परिमुष्यतां

शान्तिपर्व २४ ३ ॥

मात्सर्यं बंधुद्रोहः दानाभावेन कलिस्वरूपापन्न वयं जाता इत्यर्थः ३१ ३२ ३३ अंतराले पिशाचयोनौ ३४ अंतर्व्यासंगः अहं
ज्ञाता दाता कर्ता हर्तेत्यादिरात्मपूजा बहिर्व्यासंगः पुत्रपश्वादिपूजा तयोः कारकं मूलं अहंकारममकारौ तत्त्यक्त्वैव त्यागी भवेन्न तु

अप्रदाय द्विजातिभ्यो मात्सर्याविष्टचेतसः वयं ते राजकलयो भविष्याम विशांपते ३१ अदातारो अ
शरण्याश्च राजकिल्बिषभागिनः दोषाणामेव भोक्तारो न सुखानां कदाचन ३२ अनिष्ट्वा च महा
यज्ञैरकृत्वा च पितृस्वधां तीर्थेष्वनभिसंस्नात्वा प्रव्रजिष्यसि चेत्प्रभो ३३ छिन्नाभ्रमिव गंतासि वि
लयं मारुतेरितं लोकयोरुभयोर्भ्रष्टो ह्यंतराले व्यवस्थितः ३४ अंतर्बहिश्च यत्किंचिन्मनोव्यासंग
कारकं परित्यज्य भवेत्त्यागी न हित्वा प्रतितिष्ठति ३५ एतस्मिन्वर्तमानस्य विधावप्रतिषेधिते ब्रा
ह्मणस्य महाराज नोच्छित्तिर्विद्यते क्वचित् ३६ निहत्य शत्रूंस्तरसा समृद्धान्शक्रो यथा दैत्यब
लानि संख्ये कः पार्थ शोचेन्निरतः स्वधर्मे पूर्वैः स्मृते पार्थिव शिष्टजुष्टे ३७ क्षात्रेण धर्मेण पराक्र
मेण जित्वा महीं मंत्रविद्भ्यः प्रदाय नाकस्य पृष्ठेऽसि नरेंद्र गंता न शोचितव्यं भवताद्य पार्थ ३८ इ
ति श्रीमहाभारते शांतिपर्वणि राजधर्मे नकुलवाक्ये द्वादशोऽध्यायः १२ ॥

योऽहं हित्वा प्रतितिष्ठति स इत्यर्थः ३५ ३६ ३७ ३८ इति श्रीमहाभारते द्वादशोऽध्यायः १२ ॥

नवाह्यमिति अहंकारममकारौत्यक्त्वाविमुक्तं तत्राद्यत्यागेसर्वव्यवहारोच्छेदःस्यादितिममकारएवत्याज्यइत्येतदर्थमध्यायआ
रभ्यते तत्रद्रव्यंममकारास्पदंद्विविधंबाह्यंधावद्दारिकंशारीरंशरीरेभवंमनःकल्पितंच यथोक्तंघटोस्त्यमयथीमयाविति तथाच
श्रुतिर्विदुषोविदेहकैवल्यकालेबाह्यद्रव्यस्यकारणेलयंदर्शयतिगताःकलाःपंचदशप्रतिष्ठाइति कलाःप्राणमनःप्रभृतयः प्र
तिष्ठाःउपादानकारणानिप्रतिगताः तथाइमाःषोडशकलाःपुरुषायणाःपुरुषंप्राप्यास्तंयंतीतिमनःकल्पितानांपुरुषेलयंदर्श

सहदेवउवाच नबाह्यंद्रव्यमुत्सृज्यसिद्धिर्भवतिभारत शारीरंद्रव्यमुत्सृज्यसिद्धिर्भवतिवानवा १
बाह्यद्रव्यविमुक्तस्यशारीरेषुचगृध्यतः योधर्मोयत्सुखंवास्याद्द्विषतांतत्तथास्तुनः २ शारीरंद्र
व्यमुत्सृज्यपृथिवीमनुशासतः योधर्मोयत्सुखंवास्यात्सुहृदांतत्तथास्तुनः ३ द्व्यक्षरस्तुभवे
न्मृत्युस्त्र्यक्षरंब्रह्मशाश्वतं ममेतिचभवेन्मृत्युर्नममेतिचशाश्वतं ४ ब्रह्ममृत्यूततोराजन्नात्मन्ये च
वसमाश्रितौ अदृश्यमानौभूतानियोधयेतामसंशयं ५ अविनाशोस्यसत्त्वस्यनियतोयदिभार
त हत्वाशरीरंभूतानांनहिंसाप्रतिपत्स्यते ६ ॥

यति अतःशारीरमेवद्रव्यंबंधमूलंनबाह्य त्यागोव्यर्थः शारीरद्रव्य
त्यागेपिमनश्चांचल्यात्पुनरुपादानेसिद्धिर्नभवतीतिनवेत्यनेनउक्तं तेनदृष्टत्यागएवसिद्धिहेतुरित्युक्तं अक्षरयोजनास्पष्टा १ २ ३
ममेतिस्वीकारःनममेतिपरित्यागःअयमेवौमृत्युशाश्वतौ संसारमोक्षयोःमूलेइत्यर्थः ४ आत्मनिबुद्धौ भूतानिशास्त्रकार्तेन तथा
केचित्कर्तात्मानित्यइतिकेचिदनित्यइति ५ तत्राद्येदोषाभावमाह अविनाशइति ६ ॥

श्री· सत्वस्यकर्तृत्वधर्मवत्याःबुद्धेः ७ द्वितीयेकृतहानादिदोषत्याहतस्मादिति यस्मात्कर्तृत्वनाशेमोक्षाभावः नाशेदेहात्मवादप्रसं
भा·रा· गस्तस्मातएकांतंअन्यतरतिश्रयंत्यक्त्वाप्राचांपथास्तन्मिथ्यात्वपदत्पवादर्त्तव्यः तेनकल्पितस्यशारीरद्रव्यस्यस्वामस्यैवत्यागोयु
टी· ज्यतइत्याशयवानाहतस्मादिति निष्फलेबाह्यद्रव्यत्यागंकृत्वांतरद्रव्यत्यागमकुर्वन्मूढएवेत्याहद्वाभ्यांलब्ध्वापीति ९ १० तर्हिभ
२४ यद्रव्यत्यागःश्रेयानित्याशंक्याहबाह्येति भूतानांबाह्यमाभ्यंतरंचयतद्रव्यंतत्सर्वंस्वभावंस्वस्यप्रत्यगात्मनःभावंसत्तांपश्यजानीहि

अथापिचमहोत्पत्तिःसत्वस्यप्रलयस्तथा नहितेशरीरेणहस्त्याहृष्याचस्यात्क्रियापथः ७ तस्मा
देकांतमुत्सृज्यपूर्वैःपूर्वतरैश्चयः पंथानिषेवितःसद्भिःसतितिक्षोविजानता ८ लब्ध्वापिपृथि
वींकृत्स्नांसहस्थावरजंगमां नभुंक्तेयोनृपःसम्यङ् निष्फलंतस्यजीवितं ९ अथवावसतोरा
जन्वनेवन्येनजीवतः द्रव्येषुयस्यममतामृत्योरास्येसवर्तते १० बाह्यांतरंचभूतानांस्वभावंपश्यभार
त येतुपश्यंतितद्भूतंमुच्यंतेतेमहाभयात् ११ भवान्पिताभवान्माताभवान्भ्राताभवान्गुरुः दुःख
प्रलापानार्तस्यतन्मेत्वंक्षंतुमर्हसि १२ ॥

तदात्मव्यतिरिक्तंनास्तीत्यर्थः तथाचश्रुतिःआत्मैवेदंसर्वमिति येतुएवंमांसर्वदात्मरूपंभूतंनित्यसिद्धंपश्यंतितद्भूतमितिपाठे
पिसएवार्थः तेमहतोभयातउभयद्रव्यसंगजात्संसारान्मुच्यंतेकल्पितस्यमरीचिकोदकस्येवतन्मेवत्यागःकर्त्तव्योनस्वरूपतः २४
तस्यनित्यनिवृत्तत्वादितिभावः ११ १२ ॥

भक्त्यैवभाषितंनतुज्ञानगर्वेण १३ त्रयोदश १३ अव्याहरतिवक्तव्याभावात् नतुक्रोधान्मोहाद्वा १ २ ४ साम्नासांत्ववादेन वल्गु

तथ्यंवायदिवातथ्यंयन्मयैतत्प्रभाषितं तद्विद्धिपृथिवीपालभक्त्याभरतसत्तम १३ इतिश्रीम
हाभारतेशांतौराजधर्मेसहदेववाक्यं १३ वैशंपायनउ: अव्याहरतिकौंतेयधर्मराजेयुधिष्ठिरे
भ्रातॄणांब्रुवतांतांस्तान्विविधान्वेदनिश्चयान् १ महाभिजनसंपन्नाश्रीमत्यायतलोचना अभ्यभा
षतराजेंद्रंद्रौपदीयोषितांवरा २ आसीनमृषभंराज्ञांभ्रातृभि:परिवारितं सिंहशार्दूलसदृशैर्वार
णैरिवयूथपं ३ अभिमानवतीनित्यंविशेषेणयुधिष्ठिरे लालितासततंराज्ञाधर्मज्ञाधर्मदर्शि
नी ४ आमंत्र्यविपुलश्रोणीसाम्नापरमवल्गुना भर्तारमभिसंप्रेक्ष्यततोवचनमब्रवीत् ५ द्रौ
पद्युवाच इमेतेभ्रातर:पार्थशुष्यंतेस्तोककाइव वावाश्यमानास्तिष्ठंतिनचैनानभिनंदसे ६ नं
दयैतान्महाराजमत्तानिवमहाद्विपान् उपपन्नेनवाक्येनसततंदु:खभागिन: ७ कथंद्वैतव
नेराजन्पूर्वमुक्त्वातथावच: भ्रातॄनेतान्स्मसहितान्शीतवातातपार्दितान् ८ वयंदुर्योधनंहत्वा
मृधेभोक्ष्यामहेमेदिनीं संपूर्णांसर्वकामानामाहवेविजयैषिण: ९ विरथांश्चरथान्कृत्वानिह
त्यचमहागजान् संस्तीर्यचरथैर्भूमिंससादिभिरिरिंदमा: १०

नारमणीयेन ५ स्तोकका: चातका: वावाश्यमाना:पुन:पुन:क्रंदंत: ६ उपपन्नेनयुक्तियुक्तेन ७ ८ सर्वकानांसर्वैरर्थै: = ५ ५

श्री· ११ १२ क्लीवःअधीरः १३ १४ प्रतिषेधोदंडःराज्यान्निर्वासनंवा १६ दानंआदानंच १७ संकोचेनयाञ्चया १८ त्रिभिर्वर्गैःतिसृ-
म·रा· यजतांविविधैर्यज्ञैःसमस्तैराप्तदक्षिणैः वनवासकृतंदुःखंभविष्यतिसुखायवः ११ इत्येतानेवमु
टी· क्त्वात्वंस्वयंधर्मभृतांवरः कथमद्यपुनर्वीरविनिंदसिमनस्विनः नक्लीवोवसुधांभुंक्तेनक्लीवोधन
२५ मश्नुते नक्लीवस्यगृहेपुत्रामत्स्याःपंकइवासते १३ नादंडःक्षत्रियोभातिनादंडोभूमिमश्नुते नादंड
स्यप्रजाराज्ञःसुखंविंदन्तिभारत १४ मित्रतासर्वभूतेषुदानमध्ययनंतपः ब्राह्मणस्यैवधर्मःस्या
न्नराज्ञोराजसत्तम १५ असतांप्रतिषेधश्चसतांचपरिपालनं एषराज्ञांपरोधर्मःसमरेचापलायनं
१६ यस्मिन्क्षमाचक्रोधश्चदानादानेभयाभये निग्रहानुग्रहौचोभौसवैधर्मविदुच्यते १७ नश्रु
तेननदानेननसांत्वेननचेज्यया त्वयेयंपृथिवीलब्धानसंकोचेनचाप्युत १८ यत्तद्बलममित्रा
णांतथावीरसमुद्यतं हस्त्यश्वरथसंपन्नंत्रिभिरंगैर्महत्तमं १९ रक्षितंद्रोणकर्णाभ्यामश्वत्था
म्नाकृपेणच तत्त्वयानिहतंवीरतस्माद्भुंक्ष्ववसुंधरां २० जंबूद्वीपोमहाराजनानाजनपदायुतः
त्वयापुरुषशार्दूलदंडेनमृदितःप्रभो २१ जंबूद्वीपेनसदृशःक्रौंचद्वीपोनराधिप अपरेणमहा
मेरोर्दंडेनमृदितस्त्वया २२ ॥

भिःशक्तिभिः ताश्चप्रभुशक्तिउत्साहशक्तिः ताभिरुत्तमंश्रेष्ठं १९ २० २१ अपरेणपश्चिमतः २२ ॥

क्रौंचद्वीपादिवशीकरणंसिद्धिद्वाराजसूये २३ ३३ नस्यकर्मनासाद्वाराभेषजग्रहणं नष्टेतिपाठेनष्टाःप्रेतास्तद्वाधा

क्रौंचद्वीपेनसदृशःशाकद्वीपोनराधिप पूर्वेणतुमहामेरोर्दंडेनस्पृदितस्त्वया २३ उत्तरे-
णमहामेरोःशाकद्वीपेनसम्मितः भद्राश्वःपुरुषव्याघ्रदंडेनस्पृदितस्त्वया २४ द्वीपाश्च
सांतरद्वीपानानाजनपदाश्रयाः विगाह्यसागरंवीरदंडेनस्पृदितस्त्वया २५ एतान्यप्रति
मेयानिकृत्वाकर्माणिभारत नप्रीयसेमहाराजपूज्यमानोद्विजातिभिः २६ संतप्यत्रात्हृतिमा-
न्दृष्ट्वाप्रतिनंदस्वभारत ऋषभानिवसंमत्तानराजेंद्रानूर्जितानिव २७ अमरप्रतिमान्सर्वान्शत्रुसा
हाःपरंतपाः एकोपिद्विसहस्राणांयेषांममस्यादितिमेमतिः २८ किंपुनःपुरुषव्याघ्रपतयोमेनरर्ष
भाः समस्तानींद्रियाणीवशरीरस्यविचेष्टने २९ अनृतंनाब्रवीत्कृष्णःसर्वज्ञःसर्वदर्शिनी युधि
ष्ठिरस्तांपांचालिसत्त्वेयास्यत्यनुत्तमम् ३० हत्वाराजसहस्राणिबहून्याशुपराक्रमः तदर्थंसंप्रप
श्यामिमाहात्वजनाधिप ३१ येषामुन्मत्तकोज्येष्ठःसर्वेतेप्यनुसारिणः तवोन्मादान्महाराजसो
न्मादाःसर्वपांडवाः ३२ यदिह्निसुखरत्नमत्ताभ्रातरस्तेनराधिप वध्यास्तेनास्तिकैःसार्द्धंप्रशामेष्युवै
स्तुथरा कुरुतेमूढएवंद्वियःश्रेयानाधिगच्छति ३३ धूपैरंजनयोगैश्चनस्यकर्मभिरेवच भेषजैःस
चिकित्स्यःस्याद्यउन्मार्गेणगच्छति ३४ ॥

निहत्यर्थैःरत्नाबंधनादिकर्मभिः ३४ ॥

३५ एतेषांएतानानादृत्य ३६ ३७ चतुर्दशः १४ यज्ञसेन्यावचः १ नादंडःक्षत्रियोभातीतिद्रौपद्युक्तिमुपबृंहयतिदंडइति २ ३
उपादत्स्वदंडमितिशेषः लौकिकंभावंलोकव्यवहारंपश्यस्व पश्य यद्वाशोभनश्चासौअलौकिकश्चेतिभावंशास्त्रैकगम्यमानं

साहंसर्वाधमालोकेस्त्रीणांभरतसत्तम तथाविनाकृतापुत्रैर्याहमिच्छामिजीवितुं ३५ एतेषांयतमा
मानानांनमेद्यवचनंमृषा त्वंतुसर्वांमहींत्यक्त्वाकुरुषेस्वयमापदं ३६ यथास्तांसंमतौराज्ञांपृ
थिव्यांराजसत्तमौ मांधाताचांबरीषश्चतथाराजन्विराजसे ३७ प्रशाधिपृथिवींदेवींप्रजाधर्मेणपा
लयन् सपर्वतवनद्वीपांमाराजन्विमनाभव ३८ यजस्वविविधैर्यज्ञैर्युध्यस्वारीन्प्रयच्छच य
नानिभोगान्वासांसिद्विजातिभ्योनृपोत्तम ३९ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेद्रौपदीवा
क्यंचतुर्दशोध्यायः १४ वैशंपायनउवाच याज्ञसेन्यावचःश्रुत्वापुनरेवार्जुनोब्रवीत् अनुमा
न्यमहाबाहुंज्येष्ठंभ्रातरमच्युतं १ अर्जुनउ॰ दंडःशास्तिप्रजाःसर्वादंडएवाभिरक्षति दंडःसु
प्तेषुजागर्तिदंडंधर्मंविदुर्बुधाः २ धर्मंसंरक्षतेदंडस्तथैवार्थंजनाधिप कामंसंरक्षतेदंडस्त्रिवर्गो
दंडउच्यते ३ दंडेनरक्ष्यतेधान्यंधनंदंडेनरक्ष्यते एवंविद्वन्नुपादत्स्वभावंपश्यस्वलौकिकं ४ ॥

दात्मानमंतर्दृष्ट्यापश्यबहिश्चदंडमुपादत्स्वतेनसद्धदेवोक्तःअर्थःप्रदर्शितोभवति ४ ॥

५ सांसिद्धिके पशुवत् दंडार्हस्वभावे ६ ७ दंडशब्दार्थमाह यस्मादिति दमयति ताडनादिना दंडयति वित्तमपहरति ८ भुजार्पणश
तिभुजेन भक्तं तन्मात्रार्पणं वेतनाप्रदानमित्यर्थः दानं राज्ञे द्रव्यार्पणं निर्दंडः दास्यमेव कारयेन्नत्वस्य दंडोस्ति शूद्रं तु कारयेद्दास्य

राजदंडभयादेके पापाः पापं न कुर्वते यमदंडभयादेके परलोकभयादपि ५ परस्परभयादेके
पापाः पापं न कुर्वते एवं सांसिद्धिके लोके सर्वं दंडे प्रतिष्ठितं ६ दंडस्यैव भयादेके न खादंति परस्परं
अंधे तमसि मज्जेयुर्यदि दंडो न पालयेत् ७ यस्माददांतान्दमयत्यशिष्टान्दंडयत्यपि दमनाद्दंडना
च्चैव तस्माद्दंडं विदुर्बुधाः ८ वाचा दंडो ब्राह्मणानां क्षत्रियाणां भुजार्पणं दानदंडाः स्मृता वैश्या
निर्दंडः शूद्र उच्यते ९ असंमोहाय मर्त्यानामर्थसंरक्षणाय च मर्यादा स्थापिता लोके दंडसं
ज्ञा विशांपते १० यत्र श्यामो लोहिताक्षो दंडश्चरति सूनृतः प्रजास्तत्र न मुह्यंते नेता चेत्साधु पश्या
ति ११ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः दंडस्यैव भयादेते मनुष्या वर्त्मनि स्थिताः १२
नाभीतो यजते राजन् नाभीतो दातुमिच्छति नाभीतः कश्चित्समये स्थातुमिच्छतिः १३ नाच्छि
त्वा परमर्माणि नाकृत्वा कर्म दारुणं नाहत्वा मत्स्यघातीव प्राप्नोति महतीं श्रियं १४ नाघ्नतः की
र्तिरस्तीह न वित्तं न पुनः प्रजाः इंद्रो वृत्रवधेनैव महेंद्रः समपद्यत १५ ॥

मितिमनूक्तेः एतच्चाल्पापराधे ज्ञेयं ९ १० श्यामः दृष्टाभिघातेन दंड्यसंत्रासजनकत्वात् लोहिताक्षो दंडयितुः क्रोधातिशयात् सून
तः सत्यं ताडयतः साधु यथापराधं ११ १२ महतीं इंद्रलोकादिं मत्स्यघातीवेत्यनपकारिणामपि वधः कार्य इत्यत्र दृष्टांतः १४ ॥

१६ १७ १८ १९ २० व्यालमृगश्चित्रव्याघ्रः २१ २२ यथासृष्टः शौर्यतेजोधृतिदीक्ष्यमित्याद्युक्तस्वभावः क्षत्रियः सृष्टोसि यात्रा २३

यएवदेवाहंतारस्तांल्लोकोर्चयतेभृशं हंतारुद्रस्तथास्कंदःशक्रोग्निर्वरुणोयमः १६ हंताकालस्त
थामृत्युर्वायुर्वैश्रवणोरविः वसवोमरुतःसाध्याविश्वेदेवाश्चभारत १७ एतान्देवान्नमस्यंतिप्रतापप्र
णताजनाः नब्रह्माणंनधातारंनपूषाणंकथंचन १८ मध्यस्थान्सर्वभूतेषुदांताञ्छमपरायणान्
यजंतेमानवाःकेचित्प्रशांताःसर्वकर्मसु १९ नहिपश्यामिजीवंतंलोकेकंचिदहिंसया सत्त्वैःस
त्त्वाहिजीवंतिदुर्बलैर्बलवत्तराः २० नकुलोमूषिकानत्तिबिडालोनकुलंतथा बिडालमत्तिश्वा
राजन्श्वानंव्यालमृगस्तथा २१ तानत्तिपुरुषःसर्वान्पश्यकालोयथागतः प्राणस्यान्नमिदंस
र्वंजंगमंस्थावरंचयत् २२ विधानंदेवविहितंतत्रविद्वान्नमुह्यति यथासृष्टोसिराजेंद्रतथाभवितु
मर्हसि २३ विनीतक्रोधहर्षाहिमंदावनमुपाश्रिताः विनावधंनकुर्वंतितापसाःप्राणयापनं
२४ उदकेबहवःप्राणाःपृथिव्यांचफलेषुच नचकश्चिन्नतान्हंतिकिमन्यत्प्राणयापनात् २५
सूक्ष्मयोनीनिभूतानितर्कगम्यानिकानिचित् पक्ष्मणोपिनिपातेनयेषांस्यात्स्कंधपर्ययः २६
ग्रामान्निष्क्रम्यमुनयोविगतक्रोधमत्सराः वनेकुटुंबधर्माणोदृश्यंतेपरिमोहिताः २७ ॥

विनीतोऽपनीतोक्रोधहर्षौयैस्तेमंदाःक्षत्रियाः २४ २५ स्कंधपर्ययःदेहस्यविपर्ययः २७ ॥

२८ ततो दंडयुक्तानीति तस्यां प्रणीतायां प्रवर्त्तितायां २९ अभद्दयन्भक्षयेयुः ३० संतर्जिताः फूत्कारेण ३१ ३२ भोगाय पालनाय मर्यादायै इति शेषः ३३ ३४ सुनीतनयनाय विनयप्रापणाय ३५ ३६ कल्याणीं अपत्यवतीं नडे हतलोकः उद्वहनं नवा

भूमिं भित्त्वौषधीश्छित्त्वा हत्वा दीनं डजान्यमून् मनुष्यास्तत्ववते यज्ञांस्ते स्वर्गं प्राप्नुवन्ति च २८ दं
डनीत्यां प्रणीतायां सर्वे सिध्यन्त्युपक्रमाः कौन्तेय सर्वभूतानां तत्र मे नास्ति संशयः दंडश्चेन्न भवेल्लो
के विनश्येयुरिमाः प्रजाः जले मत्स्यानिवाभक्ष्यन्दुर्बलान्बलवत्तराः ३० सत्यं चेदं ब्रह्मणा पू
र्वमुक्तं दंडः प्रजा रक्षति साधु नीतः पश्याग्नयश्च प्रतिशाम्यभीताः संतर्जिता दंडभयाज्ज्वलंति
३१ अंधं तम इवेदं स्यान्न प्रज्ञायेत किंचन दंडश्चेन्न भवेल्लोके विभजन्साध्वसाधुनी ३२ येऽपि संभि
न्नमर्यादा नास्तिका वेदनिंदकाः तेऽपि भोगाय कल्पन्ते दंडेनाशु निपीडिताः ३३ सर्वो दंडजितो
लोके दुर्लभो हि शुचिर्जनः दंडस्य हि भयाद्भीतो भोगायैव प्रवर्त्तते ३४ चातुर्वर्ण्यप्रमोदाय सु
नीतनयनाय च दंडो विधात्रा विहितो धर्मार्थावभिरक्षितुं ३५ यदि दंडान्न बिभ्येयुर्वयांसि श्वापा
दानि च अद्युः पशून्मनुष्यांश्च यज्ञार्थानि हवींषि च ३६ न ब्रह्मचार्यध्यीयीत कल्याणीं न दुहेत गां
न कन्योद्वहनं गच्छेद्यदि दंडो न पालयेत् ३७ विश्वलोपः प्रवर्त्तेत भिद्येरन्सर्वसेतवः ममत्वं न प्र
जानीयुर्यदि दंडो न पालयेत् ३८ ॥

च्छेत् किं तत्र्यभिचरेदेव ३७ विश्वलोपः सर्वोच्छेदः सेतवो मर्यादाः ममत्वं परिच्छिन्नं न जानीयुः सर्वः सर्वत्र ममत्वं कुर्यादित्य

शां ५५ ॥

तिष्ठेयुरनुतिष्ठेयुः ३९ आश्रिताः स्वाश्रमिणः ४० ४५ ४८ गोषुप्रविष्टव्याघ्रादेर्हिंसागवामेवहिंसाभवतिअतएतयोर्मध्येध

नसंवत्सरसत्राणितिष्ठेयुरकुतोभयाः विधिवद्दक्षिणावंतियदिदंडोनपालयेत् ३९ चरेयुर्नाश्रमेधर्मंयथोक्तंविधिमाश्रिताः नविद्यांप्राप्नुयात्कश्चिद्यदिदंडोनपालयेत् ४० नचोष्ट्रानबलीवर्दानाश्वाश्वतरगर्दभाः युक्तावहेयुर्यानानियदिदंडोनपालयेत् ४१ नप्रेष्यावचनंकुर्युर्नबालाजातुकर्हिचित् तिष्ठेत्पितृमतेधर्मेयदिदंडोनपालयेत् ४२ दंडेस्थिताःप्रजाःसर्वादंडंसर्वेविदुर्बुधाः दंडेस्वर्गोमनुष्याणांलोकोयंचप्रतिष्ठितः ४३ नतत्रकूटंपापंवावंचनावापिदृश्यते यत्रदंडः सुविहितश्चरत्यरिविनाशनः ४४ हविःश्वाप्रलिहेद्दृष्ट्वादंडश्चेन्नोद्यतोभवेत् हरेत्काकःपुरोडाशंयदिदंडोनपालयेत् ४५ यदीदंधर्मतोराज्यंविहितंयद्यधर्मतः कार्यस्तत्रनशोकोवैभुंक्ष्वभोगान्यजस्वच ४६ सुखेनधर्मंश्रीमंतश्चरंतिशुचिवाससः संवसंतःप्रियैर्दारैर्भुंजानाश्चान्नमुत्तमं ४७ अर्थेसर्वेसमारंभाःसमायत्तानसंशयः सचदंडेसमायत्तःपश्यदंडस्यगौरवं ४८ लोकयात्रार्थमेवेहधर्मप्रवचनंकृतं अहिंसासाधुहिंसेतिश्रेयान्धर्मपरिग्रहः ४९ नात्यंतंगुणवत्किंचिन्नचाप्यत्यंतनिर्गुणं उभयंसर्वकार्येषुदृश्यतेसाध्वसाधुच ५० ॥

र्मस्यपरिग्रहःआर्त्तत्राणंश्रेयान् ५० ॥

मस्तकं भिंदंति शृंगग्रहतिशृंगग्रहद्भिर्गोभूदिति नस्तकानिति पाठे नासिकाः ५१ जर्जरीकृते दंडेन तदभावे भारवहनादिकार्ये नस्या
दतः पुत्राणामेव धर्ममाचरतत्र प्रवाहायाते हिंसादिदोषं अवेत्स्वेति भावः ५२ ५३ मन्युः दैन्यं ५४ आततायी शस्त्रपाणिः म
न्युः क्रोधः मन्युं क्रोधं आर्च्छति आसर्वतः ऋच्छति प्राप्नोति मन्युः कर्ता नाहं कर्तेति श्रुतेस्तत्र न भ्रूणहा ब्रह्महा भवतीत्यर्थः ५५

पशूनां वृषणांश्छित्वा ततो भिंदंति मस्तकं वहंति बहवो भारान्बध्नंति दमयंति च ५१ एवं पर्या
कुले लोके वितथे जर्जरीकृते तैस्तैर्न्यायैर्महाराज पुराणं धर्ममाचर ५२ यज देहि प्रजा रक्ष धर्मं सम
नुपालय अमित्राञ्जहि कौंतेय मित्राणि परिपालय ५३ मा च ते निघ्नतः शत्रून्मन्युर्भवतु पार्थि
व न तत्र किल्बिषं किंचित्कर्तुर्भवति भारत ५४ आततायी हि यो हन्यादाततायिनमागतं न तेन भ्रू
णहा स स्यान्मन्युस्तं मन्युमृच्छति ५५ अवध्यः सर्वभूतानामंतरात्मा न संशयः अवध्ये चात्मनि
कथं वध्यो भवति कस्यचित् ५६ यथा हि पुरुषः शालां पुनः संप्रविशेन्नवां एवं जीवः शरीराणि ता
नि तानि प्रपद्यते ५७ देहान्पुराणानुत्सृज्य नवान्संप्रतिपद्यते एवं मृत्युमुखं प्राहुर्जना ये तत्त्वद
र्शिनः ५८ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे अर्जुनवाक्यं १५ वैशंपायन उ० अर्जुनस्य व
चः श्रुत्वा भीमसेनोत्यमर्षणः धैर्यमास्थाय तेजस्वी ज्येष्ठं भ्रातरमब्रवीत् १ ॥

वस्तुतस्त्ववध्य एवात्मा देहस्तु शालावदनात्मा तेन देहेन देहे निहते नात्मा हतो वा वध्यो वेद अवध्य इत्यादिना ५६ ५८ पंचदशः
१५ अर्जुनस्य ननु देहस्य बाल्याल्लाल्यमाहिंतत्पीडया कः पीड्यते इत्याशंक्य मन एव पीड्यते नात्मेति वक्तुमयमध्यायः १ ॥

श्री
म॰रा॰
टी॰
२५

शक्रमः कर्तुमितिशेषः २ ४ ५ आयत्यामुत्तरकाले तदात्वेवर्त्तमानकाले अगतिर्दुर्मार्गः गतिः सन्मार्गः ६ राज्यप्रतिहे
तं राज्यकर्तृशक्तिं ७ देहमनसोर्दुःखाश्रयेनत्वात्मेतिज्ञात्वा स्वस्थेन राज्यं कर्त्तव्यमितितात्पर्यं निर्द्वंद्वशरीरं विना आधिर्नास्ति मनो

राजन्विदितधर्मोऽसि नतेऽस्त्यविदितं क्वचित् उपशिक्षामि तेहं त्वं सदैव नच शक्नुमः २ नवक्ष्यामि न
वक्ष्यामीत्येवं मनसि मे स्थितं अतिदुःखोऽनुवक्ष्यामि तन्निबोध जनाधिप ३ भवतः संप्रमोहेन
सर्वं संशयितं कृतं विक्लवं च वचनः प्राप्तम बलत्वं तथैव च ४ कथं हि राजा लोकस्य सर्वशास्त्र
विशारदः मोहमापद्यते दैन्याद्यथा कापुरुषस्तथा अगतिश्च गतिश्चैव लोकस्य विदिता तव
आयत्यां च तदात्वे च नतेऽस्त्यविदितं प्रभो ६ एवं गते महाराज राज्यं प्रति जनाधिप हेतुमत्र प्रवक्ष्या
मि तमिहैकमनाः शृणु ७ द्विविधो जायते व्याधिः शारीरो मानसस्तथा परस्परं तयोर्जन्म निर्द्व
न्द्वं नोपलभ्यते ८ शारीराज्जायते व्याधिर्मानसो नात्र संशयः मानसाज्जायते व्याधिः शारीर इति
निश्चयः ९ शारीरं मानसं दुःखं योतीतमनुशोचति दुःखेन लभते दुःखं द्वावनर्थौ च विंदति १०
शीतोष्णे चैव वायुश्च त्रयः शारीरजा गुणाः तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणं ११ ते
षामन्यतमोद्रेके विधानमुपदिश्यते उष्णेन बाध्यते शीतं शीतेनोष्णं प्रबाध्यते १२ ॥

विनाव्याधिर्नास्तीत्यर्थः ८ ९ १० शीतोष्णे कफपित्ते वायुर्वातः ११ विधानं चिकित्सा उष्णेनद्रव्येण १२ ॥

१३ कश्चिदिति कश्चिन्मूढोहि त्वं सुखादिस्मृत्वा सुखकालेन हर्षं पुत्रादिं स्मरन् शोकेन हर्षं बाधते कश्चिद्दुःखकाले ऽतीतं सुखं विस्मरन् हर्षेण।
शोकं बाधते इदं शुभं यं देहाद्यभिमानिविषयं १४ त्वं तु शरीरमानसाभ्यामन्यः कालत्रयेपि न दुःखी न वा सुखी अतस्तदुभयस्मर
सत्त्वं रजस्तमश्चेति मानसाः स्युस्त्रयो गुणाः तेषां गुणानां साम्यं यत्तदाहुः स्वस्थलक्षणं १२ तेषा
मन्यतमोत्सेके विधानमुपदिश्यते हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते १३ कश्चित्त्वं सुखे वा
र्तमानो दुःखस्य स्मर्तुमिच्छसि कश्चिद्दुःखे वर्तमानः सुखस्य स्मर्तुमिच्छसि १४ स त्वं न दुःखी दुः
खस्य न सुखी च सुखस्य वा न दुःखी सुखजातस्य न सुखी दुःखजस्य वा १५ स्मर्तुमर्हसि कौरव्य
दिष्टं हि बलवत्तरं अथवा ते स्वभावोयं येन पार्थिव क्लिश्यसे १६ दृष्ट्वा सभागतां कृष्णामेकवस्त्रां
रजस्वलां मिषतां पाण्डुपुत्राणां न तस्य स्मर्तुमर्हसि १७ प्रव्राजनं च नगरादजिनैश्च विवासनं म
हारण्यनिवासश्च न तस्य स्मर्तुमर्हसि १८ जटासुरात्परिक्लेशं चित्रसेनेन चाहवे सैन्धवाच्च प
रिक्लेशं कथं विस्मृतवानसि १९ पुनरज्ञातचर्यायां कीचकेन पदा वधं द्रौपद्या राजपुत्र्या
श्च कथं विस्मृतवानसि २० ॥
णानर्हत्वात्सुखकाले दुःखं दुःखकाले सुखं वा स्मर्तुं नार्हसि अथापि चेत्स्मरसि तर्हि दिवमेव बलीय इत्याह स्मार्तुमर्हसीति १५ अथ ते ते वा
देहादिसंघातममानिनः स्वभाव एवेति चेत् किं द्रौपदीक्लेशादिकं दुःखं न स्मर्तुमर्हसि पितु अर्हस्येवेत्याह अथवेत्यादिना १६ १७ २०

श्री॰
म॰ रा॰
टी॰
३॰

यत्रयथावतेद्रोणभीष्माभ्यामात्मतुल्याभ्यांसहयुद्धमासीत तत्तेतथातेतत्त्वयात्मसमेनसाप्येकेनयोद्धव्यंउपस्थितमितियोजना।
द्रोणादिवन्मनोपित्वत्तोन्यदित्याशयः एकेननिर्विकल्पावस्थेनआत्मनामनोनाशोभवतीत्यर्थः २१ तस्मिन्मनसिवासनातां।
तंसंतानरूपेअनिर्जितेसतिदेहांतरेपिपूर्वसंस्कारानवयुद्धंतत्तस्ययुद्धप्राणिभिरनिर्वार्यत्वादनंतमितीति २३ तस्मादिति यस्माद

यत्रतेद्रोणभीष्माभ्यांयुद्धमासीदरिंदम मनसैकेनतद्युद्धमिदंघोरमुपस्थितं २१ यत्रनास्तिश
रैःकार्यंनमित्रैर्नचबंधुभिः आत्मनैकेनयोद्धव्यंतत्तेयुद्धमुपस्थितं २२ तस्मिन्ननिर्जितेयुद्धे।
प्राणान्यदिविमोक्ष्यसे अन्यंदेहंसमास्थायततस्तैरपियोत्स्यसे २३ तस्माददद्यैवगंतव्यंयुध्य।
स्वभरतर्षभ परमव्यक्तरूपस्यव्यक्तंत्यक्त्वास्वकर्मभिः २४ तस्मिन्ननिर्जितेयुद्धेकामवस्थां।
गमिष्यसि एतज्जित्वामहाराजकृतकृत्योभविष्यसि २५ एतांबुद्धिंविनिश्चित्यभूतानामागतिं
गतिं पितृपैतामहेवृत्तेशाधिराज्यंयथोचितं २६ दिष्ट्यादुर्योधनःपापोनिहतःसानुगोयुधि
द्रौपद्याःकेशपाशस्यदिष्ट्यात्वंपदवींगतः २७ ॥

वंतस्मातअद्यैवस्वकर्मभिर्यमाद्यष्टांगैर्व्यक्तंस्थूलशरीरंत्यक्त्वाअव्यक्तरूपस्यमनसःपरंशत्रुभूतंएकात्म्यंगंतव्यंप्राप्तव्यंअतोयुध्य
स्वमनोजयार्थंसन्नद्धोभवेत्यर्थः २४ तस्मिन्मनसि कामवस्थांअवाच्यामित्यर्थः एतत्मनः २५ एतांमनोदेहाभ्यामन्यआत्मानं
वंरूपां भूतानामागतिंगतिंचमनस्तादात्म्येनहतामवेत्यतदपहायहर्षशोकविमुक्तःसन्राज्यंकुर्वित्यर्थः २६ ॥ ३॰

२८ षोडशः १६ असंतोषः मनस्तादात्म्यंत्यक्त्वाहर्षविषादशून्योराज्यंयत्नांश्चकुर्वितस्कंततत्रत्यागोवाज्ञात्रेणानभवति
किंतुमनोनिरोधेन सचसंतोषेकाग्र्यविनयवैराग्यशांतिधैर्यविवेकारत्यागान्तुद्वेगादिनासाध्यः राज्यंत्वसंतोषादिम

यजस्ववाजिमेधेनविधिवद्दक्षिणावता वयंतेकिंकराःपार्थवासुदेवश्चवीर्यवान् २८
इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मभीमवाक्यंनामषोडशोध्यायः १६ युधिष्ठिरउ०
असंतोषःप्रमादश्चमदोरागोप्रशांतता बलमोहोभिमानश्चाप्युद्वेगश्चैवसर्वशः १ एभिः
पाप्मभिराविष्टोराज्यंत्वमभिकांक्षसे निरामिषोविनिर्मुक्तःप्रशांतःसुसुखीभव २ यइ
मामखिलांभूमिंशिष्यादेकोमहीपतिः तस्याप्युदरमेकंवैकिमिदंत्वंप्रशंससि ३ नाह्ना
पूरयितुंशक्यानमासैर्भरतर्षभ अपूर्यांपूरयन्निच्छामायुषापिनशक्नुयात् ४ यथेद्धः
प्रज्वलत्यग्निरसमिद्धःप्रशाम्यति अल्पाहारतयात्वग्निंशमयौदर्यमुत्थितं ५ आत्मोद
रकृतेप्राज्ञःकरोतिविघसंबहुः जयोदरंपृथिव्यातेश्रेयोनिर्जितयाजितं ६ मानुषान्का
मभोगांस्त्वमैश्वर्यंचप्रशंससि अभोगिनोबलाश्चैवयांतिस्थानमनुत्तमं ७

नाकर्तव्यमतोराज्याकांक्षीहयथापूर्वंतिमाकुरु किंतुराज्यंत्यक्त्वासं
तोषादितिष्ठएवमभवेतिश्लोकद्वयार्थः १ ४ इद्धःप्रदीप्तः ५ श्रेयसापरलोकजयेनैवपृथिवीजिताभवतीतितेनवजितं
जयएवास्तीतिभावः ६ अबलास्तपःक्षीणाः ७

अलब्धलाभोयोगःलब्धसंरक्षणंक्षेमस्तद्भयंधर्माधर्मात्मकसंसाररूपत्वान्महद्भयंतस्मान्मुच्यस्वमुक्तोभव ८ एकोति
व्याघ्रइवस्वार्थपरएवराजाऽतोवध्यतेपाराथ्यंत्वस्यानुषंगिकंनमोचयितेत्तममितिभावः ९ विषयानिति बहिरर्थो।

योगःक्षेमश्चराष्ट्रस्यधर्माधर्मौत्वयिस्थितौ मुच्यस्वमहतोभारात्त्यागमेवाभिसंश्रय ८ ए॰
कोदरकृतेव्याघ्रःकरोतिविघसंबहु तमन्येप्युपजीवंतिमंदालोभवशामृगाः ९ विषयान्प्र
तिसंगृह्यसंन्यासंकुर्वतेयदि नचतुष्यंतिराजानःपश्यबुद्ध्यंतरंयथा १० पत्राहारैरश्मकुट्टैर्दं
तोलूखलिकैस्तथा अब्भक्षैर्वायुभक्षैश्चतैरयंनरकोजितः ११ यश्चेमांवसुधांकृत्स्नांप्र
शासेदखिलांनृपः तुल्याश्मकांचनोयश्चसकृतार्थोनपार्थिवः १२ संकल्पेषुनिरारंभोनि
राशोनिर्ममोभव अशोकंस्थानमातिष्ठन्निहचामुत्रचाव्ययं १३ निरामिषानशोचंतिशो॰।
चसित्वंकिमामिषं परित्यज्यामिषंसर्वंमृषावादात्प्रमोक्ष्यसे १४ पंथानौपितृयानश्चदेवा
यानश्चविश्रुतौ ईजानाःपितृयानेनदेवयानेनमोक्षिणः १५ तपसाब्रह्मचर्येणस्वाध्यायेन

मदर्थंयः विमुच्यदेहान्यास्यान्तिसत्यादविषयगताः ॥ १६ ॥

१४ ईजानाःवाग्निमाधिमिताः मोक्षणःनिःसंगाः १५ ॥

स्यर्त्कोऽतःसंन्यासीचन्नबध्यतइत्युक्तंतन्नबुद्ध्यंतरंबुद्धेर्विपर्ययोयथातथापश्यजानीहि १० एवंचेत्पत्राहारादिकंमुनयोनकुर्युरि
तिद्वयोर्भावः ११ १२ मनसैवत्यागःकार्यइत्येतन्निरस्यति निरामिषाइति अतआत्मानंत्यागीतिवदन्मृषावादीभवसीत्यर्थः

बंधनंराज्यसंगः गताइतिशेषः ताभ्यांआमिषाभ्यां ७ यत्तुपितृपैतामहंराज्यमित्युक्तंतत्रापि स्वस्यासंगंदर्शयति अपि
गाथामिति ८ ९ यदुक्तंदिष्ट्यादुर्योधनोहतस्त्वितितत्राहप्रज्ञेति मंदत्वादेवप्रज्ञाप्रासादमारोढुमशक्तः अशोच्यानस्वर्गता
न्दुर्योधनादीन् शोचतस्त्वद्वादीननपश्यसिपरङः खेनसत्वीभवन्सुखोसीतिभावः २० कस्तर्हिबुद्धिमानित्यतआहदृ

आमिषंबंधनंलोकेकर्मेहोक्तंतथामिषं ताभ्यांविमुक्तःपापाभ्यांपदमाप्नोतितत्परं ७ अपि
गाथांपुरागीतांजनकेनवदंत्युत निर्द्वंद्वेनविमुक्तेनमोक्षंसमनुपश्यता ८ अनंतंवतमेवि
त्तंयस्यमेनास्तिकिंचन मिथिलायांप्रदीप्तायांनमेदह्यतिकिंचन ९ प्रज्ञाप्रासादमारुह्यान
शोच्यान्शोचतोजनान् जगतीस्थानिवाद्रिस्थोमंदबुद्धीन्चक्षते २० दृश्यंपश्यतियःप
श्यन्सचक्षुष्मान्सबुद्धिमान् अज्ञातानांचविज्ञानात्संबोधाद्बुद्धिरुच्यते यस्तुवाचंविजा
नातिबहुमानमियात्सवै ब्रह्मभावप्रपन्नानांवैद्यानांभावितात्मनां २२ ॥

दृश्यमिति दृश्यंद्रष्टुंयोग्यंकर्तव्यमकर्तव्यंच अज्ञातंज्ञापयतितस्यकर्तव्यत्वमकर्तव्यत्वंवासंबोधयतिसम्यक्निश्चाययतिसाबु
द्धिस्तद्वान् बुद्धिमान् २१ यस्तुपरांबुद्धिंविनिश्चित्यप्राप्तस्तंतत्राहयस्त्विति यस्तुवैद्यानांविद्यावतांवाचंविजानातिनत्वतदर्थंसत्वा
दृशोबहुमानंइयात् यद्वन्नपुपदेष्ट्योग्यमात्मानमन्यते नतत्तत्त्वंविंदति २२ ॥

श्री॰
म॰शा॰
टी॰
३२

कस्तर्हि तत्त्वं विंदतीत्यत आह यदेति यदा यस्मिन्काले भूतानां वियदादीनां पृथग्भावं नानात्वं एकस्थं एकस्मिन्नात्मनि पर्यवसन्नं
विलीनमिति यावत् घटशरावादीनामिव मृन्मात्रं अनुपश्यति शास्त्राचार्योपदेशमनु ध्यानेन साक्षात्करोति तथा तत एकस्मादे
व विस्तारं उत्पत्तिं च पश्यति तदा ब्रह्म संपद्यते तत्त्वं विंदति २३ ते बुद्धिमंतस्तां गतिं ब्रह्मसंपत्तिं यांति न तु त्वादृशा विद्वांसः श्रुतप्रमा

यदा भूतपृथग्भावमेकस्थमनुपश्यति तत एव च विस्तारं ब्रह्म संपद्यते तदा २३ ते जनास्तां ग
तिं यांति नाविद्वांसोल्पचेतनाः नाबुद्धयो नातपसः सर्वं बुद्धौ प्रतिष्ठितं २४ इति श्रीमहाभार
ते शांतिपर्वणि राजधर्मेषु युधिष्ठिरवाक्ये सप्तदशोध्यायः १७ वैशंपायन उ॰ तूष्णींभूतं तदा रा
जानं पुनरेवार्जुनोब्रवीत् संतप्तः शोकदुःखाभ्यां राज्ञो वाक्शल्यपीडितः १ अर्जुन उवाच
कथयंति पुरावृत्तमितिहासमिमं जनाः विदेहराज्ञः संवादं भार्यया सह भारत २ उत्सृज्य रा
ज्यं भैक्ष्यार्थं कृतबुद्धिं नरेश्वरं विदेहराजमहिषी दुःखिता यदभाषत ३ ॥

णाभिज्ञाः यतोल्पचेतसः
मंदबुद्धयो बहिर्मुखा इत्यर्थः कथं तर्हि बुद्धिमंतो भवंतीत्यत आह नाबुद्धयो नातपसो न ते अबुद्धयो न तपसैव बुद्धिः प्राप्यत
इत्यर्थः २४ सप्तदशः १७ तूष्णींभूतं १ बुद्ध्यर्थं तपोनुष्ठातुं वनमेवाश्रयितुं इत्युक्तं तत्र कर्मणैव हि संसिद्धिमास्थिता जनकाद
य इत्युक्तेर्गृहेपि चित्तशुद्धिकरं यज्ञादिकं तपोस्तीति आख्यायिकामुखेन प्रतिपादयिष्यन्नर्जुन उवाच कथयंतीति २ ॥ ३२

पावकंयज्ञादिहाराशोयकं ४ धानाभ्रष्टयवानिरीहंविगतस्पृहं ५ हेतुमतसक्तियुक्तं ६ नतेवरः नतेत्वयावरणीयः ७ प्रतिज्ञा
सर्वसंगात्त्यजामीत्येवंरूपास्वल्पेनापिकौडिकादिसंग्रहेणनष्टेत्यर्थः ८ पतेनधानामुष्टिना ९ यतोनिष्क्रियः अतोदेवता

यत्नान्यपत्यंदाराश्चरत्नानिविविधानिच पंथानंपावकंहित्वाजनकोमौण्ड्यमास्थितः ४
तंददर्शप्रियाभार्याभैक्ष्यवृत्तिमकिंचनं धानामुष्टिमुपासीनंनिरीहंगतमत्सरं ५ तमुवाच
समागम्यभर्त्तारमकुतोभयं क्रुद्धामनस्विनीभार्याविविक्तेहेतुमद्वचः ६ कथमुत्सृज्यराज्यं
स्वंधनधान्यसमन्वितं कापालीवृत्तिमास्थायधानामुष्टिर्नतेवरः ७ प्रतिज्ञातेन्यथाराजन्वि
चेष्टाचान्यथातव यद्राज्यंमहदुत्सृज्यस्वल्पेलभ्यसिपार्थिव ८ नैतेनातिथयोराजन्देवर्षि
पितरस्तथा अद्यशक्यास्त्वयाभर्तुंमोघस्तेयंपरिश्रमः ९ देवतातिथिभिश्चैवपितृभिश्चैवा
पार्थिव सर्वैरेतैःपरित्यक्तःपरिव्रजसिनिष्क्रियः १० यस्त्वंत्रैविद्यवृद्धानांब्राह्मणानांसहस्रशः
भर्ताभूत्वाचलोकस्यसोद्यतैर्भृतिमिच्छसि ११ श्रियंहित्वाप्रदीप्तांत्वंश्ववत्संप्रतिवीक्ष्यसे अ
पुत्राजननीतेद्यकौशल्याचापतिस्त्वया १२ अभीचधर्मकामास्त्वांक्षत्रियाःपर्युपासते त्वदा
शामभिकांक्षंतःकृपणाःफलहेतुकाः १३ तांश्चत्वंविफलान्कृत्वाकंनुलोकंगमिष्यसि रा

दिभिःपरित्यक्तःसन्नेवपरिव्रजसि १० भृतिंस्वोदरभरणं ११ १२ फलहेतुकाः फलार्थिनः १३ परतंत्रेषुग्रहस्थायात्तेषु १४

१५ १६ निपीयतेस्मिन्स्वेच्छयागोभिर्जलमितिनिपानंआहावः कूपोपांतस्थः तद्वज्जलाशयइतियावत् तद्वत्स्थूला तथा आश्रः फलवान्पादिनांमाश्रयश्चभूत्वाऽन्यानडुद्वार्थकथंपर्युपासेसेउपास्से १७ हन्तिनमपिन्यासैः सर्वकर्मत्यागोरूपे तेक्रव्यादाः मांसादाः त्वांदंति अनर्थकेशरूपार्थहीने १८ यस्मामिति त्रिविष्टब्धंत्रिदंडः १९ अवसीयसे अध्यवस्यसि

नैवतेस्तिपरोलोकोनापरः पापकर्मणः यर्मातदारान्परित्यज्ययत्त्वमिच्छसिजीवितं १५ स्रजोगंधात्रलंकारान्वासांसिविविधानिच क्रिमर्थमभिमंतत्यज्यपरिव्रजसिनिष्क्रियः १६ निपा नंसर्वभूतानांभूत्वात्वंपावनंमहत् आढ्यावनस्पतिर्भूत्वासोन्यांस्त्वंपर्युपाससे १७ त्वांदंतिह स्तिनंन्यासैः क्रव्यादावहवोभुत बहवः क्रिमयश्चैवकिंपुनस्त्वामनस्त्वामनर्थकं १८ यस्मा कुंडिकांभित्त्वात्रिविष्टब्धंचयोहरेत् वासश्चापहरेत्तस्मिन्कथंतेमानसंभवेत् १९ यस्त्वयंसर्व मुत्सृज्यधानामुष्टेरनुग्रहः यद्वानेनसमंसर्वंकिमिदंह्यवसीयसे २० धानामुष्टिरिहार्थश्चे त्प्रतिज्ञातेविनश्यति कावाहंतववकोमेत्वंकश्चतेमय्यनुग्रहः २१ ॥

अनेनधानामुष्टिनासर्वंराज्यादिकंसमं संगितत्वाविशेषात् २० इहार्थइति जीवनार्थंबाह्यमप्यर्थंत्यक्तुमशक्तः कथमांतरा न्देहेंद्रियादीस्त्यक्ष्यति तथाचसर्वसंगत्यागप्रतिज्ञाव्यर्थैव किंतर्हिसर्वसंगत्यागस्वरूपमत आह काचेति देहेंद्रियमनोबु द्धिविषयाणांत्यागोशुद्धचिन्मात्रस्यत्वाहंचताहशीका ममचत्वंकः नह्यसंगचिन्मात्रयोर्द्वयोः परस्परसंबंधोस्ति भेदकोपा ३३

येरभावात् एवंसतिमयिकश्चतेऽनुग्रहः नकश्चिदित्य र्थः २१ ॥

एवमसंगस्यतवराज्यंकुर्वतोयथाकथंचित्प्रारब्धकर्मावसानपर्यंतंदेहस्थाश्यतः कुण्डिकाद्युपेतयाराज्यमेवमंगलमत्रग्राह्य
कमित्याह प्रशाधीत्यादिना २२ सौविकैःपरमहंसाश्रमार्थिभिःसंन्यासिभिःसंभृतानर्थान्कुण्डिकादीन्वीर्त्ययःस्वयमपितथा
करोतिसकिंतुततराज्यादिकंत्यजतिअपितुनैवत्यजति किंतुउचितंपरिग्रहंत्यक्त्वादेवोमहत्त्वादनुचितंपरिग्रहांतरमेवकरो

प्रशाधिपृथिवींराजन्यदितेनुग्रहोभवेत् ग्रामान्देशान्शयनंयानंवासांस्याभरणानिच २२ श्रिया
विहीनैरधनैस्त्यक्तमित्रैरकिंचनैः सौविकैःसंभृतानर्थान्यःसंत्यजतिकिंतुतत् २३ योयंपते
प्रतिगृह्णीयाद्यश्चदद्यात्सदैवहि तयोस्त्वमंतरंविद्धिश्रेयांस्ताभ्यांकउच्यते २४ सदैवयाचमा
नेषुतथादंभान्वितेषुच एतेषुददितांदत्तादावाग्निविवर्द्धते २५ जातवेदायथाराजन्नादा
ग्धोवोपशाम्यति सदैवयाचमानोहितथाशाम्यतिवैद्विजः २६ सतांवेददतोन्नंचलोकेस्मिन्प्र
कृतिर्ध्रुवा नचेद्राजाभवेद्दाताकुतःस्युर्मोक्षकांक्षिणः २७ अन्नाद्गृहस्थालोकेस्मिन्भिक्षव
स्ततएवच अन्नात्प्राणाःप्रभवतिअन्नदःप्राणदोभवेत् २८ गृहस्थेभ्योपिनिर्मुक्तागृहस्थानेव ॥
संश्रिताः प्रभवंचप्रतिष्ठांचदांताविन्दंतआसते २९ त्यागान्नभिक्षुकाविघान्नमौण्ड्यान्नचयाचना ॐ

तीत्यसंगात्वमसपडर्लभमित्यर्थः २३ एतदेवाह्वयइति २४ सदैवयाचमा त् ऋजुस्तुयोर्थंत्यजतिनसुखंविविद्धिभिक्षु ३०
नःपरिव्राड् २५ सवत्क्लेशानदग्धोवोपशाम्यत्यग्निवदित्याह जातेति २६ एतच्चगृहस्थाधीनमित्याहसतामिति सतांसंन्यासिनां

श्री॰
शां॰रा॰
टी॰
३४

ऋज्जत्वमेवाह असक्त इति ३१ दानार्थं दातं प्राप्तुं सिताः बद्धाः मठो मे भूयात् शिष्यो मे भूयात् मानो मे भूयादित्यादिभिः आमिषं

असक्तः सक्तवद्गच्छन्निःसंगो मुक्तबंधनः समः शत्रौ च मित्रे च स वै मुक्तो महीपते परिव्रजं
ति दानार्थं मुंडाः काषायवाससः सिता बहुविधैः पाशैः संचिन्वंतो वृथामिषं ३२ त्रयीं च नाम वा
र्तां च त्यक्त्वा पुत्रान्व्रजंति ये त्रिविष्टब्धं च वासश्च प्रतिगृह्णंत्यबुद्धयः ३३ अनिष्कषाये काषाय
मीहार्थमिति विद्धि तं धर्मध्वजानां मुंडानां वृत्त्यर्थमिति मे मति ३४ काषायैरजिनैश्चीरैर्नग्नान्मु
डान्जटाधरान् बिभ्रत्साधून्महाराज जय लोकान्जितेंद्रियः ३५ अग्न्याधेयानि गुर्वर्थं क्रतून्स
पशुदक्षिणान् ददात्यहरहः पूर्वं को नु धर्मवत्तरस्ततः ३६ अर्जुन उ॰ तत्त्वज्ञो जनको राजा लोकेस्मिन्नि
ति गीयते सोप्यसीन्मोहसंपन्नो मा मोहवशमन्वगाः ३७ एवं धर्ममनुक्रांतं सदा दानपरैर्नरैः आनृ
शंस्यगुणोपेताः कामक्रोधविवर्जिताः ३८ प्रजानां पालने युक्ताः दानमुत्तममास्थिता इष्टांल्लो
कानवाप्स्यामो गुरुवृद्धोपचायिनः ३९ देवतातिथिभूतानां निर्वपंतो यथाविधि स्थानमिष्टमवा
प्स्यामो ब्राह्मण्याः सत्यवादिनः ४० इति श्रीमहाभारते शांतिपर्वणि राजधर्मेऽर्जुनवाक्यं अष्टादशः

धनं मठ[illegible]काद्यर्थं ३२ ३३ अनिष्कषाये रागादिदोषवर्जनाभावे ३४ साधून्निष्कषायान् ३५ ३७ ३९ ४० अष्टादशोध्याय १८

वेदाहं ग्रंतःसंगात्पञ्चाबद्धिःकर्मक्कवित्युक्तांहसयनयुधिष्ठिरउवाच वेदेति अपराणिधर्मशास्त्राणिपराणिब्रह्मशास्त्रा
णि कुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाइति त्यजतैवहितमित्येतयमिति कुरुकर्मत्यजेतिचशास्त्रद्वयंवेदजाने
१ तयोर्निश्चयमप्यहंवेदविविदिषयेत्तेनदानेनेत्यादिश्रुतेरात्मवेदनेच्छापर्यंतंकर्मविषयः २ एतमेवप्रव्राजिनोलोकामि

युधिष्ठिरउ॰ वेदाहंतातशास्त्राणिअपराणिपराणिच उभयंवेदवचनंकुरुकर्मत्यजे
तिच १ आकुलानिचशास्त्राणिहेतुभिश्चिंतितानिच निश्चयश्चैवयोमुत्रवेदाहंतंयथा ॥ ५
विधि २ त्वंतुकेवलमस्त्रज्ञोवीरव्रतसमन्वितः शास्त्रार्थतत्त्वतोगंतुमसमर्थःकथंचन
३ शास्त्रार्थसूक्ष्मदर्शीयोधर्मनिश्चयकोविदः तेनाप्येवंनवाच्योहंयदिधर्मंप्रपश्यसि
४ भ्रातृसौहृदमास्थाययदुक्तंवचनंत्वया न्याय्यंयुक्तंचकौंतेयप्रीतोहंतेनतेर्जुन ५
युद्धधर्मेषुसर्वेषुक्रियाणांनैपुणेषुच नत्वयासदृशःकश्चित्त्रिषुलोकेषुविद्यते ६ धर्मं
सूक्ष्मतरंवाच्यंतत्रदुष्प्रतरंत्वया धनंजयनमेबुद्धिमभिशंकितुमर्हसि ७ युद्धशास्त्रवि
देवत्वंनहृद्धाःसेवितास्त्वया समस्तविस्तरविदांनतेषांवापिनिश्चयं ८ तपस्त्यागोविधिरि
च्छंतःप्रव्रजंतीतीच्छोत्तंप्रव्रज्येतिकर्मतत्त्यागश्चत्योर्व्यवस्थामजानन्नं तिनिश्चयस्त्वेषधीमतां परंपरंज्या
सूर्योसीत्याह त्वमित्याद्दिना ३ ४ धर्मंधर्मप्रतिपादकंतत्रविषयेदुष्प्रतरंदुरवगाहं ७ ८ कस्तर्हिनिश्चयइत्यतआह तपइति

॥ ५ ॥ [illegible]

श्री·
म·रा·
टी·
३५

९ एतेषु तपो विभज्यते तप इति १० अरण्य इति अजिजयन्ननं तपो यिधनात् ज्यायः किं तु ततः त्यागाविधी इति भावः १२ त्या गमाद्द उत्तरेणेति १३ श्मशानानीति क्रियावतां जन्ममरणप्रबंधो ऽक्षीर इति त्यागरप्र वक्तव्य इति दर्शितं १४ अविधिमाह अ निर्देश्येति गतिर्मोक्षः अपगानंदरूपः तस्माद्धेतोस्तल्लाभायेत्यर्थः योगाग्निर्नहतीति निरोधः सः प्रधानेच तदिष्टश्च प्रधानेष्टः

यत्त्वेतन्मन्यसे पार्थ न ज्यायोऽस्ति धनादिति तत्र ते वर्तयिष्यामि यथा नैतत्प्रधानतः ९ तपः स्वाध्यायशीला हि दृश्यन्ते धार्मिका जनाः ऋषयस्तपसा युक्ता येषां लोकाः सनातनाः १० अजातशत्रवो धीरास्तथान्ये वनवासिनः अरण्ये बहवश्चैव स्वाध्यायेन दिवं गताः १२ उत्त रेण तु पन्थानमार्या विषयनिग्रहात् अबुद्धिजं तमस्त्यक्त्वा लोकांस्त्यागवतां गताः १३ दक्षिणेन तु पन्थानं यं भास्वन्तं प्रपश्यसि एते क्रियावतां लोका ये श्मशानानि भेजिरे १४ अनिर्देश्या गा तिः सा तु यां प्रपश्यन्ति मोक्षिणः तस्माद्योगः प्रधानेष्टः स तु दुःखं प्रवेदितुं १५ अनुसृत्य तु शास्त्राणि कवयः समवस्थिताः अपीह स्यादपीह स्यात्सारासारदिदृक्षया १६ वेदवा दानतिक्रम्य शास्त्राण्यारण्यकानि च विपाट्य क ॥ २ ॥

योगेनैव ब्रह्म प्राप्यते नान्यथेत्यर्थः यदाहदत्तः स्वसंवेद्यं हि तद्ब्रह्म कुमारी स्त्रीसुखं यथा अयोगी नैव जानाति जात्यन्धो हि यथा घटमिति स तु दुःखं प्रवेदितुं तद्भ्रमज्ञापयितुमशक्यस्तवतत्त्वानधि कारादित्यर्थः १५ अपिर्वार्थे इह वा सारोऽस्ति इह वेति एवमिह वा ऽसार इह वेति शास्त्राण्यालोक्य कवयः सारमुपादाय असारं पतित्यज्य

समवस्थिताः सम्यक् निश्चयं कृतवन्त इत्यर्थः १८ आरण्यकानि वेदान्तान् ॥ २ ॥ ३५

एकांतं द्वैतवर्जितं तत्र युदासेन तत्त्यागेन केचिच्छरीरे स्थितमात्मानं इच्छादिमंतं प्राहुः ममेदं भूयादित्यादिभिरिंगितैर्लिंगैः १८ एवं परमतमुपन्यस्य सिद्धांतमाह अग्राह्यमिति चक्षुषा मनसा केवलं त्वगादिभिरग्राह्यं यतः सूक्ष्मं गिरा वा निर्देश्यं कर्महे तुरविघातये वपुरस्कारो ब्राह्मणोहं गृहस्थोहमिति चक्षुर्वागगोचरत्वं यस्य तत्सूक्ष्ममेव विपरिवर्त्तते जीवरूपेणात्मा ।

अथैकांतमुदासेन शरीरे पांचभौतिके इच्छाद्वेषसमायुक्तमात्मानं प्राहुरिंगितैः १८ अग्राह्यं चक्षु
षा सूक्ष्ममनिर्देश्यं च तद्गिरा कर्महेतुपुरस्कारं भूतेषु परिवर्त्तते १९ कल्याणगोचरं कृत्वा मनस्तृष्णा
निगृह्य च कर्मसंततिमुत्सृज्य स्यान्निरालंबनः सुखी २० अस्मिन्नेवं सूक्ष्मगम्ये मार्गे सद्भिर्निषेविते क
थमर्थमनर्थाढ्यमज्ञ त्वं प्रशंससि २१ पूर्वशास्त्रविदोप्येवं जनाः पश्यंति भारत क्रियासु निरता
नित्यं दाने यज्ञे च कर्मणि २२ भवंति सुदुरावर्त्ता हेतुमंतोपि पंडिताः दृढपूर्वस्मृता मूढा नैतदस्ती
तिवादिनः २३ अमृतस्यावमंतारो वक्तारो जनसंसदि चरंति वसुधां कृत्स्नां वावदूका बहुश्रुताः ॥ ५४ ॥

त्वर्थः १९ कल्याणगोचरं आत्मोन्मुखं निरालंबनः निरहंकारः २० सूक्ष्मगम्ये सूक्ष्मया बुध्यागम्ये सद्भिश्च निषेविते ः तत्र हंकार त्यागरूपे सति कथं वा प्रशंसतिमान अर्थान् उपादीयत्वेन प्रशंससि २१ पूर्वशास्त्रविदः कर्मकांडविदोपि एवमर्थमनर्थत्वेन पश्यंति सु तत्ततानिनः २२ दुरावर्त्ताः दुःखेनापि सिद्धांतं ग्राहयितुमशक्याः दृढः पूर्वः प्राग्भवीयः संस्कारो येषां ते दृढपूर्वं बहुश्रीहावप्या

द्वे पार्थयत्यान लौकिकानप्यर्थान्न वयं जानीमस्तानज्ञातुमर्हतीति न कोऽपि यथा एवं प्राज्ञान् अपि अस्माकमन्येषां च दुर्ज्ञेया इत्य
र्थः २५ महत्त्वैराग्यं महत्परं ब्रह्म तत्त्ववित्तपआदीनामेव २६ ऊनविंशः १९ तस्मिन् वाक्यांतरे वाक्यमित्यादिना दंडएव हि राजेंद्र त्वत्त्रय।

पार्थयान्न विजानीमः कस्तानज्ञातुमिहार्हति एवंप्राज्ञान्सतश्चापि महतः शास्त्रवित्तमान् २५ तपसा
महदाप्नोति बुद्ध्या वै विंदते महत् त्यागेन सुखमाप्नोति सदा कौंतेय तत्त्ववित् २६ इति श्रीमहाभारते शां
तिपर्वणि राजधर्मे युधिष्ठिरवाक्यं एकोनविंशोऽध्यायः १९ वैशंपायन उ० तस्मिन्वाक्यांतरे वक्ता देवस्था
नो महातपाः अभिनीततरं वाक्यमित्युवाच युधिष्ठिरं १ देवस्थान उवाच यद्वचः फाल्गुनेनोक्तं न ज्यायो
स्ति धनादिति अत्र ते वर्तयिष्यामि तदेकाग्रमनाः शृणु २ अजातशत्रो धर्मेण कृत्स्ना च वसुधा जिता तां
जित्वा च वृथा राजन्न परित्यक्तुमर्हसि ३ चतुष्पदी हि निःश्रेणी ब्रह्मण्येषा प्रतिष्ठिता तां क्रमेणा महा
बाहो यथावज्जय पार्थिव ४ तस्मात्पार्थ महायज्ञैर्यजस्व बहुदक्षिणैः स्वाध्याययज्ञा ऋषयो ज्ञानय
ज्ञास्तथापरे ५ ॥

मौनं मुंडनमित्यंतेन ग्रंथेन आत्मविविदिषोन्यंतैः पूर्वकर्माणि कर्तव्यानि पश्चात्त्याज्यानीति युधिष्ठिरमतं ब्राह्मणविषयं न तु क्षत्रियविषयमिति
प्रतिपाद्यते वाक्यांतरे वाक्यावसरे अभिनीततरं युक्तिमत्तरं १ ३ चतुष्पदी चतुराश्रमी ४ तामेवाह स्वाध्यायेति क्रमाद्ब्रह्मचारियतिगृ
हस्थवानप्रस्थानत्वपस्वेत्यर्थः ५ ॥

वैखानसानां हैरण्यगर्भाणां ६ धनं हेतुः कारणं यस्य तस्य यज्ञादेः यज्ञाद्यर्थं ईहतो धनं तस्यानीहैव गरीयसी प्रक्षालनाद्धि
पंकस्य दूरादस्पर्शनं वरमिति न्यायात्‌ तमिमं धनधर्मं यः तद्विधं उपाश्रयेत्तस्य दोषो भूयानिति ७ चोदितो यस्मात्‌ विधि
कारणात्‌ यज्ञार्थं धनसंहारं धनसंचयं आत्मानमिति बुद्ध्या तृषितः आत्मानं देहं न दद्यात्त्रियं धनं वा अनर्हते अयोग्याय कर्मणोऽस

कर्मनिष्ठांश्च बुद्ध्येथास्तपोनिष्ठांश्च भारत वैखानसानां कौन्तेय वचनं श्रूयते यथा ६ ईहतो धन
हेतोर्यस्तस्यानीहा गरीयसी भूयान्दोषो हि वर्धेत यस्तं धर्मं समाश्रयेत्‌ ७ कृत्स्नं च द्रव्यसंहार
कुर्वन्ति विधिकारणात्‌ आत्मानं तृषितो बुद्ध्या भ्रूणहा त्वानबुध्यते अनर्हते यद्ददाति न ददाति
यदर्हते ८ अर्हानर्हापरिज्ञानात्‌ दानधर्मोऽपि दुष्करः ९ यज्ञाय सृष्टानि धनानि धात्रा यष्टा
दिष्टः पुरुषो रक्षिता च तस्मात्सर्वं यज्ञ एवोपयोज्यं धनं ततोऽनन्तर एव कामः १० यज्ञैरिन्द्रो
विविधैरन्नवद्भिर्देवान्सर्वानभ्ययाद्भूरितेजाः तेनेन्द्रत्वं प्राप्य विभ्राजतेऽसौ तस्माद्यज्ञे सर्वमे
वोपयोज्यं ११ महादेवः सर्वयज्ञे महात्मा हुत्वात्मानं देवदेवो बभूव विश्वाँल्लोकान्व्याप्य विष्ट
भ्य कीर्त्या विराजते द्युतिमान्कृत्तिवासाः १२ ॥

र्पयति योग्याय च न सः आत्मद्रोहत्वाद्भ्रूणहा
त्वानबुध्यते ८ दानधर्मः शुद्धिधर्मः दैवदुर्ज्ञो धनेश्वरस्य दुष्करं ९ धनेभ्यः सृष्टेऽर्थः यज्ञो दिष्टः यज्ञार्थमेव आत्मनो वेदेन यष्टेर
इति पाठे यज्ञार्थमेव सृष्टः अनंतरः सन्निहितः यज्ञादेव सर्वकामावाप्तिर्भवतीति भावः १० ११ १२ ॥

श्री·
शां·रा·
टी·
३७

भांडउपकरणंपात्रादि १३ १४ विंशोध्यायः २० अत्रैवक्षत्रियस्यैवोक्तानस्यधर्मोश्रयणंदोषः पालनयागदानादिकंश्रणोइ
त्यस्मिन्नर्थेएव १ अमंतुष्टोहिराजाप्रजाः पीडयत्यतः संतोषमेवस्तौति २ मात्रहिः सम्यक्प्रतितिष्ठतियेनतदाहयदेति
यदाप्रसीदतितदात्रहिः प्रतितिष्ठतीतिसंबंधः कदाप्रसीदति यदाकामानजाग्रदादिविषयानसंहरते आत्मनिप्रविला

आविक्षितः पार्थिवोसौमरुत्तः स्वर्ख्याशक्रंयोजयद्देवराजं यज्ञेयस्यश्रीः स्वयंसंनिविष्टायस्मि
न्भांडंकांचनंसर्वमासीत् हरिश्चंद्रः पार्थिवेंद्रः श्रुतस्तेयज्ञैरिष्ट्वापुण्यभाग्वीतशो
कः स्वर्ख्याशक्रंयोजयन्मानुषः संस्तस्माद्यत्तेसर्वमेवोपयोज्यं १४ इतिश्रीमहाभा
रतेशांतिपर्वणिराजधर्मेदेवस्थानवाक्येविंशोध्यायः २० देवस्थानउ० अत्रैवोदाहरंतीम
मितिहासंपुरातनं इंद्रेणसमयेपृष्टोयदुवाचबृहस्पतिः १ संतोषोवैस्वर्गतमः संतोषः पर
मंसुखं तुष्टेनकिंचित्परतः साससम्यक्प्रतितिष्ठति २ यदासंहरतेकामानकूर्मोंगानी
वसर्वशः तदात्मज्योतिरचिरात्स्वात्मन्येवप्रसीदति ३ नबिभेतियदाचायंयदाचास्मान्न
बिभ्यति कामद्वेषौचजयतितदात्मानंप्रपश्यति ४ यदासौसर्वभूतानांनद्रुह्यतिनका

पयतितदात्मज्योतिः स्वयंज्योतिरात्माचात्मन्येवस्वरूपेएवप्रसीदतिद्रष्टृदर्शनदृश्यादिभेददर्शनरूपंमलंत्यजति ३ नबिभे ३७
तिद्वितीयाभावात्अस्मान्नबिभ्यतिअस्पनिष्क्रियत्वात्समायौव्युत्थानेतुकामक्रोधौजयति ४ यदाकाले ५ ॥

एवमितिभूतानि अधिकारिजीवाः यथायथायेनयेनप्रकारेणयद्यत्कर्मयज्ञादिकंवाशमगुणोपासनंवासांगमव्यंगंवाक रोतितत्तत्कर्मतथातथातेनतेनप्रकारेणफलानामाविर्भूतंआत्मनास्वानुभवेनपश्यंति एतेनतंयथायथोपासतेतत्तथे तःप्रेत्यभवतीतिश्रुतेरर्थोदर्शितः तस्मात्सर्वेभ्योभयंददज्ञयंविंदत्यभयंददभयंविंदतीतिबुध्यस्व सम्यक्प्रजापाल नेनत्वमप्यभयंप्राप्नुहीतिभावः ६ अन्यइति सामप्रीतिव्यायामयत्न अपरेएकंध्यानेनप्रशंसंतिइतिनअपितुप्रशंसं

एवंकौंतेयभूतानितंतंधर्मंतथातथा तदात्मनाप्रपश्यंतितस्माद्बुध्यस्वभारत ६ अन्येसाम
प्रशंसंतिव्यायाममपरेजनाः नैकंनचापरेकेचिदुभयंचतथापरे ७ यज्ञमेकेप्रशंसंतिसं
न्यासमपरेजनाः दानमेकेप्रशंसंतिकेचिद्देवप्रतिग्रहं ८ केचित्सर्वंपरित्यज्यतूष्णींध्यायं
तआसतेराज्यमेकेप्रशंसंतिप्रजानांपरिपालनं ९ हत्वाछित्वाचभित्वाचकेचिदेकांत
शीलिनः एतत्सर्वंसमालोक्यबुधानामेषनिश्चयः १० अद्रोहेणैवभूतानांयोधर्मःससा
तांमतः अद्रोहःसत्यवचनंसंविभागोदयादमः ११ ॥ ॥

न्त्येव उभयंसामव्यायामोपक स्यैव अवश्यामे ४
देनप्रशंसंति अपरेतथैवप्रशंसंति प्राणयानमेकंतेयं ७ पंचाध्येतान्यत्नान्विहाणोतियज्ञेतितृभिः यज्ञसंन्यासदा
नैर्देवसर्वभूतविप्राणांप्रीतिर्भवति प्रतिग्रहंप्रजाभ्योयजमानेभ्योवाद्रव्यायामरूपंमेदाःप्रशंसंति ८ सर्वपरित्यागेनत्वेकं
केचित् एकैवैवेतिपादत्रयेणसामव्यायामोपकस्यैवाह ९ अंत्यपत्नमाहकेचिदेकांतशीलिनः १० सिद्धांतमाहअद्रो

शां०

श्री०
शां० रा०
टी०
३८

प्रजनंपुत्रोत्पादनं प्रधानंचासौइष्टश्चेतिसमासः १२ १३ प्रग्रहेसंग्रहे १४ १५ श्रावणेनशास्त्रश्रवणादिविहितेन १६ १७ २०

प्रजनंस्वेषुदारेषुमार्दवंह्रीरचापलं एवंधर्मंप्रधानेष्टंमनुःस्वायंभुवोऽब्रवीत् १२ तस्मादेतत्प्रयत्ने
नकौंतेयपरिपालय योहिराज्येस्थितःशश्वद्वशीतुल्यप्रियाप्रियः १३ क्षत्रियोयज्ञशिष्टाशीरा
जशास्त्रार्थतत्त्ववित् असाधुनिग्रहरतःसाधूनांप्रग्रहेरतः धर्मेवर्त्मनिसंस्थाप्यप्रजावर्तेतधर्मतः
पुत्रसंक्रामितश्रीश्चवनेवन्येनवर्तयन् १४ विधिनाश्रावणेनैवकुर्यात्कर्माण्यतंद्रितः यएवंव
र्ततेराजाराजधर्मविनिश्चितः १६ तस्यायंचपरश्चैवलोकःस्यात्सफलोदयः निर्वाणंहिसुदुः
प्राप्यंबहुविघ्नंचमेमतं १७ एवंधर्ममनुक्रांताःसत्यदानतपःपराः आनृशंस्यगुणैर्युक्ताःकाम
क्रोधविवर्जिताः १८ प्रजानांपालनेयुक्ताधर्ममुत्तममास्थिताः गोब्राह्मणार्थेयुध्यंतःप्राप्ताग
तिमनुत्तमां १९ एवंरुद्राःसवसवस्तथादित्याःपरंतप साध्याराजर्षिसंघाश्चधर्ममेतंसमाश्रि
ताः अप्रमत्तास्ततःस्वर्गंप्राप्ताःपुण्यैःस्वकर्मभिः २० इतिश्रीमहाभारतेशांतिपर्वणिराजध
र्मेदेवस्थानवाक्येएकविंशोऽध्यायः २१ वैशंपायनउ० अस्मिन्नेवांतरेवाक्यंपुनर्देवार्जुनोऽब्रवी
त् निर्विण्णमनसंज्येष्ठमिदंभ्रातरमच्युतम् १ क्षत्रधर्मेणधर्मज्ञप्राप्यराज्यंसुदुर्लभं जित्वा ३८
चारीन्नरश्रेष्ठतप्यतेकिंभृशंभवान् २ ॥ १ २ ॥

एकविंशोऽध्यायः २१ अस्मिन् अच्युतधर्मात्

३ त्यागः संन्यासः ४ ५ ६ युक्तः आत्मयुक्तः समाधिविति यावत् ७ ८ दंशितः सन्नद्धः ९ १० ब्राह्मणः कश्यपस्य

क्षत्रियाणां महाराज संग्रामे निधनं मतं विशिष्टं बहुभिर्यज्ञैः क्षत्रधर्मविधिः स्मृतः ३ ब्राह्मणा
नां तपस्त्यागः श्रेष्ठधर्मविधिः स्मृतः क्षत्रियाणां च निधनं संग्रामे विहितं प्रभो ४ क्षात्रधर्मो म
हारौद्रः शस्त्रनित्य इति स्मृतः वधश्च भरतश्रेष्ठ काले शस्त्रेण संयुगे ५ ब्राह्मणस्यापि चेद्राज
न्क्षत्रधर्मेण वर्तितः प्रशस्तं जीवितं लोके क्षत्रं हि ब्रह्मसंभवं ६ न त्यागो न पुनर्यज्ञो न तपो म
नुजेश्वर क्षत्रियस्य विधीयन्ते न परस्वोपजीवनं ७ स भवान्सर्वधर्मज्ञो धर्मात्मा भरतर्षभ रा
जा मनीषी निपुणो लोके दृष्टपरावरः ८ त्यक्त्वा संतापजं शोकं दंशितो भव कर्मणि क्षत्रिय
स्य विशेषेण हृदयं वज्रसंनिभं ९ जित्वारीन्क्षत्रधर्मेण प्राप्य राज्यमकण्टकं विजितात्मा म
नुष्येन्द्र यज्ञदानपरो भव १० इन्द्रो वै ब्रह्मणः पुत्रः क्षत्रियः कर्मणा भवत् ज्ञातीनां पापवृत्तानां
जघान नवतीर्नव ११ तच्चास्य कर्म पूज्यं च प्रशस्यं च विशांपते तेनेन्द्रत्वं समापेदे देवानामिति
नः श्रुतं १२ स त्वं यज्ञैर्महाराज यजस्व बहुदक्षिणैः यथैवेन्द्रो मनुजेन्द्र चिराय विगतज्वरः

नवतीर्नव दशाधिकं शताष्टकं ११ इन्द्रत्वं ऐश्वर्यं १२ १३ मा त्वमेवंगते किंचिच्छोचेथाः क्षत्रियर्षभ गतास्ते त्व

श्री·
शां·रा
टी·
३९

१५ द्वाविंशः २२ एवमुक्तस्तु १ गार्हस्थ्यं गृहस्थस्यायं गार्हस्थ्यः तं २ तवक्षत्रियत्वात् अरण्ये संन्यासः ३ ४ ५ दुर्बला

भवितव्यं तथा तत्त्वयहृत्वं भरतर्षभ दिष्टं हि राजशार्दूल न शक्यमतिवर्तितुं १५ इति श्रीमहाभारते।
शांतिपर्वणि राजधर्मे॰ अर्जुनवाक्ये द्वाविंशोध्यायः २२ वैशंपायन उ॰ एवमुक्तस्तु कौंतेयो गुडाकेशे
न पांडवः नोवाच किंचित्कौरव्यस्ततो द्वैपायनोब्रवीत् १ व्यास उ॰ बीभत्सोर्वचनं सौम्य सत्यमेतत्
युधिष्ठिर शास्त्रदृष्टः परो धर्मः स्थितो गार्हस्थ्यमाश्रितः २ स्वधर्मं चर धर्मज्ञ यथाशास्त्रं यथाविधि
न हि गार्हस्थ्यमुत्सृज्य तवारण्यं विधीयते ३ गृहस्थं हि सदा देवाः पितरोतिथयस्तथा भृत्याश्चै
वोपजीवंति तान्भजस्व महीपते ४ वयांसि पशवश्चैव भूतानि च जनाधिप गृहस्थैरेव धार्यंते तस्मा
च्छ्रेष्ठो गृहाश्रमी ५ सोयं चतुर्णामेतेषामाश्रमाणां दुराचरः तं चराविमनाः पार्थ दुश्चरं दुर्बले
न्द्रियैः वेदज्ञानं च ते कृत्स्नं तपश्च चरितं महत् पितृपैतामहं राज्यं धुर्यवद्वोढुमर्हसि ७ तपो य
ज्ञः क्षमा विद्या भैक्षमिंद्रियसंयमः ध्यानमेकांतशीलत्वं तुष्टिर्ज्ञानं च शक्तितः ८ ब्राह्मणा
नां महाराज चेष्टाः संसिद्धिकारिकाः क्षत्रियाणां च वक्ष्यामि तवापि विदितं पुनः ९ यज्ञो विद्या सम

नि अजितानि वतानीन्द्रियाणि तैः ६ ७ विद्या आत्मनो संगत्व ज्ञानं ज्ञानं शास्त्रविषयं ८ ९ ध्यानममतोषः श्रियं प्रति दंड्या ३९

११ २ विलशयान्मूषकान् अप्रवासिनं शूद्रादिसंगिनं १५ १८ बाहुदानदीमनुगतनसमीपे १९ २१ विस्रब्धोम मैवेतानीति
वेदज्ञानं तथाख्यातं तपः सुचरितं तथा द्रविणोपार्जनं भूरि पात्रे च प्रतिपादनं ११ एतानि राजेन्द्र क
र्माणि सुकृतानि विशांपते इमं लोकममुं चैव साधयंतीति नः श्रुतं १२ एषां ज्यायस्तु कौंतेय
दंडज्ञाविकाः अपि गाथामिमां चैव बृहस्पतिरगायत् धारणमुच्यते बले हि तत्स्थिते नित्यं बले दंडः
समाहितः १३ एता विद्याः क्षत्रियाणां राजन्संसिद्धिकारिकाः अपि गाथामिमां चैव बृहस्पतिरगाय
न १४ भूमिरेतौ निगिरति सर्पो बिलशयानिव राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनं १५ सुद्युम्न
श्चापि राजर्षिः श्रूयते दंडधारणात् प्राप्तवान्परमां सिद्धिं दक्षः प्राचेतसो यथा १६ युधिष्ठिरः भग
वन्कर्मणा केन सुद्युम्नो वसुधाधिपः संसिद्धिं परमां प्राप्तः श्रोतुमिच्छामि तेनघ १७ व्यासउ० अत्रा
प्युदाहरंतीममितिहासं पुरातनं शंखश्च लिखितश्चास्तां भ्रातरौ संशितव्रतौ १८ तयोरावसथा
वास्तां रमणीयौ पृथक् पृथक् नित्यपुष्पफलैर्वृक्षैरुपेतौ बाहुदामनु १९ ततः कदाचिल्लिखितः शं
खस्याश्रममागतः यदृच्छयाथ शंखोपि निष्क्रांतोभवदाश्रमात् २० सोभिगम्याश्रमं भ्रातुः शंख
स्य लिखितस्तदा फलानि पातयामास सम्यक्परिणतान्युत २१ उपादाय विस्रब्धो भक्षयामा
स स द्विजः तस्मिंश्च भक्षयत्येव शंखोप्याश्रममागतः २२
निश्चयवान् २२ ॥

श्री० २३ २४ २५ इदंभवताणांकृतंहेपार्थिवसत्तममयाअदत्तादानंकृतमितिअस्मैराज्ञेकथयस्वेतिसंबन्धः २६ २८ अंतपाले-
शां० रा० भ्यःद्वारपालेभ्यः २९ ३० करिष्येइतिमयिविप्रर्षिः ३१ अनिसृष्टानिअदत्तानिगुरुणाज्येष्ठभ्रात्रा ३२ यथादंडधारणेराजाप्र
टी० भक्षयंततस्तंतुशंखोभ्रातरमब्रवीत् कुतःफलान्यवाप्तानिहेतुनाकेनखादसि २३ सोऽब्रवीद्भ्रात
४० रंज्येष्ठमुपस्पृश्याभिवाद्यच इतएवगृहीतानिमयेतिप्रहसन्निव २४ तमब्रवीत्तथाशंखस्तीव्रकोपसमा
न्वितः स्तेयंत्वकृतमिदंफलान्याददतास्वयं २५ गच्छराजानमासाद्यस्वकर्मकथयस्ववै अदत्तादानमेवं
हिकृतंपार्थिवसत्तम २६ स्तेनंमांत्वंविदित्वाचस्वधर्ममनुपालयन् शीघ्रंधारयचौरस्यममदंडंनराधि
प २७ इत्युक्तस्तस्यवचनात्सुद्युम्नंवसुधाधिपं अभ्यगच्छन्महाभागोलिखितःसंशितव्रतः २८ +ज्ञा ६
सुद्युम्नस्त्वंतपालेभ्यःश्रुत्वालिखितमागतं अभ्यगच्छन्महामात्यःपद्भ्यामेवजनेश्वरः २९ तमब्रवीत्स
मागम्यसराजाधर्मवित्तमं किमागमनमाचक्ष्वभगवन्कृतमेवतत् ३० एवमुक्तःसविप्रर्षिःसुद्युम्न
मिदमब्रवीत् प्रतिश्रुत्यकरिष्येतिश्रुत्वातत्कर्तुमर्हसि ३१ अनिसृष्टानिगुरुणाफलानिमनुजा
र्षभ भक्षितानिमहाराजतत्रमांशाधिमाचिरं ३२ सुद्युम्नउ० प्रमाणंचेन्मतोराजाभवतोदंडधार
णे अनुज्ञायामपितथाहेतुःस्याद्ब्राह्मणर्षभ ३३ सभवानभ्यनुज्ञातःशुचिकर्मामहाव्रतः ब्रूहिका
मानतोऽन्यांस्त्वंकरिष्यामिहितेवचः ३४ ॥ माणंतथाऽनुज्ञायामपिहेतुःप्रमाणं ३३ शुचिकर्मामदनुज्ञये ४०
वशोधितदोषः श्रुतकर्माश्रावितकर्माकीर्तनेनापिदोषोनस्पृशतीत्यर्थः ३४ ॥

३५ ३६ ३७ मममांमयावानदूषसे तेनत्वया निष्कृतिःप्रायश्चित्तं ३८ ३९ उदकस्यग्रंथंप्रयोजनंआचमनादिकर्तव्यमितिशे
व्यासउवाच सत्क्रियमाणोब्रह्मर्षिःपार्थिवेनमहात्मना नान्यंसवरयामासतस्माद्दण्डादृतेवरं ३५
ततःसपृथिवीपालोलिखितस्यमहात्मनः करौप्रच्छेदयामासधृतदण्डोजगामसः ३६ सगत्वा
भ्रातरंशङ्खमार्तरूपोब्रवीदिदं धृतदण्डस्यदुर्बुद्धेर्भवांस्तत्क्षन्तुमर्हसि ३७ शङ्खउ० नकुप्येतवधर्म
ज्ञनचदूषयसेमम धर्मस्तुतेव्यतिक्रान्तस्ततस्तेनिष्कृतिःकृता ३८ सगत्वाबाहुदांशीघ्रंतर्पय
स्वयथाविधि देवानृषीन्पितॄंश्चैवमाचाधर्मेमनःकृथाः ३९ तस्यतद्वचनंश्रुत्वाशङ्खस्यलि
खितस्तदा अवगाह्यापगांपुण्यामुदकार्थंप्रचक्रमे ४० प्रादुरास्तांततस्तस्यकरौजलज
सन्निभौ ततःसविस्मितोभ्रातुर्दर्शयामासतौकरौ ४१ ततस्तमब्रवीच्छङ्खस्तपसेदंकृतंमया
माचतत्रविशङ्काभूद्दैवमत्रविधीयते ४२ लिखितउ० किंनुनाहंत्वयापूतःपूर्वमेवमहाद्युते
यस्यतेतपसोवीर्यमीदृशंद्विजसत्तम ४३ शङ्खउवाच एवमेतन्मयाकार्यंनाहंदण्डधरस्तव
सचपूतोनरपतिस्त्वंचापिपितृभिःसह ४४ व्यासउवाच सराजापाण्डवश्रेष्ठश्रेयानेतेनकर्मणा
प्राप्तवान्परमांसिद्धिंदक्षःप्राचेतसोयथा ४५ एषधर्मःक्षत्रियाणांप्रजानांपरिपालनं उत्पा
षः ४० ४१ ४२ ४३ ४४ ॥ थोन्यामहाराजमास्मशोकेमनःकृथाः ४६ ॥

श्री·
शां·रा·
टी·
५१

आख्यायिकातात्पर्यमाह ५० अध्यायः २२ पुनरेव १ स्वधर्मइतिराज्यंकर्तव्यमित्युक्तं आत्रादीनामारण्या।
भ्रातृवस्यहितवाक्यश्रुत्वाउधर्मजस्तस्तम दंडएवहिराजेंद्रक्षत्रधर्मोनमुंडनं ५० इतिश्रीमहाभार
तेशांतिपर्वणिराजधर्मेव्यासवाक्यत्रयोविंशोध्यायः २३ वैशंपायनउवाच पुनरेवमहर्षिस्तं
कृष्णद्वैपायनोमुनिः अजातशत्रुंकौंतेयमिदंवचनमब्रवीत् १ अरण्येवसतातातभ्रातृणांतेम।
नस्विनां मनोरथामहाराजयेतत्रासन्युधिष्ठिर २ तानिमेभरतश्रेष्ठप्राप्नुवंतुमहारथाः प्रशा।
धिपृथिवीपार्थययातिरिवनाहुषः ३ अरण्येदुःखवसतीरनुभूतास्तपस्विभिः दुःखस्यांतेनर
व्याघ्रसुखान्यनुभवंतुवै ४ धर्ममर्थंचकामंचभ्रातृभिःसहभारत अनुभूयततःपश्चात्प्रस्था
तासिविशांपते ५ अर्थिनांचपितृणांचदेवतानांचभारत आनृण्यंगच्छकौंतेयतत्सर्वंचकरि।
ष्यसि ६ सर्वमेधाश्वमेधाभ्यांयजस्वकुरुनंदन ततःपश्चान्महाराजगमिष्यसिपरांगतिं ७
भ्रातृंश्चसर्वान्क्रतुभिःसंयोज्यबहुदक्षिणैः संप्राप्तःकीर्तिमतुलांपांडवेयभविष्यसि ८ वि
द्मतेपुरुषव्याघ्रवचनंकुरुसत्तम शृणुचैवंयथाकुर्वन्नधर्माच्च्यवसेनृप ९ आददानंचविजयंवि
ग्रहंचयुधिष्ठिर समानधर्मकुशलाःस्थापयंतिनरेश्वर १० धर्ममपितत्कर्तव्यमित्याह अरण्येत्यादिना
२ ४ ८ वचनंहिंसाप्रधानःक्षत्रधर्मोमेमाभूदित्येवंरूपंहेकुरुसत्तम ९ आददानस्यपरस्वापहर्तुः समानधर्मः अविग्र

सोधर्मःतत्कुशलाःस्थापयंतिप्रवृत्तेकर्मणि यत्प्रयावस्थापयंतीति
१५४ पात्रेतेविनयादिकंकुर्वंतीत्यर्थः ४ ॥
५१

मर्षयतेदस्यूनपिनदंति एतस्मात्ज्ञेनपापेन ११ १२ आतिष्ठन्नतिचक्रेदः धर्मशास्त्राणांनिग्रहादतिलंघनात् जातादय
र्मान्नहेतोःच्यवते तानिग्रहकृच्छ्रन्नपेतभीश्चभवति १३ १४ १५ १६ गांवाचंमिमतेविचारयंतितेगोमिनोब्रह्मकर्मा।

देवकालप्रतीक्षीयोदस्यून्मर्षयतेनृप शास्त्रजांबुद्धिमास्थाययुज्यतेनैनसाहिसः १ आदायबा
लिषड्भागंयोराष्ट्रंनाभिरक्षति प्रतिगृह्णातितत्पापंचतुर्थांशेनभूमिपः २ निबोधचयथातिष्ठन्
धर्मान्नच्यवतेनृपः निग्रहात्धर्मशास्त्राणामनुकृच्छ्रन्नपेतभीः ३ कामक्रोधावनादृत्यपितेवसम
दर्शनः शास्त्रजांबुद्धिमास्थाययुज्यतेनैनसाहिसः ४ दैवेनाभ्यादत्तोराजाकर्मकालेमहाद्युते न
साधयतियत्कर्मनतत्राहुरतिक्रमं तस्माबुद्धिपूर्वंवानिग्राह्यापवशात्रवः पापैःसहनसंदध्या
द्राष्ट्रगुण्यंचकारयेत् ६ शूराश्चार्याश्चसत्कार्याविद्वांसश्चयुधिष्ठिर गोमिनोधनिनश्चैवपरिपा
ल्याविशेषतः ७ व्यवहारेषुधर्मेषुयोक्तव्याश्चबहुश्रुताः गुणयुक्तेपिनैकस्मिन्विश्वसेतविच
क्षणः अरक्षिताडुर्विनीतोमानीस्तब्धोभ्यसूयकः एनसायुज्यतेराजाडुर्दान्तइतिचोच्यते ८ ये
रक्ष्यमाणाहीयंतेदैवेनाभ्याहतानृप तस्करैश्चापिमृष्यंतेसर्वंतद्राजकिल्बिषं १० ॥

कांडार्थविदोब्राह्मणाः गोमंतोधनिनोवैश्याः ७ ८ स्तब्धोमान्यानमानयन् अभ्यसूयकःगुणेषुदोषदृष्टिः ९
येजनाः दैवेनअवर्षणादिना १० ॥

श्री॰
शा॰रा॰
टी॰
५२

मंत्रनीतिसहायायुपेतेपुरुषकारेकृतेपियदिजनाः हीयंतेक्षीयंतेवातर्हिराज्ञः अधर्मोनास्तीत्यर्थः २१ २२ २३ शत्रून्हत्
त्वाप्राप्यततःशत्रोःसकाशादाजौहतस्यवधंप्राप्तस्यतत्रहेतुरसहायस्येति २४ यत्कर्मकर्तव्यंतत्कर्मकृत्वेतिसंबन्धः २५

समंत्रितेसमनीतेचसर्वतश्चोपपादिते पौरुषेकर्मणिकृतेनास्त्यधर्मोयुधिष्ठिर २१ विच्छिद्यंतेसमारं
भाःसिध्यंतेचापिदैवतः कृतेपुरुषकारेतुनैनःस्पृशतिपार्थिवं २२ अत्रतेराजशार्दूलवर्तयिष्येकथा
मिमां यद्वृत्तंपूर्वराजर्षेर्हयग्रीवस्यपांडव २३ शत्रून्हत्वाहतस्याजौशूरस्याक्लिष्टकर्मणः असहाय
स्यसंग्रामेनिर्जितस्ययुधिष्ठिर २४ यत्कर्मवैनिग्रहेशात्रवाणांयोगश्चाग्र्यःपालनेमानवानां कृत्वा
कर्मप्राप्यकीर्तिंसयुद्धेवाजिग्रीवोमोदतेस्वर्गलोके २५ संत्यक्तात्मासमरेष्वाततायीशस्त्रैश्छिन्नोद
स्युभिर्वध्यमानः अश्वग्रीवःकर्मशीलोमहात्मासंसिद्धार्थोमोदतेस्वर्गलोके २६ धनुर्यूपोरशना
ज्याशरःस्रुक्स्रुवःखड्गोरुधिरंयत्रचाज्यं रथोवेदीकामगोयुद्धमग्निश्चातुर्होत्रंचतुरोवाजिमु
ख्याः २७ हुत्वातस्मिन्यज्ञवह्नावथारीन्पापान्मुक्तोराजसिंहस्तरस्वी प्राणान्हुत्वाचावभृथेरणे
सवाजिग्रीवोमोदतेदेवलोके २८

२६ कामजःक्रोधोयोयुद्धंयुद्धस्थलभूतःअग्निः चातुर्होत्रंब्रह्माद्याश्चत्विजः चतुरश्चत्वारः २७ २८ ॥

५२

सत्यक्तात्मात्यक्ताहंकारः २९ योगः क्रियायां उत्साहः न्यासः अभिमानत्यागः तैर्युक्तः दैवीं सिद्धिं यत्तादिक्रियामन्या
दीयां मानुषीं च सिद्धिं दंडनीतिं महीं च पालयित्वेति योजना स्वयं च यज्ञशीलः ३१ मानुषं लोकमिति संबन्धः तनुत्यजां प्र

याद्भूवत्तत्वबुद्धिपूर्वं नयेन संत्यक्तात्मा यज्ञशीलो महात्मा सर्वांल्लोकान्व्याप्य कीर्त्या मनस्वी वाजिग्री
वो मोदते देवलोके २९ दैवीं सिद्धिं मानुषीं दंडनीतिं योगन्यासैः पालयित्वा महीं च तस्माद्राजा धर्मशी
लो महात्मा वाजिग्रीवो मोदते लोके ३० विद्वांस्त्यागी श्रद्दधानः कृतज्ञस्त्यक्त्वा लोकं मानुषं कर्म कृ
त्वा मेधाविनां विदुषां संमतानां तनुत्यजां लोकमाक्रम्य राजा ३१ सम्यग्वेदान्प्राप्य शास्त्राण्यधी
त्य सम्यग्राज्यं पालयित्वा महात्मा चातुर्वर्ण्यं स्थापयित्वा स्वधर्मे वाजिग्रीवो मोदते देवलोके ३२
जित्वा संग्रामान्पालयित्वा प्रजाश्च सोमं पीत्वा तर्पयित्वा द्विजाग्र्यान् युक्त्या दंडं धारयित्वा प्रजानां
युद्धे क्षीणो मोदते देवलोके ३३ वृत्तं यस्य श्लाघनीयं मनुष्याः संतो विद्वांसश्चार्हयन्त्यर्हणीयं स्वर्गं
जित्वा वीरलोकानवाप्य सिद्धिं प्राप्तः पुण्यकीर्तिर्महात्मा ३४ इति श्रीमहाभारते शांतिपर्वणि
राजधर्मे व्यासवाक्यं चतुर्विंशोऽध्यायः २४ वैशंपायन उ० द्वैपायनवचः श्रुत्वा कुपिते च धनंजये
व्याससमामंत्र्य कौंतेयः प्रत्युवाच युधिष्ठिरः १ युधिष्ठिर उ० न पार्थिवमिदं राज्यं न भोगाश्च पृथग्विधाः

यागादौ ३१ ३२ ३३ ३४ अध्यायः २४ द्वैपायनः कुपिते राज्यका श्रीणायंति मनो मे घ शोको मां रुंधयत्यये २
रणात् १ रुंधयति शोको पहतो गुरूणां बंधूनां वा वाक्यं न शृणोमीति भावः २ ॥

श्री॰ वीरविहीनानां पतिहीनानां ३ ४ न लभ्यते वीराभिर्वीरपत्नीभिरित्यर्थः नापि ताभ्यः कश्चित्पतिं दातुं समर्थोऽस्तीत्यर्थः
शां॰ पा॰ श्रुत्वा वीरविहीनानामपुत्राणां च योषितां परिदेवयमानानां शांतिं नोपलभेऽनघ ३ इत्युक्तः प्रत्यु
टी॰ वाचेदं व्यासो योगविदां वरः युधिष्ठिरं महाप्राज्ञो धर्मज्ञो वेदपारगः ४ व्यास उ॰ न कर्मणा लभ्यते
५३ चेज्यया वा नाप्यस्ति दाता पुरुषस्य कश्चित् पर्याययोगाद्विहितं विधात्रा कालेन सर्वं लभते मनुष्यः
५ न बुद्धिशास्त्राध्ययनेन शक्यं प्राप्तुं विशेषं मनुजैरकाले मूर्खोऽपि चाप्नोति कदाचिदर्थान्कालो
हि कार्यं प्रति निर्विशेषः ६ नाभूतिकालेषु फलं ददंति शिल्पानि मंत्राश्च तथौषधानि तानि च का
लेन समाहितानि सिध्यंति वर्द्धंति च भूतिकाले ७ कालेन शीघ्राः प्रवहंति वाताः कालेन वृष्टिर्ज
लदानुपैति कालेन पद्मोत्पलवज्जलं च कालेन पुष्यंति नगा वनेषु ८ कालेन कृष्णाश्च सिताश्च
रात्र्यः कालेन चंद्रः प्रतिपूर्णबिंबः नाकालतः पुष्पफलं द्रुमाणां नाकालवेगाः सरितो वहंति
९ नाकालवेगाः खगपन्नगाश्च मृगद्विपाः शैलमृगाश्च लोके नाकालतः स्त्रीषु भवंति गर्भा
नायांत्यकाले शिशिरोष्णवर्षाः १० नाकालतो म्रियते जायते वा नाकालतो व्याहरते च बालः
नाकालतो यौवनमभ्युपैति नाकालतो रोहति बीजमुप्तं ११ ॥ ५ कालेन लभते नत्वकाले तत्तत्संप ५३
त्तिलाभकालोऽतीत इति न ताः शोच्याः विशेषं विगतं शेषं यस्मादिति तत्र विशेषं पुत्रादिकं ६ ददंति ददते ७ नगाः द्रुमाः

अस्तंगिरिंभानुरभ्युपैति १३ सेनजितापुत्रशोकार्त्तेनदुःखार्त्तेन १४ पर्यायःकालगतिः १४ नहिनस्तिनहन्यते हननां
स्यकर्त्ताकर्मवानभवतितेनकर्त्रात्मवादश्चतार्किकलौकायतिकमतेतोक्रमेणनिरस्तौ १५ कश्चित्तार्किकःअपरःसां
ख्यःस्वभावतःचित्स्वतःभूतानांदेहाद्याकाराणांप्रभवाप्ययौउत्पत्तिनाशौनियतौ आत्मानकर्त्तानाप्यकर्त्ताकिंतुस्व

नाकालतोभानुरुपैतियोगंनाकालतोस्तंगिरिमभ्युपैति नाकालतोहीयतेवर्द्धतेचचंद्रःसमु
द्रोपिमहोर्मिमाली १२ अत्राप्युदाहरंतीममितिहासंपुरातनं गीतंराज्ञासेनजितादुःखार्त्तेनयु
धिष्ठिर १३ सर्वानेवैषपर्यायोमर्त्यान्स्पृशतिदुःसहः कालेनपरिपक्वाहिम्रियन्तेसर्वपार्थिवाः
घ्नंतिचान्यान्नरान्राजंस्तानप्यन्येतथानराः संज्ञैषालौकिकीराजन्नहिनस्तिनहन्यते १५ हं
तीतिमन्यतेकश्चिन्नहंतीत्यपिचापरः स्वभावतस्तुनियतौभूतानांप्रभवाप्ययौ १६ नष्टेधनेवादा
रेवापुत्रेपितरिवामृते अहोदुःखमितिध्यायन्दुःखस्यापचितिंचरेत् १७ सकिंशोचसिमूढः
सन्शोच्यान्किमनुशोचसि पश्यदुःखेषुदुःखानिभयेषुचभयान्यपि १८

सत्तामात्रेणमहाह्रदस्त
रंगाणांमरीचयइवभूतानांउत्पत्तिविनाशयोर्हेतवितिभावः १६ १७ मोध्यानात्ध्यायन्नेवापचितिंप्रतीकारंचरेत्नतत्
अध्यायन् शोच्यान्शोकाक्रांतान्बालविधवयादिवेत्रात्वल्यान्दुःखेषुशोकजेषुमनस्तापेषु दुःखानिशिरस्तापाद
नीदीनि दुःखोदर्कीणिकर्माणिमूढकार्यमित्यर्थः १८

श्री. भा. रा. टी. ४४

मोहनिवृत्तेरवधिमाह आत्मेति अयं व्यावहारिक आत्मा अहंप्रत्ययविषयः सोपि मम स्वरूपं न मत्तः पृथग्भूतत्वात् सर्वा पृथि-
वीति सर्वप्रपंचोपलक्षणं सर्वं वा ममैव स्वरूपं यथाहं सर्वस्मादन्यः सर्वात्मा च तथान्येपीत्याह यथेति एवमहंताममतात्वं पश्यन्न-
मुह्यतीत्यर्थः तथा च श्रुतिः तरति शोकमात्मविदिति १९ २० यानि प्रियाणि तान्येव कालेन दुःखानि भवन्ति यानि द्वेष्याणि

आत्मापि चायं न मम सर्वा वा पृथिवी मम यथा मम तथान्येषामिति पश्यन्न मुह्यति १९ शोकस्था-
नसहस्राणि हर्षस्थानशतानि च दिवसे दिवसे मूढमाविशन्ति न पण्डितं २० एवमेतानि कालेन प्रि-
यद्वेष्याणि भागशः जीवेषु परिवर्तन्ते दुःखानि च सुखानि च २१ दुःखमेवास्ति न सुखं तस्मात्तदु-
पलभ्यते तृष्णार्तिप्रभवं दुःखं दुःखार्तिप्रभवं सुखं २२ सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सु-
खं न नित्यं लभते दुःखं न नित्यं लभते सुखं २३ सुखमेव हि दुःखान्तं कदाचिद्दुःखतः सुखं त-
स्मादेतद्द्वयं जह्याद्य इच्छेच्छाश्वतं सुखं २४ यन्निमित्तं भवेच्छोकस्तापो वा दुःखमूर्छितः
आयासो वापि यन्मूलस्तदेकाङ्गमपि त्यजेत् २५ ॥

तान्येव सुखानि तस्माद्यातजडस्य ताडनमिव सर्वं दुःखमेव मोहात्सुखवद्विभातीत्यर्थः २१ तृष्णायाया आर्त्तिरनवस्थित-
चित्तत्वात्तज्जं दुःखं दुःखस्यार्त्तिः विनाशस्तज्जं सुखं २२ सततं यं सुखं दुःखं वा नाश्नुते तस्याजेयं वेत्याह सुखस्येत्या- ४४
दिना २३ २४ दुःखमूर्छितः दुःखेन वर्धितः एकाङ्गमपि सर्पदष्टाङ्गुष्ठवत् किमुत बाह्यं राज्यादीति भावः २५ ॥

हृदयेनशोकमूलेन २६ प्रियंमप्रचरन्नकुर्वन् केनहेतुनाकथंकेनप्रकारेणाकस्यसंबंधीतिज्ञास्यसि २७ मूढतमाः
प्रसन्नमनस्वजडाः बुद्धेः परंब्रह्मगताःप्राप्ताः अतस्त्वंअधमस्तेनभवसिमध्यमोपिमाभूरित्यर्थः २८ ३० येनत्वमादिति।

सुखंवायदिवादुःखंप्रियंवायदिवाप्रियं प्राप्तंप्राप्तमुपासीतहृदयेनापराजितः २६ ईषदप्यगादा
राणाधृत्राणामचरन्प्रियं ततोज्ञास्यसिकः कस्यकेनवाकथमेवच २७ येचमूढतमालोकेये
चबुद्धेःपरंगताः तएवसुखमेधंतेमध्यमः क्लिश्यतेजनः २८ इत्यब्रवीन्महाप्राज्ञोयुधिष्ठिरसमे
नजित् परापरज्ञोलोकस्यधर्मवित्सुखदुःखवित् २९ परदुःखेनयोदुःखीनसजातुसुखीभवे
त् दुःखानांहितयोनास्तिजायतेस्यपरात्परं ३० सुखंचदुःखंचभवाभवौचलाभालाभौम
रणंजीवितंच पर्यायतः सर्वमवाप्नुवंतितस्माद्धीरोनैवहृष्येन्नशोचेत् ३१ दीक्षाराज्ञः संयुगेयु
द्धमाहुर्योगंराज्येदंडनीत्याचसम्यक् वित्तत्यागोदक्षिणानांचयज्ञेसम्यक्ज्ञानंपावनानीतिवि
द्यात् ३२ रक्षन्राष्ट्रंबुद्धिपूर्वंनयेनसंत्यक्तात्मायज्ञशीलोमहात्मा सर्वांल्लोकान्धर्मदृष्ट्याच
रंश्चाप्यूर्ध्वंदेहान्मोदतेदेवलोके ३३ जित्वासंग्रामान्पालयित्वाचराष्ट्रंसोमंपीत्वावर्धयित्वाप्रजा
युक्त्यादंडंधारयित्वाप्रजानांयुद्धेक्षीणोमोदतेदेवलोके ३४

मितेनभवाभवौपेश्वर्यानैश्वर्ये ३१ दीक्षामितिद्वा
ज्ञोयागयोगसंन्यासस्थानीयाः युद्धपालनंक्रतौवित्तत्यागश्चेतितान्येवास्यपावनानीत्यर्थः ३२ संत्यक्तात्मानिरहंकारः ३३ ३४

श्री॰ शां॰ रा॰ टी॰ ५५

३५ ३६ पंचविंशः २५ अस्मिन्नेव १ ३ समयं अध्ययनसंप्रदायस्याविच्छेदं आश्रिताः आश्रमिणः ब्रह्मचारिण इत्यर्थः ४ ५
कार्याणि राजकार्याणि प्रतिष्ठाप्यानि तद्वचसा अनुष्ठेयानीत्यर्थः तथाहि धर्माधर्मनिर्णयार्थं परिषदमुपक्रम्य एको वाध्यात्मवित्तम

समस्तवेदानध्याप्य शास्त्राण्यधीत्य सम्यग्राज्यं पालयित्वा च राजा चातुर्वर्ण्यं स्थापयित्वा स्वधर्मे पू
तात्मा वै मोदते देवलोके ३५ यस्य वृत्तं नमस्यंति स्वर्गस्थस्यापि मानवाः पौरजानपदामात्याः स रा
जा राजसत्तमः ३६ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे सेनजिदुपाख्याने पंचविंशः २५ वै
शंपा॰ अस्मिन्नेव प्रकरणे धनंजयमुदारधीः अभिनीततरं वाक्यमित्युवाच युधिष्ठिरः १ यदेत
न्मन्यसे पार्थ न ज्यायोस्ति धनादिति न स्वर्गो न सुखं नार्थो निर्धनस्येति तन्मृषा २ स्वाध्याययज्ञसं
सिद्धा दृश्यंते बहवो जनाः तपोरताश्च मुनयो येषां लोकाः सनातनाः ३ ऋषीणां समयं शश्वद्ये रक्षं
ति धनंजय आश्रिताः सर्वधर्मज्ञा देवास्तान्ब्राह्मणान्विदुः ४ स्वाध्यायनिष्ठान्हि ऋषीन्ज्ञाननिष्ठां
स्तथापरान् बुध्येथाः सततं चापि धर्मनिष्ठान्धनंजय ५ ज्ञाननिष्ठेषु कार्याणि प्रतिष्ठाप्यानि पांड
व वैखानसानां वचनं यथा नो विदितं प्रभो ६ अजाश्च पृश्नयश्चैव सिकताश्चैव भारत अरुणाः के १

मइति पर्षत्वेन वरणीय इति शेषः कार्याणीति पाठेपि ज्ञानिनां दर्वीषि ज्ञाननिष्ठे तवश्चैव स्वाध्यायेन दिवं गताः ७ ॥
अध्यवदेयानीत्यर्थः ज्ञाननिष्ठेषु कार्याणि प्रतिपाद्यानीत्येव वैखानसानां वानप्रस्थानां वचनं ६ अजादयो वालखिल्यवदृषीणां गणावि ५५

७ एतान् लघून् स्पष्टान् क्रियावतां कर्मिणाम् ९ उत्तरेण उत्तरतः स्थितं १० गतिद्वयादभ्यधिकमाह संतोषइति संतोषः परवै
राग्यं परमं सुखं कैवल्यं ११ सा तुष्टिः परवैराग्याभिधा उत्तमा सिद्धिः विनीतक्रोधादिजयिनः सम्यक् प्रतितिष्ठतीत्यत्रस्पष्ट

अवाप्यैतानि कर्माणि वेदोक्तानि धनंजय दानमध्ययनं यज्ञो निग्रहश्चैव षड्विधः ८ दक्षिणेन च ये पा
न्थानः मर्त्यमुनयो ये दिवं गताः एतान् क्रियावतां लोकानुक्तवान् पूर्वमप्यहं ९ उत्तरेण तु पन्थानं निय
माद्यं प्रपश्यसि एते योगवतां लोका भान्ति पार्थ सनातनाः १० तत्रोत्तरां गतिं पार्थ प्रशंसन्ति पुरावि
दः संतोषात् स्वर्गमाप्नोति संतोषात् परमं सुखं ११ तुष्टेर्न किंचित् परमं सा सम्यक् प्रतितिष्ठति क्रोध
हर्षविनीतस्य सततं सिद्धिरुत्तमा १२ अत्राप्युदाहरन्तीमा गाथा गीता ययातिना याभिः प्र
त्याहरेत् कामान् कूर्मोऽङ्गानीव सर्वशः १३ यदा चायं न बिभेति यदा चास्मान्न बिभ्यति यदा नेच्छति
न द्वेष्टि ब्रह्म संपद्यते तदा १४ यदा न भावं कुरुते सर्वभूतेषु पापकं कर्मणा मनसा वाचा ब्रह्म संप
द्यते तदा १५ विनीतमानमोहश्च बहुसंगविवर्जितः तदात्मज्योतिषः साधोर्निर्वाणमुपपद्यते
१६ इदं तु शृणु मे पार्थ ब्रुवतः संयतेन्द्रिय धर्ममन्ये वृत्तमन्ये धनमीहन्ति चापरे १७ धनहेतोर्य ई
हेत तस्यानीहा गरीयसी भूयान् दोषो हि वित्तस्य पश्य धर्मस्तदाश्रयः १८ ॥

नेत्यर्थः १२ १५ आत्मज्योति
षः आत्मज्ञस्य निर्वाणं मोक्षः १६ वृत्तं शीलं ईहन्ति ईहन्ते १७ धनहेतोः धर्माय वित्तस्यार्जने इति शेषः तदाश्रयो धर्माय

ईहमानेनधनार्थिना १९ सम्यकसाधुकर्म दुष्यतःद्रोहयुक्तान्नेवतद्धनंप्रैतिनन्वद्रोहानितिप्राहुः हिंसांविनाधनप्राप्तिर्नास्ती
त्यर्थः प्रायमपियथातथं सर्वथाप्रतिकूलं नानाभयहेतुत्वात् २० संभिन्नवृत्तः संकीर्णस्वभावः वीतंभाविशोकंजंभयंयस्य
स्मात्सवीतशोकभयः अल्पेनधनेनहेतुनातृषितस्तस्मादानमनुद्यन्तेनद्रोहेणजायमानांब्रह्महत्यांनबुध्यते लोभी
अल्पार्थेपिब्रह्महत्यामर्जयतीत्यर्थः २१ दुर्लभंधनंप्राप्याप्यनुकूलेभ्योदत्वादस्युभयादिवभृशमनुतप्यतेइतिसंबंधः

प्रत्यक्षमनुपश्यामित्वमपिद्रष्टुमर्हसि वर्जनंवर्जनीयानामीहमानेनदुष्करं १९ येवित्तमभिप
द्यंतेसम्यक्त्वंतेषुदुर्लभं दुष्यतःप्रैतितत्प्राहुःप्रतिकूलंयथातथं २० यस्तुसंभिन्नवृत्तःस्याद्वीत
शोकभयोनरः अल्पेनतृषितोदुष्यन्भ्रूणहत्यांनबुध्यते दुष्यंत्याददतोभृत्यान्नित्यंदस्युभ
यादिव दुर्लभंचधनंप्राप्यभृशंदत्वानुतप्यते २२ अधनःकस्यकिंवाच्योविमुक्तःसर्वशःसु
खी देवस्वमुपगृह्यैवधनेनसुखीभवेत् २३ तत्रगाथांयज्ञगीतांकीर्तयंतिपुराविदः त्रयी
मयाश्रितांलोकेयज्ञसंस्तारकारिकां २४ ॥

विनष्टप्रायेमहद्दुःखंभवतीत्यर्थः २२ देवस्वंतथात्रैवार्षिकाधिकान्नोयः सहिसोमंपिबेद्द्विजः प्राक्सौमिकीः क्रियाःकार्यायस्यान्नं
वार्षिकंभवेदितिस्मृतेरल्पमपिसंचिंतयन्देवस्वमेवतदपिउपसंगृह्यदेवेभ्योअदत्वैवतेनतावतापिसुखीनभवेत् किंतुलाभालो ५९
भःप्रवर्त्ततइतिन्यायेनतृष्णाधिक्याद्दुःखमेवानुभवतीत्यर्थः २३ गाथांवैदिकजनेयज्ञप्रतिष्ठाकरीं २४ ॥

तामाह यज्ञायेति २५ एतत्स्वधनं स्वार्थे दानयज्ञार्थे वा २६ तस्मादिति धनस्वाम्यं कस्यापि नास्तीत्यर्थः तथा च श्रुतिः
मा गृधः कस्यस्विद्धनं फलितमाह श्रद्दधान इति २७ इत्याज्ञः प्रशास्तमाज्ञ इत्यर्थः कार्यं त्यागात्मकं २८ अपात्रे धनेन

यज्ञाय सृष्टानि धनानि धात्रा यज्ञाय सृष्टः पुरुषो रक्षिता च तस्मात्सर्वं यज्ञ एवोपयोज्यं धनं तता-
कामाय हितं प्रशस्तं २५ एतत्स्वार्थं च कौन्तेय धनं धनवतां वर धाता ददाति मर्त्येभ्यो यज्ञार्थ-
मिति विद्धि तत् २६ तस्माद्बुध्यति पुरुषा न हितं कस्यचित्क्वचित् श्रद्दधानस्ततो लोके दद्याच्चैव =
यजेत च लब्धस्य त्यागमेवाहुर्न भोगं न च संचयं तस्य किं संचयेनार्थः कार्यं ज्यायसि तिष्ठति ४
२८ ये हस्वधर्मादपेतेभ्यः प्रयच्छन्त्यल्पबुद्धयः शतं वर्षाणि ते प्रेत्य पुरीषं भुञ्जते जनाः २९ अन-
र्हते यद्ददाति न ददाति यदर्हते अर्हानर्हापरिज्ञानाद्दानधर्मोऽपि दुष्करः ३० लब्धानामपि वि-
त्तानां बोद्धव्यो द्वावतिक्रमौ अपात्रे प्रतिपत्तिश्च पात्रे चाप्रतिपादनं ३१ इति श्रीमहाभारते शा-
न्तिपर्वणि राजधर्मे युधिष्ठिरवाक्यं षड्विंशोऽध्यायः २६ युधिष्ठिर अभिमन्यौ हते बाले द्रौप-
द्यास्तनयेषु च धृष्टद्युम्ने विराटे च द्रुपदे च महीपतौ १ वसुषेणे च धर्मज्ञे धृष्टकेतौ च पार्थिवे
तथान्येषु नरेन्द्रेषु नानादेश्येषु संयुगे २ न च मुञ्चति मां शोको ज्ञातिघातिनमातुरं राज्यकामु-
कमत्युग्रं स्ववंशोच्छेदकारिणं ३ यस्याङ्के क्रीडमानेन मया वै परिवर्तितं स मया राज्यलब्धेन

देयमित्याह यज्ञ इति २४ ३१ षड्विंशः २६ अभिमन्यौ १ वृषसेने कर्णपुत्रे नरे वसुषेणोऽपि स एव २ ३ ४ ॥

[illegible]

श्री॰
गी॰ वा॰
टी॰
४०

५ ६ परस्थाकृजं परस्थानां पीडकं ७ ८ ९ १० ११ १२ १३ १४।१५ आमर्षयन् निश्चिन्वन् १६ १७ ॥
यदा ह्येनं विघूर्णितमपश्यं पार्थसायकैः कंपमानं यथा वज्रैः प्रेर्यमाणं शिखण्डिना ५ जीर्णं सिंहमि
व प्रांशुं नरसिंहं पितामहं कीर्यमाणं शरैर्दीप्तैर्दृष्ट्वा मे व्यथितं मनः ६ प्राग्रे विसीदमानं च रथे परर
थारुजं घूर्णमानं यथा शैलं तदा मे कश्मलोऽभवत् ७ यः स बाणायतुः पाणिर्योधयामास भार्ग
वं बहून्यहानि कौरव्यः कुरुक्षेत्रे महामृधे ८ स मे तं पार्थिवं तत्र वारणास्यो नदीसुतः कन्यार्थ
माकृष्य ह्रीरो रथ्येनैकेन संयुगे ९ येन चोग्रायुधो राजा चक्रवर्ती दुरासदः दग्धश्चास्त्रप्रतापेन
स मया युधि घातितः १० स्वयं मृत्युं रक्षमाणः पांचाल्यः शिखण्डिनं न बाणैः पातयामास
सोऽर्जुनेन निपातितः ११ यदैनं पतितं भूमावपश्यं रुधिरोक्षितं तदैवाविशदत्युग्रो ज्वरो मां
मुनिसत्तम १२ येन संवर्द्धिता बाला येन स्मः परिरक्षिताः स मया राज्यलुब्धेन पापेन गुरुघाति
ना १३ अल्पकालस्य राज्यस्य कृते मूढेन घातितः आचार्यश्च महेष्वासः सर्वपार्थिवपूजि
तः १४ अभिगम्य रणे मिथ्या पापेनोक्तः सुतस्त्विति तन्मे दहति गात्राणि यन्मां गुरुरभाषत स
त्यमाख्याहि राजेन्द्र यदि जीवति मे सुतः सत्यमामर्षयन्विप्रो मयि तत्परिपृष्टवान् १६ कुं
जरं चांतरं कृत्वा मिथ्योपचरितं मया सुभृशं राज्यलुब्धेन पापेन गुरुघातिना १७ ॥

१८ १९ २० २१ २२ २३ २४ २५ २६ २७ अतिवेलमत्यर्थं २८ ॥

सत्यकंचुकमास्थाय मया स गुरुराहवे अश्वत्थामा हत इति मयोक्तः कुंजरे हते १८ कांल्लो
कान्गमिष्यामि कृत्वा कर्म सुदुष्करं अघातयं च यत्कर्णं समरेष्वपलायिनं १९ ज्येष्ठं भ्रात
रमत्युग्रं को मत्तः पापकृत्तमः अभिमन्युं च यद्बालं जातं सिंहमिवाद्रिषु २० प्रावेशयमहं लु
ब्धो वाहिनीं द्रोणपालितां तदाप्रभृति बीभत्सुं न शक्नोमि निरीक्षितुं २१ हासं च पुत्रं दीका
दं किल्बिषी भ्रूणहा यथा द्रौपदी चापि दुःखार्त्ता पंचपुत्रैर्विनाकृता २२ शोचामि पृथि
वीं हीनां पंचभिः पर्वतैरिव सोऽहमागस्करः पापः पृथिवीनाशकारकः २३ आसीन
एवमेवं शोचयिष्ये कलेवरं प्रायोपविष्टं जानीध्वमथ मां गुरुघातिनं २४ जातिष्व
न्यास्वपि यथा न भवेयं कुलान्तकृत् न भोक्ष्ये न च पानीयमुपभोक्ष्ये कथंचन २५ शोषयिष्ये
प्रियान्प्राणानिहस्थोऽहं तपोधन यथेष्टं गम्यतां काममनुजाने प्रसाद्य वः २६ सर्वे मामनु
जानीत त्यक्ष्यामीदं कलेवरं वैशंपायन उ० तमेवं वादिनं पार्थं बंधुशोकेन विह्वलं मैवमित्यब्र
वीद्व्यासो निगृह्य मुनिसत्तमः २७ व्यास उवाच अतिवेलं महाराज न शोकं कर्तुमर्हसि पुनरु
क्तं तु वक्ष्यामि दिष्टमेतदिति प्रभो २८ ॥

२९ ३० आलस्यं तत्काले स्वत्वमपि उ: स्वांतं दात्यं तत्काले उ: स्वमपि स्वांतं भूतिरणिमादि: ३१ ३२ अतएव
कर्मभ्य एव कर्मणां त्यागो त्वनेश: न प्रभु: ३३ सप्तविंश: २७ ज्ञाति अभ्युत्सिसृक्षत: त्यक्तुमिच्छत: १ २ ३ क
संयोगा विप्रयोगांता जातानां प्राणिनां ध्रुवा: बुद्बुदा इव तोयेषु भवंति न भवंति च २९ सर्वे क्ष
यांता निचया: पतनांता: समुच्छ्रया: संयोगा विप्रयोगांता मरणांतं हि जीवितं ३० स्वं स्वं उ:
स्वांत मालस्य दात्य उ: स्वं स्वावोदयं भूति: श्री ह्री धृति: कीर्त्तिर्दक्षे वसति नालसे ३१ नाल
स्वावाय स्वस्य दो नाल उ: स्वो य शत्रव: न च प्रज्ञालमर्थेभ्यो न सुखोपभ्योग्यलयने ३२ यथा स्व
ह्यास्मि कौंतेय यथा त्राकर्म स्वतत्कृत अतएव हि सिद्धास्ते नेशस्तु कर्मणां त्वय ३३ इति श्रीमहा
भारते शांतिपर्वणि राजधर्मे व्यासवाक्ये सप्तविंशोध्याय: २७ वैशंपायन उ० ज्ञातिशोका
भितप्तस्य प्राणानभ्युत्सिसृक्षत: ज्येष्ठस्य पांडुपुत्रस्य व्यास: शोकमपानुदत् १ व्यास उ०
अत्राप्युदाहरंतीममितिहासं पुरातनं अश्मगीतं नरव्याघ्र तन्निबोध युधिष्ठिर २ अश्मानं
ब्राह्मणं प्राज्ञं वैदेहो जनको न्टप संशयं परिपप्रच्छ उ: स्वशोकसमन्वित: ३ जनक उ०
आगमे यदि वापाये ज्ञातीनां द्रविणस्य च नरेण प्रतिपत्तव्यं कल्याणं कथमिच्छता ४ ॥ ५८

ल्याणमिच्छता स्वबोधादिकं कथं प्रतिपत्तव्यं केन प्रकारेण हृष्टत्वेनातिहृष्टत्वेन उदासीनत्वेन वा ज्ञातव्यं ४ ॥

आत्मानं देहं उत्पन्नमनु अनंतरं अव्ययथानेनैव देहस्वभावप्राप्ते सुखदुःखादौ हर्षविषादौ न कुर्वीत किं तूदासीनैवेति भावः ५
६ प्रसिच्यते ह्लानिं तेः स्थैर्यं भवतीत्यर्थः ७ भोगान् भोग्यार्थान् शयनादीन् विसृज्य भोगेन नन्दनं तेकादि द्वाराव्ययीकृत्य
आदानं चौर्यं साधु हितं ८ असंप्राप्तं अयुक्तं यथा स्यात्तथा इषुभिः प्रतिषेधयंति घ्नंतीत्यर्थः लुब्धाः व्याधाः ९ ये चो

ऋषभोवाच उत्पन्नमिममात्मानं नरस्यानंतरं ततः तानि तान्यनुवर्तन्ते दुःखानि च सुखानि
च ५ तेषामन्यतरापत्तौ यद्यदेवोपपद्यते तदस्य चेतनामाशु हरत्यभ्रमिवानिलः ६ अभिजा
तोस्मि सिद्धोस्मि नास्मि केवलमानुषः इत्येभिर्हेतुभिस्तस्य त्रिभिश्चित्तं प्रसिच्यते ७ संप्रसक्तम
ना भोगान्विसृज्य पितृसंचितान् परिक्षीणाः परस्वानामादानं साधु मन्यते ८ तमतिक्रांतम
र्यादमाददानमसांप्रतं प्रतिषेधंति राजानो लुब्धा मृगमिवेषुभिः ९ ये च विंशतिवर्षा वा त्रिंश
द्वर्षाश्च मानवाः परेण ते वर्षशतान्न भविष्यंति पार्थिव ९ तेषां परमदुःखानां बुद्ध्या भैषज्या
माचरेत् सर्वप्राणभृतां दृष्टं प्रेक्षमाणस्ततस्ततः ९ ॥

ये ते परेण विंशत्यादिवर्षादूर्ध्वं वर्षशतान् शतवर्षपर्यंतं न भविष्यंति न जीविष्यंति चौर्यप्रसक्ताः सद्य एव मार्यंत इत्यर्थः ९ ते
षां दारिद्र्योत्थानां भैषज्यं प्रतीकारं तमेवाह सर्वेति दुःखदुःखाधिकान्यश्येत् सुखसुखाधिकान् आत्मानं ह
र्षशोकाभ्यां शत्रुभ्यामिव नार्पयेदिति भावः ९ ॥

श्री॰
शां॰रा॰
टी॰
५९

विभ्रमो विपर्यासः अनिष्टेपीष्टबुद्धिरिष्टे चानिष्टबुद्धिरिति अनिष्टं पुत्रशोकादि तत्प्राप्तिर्वा १२ संस्पर्शजानि विषयसंग
जानि १३ १४ १५ प्राप्तव्यं भोक्तव्यं १६ तेऽर्थाः जरादयः पदार्थाः ततोऽन्यथाऽजरत्वादिरूपेण ये मनुष्यस्य कांक्षिताः ३

मानस्थानां पुनर्यो निदुःखानां चित्तविभ्रमः अनिष्टोपनिपातो वा तृतीयं नोपपद्यते १२ एवमेता
नि दुःखानि तानि तानीह मानवं विविधान्युपवर्तन्ते यथा संसर्गजान्यपि १३ जरामृत्यू हि भूता
नां खादितारौ वृकाविव बलिनां दुर्बलानां च ह्रस्वानां महतामपि १४ न कश्चिज्जात्वतिक्रामेज्ज
रामृत्यू हि मानवः अपि सागरपर्यन्तां विजित्येमां वसुंधरां १५ सुखं वा यदि वा दुःखं भूतानां प
र्युपस्थितं प्राप्तव्यमवशैः सर्वं परिहारो न विद्यते १६ पूर्वे वयसि मध्ये वाप्युत्तमे वा नराधिप अ
वर्जनीयास्तेऽर्था वै कांक्षितास्ततोऽन्यथा १७ सुप्रियैर्विप्रयोगश्च संप्रयोगश्च विप्रियैः अर्थाना
र्थौ सुखदुःखे विधानमनुवर्तन्ते १८ प्रादुर्भावश्च भूतानां देहत्यागस्तथैव च प्राप्तिव्यायामयो
गश्च सर्वमेतत्प्रतिष्ठितं १९ गन्धवर्णरसस्पर्शा निवर्तन्ते स्वभावतः तथैव सुखदुःखानि वि सर्व ९
धानमनुवर्तन्ते २० आसनं शयनं यानमुत्थानं पानभोजनं नियतं भूतानां कालेनैव भवत्युत २१
वैद्याश्चाप्यातुराः सन्ति बलवन्तश्च दुर्बलाः श्रीमन्तश्चापरे षण्ढाः विचित्रः कालपर्ययः २२ ॥

ष्टाः १७ विधानं अदृष्टं १८ प्राप्तिर्लाभो व्यायामः श्रमः अलाभ इति यावत् तयोर्योगः प्रतिष्ठितं विधानमित्यनुषज्यते १९ गं ८ ५९
धेति फलस्य गन्धादयो निवर्तन्ते पूर्वे उत्तरे उपयान्ति तथैव सुखदुःखादीनि अप्रयत्नात् प्राप्यान्यपि अनुवर्तन्ते विद्वान् २० ८

२३ २४ बुभुक्षाः क्षामभक्तयः २५ निर्माणोऽदृष्टे सेवनाकर्ममर्यादया अतिक्रामन्नतिपापी अनिष्क्रान्तो न दृश्यते किं
त्वपायेन मुक्तो वक्ष्यत एव कश्चिन्न निग्राह्यो न भवतीत्यपि दृश्यते २६ ३० अप्रसंगायुद्धविवादादयः अत्रमृगयादौ ३१ ३२ इह
कुले जन्म तथा वीर्यमारोग्यं रूपमेव च सौभाग्यमुपभोगश्च भवितव्येन लभ्यते २३ सन्ति पुत्राः सुब
हवो दरिद्राणामनिच्छतां नास्ति पुत्रः समृद्धानां विचित्रं विधिचेष्टितं २४ व्याधिरग्निर्जलं शस्त्रं बु
भुक्षापदो विष ज्वरश्च मरणं जन्तोरुच्चाच्च पतनं तथा २५ निर्माणो यस्य यद्दृष्टं तेन गच्छति सेतु
ना दृश्यते नाप्यतिक्रामन्न निष्क्रान्तोऽथवा पुनः दृश्यते चाप्यतिक्रामन्न निग्राह्योऽथवा पुनः २६ दृ
श्यते हि युवैवेह विनश्यन् वसुमानपि दरिद्रश्च परिक्लिष्टः शतवर्षो जरान्वितः अकिंचनाश्च दृश्यं
ते पुरुषाश्चिरजीविनः समृद्धे वकुले जाता विनश्यन्ति पतंगवत् २८ प्रायेण श्रीमतां लोके भोक्तुं
शक्तिर्न विद्यते काष्ठान्यपि हि जीर्यन्ते दरिद्राणां च सर्वशः २९ अहमेतत्करोमीति मन्यते कालचो
दितः यद्यदिष्टमसंतोषाद्दुरात्मा पापमाचरेत् ३० मृगयाक्षाः स्त्रियः पानं प्रसंगा निन्दिता बुधैः दृ
श्यन्ते पुरुषाश्चात्र संप्रसक्ता बहुश्रुताः ३१ इति कालेन सर्वार्था नीप्सितानीप्सिता निह स्पृशन्ति सर्व
भूतानि निमित्तं नोपलभ्यते ३२ वायुमाकाशमग्निं च चन्द्रादित्यावहःक्षये ज्योतींषि सरितः शै
लान्कः करोति बिभर्त्ति च ३३ शीतमुष्णं तथा वर्षं कालेन परिवर्तते एवमेव मनुष्याणां सुखदुःखे नृ
निमित्तं नोपलभामहे किं तु अदृष्टनिमित्तमेव तदित्यर्थः ३२ यथा बाल्यादिरीश्वरकृतत्वादविनाश्यपदं दुःखमयीत्याह वायुमि

श्री० ३५ ३६ उपस्थिताः सेविताः कालः मृत्युः ३७ पथि मार्गेऽन्यैर्विविहृद्दारादिभिः संगतं ज्ञेयं ३९ स्थापयेत् विचारेदिति शेषः
शां० रा० ४० ४१ एवमिष्टवियोगे शोको न कार्य इत्युक्तं तदनन्तरं नरकपातभयादपि शोको न कार्य इत्याह नदृष्टपूर्वमित्यादिना आ।
टी० नौषधानि न मंत्राश्च न होमा न पुनर्जपाः त्रायंते मृत्युनोपेतं जरया चापि मानवं ३५ यथा काष्ठं च का
५९ ष्ठं च समेयातां महोदधौ समेत्य च व्यपेयातां तद्वद्भूतसमागमः ३६ ये चैव पुरुषाः स्त्रीभिर्गीतवाद्यै
रुपस्थिताः ये चानाथाः परान्नादाः कालस्तेषु समक्रियः ३७ मातापितृसहस्राणि पुत्रदारशता
नि च संसारेष्वनुभूतानि कस्य ते कस्य वा वयं ३८ नैवास्य कश्चिद्भविता नायं भवति कस्यचित् पा
थि संगतमेवेदं दारबंधुसुहृज्जनैः ३९ क्वासं क्व च गमिष्यामि को न्वहं किमिहास्थितः कस्मा
त्किमनुशोचेयमित्येवं स्थापयेन्मनः ४० अनित्ये प्रियसंवासे संसारे चक्रवद्गतौ पथि संगतमे
वैतद्भ्राता माता पिता सखा ४१ नदृष्टपूर्वं प्रत्यक्षं परलोकं विदुर्बुधाः आगमांस्त्वनतिक्रम्य
श्रद्धातव्यं बुभूषता ४२ कुर्वीत पितृदैवत्यं धर्माणि च समाचरेत् यजेच्च विद्वान्विधिवत्त्रिव
र्गं चाप्युपाचरेत् ४३ संनिमज्जज्जगदिदं गंभीरे कालसागरे जरामृत्युमहाग्राहे न का
श्चिदवबुध्यते ४४ ॥
गमैकगम्यः परलोकः आगमे च युद्धे शत्रुघातिनां स्वर्गप्राप्तीनि दृष्टमतो हृष्येव तेन शोक इत्यर्थः ४२ धर्माणि धर्मावहानि ५९
४३ ४४ ॥ रामायनमो नमः ॥

४५ ४६ नागाःगजाःउत्तमैःबलिष्ठैः ४७ ४८ अधानंसंसारमार्गप्रवशश्रुतिच्छेदः अभ्येतिआविर्भवति ५० नित्यात्मपा
देजीवाद्देहोत्पत्तिः अनित्यात्मपक्षेदेहाज्जीवोत्पत्तिर्वाभवतुसर्वथादारादिसंगमःपान्थसंगमतुल्यएवेत्यर्थः ५१ सेवा

आयुर्वेदमधीयानाःकेवलंसपरिग्रहाः दृश्यंतेबहवोवैद्याव्याधिभिस्तुताः ४५ तेपिबंतःक
षायांश्चसर्पींषिविविधानिच नशान्तिमतिवर्तंतेवेलामिवमहोदधिः ४६ रसायनविदश्चैववसु
प्रयुक्तरसायनाः दृश्यंतेजरयाभग्नानगानागैरिवोत्तमैः ४७ तथैवतपसोपेताःस्वाध्यायाभ्यस
नेरताः दातारोयज्ञशीलाश्चनतरंतिजरांतकौ ४८ नह्यहानिनिवर्तंतेनमासानपुनःसमाः जा
तानांसर्वभूतानांनपक्षानपुनःक्षपाः ४९ सोयंविपुलमध्वानंकालेनध्रुवमध्रुवः नरोवशःस
मभ्येतिसर्वभूतनिषेवितं ५० देहोवाजीवतोभ्येतिजीवोवाभ्येतिदेहतः पथिसंगतमेवेदंदारैरन्यैश्च
बंधुभिः नायमत्यंतसंवासोलभ्यतेजातुकेनचित् अपिस्वेनशरीरेणकिमुतान्येनकेनचित् ५२
क्वनुतेद्यपिताराजनक्वनुतेद्यपितामहाः नत्वंपश्यसितानद्यनत्वांपश्यंतितेनघ ५३ नचैवपुरु
षोद्रष्टास्वर्गस्यनरकस्यच आगमस्तुसतांचक्षुर्नृपतेतमिहाचर ५४ चरितब्रह्मचर्योहिप्रजा
येतयजेतच पितृदेवमनुष्याणामानृण्यायादनसूयकः ५५ ॥

सःसहावस्थानं ५२ ५३ ५४ प्रजायेतपुत्रादीनुत्पादयेत् आनृण्यातहेतोः ५५ ॥

श्री॰ शां॰रा॰ टी॰ ५१

प्रजनेप्रजोत्पादने हृदयव्यलीकं हृत्स्थं अप्रियं शोकं अनन्तं वा ममत्वाद्यध्यासं मुक्त्वा स्वर्गं च लोकं परं परमात्मानं वा राधयेत् ५६ समं रागद्वेषवर्ज्जं यथा स्यात्तथा धर्मं चरतः ५७ ५८ हे अच्युतेति स्वधर्मान्न च्युतोसीत्यर्थः तेत्वया ५९ अष्टाविंशः २८

समयत्तशीलः प्रजने निविष्टः प्राग्ब्रह्मचारी प्रविविक्तचक्षुः आराधयेत्स्वर्गमिमं च लोकं परं च मुक्त्वा हृदयव्यलीकं ५६ समं हि धर्मं चरतो न्यपस्य द्वयानि वाप्याहरतो यथावत् अहन्न धर्मस्य यशोभिवृद्धेतेसर्वेषु लोकेषु चराचरेषु ५७ इत्येवमाज्ञाय विदेहराजो वाक्यं समग्रं परिपूर्णहेतु अश्मानमामंत्र्य विशुद्धबुद्धिर्ययौ गृहं स्वं प्रतिशान्तशोकः ५८ तथा त्वमप्यच्युत मुंच शोकमुत्तिष्ठ शक्रोपम हर्षमाहि त्वात्रेणाधर्मेण मही जिता ते तां भुङ्क्ष्व कुन्तीसुत मावमंस्थाः ५९ इति श्रीमहाभारते शांतिपर्वणि राजधर्मेष्वश्मवाक्ये अष्टाविंशोध्यायः २८ वैशंपायन उ॰ अव्याहरति राजेन्द्रे धर्मपुत्रे युधिष्ठिरे = गुडाकेशो हृषीकेशमभ्यभाषत पाण्डवः १ अर्जुन उ॰ ज्ञातिशोकाभिसन्तप्तो धर्मपुत्रः परंतपः एष शोकार्णवे मग्नस्तमाश्वासय माधव २ सर्वे स्मते संशयिताः पुनरेव जनार्दन अस्य शोकं महाबाहो प्रणाशयितुमर्हसि ३ वैशंपायन उ॰ एवमुक्तस्तु गोविंदो विजयेन महात्मना पर्यवर्त्तत राजानं पुण्डरीकेक्षणोच्युतः ४ अनतिक्रमणीयो हि धर्मराजस्य केशवः बाल्यात्प्रभृति गोविंदः प्रीत्या चाप्यधिको

अव्याहरति हेत्वभावे पि शोको बाध्यत इति विस्मयात्मौनमास्थिते १ २ तेवयं ३ पर्यवर्त्तत अभिमुखो भूत् ४ ५ ॥ ५१

भुजे रात्तः संप्रेक्ष्य हस्तेऽपि धृत्वा ६ व्याकोशं विकसितं ७ हताः अस्मिन्संयति राष्ट्रः ८ लाभाय अर्थाः ९ १२ एतान्महानु
भावान्श्रुत्वा तान् तेनेव धूत शोचितं नार्हसीति संबंधः १३ संजयस्य पुत्रः सहदेवः तस्य शोकेनार्त्तं सहदेवाय सार्जया
संप्रेक्ष्य महाबाहुर्भुजे वेदनभूषिते शीलसत्त्वोपमं श्रोत्रि कृतवाचाभिविनोदयन् ६ सु
सुभे वदनं तस्य सुदंष्ट्रं चारुलोचने व्याकोशमिव विस्पष्टपद्मं सूर्य इवोदिते ७ वासुदे
वः मा कथाः पुरुषव्याघ्र शोकं त्वं गात्रशोकं त्वं गात्रशोषणं नहि ते सुलभा भूयो ये हतास्मि
न् रणाजिरे ८ सुमलब्धायया लाभाविनथाः प्रतिबोधने पर्वते नत्रियाराजन्ये व्यतीताम
हारणे ९ सर्वेऽप्यभिमुखाः शूरा विजितारणशोभिनः नैषां कश्चित्पृष्ठतो वा पलायन्वापि पा
तितः १० सर्वे त्यक्त्वात्मनः प्राणान्युधावीरा महामृधे शस्त्रपूता दिवं प्राप्ता न तान् शोचितुमर्ह
सि ११ क्षत्रधर्मरताः शूराः वेदवेदाङ्गपारगाः प्राप्ता वीरगतिं पुण्यां तान्न शोचितुमर्हसि १२
एतान्महानुभावांस्तु श्रुत्वैव पृथिवीपतीन् अत्रैवोदाहरन्तीममितिहासं पुरातनं १३ संज
यं पुत्रशोकार्तं यथायं नारदोऽब्रवीत् सुखदुःखैरहं त्वं च प्रजाः सर्वाश्च सृंजय १४ अविमुक्ता
मरिष्यामस्तत्र का परिदेवना महाभाग्यं पुराराज्ञां कीर्त्यमानं मया शृणु १५ ॥ येनिव्राह्मणात् १४
अविमुक्ताः इति मरणेऽपि सुखादेर्वियोगो नास्तीति प्रायोपवेशनं व्यर्थमिति भावः महाभाग्यं महात्म्यं १५

श्री॰ उपादानं उपादातुं श्रोतुं योग्यं १८ ईयुः प्रत्यक्षमागतवन्तः १९ यागं माकुर्विति प्रत्याख्यातवान् २० २१ मरुत्तः परिवेष्टारो मरु
शां॰ रा॰ त्तस्यावसन्गृहे आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति श्रुतेरर्थं दर्शयति आविक्षितस्येति २३ अत्यरिच्यत येभ्यो याद
टी॰
५२

गच्छावथानं नृपते ततो दुःखं प्रहास्यसि एतान्महानुभावांस्त्वं श्रुत्वैव पृथिवीपतीन् १६ शममान
य संतापं शृणु विस्तरशश्च मे क्रूरग्रहाभिशमनमायुर्वर्द्धनमुत्तमं १७ अग्रिमाणां क्षितिभुजामुपा
दानं मनोहरं आविक्षितं मरुत्तं वै मृतं सृंजय शुश्रुम १८ यस्य सेन्द्राः सवरुणा बृहस्पतिपुरोगमाः
देवा विश्वसृजो राज्ञो यज्ञमीयुर्महात्मनः १९ यः स्पर्द्धया जयच्छक्रं देवराजं पुरंदरं शक्रप्रियैषी
यं विद्वान् प्रत्याचष्ट बृहस्पतिः २० संवर्त्तो याजयामास यवीयान्स बृहस्पतेः यस्मिन्प्रशासति म
हीं नृपतौ राजसत्तम २१ अकृष्टपच्या पृथिवी विबभौ चैत्यमालिनी २२ आविक्षितस्य वै सत्त्रे वि
श्वेदेवाः सभासदः मरुतः परिवेष्टारः साध्याश्चासन्महात्मनः २३ मरुद्गणा मरुत्तस्य यत्सोमम
पिबन्त ते देवान्मनुष्यान्गन्धर्वानत्यरिच्यन्त दक्षिणाः २४ स चेन्ममार सृंजय चतुर्भद्रतरस्त्व =
या पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः २५ सुहोत्रं चैवातिथिनं मृतं शुश्रुम सृंजय य ५४
स्मिन् हिरण्यं ववृषे मघवा परिवत्सरं २६ ॥

तिणः दत्तास्ताभिर्देवाद्यपि अशक्या जाता इत्यर्थः २४ चतुर्भद्र ५२
तरः चत्वारि धर्मज्ञानवैराग्यैश्वर्याख्यानि भद्राणि यस्मिन्स चतुर्भद्रः त्वयाऽवधिभूतेन ततोऽतिशयेन चतुर्भद्र इत्यर्थः २५

२७ ३१ चेत्यचेतनावान्भवजानीहीत्यर्थः संशाम्यत्तात्वाशांतोभवेत्यर्थः अवासृजत्यत्तार्थउत्सृष्टवान्

सत्यनामावसुमतीयंत्राण्यासीज्जनाधिपं हिरण्यमवहन्नद्यस्तस्मिनजनपदेश्वरे २७
कूर्मान्कार्कटकानक्रान्मकरान्शिंशुकानपि नदीष्वपातयद्राजन्मधवालोकपूजितः २८
हिरण्यान्यातितान्दृष्ट्वामत्स्यान्मकरकच्छपान् सहस्रशोथशतशस्ततोस्मयदथोतिथिः
तद्धिरण्यमपर्यंतमाहृतंकुरुजांगले ईजानोवितते यज्ञेब्राह्मणेभ्यः समार्पयत् ३० सचे
त्समारुहज्जयचत्रभेंद्रतरस्तया पुत्रास्तुएपतवश्चैवमापुत्रमनुत्तमथाः ३१ अदक्षिणाम
यज्वानंस्वर्वसंशाम्यमाश्चुचः अंगोहृदृश्यैचेवमत्तेसृजयश्रुक्रम ३२ यःसहस्रंसहस्रा
णांश्वेतानश्वानवासृजत् सहस्रंचसहस्राणांकन्याहेमपरिष्कृताः ३३ ईजानोवितते
यज्ञेदक्षिणामत्यकालयत् यःसहस्रंसहस्राणांगजानामतिपद्मिनां ३४ ईजानोवितते
यज्ञेदक्षिणामत्यकालयत् शतंशतसहस्राणांवृषाणांहेममालिनां ३५ गवांसहस्रानु
चरंदक्षिणामत्यकालयत् अंगस्ययजमानस्यतदाविष्णुपदेगिरौ ३६ अमाद्यदिंद्रःसोमेन =
दक्षिणाभिर्द्विजातयः यस्ययज्ञेषुराजेंद्रशतसंख्येषुवापुरादेवान्मनुष्यानांपर्वान्अत्यरि।

अत्यकालयन्दत्तवान् ३४ ३६ ३८ च्यानदक्षिणाः नजातोजनिताचान्यःपुमान्यस्तान्प्रदास्यति ॥

श्री॰
भा॰ रा॰
टी॰
५३

समस्त्वग्निष्टोमोत्यग्निष्टोमउक्थ्यः षोडशीवाजपेयोतिरात्रोप्तोर्याम इति सप्त सोमसंस्थाः तास्ताः ३९ ४१ ४३ ४५ ४७

यद्गाः प्रददौ विप्रे सोमसंस्थास्तु सप्त सः ३९ सचेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यप
तरस्तेव मापुत्रमनुतप्यथा ४० शिबिमौशीनरं चैव मृतं सृञ्जय शुश्रुम य इमां पृथिवीं स
र्वां चर्मवत्समवेष्टयत् ४१ महता रथघोषेण पृथिवीमनुनादयन् एकच्छत्रां महीं चक्रे जैत्रे
णैकरथेन यः ४२ यावदद्य गवाश्वं स्यादारण्यैः पशुभिः सह तावतीः प्रददौ गाः स शिबि
रौशीनरोध्वरे ४३ न वोढारं धुरं तस्य कंचिन्मेने प्रजापतिः न भूतं न भविष्यं च सर्वराजसु सृ
ञ्जय ४४ अन्यत्रौशीनराच्छैब्याद्राजर्षेरिंद्रविक्रमात् अदक्षिणमयज्वानं मापुत्रमनुतप्य
थाः ४५ सचेन्ममार सृञ्जय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तेव मापुत्रमनुतप्यथाः ४६ भर
तं चैव दौष्यंतिं मृतं शुश्रुम सृञ्जय शाकुंतलं महात्मानं भूरिद्रविणसंचयं ४७ यो बद्ध्वा त्रिंशतं
चाश्वान्देवेभ्यो यमुनामनु सरस्वतीं विंशतिं च गंगामनु चतुर्दश ४८ अश्वमेधसहस्रेण राज
सूयशतेन च इष्टवान्स महातेजा दौष्यंतिर्भरतः पुरा ४९ भरतस्य महत्कर्म सर्वराजसु पा
र्थिवाः खं मर्त्या इव बाहुभ्यां नानुगंतुमशक्नुवन् ५० ॥

४८ ४९ महाकर्म भरतस्य न पूर्वे नापरे जनाः दिवं मर्त्य इव हस्ताभ्यां नोदापुः पंचमानवा इति श्रुतेरर्थं संगृहीतानि भरतस्येति ५०

बह्वान्हयानितिपाठः बह्वंसंख्याविशेषः अर्बुदपर्यायः यस्मिन्सहस्रंब्राह्मणावहशोगाविभेजिरेइतिश्रुतेः ५५ ५६ व
र्षसहस्राणिः स्त्रियः वर्षसहस्रिकाः पुरुषाः ५७ ५९ द्रोणदुघाः द्रोणपरिमितंक्षीरंदुहन्तिताः द्रोणः कलशइत्येके

परं सहस्राद्योबह्वानहयान्वेदीर्वितत्य च सहस्रयज्ञपद्मानांकाण्वायभरतोददौ ५१ सचेन्ममा
रसंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैवमापुत्रमनुतप्यथाः ५२ रामंदाशरथिंचैवमृतंशु
श्रुमसृंजय योन्वकंपतवैनित्यंप्रजाःपुत्रानिवौरसान् ५३ विधवायस्यविषयेनानाथाःकाश्च
नाभवन् सदैवासीत्पितृसमोरामोराज्यंयदन्वशात् ५४ कालवर्षीचपर्जन्यःसस्यानिसमपा
दयत् नित्यंसुभिक्षमेवासीद्रामेराज्यंप्रशासति ५५ प्राणिनोनाप्सुमज्जंतिनान्यथापावकोदह
त् रुजाभयंनतत्रासीद्रामेराज्यंप्रशासति ५६ आसन्वर्षसहस्राणियत्तथापुत्रसहस्रिकाः पु
रोगाः सर्वसिद्धार्थारामेराज्यंप्रशासति ५७ नान्योन्येनविवादोभूत्स्त्रीणामपिकुतोनृणां ध
र्मनित्याःप्रजाश्चासन्रामेराज्यंप्रशासति ५८ संतुष्टाःसर्वसिद्धार्थानिर्भयाःस्वैरचारिणः नराः
सत्यव्रताश्चासन्रामेराज्यंप्रशासति ५९ नित्यपुष्पफलाश्चैवपादपानिरुपद्रवाः सर्वाद्रोणदु
घागावोरामेराज्यंप्रशासति ६० सचतुर्दशवर्षाणिवनेप्रोष्यमहातपाः दशाश्वमेधान्जारू
थ्यानाजहारनिरर्गलान् ६१ युवाश्यामोलोहिताक्षोमातंगइवयूथपः आजानुबाहुःसुमु =

६० जारूथ्यानस्तुत्यान् त्रिगुणदक्षिणान्नित्यन्येनिरर्गलानश्ववारिति खःसिंहस्कंधोमहाभुजः ६२ ॥ हारान् ६१

श्री॰
शां॰ प॰
टी॰
५४

६३ ६४ चतुर्युजः चतुरश्वाः ६८ ६९ उपह्वरेसमीपे अंकेऊरौनिषसादआसांचक्रे तस्मात्योगात्साउर्वशी ऊरौआसीयस्याः

दशवर्षसहस्राणिदशवर्षशतानिच अयोध्याधिपतिर्भूत्वारामोराज्यमकारयत् ६३ सचेन्म
मारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैवमापुत्रमनुतप्यथाः ६४ भगीरथंचराजानंमृ
तंशुश्रुमसृंजय यस्येंद्रोविततेयज्ञेसोमंपीत्वामदोत्कटः ६५ असुराणांसहस्राणिबहूनिसु
रसत्तम अजयद्बाहुवीर्येणभगवान्पाकशासनः ६६ यःसहस्रंसहस्राणांकन्याहेमविभूषि
ताः ईजानोविततेयज्ञेदक्षिणामत्यकालयत् ६७ सर्वारथगताःकन्यारथाःसर्वेचतुर्युजः
शतंशतंरथेनागाःपद्मिनोहेममालिनः ६८ सहस्रमश्वाएकैकंहस्तिनंपृष्ठतोन्वयुः गवां
सहस्रमश्वेऽश्वेसहस्रंगव्यजाविकं ६९ उपह्वरेनिवसतोयस्यांकेनिषसादह गंगाभागीर
थीतस्मादुर्वशीह्यभवत्पुरा ७० भूरिदक्षिणमिक्ष्वाकुंयजमानंभगीरथं त्रिलोकपथगागंगा
दुहितृत्वमुपेयुषी ७१ सचेन्ममारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैवमापुत्रमनुत ॥
प्यथाः ७२ दिलीपंचमहात्मानंमृतंशुश्रुमसृंजय यस्यकर्माणिभूरीणिकथयंतिद्विजा
तयः ७३ यइमांवसुसंपूर्णांवसुधांवसुधाधिपः ददौतस्मिन्महायज्ञेब्राह्मणेभ्यःसमाहितः

५४

सतियोगादुर्वशीत्यपेक्षितेकस्वत्वंवर्णविपर्ययश्छंदोदोषादित्वात्तज्ज्ञेयं ७० ७१ ७२ ७३ ७४ ॥

७५ ७६ समयासमसबरानुसारेणावादयदितिसंबंधः ७७ ममसुवत इतिशेषः मांलक्षीकृत्येत्यर्थः ७८ ७९ शतधन्वानं शत
धनं तानसदतेयन्वयस्यतं शतधन्वानं मध्यमपदलोपीसमासः ८० ८१ ८२ एवंराज्यंदधिमिश्रमाज्यंकस्यचिदर्थप्रवेशेत्यादना

यस्येदृयजमानस्ययज्ञेयज्ञेपुरोहितः सहस्रंवारणानदैमानदक्षिणामत्यकालयत् ७५ यस्यय
ज्ञेमहानासीद्यूपःश्रीमान्हिरण्मयः तंदेवाःकर्मकुर्वाणाःशक्रज्येष्ठाउपाश्रयन् ७६ चषालेय
स्यसौवर्णेतस्मिन्यूपेहिरण्मये ननृतुर्देवगन्धर्वाःषट्सहस्राणिसप्तधा ७७ अवादयत्तत्रवीणाम
मन्यं ध्येविश्वावसुःस्वयं सर्वभूतान्यमन्यन्तममवादयतीत्ययं ७८ एतद्राज्ञोदिलीपस्यराजानोनानुचक्रिरे
यस्येभाहेमसंछन्नाःपथिमत्ताःस्मशेरते ७९ राजानंशतधन्वानंदिलीपंसत्यवादिनं येपश्य
न्तमहात्मानंतेपिस्वर्गजितानराः ८० त्रयःशब्दानजीर्यन्तेदिलीपस्यनिवेशने स्वाध्यायघोषो
ज्याघोषोदीयतामितिवैत्रयः ८१ मचेन्ममारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैवमापुत्र
मनुतप्यथाः ८ ८२ मांधातारंयौवनाश्वमृतंशुश्रुमसृंजय यंदेवामरुतोगर्भंपितुःपार्श्वादा
पाहरन् ८३ समृद्धोयुवनाश्वस्यजठरेयोमहात्मनः पृषदाज्योद्भवःश्रीमांस्त्रिलोकविजयीन्नृपः
८४ यंदृष्ट्वापितुरुत्संगेशयानंदेवरूपिणं अन्योन्यमब्रुवन्देवाःकमयंधास्यतीतिवै ८५ ॥

यनिर्मितेन
युवनाश्वेनपीतात्तत्तरेतोरुधिरयोगंविनापितुरुदरेगर्भोभवत्पितुःपार्श्वंभित्वानिःसारितोदेवैरित्याख्यायिकार्थोत्रसूचितः ८३ ८५

६८ ६७ अङ्गाष्पकेन शतं पलानि व्यवर्द्धत द्वादशसमो द्वादशवर्षतुल्यः द्वादशशतं पलत्तुलितो वाऽभवत् एतावानेव

मामेवधास्यतीत्येवमिंद्रोथाभ्युपपद्यत मांधातेति ततस्तस्य नाम चक्रे शतक्रतुः ८६ ततस्तु प
यसोधारां पुष्टिहेतोर्महात्मनः तस्यास्ये यौवनाश्वस्य पाणिरिंद्रस्य चास्रवत् ८७ तं पिबन्पाणि
मिंद्रस्य शतमह्नाव्यवर्द्धत स आसीद्द्वादशसमो द्वादशाहेन पार्थिवः ८८ तमिमं पृथिवी सर्वाए
कह्नासमपद्यत धर्मात्मानं महात्मानं शूरमिंद्रसमं युधि ८९ यश्चांगारं तु नृपतिं मरुत्तमसितं
गयं अंगं बृहद्रथं चैव मांधाता समरेऽजयत् ९० यौवनाश्वो यदांगारं समरे प्रत्ययुध्यत विस्फा
रैर्धनुषो देवा द्यौरभेदीति मेनिरे ९१ यत्र सूर्य उदेति स्म यत्र च प्रतितिष्ठति सर्वं तद्यौवनाश्वस्य
मांधातुः क्षेत्रमुच्यते ९२ अश्वमेधशतेनेष्ट्वा राजसूयशतेन च अददद्रोहितान्मत्स्यान्ब्राह्म
णेभ्यो विशांपते ९३ हैरण्यान्योजनोत्सेधानायतान्दशयोजनं अतिरिक्तान्द्विजातिभ्यो व्य
भजंस्तितरे जनाः ९४ स चेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्य थाः

प्रायेणापक्वस्य पुरुषस्य भावो भवति ८८ अभेदि तिन्ना ९१ ९२ मत्स्यान् हैरण्यानिति संबंध ९३ ९४ ९५ ९६ ॥ ॥

शम्यास्थूलबुध्नःकाष्ठदंडः सबलवताक्षिप्तोयावद्दूरंपतेत्तावान्देशः शम्यापातः तावंतंतंदेशमुरुवः सर्वोयत्रैवंवेदीकृ
तांगोवसुंधरांपर्यगच्छत्परित्यज्यसमुद्रतीरंप्राप्तइत्यर्थः १७ १८ व्यभजत्पुत्रेभ्योदत्तवान् १९ यदुद्रुह्युपुरस्त
वैस्तथा तान्यदुद्रुह्युपुरोगान् १ १२ याजिनांयज्वनांराज्ञांसहस्रंब्राह्मणेभ्यः ब्राह्मणानामातिथ्यार्थंप्रयुक्तयो

शम्यापातेनाभ्यतीयाद्वेदीभिश्चित्रयन्महीं ईजानःक्रतुभिर्मुख्यैःपर्यगच्छद्वसुंधरां १७
इष्ट्वाक्रतुसहस्रेणवाजपेयशतेनच तर्पयामासविप्रेंद्रांस्त्रिभिःकांचनपर्वतैः १८ व्यूढे
नासुरयुद्धेनहत्वादैतेयदानवान् व्यभजत्पृथिवींकृत्स्नांययातिर्नहुषात्मजः १९ अंतेषु
पुत्रान्निक्षिप्ययदुद्रुह्युपुरोगमान् पूरुंराज्येभिषिच्यसदारःप्राविशद्वनं १ सचेन्ममा
रसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैवमापुत्रमनुतप्यथाः १ ११ अंबरीषंचना
भागिंमृतंशुश्रुमसृंजय यंप्रजावव्रिरेपुण्यंगोप्तारंनृपसत्तमम २ यःसहस्रंसहस्राणांरा
ज्ञामयुतयाजिनां ईजानोविततेयज्ञेब्राह्मणेभ्यःसमादिशत् ३ नैतत्पूर्वेजनाश्चक्रुर्नकरि
ष्यंतिचापरे इत्यंबरीषंनाभागिमन्वमोदंतदक्षिणाः ४ शतंराजसहस्राणिशतंराजशता
निच सर्वेश्वमेधैरीजानास्तेन्वयुर्दक्षिणायनं ५ ॥

जितवान् नृपानदास्येयोजितवा नित्यर्थः ३ दक्षिणादात्
युक्ताः ४ सर्वेराजानोंबरीषस्ययज्ञेविप्रदासंकुर्वाणा अश्वमेधफलभागित्वात्तथाजिनःस्मृतः अंबरीषमाहात्म्याद्दक्षिणा

पंचव्रतपश्चात्स्मृतिःतामुत्तरायणमार्गेण हिरण्यगर्भलोकंगमनमाहुरर्थः ॥ ५५ ॥

श्री·
शां·रा·
टी·
५६

६ ७ शाशबिंदवः शशबिंदोः पुत्राः ८ १३ ददतो दानं कुर्वतः अयः स्वर्णानि देववित्तं अस्तयं सततवर्द्धतां मेतयमिति पाठस्तत्र

सचेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्रमनुतप्यथाः ११ शशबिंदुं चैत्ररथं
मृतं शुश्रुम सृंजय यस्य भार्यासहस्राणां शतमासीन्महात्मनः ७ सहस्रं तु सहस्राणां य
स्यासन् शाशबिंदवः हिरण्यकवचाः सर्वे सर्वे चोत्तमधन्विनः शतं कन्या राजपुत्रमेकैकं पृथ
गन्वयुः कन्यां कन्यां शतं नागा नागं नागं शतं रथाः ९ रथे रथे शतं चाश्वा देशजा हेममालिनः
अश्वे अश्वे शतं गावो गवां वा तद्वदजाविकं १० एतद्धनमपर्यन्तमश्वमेधे महामखे शशबिंदुर्महा
राज ब्राह्मणेभ्यः समर्पयत् ११ सचेन्ममार सृंजय चतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यं मा पुत्र
मनुतप्यथाः १२ गयं चामूर्तरयसं मृतं शुश्रुम सृंजय यः स वर्षशतं राजा हुतशिष्टाशनोभव
त् १३ यस्मै वह्निर्वरं प्रादात्ततो वव्रे वरान्नायः ददतो मे तयं वित्तं धर्मे श्रद्धा च वर्द्धतां १४ मनो
मे रमतां सत्येन त्वत्प्रसादाद्धुताशन लेभे च कामांस्तान्सर्वान्पावकादिति नः श्रुतं १५ दर्शे चा
पूर्णमासे च चातुर्मास्ये पुनः पुनः अयजद्धयमेधेन सहस्रं परिवत्सरान् १६ शतं गवां सहस्रा
णां शतमश्वतराणि च उत्थायोत्थाय वै प्रादात्सहस्रं परिवत्सरान् १७ तर्पयामास सोमे
र्षः १४ १५ १६ १७ १८ न देवान्वित्तैर्द्विजानपि पितॄन्स्वधाभिः कामैश्च स्त्रियः स पुरुषर्षभ १८ ॥ ५६

व्यामव्यायतहस्तप्रमाणांस्वहस्तेनोन्मितं दशव्यामंपंचाशद्धस्तविस्तारां द्विरायतांशतहस्तदीर्घां १९ २३ उपातिष्ठन्नपि स्व
कार्येमांनियोजयमांनियोजयेति २४ तेषांमाविनानांपशूनांचर्मराशेः उत्क्लेदात्स्रावद्रवात् २५ तुभ्यमिति निष्कनि

सौवर्णांपृथिवींकृत्वादशव्यामांद्विरायतां दक्षिणामददाद्राजावाजिमेधेमहाक्रतौ १९ या
वत्यःसिकताराजन्गंगायाःपुरुषर्षभ तावतीरेवगाःप्रादादामूर्तरयसोगयः २० सचेन्म
मारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरस्तुभ्यंमापुत्रमनुतप्यथाः १ २१ रंतिदेवंचसांकृ
त्यंमृतंसृंजयशुश्रुम सम्यगाराध्ययःशक्राद्वरंलेभेमहातपाः २२ अन्नंचनोबहुभवेदतिथीं
श्चलभेमहि श्रद्धाचनोमाव्यगमन्माचयाचिष्मकंचन २३ उपातिष्ठन्पशवःस्वयंतंसंशित
व्रतं ग्राम्यारण्यामहात्मानंरंतिदेवंयशस्विनं २४ महानदीचर्मराशेरुत्क्लेदात्सुस्रुवेयतः
ततश्चर्मण्वतीत्येवंविख्यातासामहानदी ब्राह्मणेभ्योददौनिष्कान्सदसिप्रततेनृप तुभ्यंतु
भ्यंतुभ्यंनिष्कमितियत्राक्रोशंतिवैद्विजाः २६ सहस्रंतुभ्यमित्युक्त्वाब्राह्मणान्स्मप्रपद्यते अन्वाहा
र्योपकरणंद्रव्योपकरणंचयत् २७ घटाःपात्र्यःकटाहानिस्थाल्यश्चपिठराणिच नासीत्किंचि
दसौवर्णंरंतिदेवस्यधीमतः २८ सांकृतेरंतिदेवस्ययांरात्रिमवसन्गृहे आलभ्यंतशतंगावःसह

स्राणिचविंशतिः २९ ॥
क्षशतंशतंतुभ्यमितितिसेचप्रतास्यतीतिमंत्रवर्णात् तुभ्यंनिष्कशतंददामीतिक्रोशंत्येवहि
जाःनतुकश्चिद्गृह्णाति २६ सहस्रंतुभ्यमित्युक्त्वातुब्राह्मणान्प्रतिग्रहीतृन्प्रपद्यतेप्राप्नोति २७ पिठराणिवितनमुखानिदारु

॥ ५४ ॥ शांतिप

श्री॰
शां॰रा॰
टी॰
५७

नाद्यमांसंपञ्चमात्रोपयोगस्यशाउक्तत्वात् ३० ३१ ऐक्ष्वाकंइक्ष्वाकुवंशजं ३२ ३३ आदेशेनआज्ञयातद्वित्तंस्वर्णप्रासादरूपं ३६

तत्रस्मसूदाःक्रोशंतिसुमृष्टमणिकुंडलाः सूपभूयिष्ठमश्नीध्वंनाद्यमांसंयथापुरा ३० सचेन्ममारसृंज
यचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैवमापुत्रमनुतप्यथाः १४ ३१ सगरंचमहात्मानंमृतंशुश्रुमसृं
जय ऐक्ष्वाकंपुरुषव्याघ्रममितमानुषविक्रमं ३२ षष्टिःपुत्रसहस्राणियंयांतमनुजग्मिरेनक्षत्रराजं
वर्षांतेव्यभ्रेज्योतिर्गणाइव ३३ एकच्छत्रामहीयस्यप्रतापादभवत्पुरा योऽश्वमेधसहस्रेणतर्पया
मासदेवताः ३४ यःप्रादात्कनकस्तंभप्रासादंसर्वकांचनं पूर्णंपद्मदलाक्षीणांस्त्रीणांशयनसं
कुलं ३५ द्विजातिभ्योऽनुरूपेभ्यःकामांश्चविविधान्बहून् यस्यादेशेनतद्वित्तंव्यभजंतद्विजातयः
३६ खानयामासयःकोपात्पृथिवींसागरांकितां यस्यनाम्नासमुद्रश्चसागरत्वमुपागतः ३७
सचेन्ममारसृंजयचतुर्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैवमापुत्रमनुतप्यथाः ३८ १५ राजानंचपृ
थुंवैन्यंमृतंशुश्रुमसृंजय यमभ्यषिंचन्संभूयमहारण्येमहर्षयः ३९ प्रथयिष्यतिवैलोकान्पृ
थुरित्येवशब्दितः क्षताद्योवैत्रायतीतिसतस्मात्क्षत्रियःस्मृतः ४० पृथुंवैन्यंप्रजादृष्ट्वारक्ताःस्मेति
यदब्रुवन् ततोराजेतिनामास्यअनुरागादजायत ४१ ॥

३८ वैन्यंवेनपुत्रंमहारण्ये ३९ ४० ४१ ॥ दंडकारण्ये

पुटके पुटके पत्रे पत्रे इति प्राचः ४३ ४४ त्रितल्लोत्सेयातन्नल्वः किष्कुचतुःशतमिति पाठं प्रकल्प्य व्याख्यायते ४५ ४६ विप्रल
म्भविप्रलपितं ४७ ४८ विशोको जात इति शेषः ४९ ५० गामितः स्रुतः विजातः गुणवान् ५१ इति राजधर्मेषु षोडशराजको

स्रक्षूपव्याघ्रपृथिवी पुटके पुटके मधु सर्वाङ्गाणाङ्दुघा गावो वैन्यस्यासन्प्रशासतः ४२ अरोगाः
सर्वसिद्धार्था मनुष्या अकुतोभयाः यथाभिकाममवसन्क्षेत्रेषु च गृहेषु च ४३ आपस्तस्तम्भि
रे चास्य समुद्रमभियास्यतः सरितश्चानुदीर्यन्त ध्वजभङ्गश्च नाभवत् ४४ हैरण्यांस्त्रितलोत्से
धान्पर्वतानेकविंशति ब्राह्मणेभ्यो ददौ राजा योऽश्वमेधे महामखे ४५ सचेन्ममार सृञ्जय चतु
र्भद्रतरस्त्वया पुत्रात्पुण्यतरश्चैव मा पुत्रमनुतप्यथाः ९६ ४६ किं वा तूष्णीं ध्यायसे सृञ्जय त्वं
न मे राजन्वाचमिमां शृणोषि नचेन्मोघं विप्रलप्तं मयेदं पथ्यं मुमूर्षोरिव सम्प्रयुक्तं ४७ सृञ्जयः
शृणोमि ते नारद वाचमेतां विचित्रार्थां स्रजमिव पुण्यगन्धां राजर्षीणां पुण्यकृतां महात्मा
नां कीर्त्या युक्तां शोकनिर्णाशनार्थं ४८ नैतन्मोघं विप्रलप्तं महर्षे दृष्ट्वैवाहं नारद त्वां विशो
कः शुश्रूषुस्ते वचनं ब्रह्मवादिन्न ते तृप्याम्यमृतस्येव पानात् ४९ अमोघदर्शिन्मम चेत्प्र
सादं सन्तापदग्धस्य विभो प्रकुर्याः सुतस्य सञ्जीवनमद्य मे स्यात्तव प्रसादात्सुतसङ्गमश्च ४९
नारदउ॰ यस्ते पुत्रो गामितो यो विजातः स्वर्णष्ठीवी यददात्पर्वतस्ते पुनस्तं ते पुत्रमहं ददामि हिर

ाणि राजधर्मेषु षोडशराजकीये त्रिंशोध्यायः २९ ॥

[illegible] ५१ [illegible]

नत्रिंशोध्यायः २९ ॥

श्री॰
ग्रं॰रा॰
टी॰
५८

१ ५ हविःपवित्रभोज्येनशाल्येनेनदेवभोज्येनहृतेननाभ्यांविहर्तुकामावितिसंबंधः ६ ७ ९ प्रगुणीभवअनुकूलोभव ११ १२

युधिष्ठिरउवाच सकथंकांचनष्ठीवीसृंजयस्यसुतोभवत् पर्वतेनकिमर्थंवादत्तस्तेनममाचव १
यदावर्षसहस्रायुस्तदाभवतिमानवः कथमप्राप्तकौमारःसृंजयस्यसुतोमृतः २ उताहोनाममात्रं
वैसुवर्णष्ठीविनोभवत् कथंवाकांचनष्ठीवीत्येतदिच्छामिवेदितुं ३ श्रीकृष्णउवाच अत्रतेवर्णयि
ष्यामियथावृत्तंजनेश्वर नारदःपर्वतश्चैवद्वावृषीलोकसत्तमौ ४ मातुलोभागिनेयश्चदेवलोका
दिहागतौ विहर्तुकामौसंप्रीत्यामानुषेषुपुराविभो ५ हविःपवित्रभोज्येनदेवभोज्येनचैवहि नार
दोमातुलश्चैवभागिनेयश्चपर्वतः ६ तावुभौतपसोपेताववनीतलचारिणौ भुंजानौमानुषान्भो
गान्यथावत्पर्यधावतां ७ प्रीतिमंतौमुदायुक्तौसमयंचैवचक्रतुः योभवेद्धृदिसंकल्पःशुभोवा
यदिवाशुभः ८ अन्योन्यस्यसआख्येयोमृषाशापोन्यथाभवेत् तौतथेतिप्रतिज्ञायमहर्षीलोका
पूजितौ ९ सृंजयंश्वैत्यमभ्येत्यराजानमिदमूचतुः आवांभवतिवत्स्यावःकंचित्कालंहितायते
१० यथावत्पृथिवीपालआवयोःप्रगुणीभव तथेतिकृत्वाराजातौसत्कृत्योपचचारह ११ ततःक
दाचित्तौराजामहात्मानौतपोधनौ अब्रवीत्परमप्रीतःसुतेयंवरवर्णिनी १२ ॥

सुकुमारीनाम्ना सौम्यं उत्तमं १४ १५ १६ १७ १८ १९ २० २१ प्रवर्त्तितं प्रवर्त्तमानं २२ नेत्वा २३ २४ २५ ॥
एकैव मम कन्येषा युवां परिचरिष्यति दर्शनीयानवद्याङ्गी शीलवृत्तसमाहिता १३ सुकुमा
री कुमारी च पद्मकिञ्जल्कसप्रभा परमं सौम्यमित्युक्ता ताभ्यां राजा शशास तां १४ कन्ये विप्राव
पचर देववत्पितृवच्च ह सा तु कन्या तथेत्युक्त्वा पितरं धर्मचारिणी १५ यथा निदेशं राज्ञस्तौ सत्कृ
त्योपचचार ह तस्यास्तेनोपचारेण रूपेणाप्रतिमेन च १६ नारदं हृच्छयस्तूर्णं सहसैवाभ्यपद्यत
वहृधे हि ततस्तस्य हृदि कामो महात्मनः १७ यथा शुक्लस्य पक्षस्य प्रवृत्तौ चन्द्रमाः शनैः नच तं भा
गिनेयाय पर्वताय महात्मने १८ शशंस मन्मथं तीव्रं व्रीडमानः स्वधर्मवित् तपसा चेङ्गितेनैव पर्वतो
ऽथ बुबोध तं १९ कामार्त्तं नारदं क्रुद्धः शशापैनं ततो भृशं कृत्वा समयमव्यग्रो भवान्वै सहितो मया
२० यो भवेद्धृदि संकल्पः शुभो वा यदि वाशुभः अन्योन्यस्य स आख्येय इति तद्वै मृषा कृतं २१ भवा
ता वचनं ब्रह्मंस्तस्मादेवं शपाम्यहं नहि कामं प्रवर्त्तन्तं भवानाचष्ट मे पुरा २२ सुकुमार्यां तेन तस्मा
देव शपाम्यहं ब्रह्मचारी गुरुर्यस्मात्तपस्वी ब्राह्मणश्च सन् २३ अकार्षीः समयभ्रंशमावाभ्यां
यः कृतो मिथः शप्स्ये तस्मात् सुसंक्रुद्धो भवन्तं तं निबोध मे २४ सुकुमारी च ते भार्या भविष्यति
न संशयः वानरं चैव नेहृपं विवाहात्प्रभृति प्रभो २५ ॥

२६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ ३८ ॥

संद्रक्ष्यंतिनराश्चान्येस्वरूपेणाविनाशनं मतद्वाक्यंतद्विज्ञायनारदःपर्वतंतथा २६ अथापत्न
मपिक्रोधाच्छशापैनंयथासमातपः नत्वमाब्रह्मचर्येणसत्येनचदमेनच २७ युक्तोपिनित्यधर्मे
श्चनवैस्वर्गमवाप्स्यसि तौतशप्ताभृशंक्रुद्धोपरस्परममर्षणौ प्रतिजग्मतुरन्योन्यंक्रुद्धाविवग
जोत्तमौ पर्वतःपृथिवींकृत्स्नांविचचारमहामतिः २९ पूज्यमानोयथान्यायंतेजसास्वेनभारत
अथतामलभत्कन्यांनारदःसृंजयात्मजां ३० यमेनाविप्रप्रवरःसुकुमारीमनिंदितां सातुकन्या
यथाशापंनारदंतंददर्शह ३१ पाणिग्रहणमंत्राणांनियोगादेवनारदं सुकुमारीचदेवर्षिंवान
रप्रतिमाननं ३२ नैवावमन्यततदाप्रीतिमत्येवचाभवत् उपतस्थेचभर्तारंनचान्यंमनसाप्यगा
त् ३३ देवंमुनिंवायक्षंवापतित्वेपतिवत्सला ततःकदाचिद्भगवान्पर्वतोनुचचारह वनंविरहि
तंकिंचित्तत्रापश्यत्सनारदं ततोभिवाद्यप्रोवाचनारदंपर्वतस्तदा ३५ भवान्प्रसादंकुरुतात्स्वा
र्गादेशायमेप्रभो तमुवाचततोदृष्ट्वापर्वतंनारदस्तथा ३६ कृतांजलिमुपासीनंदीनंदीनतरः
स्वयं त्वयाहंप्रथमंशप्तोवानरस्त्वंभविष्यसि ३७ इत्युक्तेनमयापश्चात्त्वमपिमत्सरात्
अद्यप्रभृतिवैवासंस्वर्गेनावाप्स्यसीतिह ३८ ॥

३९ ४० ४१ ४२ ४४ इतित्रिंशोध्यायः ३० ततोराजा १ २ ३ ४ ५ ॥
तवनैतद्धिसदृशंपुत्रस्थानेहिमेभवान् निवर्त्तयेतांतौशापावन्योन्येनतदामुनी ३९ श्री
सम्स्हृतदादृष्ट्वानारदंदेवरूपिणं सुकुमारीप्रदुद्राववपरपत्याभिशंकया ४० तांपर्वत
स्ततोदृष्ट्वाप्रद्रवंतीमनिंदितां अब्रवीत्तवभर्त्तैषनात्रकार्याविचारणा ४१ ऋषिःपरमध
र्मात्मानारदोभगवान्प्रभुः तवैवाभेद्यहृदयोमातेभूदत्रसंशयः ४२ सानुनीताबहुविधंपर्व
तेनमहात्मना शापदोषंचतंभर्त्तुः श्रुत्वाप्रकृतिमागता ४३ पर्वतोथययौस्वर्गंनारदोभ्यगा
मद्गृहान् ४४ वासुदेवउवाच प्रत्यक्षकर्त्तासर्वस्यनारदोभगवानृषिः एषवक्ष्यतितेपृष्टोयथा
वृत्तंनरोत्तम ४५ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेत्रिंशोध्यायः ३० वैशंपायनउ० ततो
राजपांडुसुतोनारदंप्रत्यभाषत भगवान्श्रोतुमिच्छामिसुवर्णष्ठीविसंभवं १ एवमुक्तस्तुसमु
निर्धर्मराजेननारदः आचचक्षेयथावृत्तंसुवर्णष्ठीविनंप्रति २ नारदउ० एवमेतन्महाबाहोय
थायंकेशवोब्रवीत् कार्यस्यास्यतुयच्छेषंतत्तेवक्ष्यामिपृच्छतः ३ अहंचपर्वतश्चैवस्वस्रीयोमे
महामुनिः वस्तुकामावभिगतौसृंजयंजयतांवरं ४ तत्रावांपूजितौतेनविधिदृष्टेनकर्मणा स
र्वकामैःसुविहितौनिवसावोस्यवेश्मनि ५ ॥

६ सांप्रतंकल्याणं ७ ८ ९ १० ११ देवानामिति येनदेवपीडामनुष्यत्वयस्मान्नभवतितन्नादर्शंवरंगृहाणेतिभावः १२ १६

व्यतिक्रांतास्तुवर्षास्तुसमयेगमनस्यच पर्वतोमामुवाचेदंकालेवचनमर्थवत् ६ आवामस्यन
रेंद्रस्यगृहेपरमपूजितौ उषितौसमयेप्राप्तंसंस्तद्धिचिंतयसांप्रतं ततोऽहमब्रुवंराजन्पर्वतंशुभदर्श
नं सर्वमेतत्त्वयिविभोभागिनेयोपपद्यते ८ वरेणाच्छंद्यतांराजालभतांयद्यदिच्छति आवयो
स्तपसासिद्धिंप्राप्नोतुयदिमन्यसे ९ ततस्त्वाहूयराजानंसृंजयंजयतांवरं पर्वतोनुमतेवाक्यमु
वाचकुरुपुंगव १० प्रीतौस्वोनृपसत्कारैर्भवतोर्जवसंसृतैः आवाभ्यामभ्यनुज्ञातोवरंनृवरवि
तय ११ देवानामविहिंसायांनभवेन्मानुषत्वयं तद्गृहाणमहाराजपूजार्होनोमतोभवान्
१२ सृंजयउवाच प्रीतौभवंतौयदिमेकृतमेतावताम्म एषएवपरोलाभोनिर्वृत्तोमेमहाफ
लः १३ तमेववादिनंभूयःपर्वतःप्रत्यभाषत वृणीष्वराजन्संकल्पंयत्तेहृदिचिरंस्थितं १४
सृंजयउवाच अभीप्सामिसुतंवीरंवीर्यवंतंदृढव्रतं आयुष्मंतंमहाभागंदेवराजसमद्युतिं १५
पर्वतउवाच भविष्यत्येषतेकामोनत्वायुष्मान्भविष्यति देवराजाभिभूत्यर्थंसंकल्पोह्येषतेहृदि
१६ ख्यातःसुवर्णष्ठीवीतिपुत्रस्तवभविष्यति रक्ष्यश्चदेवराजात्सदेवराजसमद्युति १७ ॥

तच्छ्रुत्वा सृंजयो वाक्यं पर्वतस्य महात्मनः प्रसादयामास तदा नैतदेवं भवेदिति १८ आयुष्मान्मे भवेत्पुत्रो
भवतस्तपसा प्रभो नचतं पर्वतः किंचिदुवाचेंद्रव्यपेक्षया १९ तमहं नृपतिं दीनमब्रुवं पुनरेव च स्मर्त्तव्यो।
स्मि महाराज दर्शयिष्यामि ते सुतं २० अद्य ते दयितं पुत्रं प्रेतराजवशंगतं पुनर्दास्यामि तद्रूपं मा शुचः पृथि
वीपते २१ एवमुक्त्वा तु नृपतिं प्रयातौ स्वो यथेप्सितं सृंजयश्च यथाकामं प्रविवेश स्वमंदिरं २२ सृंजयस्या
थ राजर्षेः कस्मिंश्चित्कालपर्यये जज्ञे पुत्रो महावीर्यस्तेजसा प्रज्वलन्निव २३ ववृधे स यथाकालं सरसीव
महोत्पलं बभूव कांचनष्ठीवी यथार्थं नाम तस्य तत् २४ तदद्भुततमं लोके पप्रथे कुरुसत्तम बुबुधे तच्च दे
वेंद्रो वरदानं महर्षितः २५ ततः स्वाभिभवाद्भीतो बृहस्पतिमते स्थितः कुमारस्यांतरप्रेक्षी बभूव बलवृत्र
हा २७ चोदयामास तद्वज्रं दिव्यास्त्रं मूर्त्तिमत्स्थितं व्याघ्रो भूत्वा जहीमं त्वं राजपुत्रमिति प्रभो प्रवृद्धः किल
कार्येण मामेषोऽभिभविष्यति सृंजयस्य सुतो वज्र यथैनं पर्वतोऽब्रवीत् २८ एवमुक्तस्तु शक्रेण वज्रः परपुरं
जयः कुमारमंतरप्रेक्षी नित्यमेवान्वपद्यत २९ सृंजयोऽपि सुतं प्राप्य देवराजसमद्युतिं हृष्टः सांतःपुरो रा
जा वननित्यो बभूव ह ३० ततो भागीरथीतीरे कदाचिन्निर्जने वने धात्रीद्वितीयो बालः स क्रीडार्थं पर्यधाव
त ३१ पंचवर्षकदेशीयो बालो नागेंद्रविक्रमः सहसोत्पतितं व्याघ्रमाससाद महाबलं ३२ ॥

श्री॰ सबालस्तेननिक्षिप्तोवेपमानोन्नृपात्मजः व्यसुःपपातमेदिन्यांततोधात्रीविचुक्रुशे ३३ हत्वातुराजपुत्रंसत
शां॰ रा॰ त्रैवांतरधीयशार्दूलोदेवराजस्यमाययांतर्हितस्तदा ३४ धात्र्यास्तुनिनदंश्रुत्वारुदंत्याःपरमार्त्तवत् अथ
टी॰ यावत्तंदेशंस्वयमेवमहीपतिः ३५ सददर्शशयानंतंगतासुंपीतशोणितं कुमारंविगतानंदंनिशाकर
६९ मिवच्युतं ३६ हतपुत्रस्तगामारोप्यपरिपीडितमानसः पुत्रंरुधिरसंसिक्तंपर्यदेवयदातुरः ३७ ततस्तामातरो
स्तस्यरुदंत्यःशोककर्षिताः अभ्ययावंततंदेशंयत्रराजासमंजयः ३८ ततःसराजासस्मारमामेवगतमा
नसः तदाहंचिंतनंज्ञात्वागतवांस्तस्यदर्शनं ३९ मयैतानिचवाक्यानिश्राविताःशोकलालसः यानि
तेयदुवीरेणाकथितानिमहीपति ४० संजीवितश्चापिपुनर्वासवानुमतेतदा भवितव्यंतथातच्चनतच्छ
क्यमतोन्यथा ४१ ततऊर्ध्वंकुमारस्तुसर्वाणीवीमहायशाः चिंतप्रसादयामासपितुर्मातुश्चवीर्यवान् ४२
कारयामासराज्यंचपितरिस्वर्गतेनृप वर्षाणांशतमेकंचसहस्रंभीमविक्रमः ४३ ततईजेस
हायज्ञैर्बहुभिर्भूरिदक्षिणैः तर्पयामासदेवांश्चपितृंश्चैवमहाद्युतिः ४४ उत्पाद्य
चबहून्पुत्रान्कुलसंतानकारिणः कालेनमह ६९
ताराजन्कालधर्ममुपेयिवान् ४५

४६ ४७ एकत्रिंशोध्यायः ३१ तूष्णीभूतं १ २ धर्मेअनुतिष्ठस्वपालयेतिचसंबंधः ३ ६ शातयीतमारयेत् ७ ८

सत्वंराजेंद्रसंजातंशोकमेनंनिवर्तय यथात्वांकेशवःप्राहव्यासश्चसुमहातपाः ४६ पितृपैताम
हंराज्यमास्थायधुरमुद्वह इष्टापूर्तैर्महायज्ञैर्विहंलोकमवाप्स्यसि ४७ इतिश्रीमहाभारतेशांति
पर्वणिराजधर्मेसुवर्णष्ठीविसंभवएकत्रिंशोध्यायः ३१ वैशंपायनउवाच तूष्णींभूतंतुराजानंशोच
मानंयुधिष्ठिरं तपस्वीधर्मतत्त्वज्ञःकृष्णद्वैपायनोब्रवीत् १ व्यासउवाच प्रजानांपालनंधर्मोराज्ञां
राजीवलोचन धर्मःप्रमाणंलोकस्यनित्यंधर्मानुवर्तिनः २ अनुतिष्ठस्वतद्राजन्पितृपैतामहंपदं
ब्राह्मणेषुतपोधर्मःसनित्योवेदनिश्चितः ३ तत्प्रमाणंब्राह्मणानांशाश्वतंभरतर्षभ तस्यधर्मस्य
कृत्स्नस्यक्षत्रियःपरिरक्षिता ४ यःस्वयंप्रतिस्मशासनंविषयेरतः सबाहुभ्यांविनिग्राह्योलोकया
त्राविघातकः ५ प्रमाणमप्रमाणंयःकुर्यान्मोहवशंगतः भृत्योवायदिवापुत्रस्तपस्वीवाथकश्च
न ६ पापान्सर्वैरुपायैस्तान्नियच्छेद्घातयीतवा अतोन्यथावर्तमानोराजाप्राप्नोतिकिल्बिषं ७ ध
र्मंविनश्यमानंहियोनरक्षेत्सधर्महा तेत्वयाधर्महंतारोनिहताःसपदानुगाः ८ स्वधर्मेवर्तमानस्त्वं
किंनुशोचसिपांडव राजाहिहन्याद्दद्याच्चप्रजारक्षेच्चधर्मतः ९ ॥

श्री· १ मेमां दहंतिहृदयं पंचति शरीरंशोषयंति १ मयाबद्धोघातितानाइत्युक्तं तत्किंहननक्रियायांतवप्रयोज्यकर्तृत्वंप्रयो-
शां·रा· जकर्तृत्वंवाबध्यस्यचकर्मत्वंवाप्राक्कृतकर्मफलभोक्तृत्वंवेतिविकल्पयति ईश्वरइति २ नाद्यइत्याह ईश्वरेणेति परशोरिव
टी· परप्रयोज्यस्यतवहंतृत्वंनास्तीत्यर्थः ३ ४ परप्रयोज्योप्यहंपरशोःप्रयोक्तास्मिनतुपरशुवदचेतनोस्मीति ममपापमेवं
६२

मे

युधिष्ठिरउवाच नतेभिशंकेवचनंयद्ब्रवीषितपोधन अपरोक्तोहिधर्मःसर्वधर्मविदांवर १ म
यात्वबध्याबद्धोघातिताराज्यकारणात् तानिकर्माणिमेब्रह्मन्दहंतिचपचंतिच १ व्यासउवा
च ईश्वरोवाभवेत्कर्तापुरुषोवापिभारत हठोवावर्ततेलोकेकर्मजंवाफलंस्मृतं २ ईश्वरेणानि
युक्तोहिसाध्वसाधुचभारत कुरुतेपुरुषःकर्मफलमीश्वरगामितत् ३ यथाहिपुरुषश्छिंद्याद्वृ-
क्षंपरशुनावने छेत्तुरेवभवेत्पापंपरशोर्नकथंचन ४ अथवातदुपादानात्प्राप्नुयात्कर्मणःफलं
दंडशास्त्रकृतंपापंपुरुषेतन्नविद्यते ५ ॥

योन्यैवेत्याहाथवेति प्राप्नुयात्
परशोरुपादाता एवंतर्हियेनपरशोर्दं
डःशास्त्रंपरशुश्चकृतःतमेवपापंकर्तृप्राप्नुयात् तस्यप्रथमप्रयोज्यत्वात् पुरुषेउपादातरितन्नविद्यते तस्यजडवत्यत्वात् ५ ॥ ६२

नचेति यद्विचपतन्नेष्टं पततकिंयत अन्येनप्रहर्त्राकृतंपापंतस्यफलंशस्त्रकर्त्ताप्राप्नुयादिति नहिंजवन्यप्रयोज्येत्वय्यपिपापा
भावादीश्वरेएवतन्निवेशाय १६ अथापीति यद्विपुरुषएवकर्त्तापरईश्वरोनास्तितस्मादपिहेतोस्त्वयापतच्छुभमेवकृतं १७ यतः
कश्चिदपिदिष्टप्रतिग्रहस्यप्रतिकूलोभूत्वाऽवश्यंभाविनःकर्मणःसकाशान्ननिवर्त्तते दैवस्यदुर्लंघ्यत्वादितिभावः नत्वा
दिष्टमपिजन्मांतरीयःस्वस्यैवापरायइत्याशंक्याहदंडेति एवंपूर्वापरायस्यउत्तरोत्तरदेहत्वमित्यनादिदानीतनस्यकर्त्तेनोय

नचैतद्दिष्टंकौंतेययदन्येनकृतंफलं प्राप्नुयादितियस्माच्चईश्वरेतन्निवेशय १६ अथापिपुरुषः
कर्त्ताकर्मणोःशुभपापयोः नपरोविद्यतेतस्मादेवमेतच्छुभंकृतं १७ नहिकश्चित्क्वचिद्राजन्दिष्टा
त्प्रतिनिवर्त्तते दंडशस्त्रकृतंपापंपुरुषेतन्नविद्यते १८ यदिवामन्यसेराजनहतमेकंप्रतिष्ठितं ए
वमप्यशुभंकर्मनभूतंनभविष्यति १९ अथाभिपत्तिर्लोकस्यकर्त्तव्याशुभपापयोः अभिपन्नमिदंलो
केराज्ञामुपपद्यतदंडनं २० ॥

रायोक्तिअतःप्राचीनकर्त्तादंडशस्त्रकृद्विनप यंत्रयोज्यइतिभावः १८ तृतीयपक्षंदूषयति
यद्विवेति प्रतिष्ठितंनिश्चितंयथास्यात्तथायदिपुरुषंहतंहननक्रियायाःकर्मीभूतमेवमन्यसेतर्हिस्वभाववादिनस्तेभूतभाव्य
शुभाभावाद्दुष्टैवशोकइत्यर्थः १९ चतुर्थंचेतराज्ञाउद्यतदंडेनउद्धृतदपत्तमाह अथेति शुभपापयोःस्वावट्टःस्वियोः अभिप
त्तिःउपपत्तिःकर्त्तव्यासाचयर्मीयर्मीवंतरोणनक्ष्टतेतोचशास्त्रैकगम्याविति चेत्राज्ञाउद्यतदंडेनउद्धृतदमनेलोकेशास्त्रयो

श्री॰ शां॰रा॰ टी॰ ६३

अत्रशंकते तथापीति यद्यप्येवंतथापिलोकेशास्यमानेकर्माणिशुभान्यशुभानिचसमापतंति अवशंप्राप्यंतिफलंचप्रयच्छं-
ति अतोममप्रायोपवेशनमेववरमितिभावः २१ समापतंत्ते एवमिति यस्मात्कर्मणःपापात् अशुभफलात्मकपापप्रवृत्ति

तथापिलोकेकर्माणिसमावर्त्तंतिभारत शुभाशुभंफलंचैतेप्राप्नुवंतीतिमेमतिः २१ एवमप्यशुभंक
र्मकर्मणस्तत्फलात्मकं त्यजत्वंराजशार्दूलमैवंशोकेमनःकृथाः २२ स्वधर्मेवर्त्तमानस्यसापवादे
पिभारत एवमात्मपरित्यागस्तवराजन्नशोभनः २३ विहितानिहिकौंतेयप्रायश्चित्तानिकर्मणां
शरीरवांस्तानिकुर्यादशरीरःपराभवेत् २४ तद्राजन्जीवमानस्त्वंप्रायश्चित्तंकरिष्यसि प्रायश्चि
त्तमकृत्वातुप्रेत्यतप्तासिभारत २५ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेप्रायश्चित्तविधिः ३२
युधिष्ठिरउवाच हताःपुत्राश्चपौत्राश्चभ्रातरःपितरस्तथा श्वशुरागुरवश्चैवमातुलाश्चपितामहाः १
क्षत्रियाश्चमहात्मानःसंबंधिसुहृदस्तथा वयस्याभागिनेयाश्चज्ञातयश्चपितामह २ बहवश्चमनुष्ये
न्द्रानानादेशसमागताः घातिताराज्यलुब्धेनमयैकेनपितामह ३ तांस्ताहंशानहंहत्वाधर्मनित्या
न्महीक्षितः असकृत्सोमपान्वीरान्किंप्राप्स्यामितपोधन ४ ॥

रूपंकर्मभवतितत्पापमूलंकर्मत्यज २२ सापवादेनिंद्येपिस्वधर्मेस्थितस्यतेआत्मत्यागोनोचितइत्यर्थः २३ ननुतथापि
निंद्यात्कर्मणःपापंभवतीत्याशंक्याह विहितानीति २४ २५ द्वात्रिंशः ३२ हताःपुत्राश्च १ २ ४ ६२

५ ६ ७ ८ ९ १० अनंतकं प्रायश्चित्तैरप्यविनाश्यं ११ शरीराणीति ममत्वत्यागपूर्वप्रायश्चित्तमिति निश्चयोस्ति तथापि आश्रमाणां मध्ये विशेषं श्रेष्ठं उक्तदोषनिवर्तनक्षमं आचक्ष्वेत्यर्थः १२ १३ १४ कृतान्तविधिः परप्राणहरणं तेन संयुक्ताः

दह्याम्यनिशमद्यापि चिंतयानः पुनः पुनः हीनां पार्थिवसिंहैस्तैः श्रीमद्भिः पृथिवीमिमां ५ दृष्ट्वा ज्ञातिवधं घोरं हतांश्च शतशः परान् कोटिशश्च नरानन्यान्परितप्ये पितामह ६ कानु तासां वरस्त्रीणामवस्थाद्य भविष्यति विहीनानां स्वतनयैः पतिभिर्भ्रातृभिस्तथा ७ अस्मानंतकरान्घोरान्पांडवान्वृष्णिसंहतान् आक्रोशन्त्यः कृशा दीना निपतिष्यन्ति भूतले ८ अपश्यन्त्यः पितॄन्भ्रातॄन्पतींश्च पुत्रांश्च योषितः त्यक्त्वा प्राणान्प्रियान्सर्वा गमिष्यन्ति यमक्षयं ९ वत्सलत्वाद्द्विजश्रेष्ठ तत्र मे नास्ति संशयः व्यक्तं सौक्ष्म्याच्च धर्मस्य प्राप्स्यामः स्त्रीवधं वयं १० यद्वयं सुहृदो हत्वा कृत्वा पापमनंतकं नरके निपतिष्यामो ह्यधःशिरस एव ह शरीराणि विमोक्ष्यामस्तपसोग्रेण सत्तम आश्रमाणां विशेषांस्त्वमथाचक्ष्व पितामह १२ वैशंपायन उ॰ युधिष्ठिरस्य तद्वाक्यं श्रुत्वा द्वैपायनस्तदा निरीक्ष्य निपुणं बुद्ध्या ऋषिः प्रोवाच पांडवं १३ व्यास उ॰ मा विषादं कृथा राजन्क्षत्रधर्ममनुस्मरन् स्वधर्मेण हता ह्येते क्षत्रियाः क्षत्रियर्षभ १४ कांक्षमाणाः श्रियं कृत्स्नां पृथिव्यां च महद्यशः कृतान्तविधिसंयुक्ताः कालेन निधनं गताः १५

स्वापराधेनैव हता इत्यर्थः १५ वस्तुतस्तु तेषामपि स्वान्तं अंत्रं नास्तीत्याह नत्वमिति पर्यायधर्मेण मरणविधिना आदत्त गृहीतवान् १६॥

हेतुमात्रं निमित्तमात्रं इदं युद्धं तस्य तेन प्रेष्यप्रेष्य पेप्रं नियंतृत्वं १८ कर्मैव सूत्रं बंधनं तदात्मकं तत्प्रधानं ईश्वरोपि कर्मानुसारेण फलं ददन्नैव वैषम्यनैर्घृण्यदोषौ भजतीत्यर्थः कालं कर्मापि काल एवेत्यर्थः १९ २० आत्मन इति शांतस्यापि तव हिंसैकर्माणि प्रवृत्तिरिति

न तस्य माता पितरौ नानुग्राह्यो हि कश्चन कर्मसाक्षी प्रजानाथ यस्तेन कालेन संहृताः १७ हेतुमात्रमिदं तस्य विहितं भरतर्षभ युंक्ति भूतैर्भूतानि तदस्मै रूपमैश्वरं १८ कर्मसूत्रात्मकं विद्धि साक्षिणं शुभपापयोः सुखदुःखगुणोदर्कं कालं कालफलप्रदं १९ तेषामपि महाबाहो कर्माणि परिचिंतय विनाशहेतुकानि त्वं येन ते कालवशं गताः २० आत्मनश्च विजानीहि नियतव्रतशासने यदा त्वमीदृशं कर्म विधिनाक्रम्य कारितः २१ त्वष्ट्रेव विहितं यंत्रं तथा वेष्टयितुं वशे कर्मणा कालयुक्तेन तथेदं चेष्टते जगत् २२ पुरुषस्य हि दृष्टा समुत्पत्तिरनिमित्ततः यदृच्छया विनाशश्च शोकहर्षावनर्थकौ २३ व्यलीकमपि यत्त्वत्र चित्तवैतंसिकं तव तदर्थमिष्यते राजन् प्रायश्चित्तं तदाचर २४ इदं तु श्रूयते पार्थ युद्धे देवासुरे पुरा असुरा भ्रातरो ज्येष्ठा देवाश्चापि यवीयसः २५ ॥

कालस्यैवैतन्माहात्म्यमित्यर्थः २१ २२ पुरुषस्येति उत्पत्तिवद्विनाशोपि यादृच्छिक एवेति भावः २३ व्यलीकं अप्रियं तत् चित्तवैतंसिकं चित्तबंधनं तदर्थं तन्निवृत्त्यर्थं मृषाभूतमपि हंतृत्वादिकं यद्धिंसात्वमिति मन्यसे तर्हि प्रायश्चित्तं कुर्वित्यर्थः २४ यवीयसः यवीयांसः २५ ॥

समुच्छ्रयो विरोधः २६ २७ संश्रिताः सन्नद्धाः सहार्थं सहायार्थं २८ २९ अधर्मस्येति च्छेदः ३० राष्ट्रे ऽनामयं स्यात् तन्नहितन
एकस्य कुलस्य वा हननं न वृत्तोपघातकं धर्मनाशकं न भवति ३१ अधर्मरूपोऽधर्मवज्ज्ञातिधर्मः यथा शालावृकाख्यब्राह्मणवधः

तेषामपि श्रीनिमित्तं महानासीत्समुच्छ्रयः युद्धं वर्षसहस्राणि द्वात्रिंशदभवत्किल २६ एका
र्णवां महीं कृत्वा रुधिरेण परिप्लुतां जघ्नुर्दैत्यांस्तथा देवास्त्रिदिवं चाभिलेभिरे २७ तथैव पृथि
वीं लब्ध्वा ब्राह्मणा वेदपारगाः संश्रिता दानवानां वै सहार्थं दर्पमोहिताः २८ शालावृका इति ख्याता
स्त्रिषु लोकेषु भारत अष्टाशीतिसहस्राणि ते चापि विबुधैर्हताः २९ धर्मव्युच्छित्तिमिच्छन्तो ये
धर्मस्य प्रवर्तकाः हन्तव्यास्ते दुरात्मानो देवैर्दैत्या इवोल्बणाः ३० एकं हत्वा यदि कुले शिष्टानां स्या
दनामयं कुलं हत्वा च राष्ट्रं च न तद्वृत्तोपघातकं ३१ अधर्मरूपो धर्मो हि कश्चिदस्ति नराधिप धर्म
श्चाधर्मरूपोऽस्ति तच्च ज्ञेयं विपश्चिता ३२ तस्मात्संयम्य आत्मानं श्रुतवानसि पाण्डव देवैः पूर्वगतं मा
र्गमनुयातोऽसि भारत ३३ न हीदृशं गमिष्यन्ति नरकं पाण्डवर्षभ भ्रातॄनाश्वासयैतांस्त्वं सुहृदश्च पर
न्तप ३४ यो हि पापसमारंभे कार्ये तद्भावभावितः कुर्वन्नपि तथैव स्यात्कृत्वा च निरपत्रपः ३५

धर्मश्चाधर्मः यथा कार्पण्यवीक्षसत्यवादिनः चोरेभ्यः कार्पटिकमार्गप्रदिशनः ३२ ३३ ३४ तद्भावभावितः पापभावनागतः कुर्व
न्नपापमिति वर्तते ३५ ॥

श्री० शां० रा० टी० ६५

अस्मिन्निति तस्य अपश्चात्तापिनो निर्लज्जस्य प्रायश्चित्तं वा तेन पापक्षमो वा नास्तीत्यर्थः ३६ परदोषेणाडर्योधनदोषेण ३७
३८ ३९ ४० महीयंतं महीयमानं ४१ ४२ हतनाथानां स्त्रीणां शोकेन मम दोषोऽनंतः इत्युक्तं तत्राहैतेषामिति ४३ ४४ का-

तस्मिंस्तत्कालधर्मं सर्वं समाम्नमिति शाह्वितं प्रायश्चित्तं न तस्यास्ति क्षमो वा पापकर्मणः ३६ त्वं
तु शुक्लाभिजातीयः परदोषेण कारितः अनिच्छमानः कर्मेदं कृत्वा च परितप्यसे ३७ अश्वमेधो
महायज्ञः प्रायश्चित्तमुदाहृतं तमाहर महाराज विपाप्मैवं भविष्यसि ३८ मरुद्भिः सह जित्वारीन्
भगवान्पाकशासनः एकैकं क्रतुमाहृत्य शतकृत्वः शतक्रतुः ३९ पूतपाप्मा जितस्वर्गो लोकान्प्रा-
प्य सुखोदयान् मरुद्गणैर्वृतः शक्रः शुशुभे भासयन्दिशः ४० स्वर्गलोके महीयंतमप्सरोभिः शची-
पतिम् ऋषयः पर्युपासंते देवाश्च विबुधेश्वरं ४१ सेयं त्वामनुसंप्राप्ता विक्रमेण वसुंधरा निर्जिताश्च
महीपाला विक्रमेण त्वयानघ ४२ तेषां पुराणि राष्ट्राणि गत्वा राजन्सुहृद्वृतः भ्रातॄन्पुत्रांश्च पौत्रांश्च
स्वे स्वे राज्येऽभिषेचय ४३ बालानपि च गर्भस्थान्सांत्वेन समुदाचरन् रंजयन्प्रकृतीः सर्वाः परिपा-
हि वसुंधरां ४४ कुमारो नास्ति येषां च कन्यास्तत्राभिषेचय कामाशयो हि स्त्रीवर्गः शोकमेवं प्रहा-
स्यति ४५ एवमाश्वासनं कृत्वा सर्वराष्ट्रेषु भारत यजस्व वाजिमेधेन यथेन्द्रो विजयी पुरा ४६ अशो-
माः आशेरतेऽस्मिन्निति कामः इत्यर्थः ४५ ४७ ॥ न्यास्ते महात्मानः क्षत्रियाः क्षत्रियर्षभ स्वकर्मभिर्गता नाशं

शितानवनमान्यैस्तैः २ =

६५

४८ अध्यायः ३३ कानिकृत्वा १ प्रायश्चित्तीयते प्रायश्चित्तेऽधिक्रियते मिथ्यानुवर्तयन् कायं संचरन् २ सूर्येणाभ्युदितः यस्मि
न् शयाने सति सूर्योऽभ्युदेतीत्यर्थः निर्मुक्तः शयाने सति सूर्योऽस्तं गच्छतीत्यर्थः अन्यापि तं चेत्स्वयं तमादित्योऽभ्युदियादित्यादिस्मृत्या
न्नप्रायश्चित्तं सकृत्कुर्यादित्यर्थः २ कुनखी श्यावदंतीति च स्वर्णहारी तु कुनखी सुरापः श्यावदंतकः इति कर्मविपाके जन्मांतरीयदोषवा-

अवाप्तः तत्र धर्मस्त्वेराज्यं प्राप्तमकंटकं एतत्स्वधर्मं कौंतेय श्रेयान्यः प्रेत्य भारत ४८ इति श्रीम
हाभारते शांतिपर्वणि राजधर्मे प्रायश्चित्तीये ३३ युधिष्ठिर उ० कानि कृत्वेह कर्माणि प्रायश्चि
त्तीयते नरः किं कृत्वा मुच्यते तत्र तन्मे ब्रूहि पितामह १ व्यास उ० अकुर्वन्विहितं कर्म प्रतिषिद्धानि
चाचरन् प्रायश्चित्तीयते ह्येवं नरो मिथ्यानुवर्तयन् २ सूर्येणाभ्युदितो यश्च ब्रह्मचारी भवत्युत
तथा सूर्याभिनिर्मुक्तः कुनखी श्यावदंत्यपि ३ परिवित्तिः परिवेत्ता ब्रह्मघ्नो यश्च कुत्सकः दि
धिषूपपतिर्यः स्यादग्रेदिधिषुरेव च ४ अवकीर्णी भवेद्यश्च द्विजातिवधकस्तथा अतीर्थे ब्रा
ह्मणस्यागी तीर्थे चाप्रतिपादकः ५ ॥

तापि सूर्यारुणसंवादादावुपदिष्टं प्रायश्चित्तं कर्तव्यमित्युक्तं ३ अनूढे ज्येष्ठे ऊढवान्कनिष्ठः परिवेत्ता परिवित्तिः पूर्वजः ज्येष्ठायाम
नूढायां कनिष्ठामूढवानग्रेदिधिषूपतिः दिधिषूपपतिस्तु कनिष्ठाविवाहोत्तरं ज्येष्ठामूढवान् ४ अवकीर्णी नष्टव्रतः अतीर्थे अ
पात्रे त्यागी दाता ५ ॥

श्री॰
शां॰ रा॰
टी॰
६६

ग्रामघातीसमूहहन्ता याजीतिपाठान्तरे मांसस्येतिन्यपस्यादेः अपविद्धेनत्यजेत् ब्रह्मविक्रयीभृतकाध्यापकः राजविक्रयीतिपाठेसोमविक्रयीराजानमाप्याययतीत्यादौसोमेराजशब्दश्रवणात् ६ ९ अभक्ष्यस्यलशुनादेः १० रसानांलवणगुडादीनां ११ नित्यदेया

ग्रामघातीचकैवर्तोमांसस्यपरिविक्रयी यश्चाग्नीनपविध्येततथैवब्रह्मविक्रयी ६ गुरुस्त्रीवधको
यश्चपूर्वंपूर्वस्तुगर्हितः वृथापशुसमालंभीगृहदाहस्यकारकः ७ अनृतेनोपवर्तीचप्रतिरोद्धा
गुरोस्तथा पतान्येतांसिसर्वाणिव्युत्क्रांतसमयश्चयः ८ अकार्याणितुवक्ष्यामियानितानिनिबो
धमे लोकवेदविरुद्धानितान्येकाग्रमनाःशृणु ९ स्वधर्मस्यपरित्यागःपरधर्मस्यचक्रिया अया-
ज्ययाजनंचैवतथाभक्ष्यस्यभक्षणं १० शरणागतसंत्यागोभृत्यस्याभरणंतथा रसानांविक्रयश्चा
पितिर्यग्योनिवधस्तथा ११ आधानादीनिकर्माणिशक्तिमान्नकरोतियः अप्रयच्छंश्चसर्वाणि
नित्यदेयानिभारत १२ दक्षिणानामदानेनब्राह्मणस्वाभिमर्षणं सर्वाण्येतान्यकार्याणिप्राहु-
र्धर्मविदोजनाः १३ पित्राविवदतेपुत्रोयश्चस्याद्गुरुतल्पगः अप्रजायन्नरव्याघ्रभवत्याधार्मिको
नरः १४ उक्तान्येतानिकर्माणिविस्तरेणेतरेणच यानिकुर्वन्नकुर्वंश्चप्रायश्चित्तीयतेनरः १५ ॥

नि गोग्रासादीनि १२ दक्षिणानांप्रतिश्रुतानां १३ विवदतेयन्नाद्यर्थंपित्रासहकलहंकरोति अप्रजायन्धर्मपत्न्यांकालेमैथुनमकुर्व
न् १४ इतरेणसंक्षेपेण १५ ॥

एतानि स्वधर्मस्य परित्याग इत्यादीनि कर्माणि क्रियमाणानि ये मानवाः उपजीवन्त इति शेषः १६ जिघांसीं हन्तुमिच्छावान् ईया
त गच्छेत् १८ मंत्रो मन्युरकधीत्ते मोनमः इत्यादिर्मन्त्र एव स्वाहेत्यन्तः मन्युः क्रोधः तन्मन्त्रं शत्रोः क्रोधं प्रतिगच्छति क्रोधयत्येवं तत्र

एतान्येव तु कर्माणि क्रियमाणानि मानवाः येषु येषु निमित्तेषु न लिप्यन्ते यथा तान् शृणु १६ प्रगृह्य
शस्त्रमायान्तमपि वेदान्तगं रणे जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत् १७ इति चाप्यत्र कौन्ते
य मंत्रो वेदेषु पठ्यते वेदप्रमाणविहितं धर्मं च प्रब्रवीमि ते १८ अपेतं ब्राह्मणं हन्ता यो हन्यादातता
यिनं न तेन ब्रह्महा स स्यान्मन्युस्तन्मन्युमृच्छति १९ प्राणात्यये तथा ज्ञानादाचरन्मदिरामपि
आदेशितो धर्मपरैः पुनः संस्कारमर्हति २० एतत्ते सर्वमाख्यातं कौन्तेयाभक्ष्यभक्षणं प्रायश्चि
त्तविधानेन सर्वमेतेन शुध्यति २१ गुरुतल्पं हि गुर्वर्थेन दूषयति मानवं उद्दालकः श्वेतकेतुं
जनयामास शिष्यतः २२ स्तेयं कुर्वंश्च गुर्वर्थमापत्सु न निबध्यते बहुशः कामकारेण न
वेद्यः संप्रवर्तते २३ अन्यत्र ब्राह्मणस्वेभ्यः आददानो न दुष्यति स्वयमप्राशिता यश्च न स पा
पेन लिप्यते २४ प्राणत्राणेऽनृतं वाच्यमात्मनो वा परस्य च गुर्वर्थे स्त्रीषु चैव स्याद्विवाहकरणे
षु च २५ ॥

तीपीभूय परशरीरद्वाराद्दन्तीत्यर्थः १९ असाध्यरोगा दिना प्राणात्यये उपस्थिते जीवनार्थं मदिरामपि आचरन्
पिबन् धर्मपरैश्चिकित्सकैः आदेशित उपदिष्टः २० २१ गुर्वर्थे गुर्वाज्ञया २२ २३ २४ २५ ॥

श्री·
भा· शा·
टी·
६७

व्रतेनावर्ततेपुनरुपनयनेनकर्तव्यमित्यर्थः आज्यहोमःपुनर्मामैत्विंद्रियमितिमंत्रेण २६ पतितेज्येष्ठभ्रातरि भिक्षितेधर्मार्थ-
मपिरेतः सिंचेतिस्त्रियाप्रार्थितेसति २७ वृथाश्राद्धादिनिमित्तंविना संस्कारःपावित्र्यं योयजेताश्वमेधेनमासिमासिशतंसमाः मां-
सानिचनखादेत्तद्वयमेतत्समंस्मृतेः २८ तीर्थेसत्काराणामज्ञानादप्रतिपादनमपिनदूषकं २९ अपचारिण्याःव्यभिचारि-

नावर्ततेव्रतंतस्यभैक्षक्रमोदेकथंचन आज्यहोमःसमिद्धेग्नौप्रायश्चित्तंविधीयते २६ पारि-
वित्त्यंतुपतितेनास्तिप्रव्रजितेतथा भिक्षितेपारदार्येचतद्धर्मस्यनदूषकं २७ वृथापशुसमा-
लंभंनैवकुर्यान्नकारयेत् अनुग्रहःपशूनांहिसंस्कारोविधिनोदितः २८ अनर्हेब्राह्मणेदत्त-
मज्ञानान्नतुदूषकं सत्काराणांतथातीर्थेनित्यत्वाप्रतिपादनं २९ स्त्रियास्तथापचारिण्या
निष्कृतिःस्याददूषिका अपिसापूयतेतेननतुभर्ताप्रदुष्यति ३० तत्त्वज्ञानात्तुसोमस्यविक्रयः
स्याददोषवान् असमर्थस्यभृत्यस्यविसर्गःस्याददोषवान् ३१ वनदाहोगवामर्थेक्रियमाणो
नदूषकः उक्तान्येतानिकर्माणियानिकुर्वन्नदुष्यति प्रायश्चित्तानिवक्ष्यामिविस्तरेणैवभार-
त ३२ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मप्रायश्चित्तीये ३४ ॥

ण्याः निष्कृतिःधिक्करणंदासीवत्
अन्नाच्छादनमात्रेणदूरस्थापनं तया
सहरतिभोजनादिवर्जनंचेत्यर्थः ३० सोमस्यतत्त्वंअनेनतत्प्रसादेवामर्त्यान्कामैरभिवर्षतीतिलोकद्वयोपकारीयंसोमइति ३१ ३२ चात्र

शांतिः ३४ ॥
६७

साधारणानिप्रायश्चित्तानितावदाह तपसेति तपसाकृच्छ्रचान्द्रायणादिना कर्मणायज्ञादिना प्रदानेनगवादीनां पुना
तिशोधयति १ स्वकर्मकृत्तदासमादिविहितः २ कर्मब्रह्महत्या ३ लब्धइति कामकारविषयेविडम्बाप्रायश्चित्तोपदेष्टृणाः
आत्मनोवाइच्छयावैडम्ब्यमतीति अकामतस्त्वाहत्रिरित्यादिना ४ अवाकशिराःयंकंचिद्वेदंजपेत्योजनानांशतंत्रिर्व्रजेत् श

व्यासउवाच तपसाकर्मभिश्चैवप्रदानेनचभारत पुनातिपापंपुरुषःपुनश्चेन्नप्रवर्तते १ एका
कालंतुभुञ्जीतचरन्भैक्ष्यंस्वकर्मकृत् कपालपाणिःखट्वाङ्गीब्रह्मचारीसदोत्थितः २ अनसू
युरधःशायीकर्मलोकेप्रकाशयन् पूर्णैर्द्वादशभिर्वर्षैर्ब्रह्महाविप्रमुच्यते ३ लघुःशास्त्रभृतो
वास्याद्विदुषामिच्छयात्मनः प्रास्येदात्मानमग्नौवासमिद्धेत्रिरवाकशिराः ४ जपन्वान्यतमं
वेदंयोजनानांशतंव्रजेत् सर्वस्वंवावेदविदेब्राह्मणायोपपादयेत् ५ धनंवाजीवनायालंगृ
हंवासपरिच्छदं मुच्यतेब्रह्महत्यायागोप्तागोब्राह्मणस्यच ६ षड्भिर्वर्षैःकृच्छ्रभोजीब्र
ह्महापूयतेनरः मासेमासेसमश्नंस्तुत्रिभिर्वर्षैःप्रमुच्यते ७ ॥

तत्रचयोजनंपादचारेणतीर्थयात्रायांवेदंजपन्मुच्यतइत्यर्थः ५ ६ कृच्छ्रभोजीकृच्छ्रवृत्त्यासातत्येनभुञ्जानः त्र्यहंप्रा
तस्त्र्यहंसायंत्र्यहमद्यादयाचितं त्र्यहंपरंचनाश्नीयादितिविधिनाएकैकःकृच्छ्रोद्वादशदिनात्मकोज्ञेयः मासेमा
सेइतितस्यैवातिदेशःसप्ताहंप्रातःसप्ताहंसायंसप्ताहमयाचितंसप्ताहमनशनंविषमेषुमासेषु समेष्वाहारक्रमेणसमे
षुप्रकारएवंवर्षत्रयमितिद्वितीयः ७ ॥

मासाशीति मासंमासं मासं प्रातर्मासमयाचितमासमुपवास इति क्रमेण वर्षं वा नयेत् मासादधिकेन स्वल्पेनापि का
लेन उपवसन् जलमात्रेण वर्तयन् मुच्यते ८ सर्वपाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति श्रुतिः ९ १० ११

संवत्सरेण मासाशी शूयते नात्र संशयः तथैवोपवसन् राजन् स्वल्पेनापि प्रपूयते ८ कृत्वा
वाश्वमेधेन पूयते नात्र संशयः ये चाप्यवभृथस्नाताः केचिदेवंविधा नराः ९ ते सर्वे पूतपा
प्मानो भवन्तीति परा श्रुतिः ब्राह्मणार्थे हतो युद्धे मुच्यते ब्रह्महत्यया १० गवां शतसहस्रं तु
पात्रेभ्यः प्रतिपादयेत् ब्रह्महा विप्रमुच्येत सर्वपापेभ्य एव च कपिलानां सहस्राणि यो द
द्यात्पंचविंशति दोग्ध्रीणां स च पापेभ्यः सर्वेभ्यो विप्रमुच्यते १२ गोसहस्रं सवत्सानां दोग्ध्री
णां प्राणसंशये साधुभ्यो वैदविद्भ्यो दत्त्वा मुच्येत किल्बिषात् १३ शतं वै यस्तु कांबोजान् ब्रा
ह्मणेभ्यः प्रयच्छति नियतेभ्यो महीपाल स च पापात्प्रमुच्यते १४ मनोरथं तु यो दद्यादेका
स्मा अपि भारत न कीर्तयेत दत्त्वा यः स च पापात्प्रमुच्यते १५ सुरापानं सकृत्पीत्वा यो ऽग्निव
र्णां सुरां पिबेत् स पावयत्यथात्मानमिह लोके परत्र च १६ महाप्रपातं प्रपतन् ज्वलनं वा स
माविशेत् महाप्रस्थानमातिष्ठन्मुच्यते सर्वकिल्बिषैः १७ ॥

१२ १३ कांबोजान् जात्यश्वान् कांबुदेशजान् १४ मनोरथं वाञ्छितं गृहक्षेत्रादि १५ १६ महाप्रपातं निर्जलदेशे पर्वताग्रा
त्पतनं महाप्रस्थानं केदारे हिमवदारोहणं १७ ॥

समितिं गच्छेदित्यस्य निष्पापः सन् ब्राह्मणसभामारोढुं योग्यो भवतीत्यर्थः ८ ९ शेषं स्पष्टं २० यताः त्यक्त्वा दारा विहा
या उक्तेष्वेव पापेषु सत्सु मुच्यते २१ महाव्रतं मासमात्रं जलस्यापि त्यागः २२ २३ कृच्छ्रादिति एतच्च जपेषु स्यापि दाराग्निहो

बृहस्पतिसवेनेष्ट्वा सुरापो ब्राह्मणः पुनः समितिं ब्राह्मणो गच्छेदिति वै ब्रह्मणः श्रुति ८ भू
मिप्रदानं कुर्याद्यः सुरां पीत्वा विमत्सरः पुनर्नैव पिबेद्राजन्संस्कृतः स च शुध्यति ९ गुरुत
ल्पी शिलां तप्तामायसीमभिसंविशेत् अवकृत्यात्मनः शेफं प्रव्रजेदूर्ध्वदर्शनः २० शरीरस्य वि
मोक्षेण मुच्यते कर्मणोऽशुभात् कर्मभ्यो विप्रमुच्यन्ते यताः संवत्सरं स्त्रियः २१ महाव्रतं चरेद्य
स्तु दद्यात्सर्वस्वमेव तु गुर्वर्थे वा हतो युद्धे स मुच्येत्कर्मणोऽशुभात् २२ अनृतेनोपचर्ता चेत्प्र
तिरोद्धा गुरोस्तथा उपाहृत्य प्रियं तस्मै तस्मात्पापात्प्रमुच्यते २३ अवकीर्णिनिमित्तं तु ब्रह्म
हत्याव्रतं चरेत् गोचर्मवासाः षण्मासांस्तथा मुच्येत किल्बिषात् २४ परदारापचारी तु प
रस्यापहरन्वसु संवत्सरं व्रती भूत्वा तथा मुच्येत किल्बिषात् २५ यत्तं तु यस्यापहरेत्तस्मै दद्यात्स्व
मेव तु विविधेनाभ्युपायेन तदा मुच्येत किल्बिषात् कृच्छ्रान्द्वादशरात्रेण संयतात्मा व्र
तेस्थितः परिवेत्ता भवेत्सूतः परिवित्तिस्तथैव च २७ निवेशे तु पुनस्तेन सदा तारयता पितॄन्

व्रतकरणानन्तरं द्रष्टव्यं २७ तेन कनिष्ठेन निवेशं विवाहानन्तरं कर्तव्यं अन्यथा न तु स्त्रिया भवेद्दोषो न तु स्नातेन लिप्यते २८

प्रायश्चित्तिसर्गः २५ ॥

अंतराभोजनं धारणापारणाव्रतेन माचमनतुष्टये कृतेन शुध्यंति महापापप्रयोगे २९ अन्यत्र तु सकृत्तद्व्यभिचारमात्रे मानसिके वा अ
दहस्त्रिय इति ३० प्रसंगाद्भाजनशुद्धिमाह पादजेति शूद्रस्य उच्छिष्टं कांस्यपात्रं तथा तद्देवगवां घ्रातं तथा गंडूषपात्रं ब्राह्मणा

भोजनं ह्यंतराशुद्धं चातुर्मास्ये विधीयते स्त्रियस्तेन प्रशुध्यन्ति इति धर्मविदो विदुः २९ स्त्रिय
स्त्वाशंकिताः पापा नोपगम्या विजानता रजसा ता विशुध्यंते भस्मना भाजनं तथा ३० पा
दजोच्छिष्टकांस्यं तत् गवाघ्रातमथापि वा गंडूषोच्छिष्टमपि वा विशुध्येद्दशभिस्तु तत्
३१ चतुष्पात्सकलो धर्मो ब्राह्मणस्य विधीयते पादावकृष्टो राजन्ये तथा धर्मो विधीय
ते ३२ तथा वैश्ये च शूद्रे च पादः पादो विधीयते विद्यादेवं विधेनैषां गुरुलाघवनिश्चयं ३३
तिर्यग्योनिवधं कृत्वा द्रुमांश्छित्वेतरान्बहून् त्रिरात्रं वायुभक्षः स्यात्कर्म च प्रथयन्नरः ३४
अगम्यागमने राजन्प्रायश्चित्तं विधीयते आर्द्रवस्त्रेण षण्मासान् विहार्यं भस्मशायिना

स्यापि कृतानि दशभिः शोधनैः शुध्यंति तानि च पंचगव्येन स्नानोयै भस्मनाम्लेन वह्निनेति ३१ विधीयते पादः पादोऽपकृष्ट इ
त्यर्थः ३२ ३३ वैश्यस्य द्विपादः शूद्रस्य पादमात्रः धर्मः शौचादिः प्रायश्चित्तादेरधिकस्य विधानात् ३४ ॥ ६५

एषइति भस्मस्नानचर्याद्युक्तरुद्रियजपोप्यत्रद्रष्टव्यः यदाहवृद्धशातातपः मद्यंपीत्वागुरुदारांश्चगत्वास्तेयंकृत्वाब्रह्मह
त्यांचकृत्वा भस्मच्छन्नोभस्मशय्याशयानोरुद्राध्यायीमुच्यतेसर्वपापैरिति पापानांगौरवलाघवानुसारेणादीक्षासंवत्सरंषण्मासंत्रि
मासंमासंद्वादशाहमितियथायोग्यंज्ञेया तत्रयथाकूष्माण्डहोमेयोयोनैरेतःसिंचतीतिपारदार्यग्रहात्पवर्षमाससचतुर्विंशति
रात्रद्वादशरात्रषड्रात्रत्रिरात्रपक्षाउक्ताः यावदेनोदीक्षामुपेतीतिचपापानुसारित्वंदीक्षायाउक्तंतद्दृष्टांतेनसर्वत्रबोध्यं दृष्टांतभूतो

एषएवतुसर्वेषामकार्याणांविधिर्भवेत् ब्रह्मणोक्तेनविधिनादृष्टांतागमदेवभिः ३६ सावित्री
मप्यधीयीतशुचौदेशेमिताशनः अहिंस्रोमंदकोजल्पोमुच्यतेसर्वकिल्बिषैः ३७ अहःस्वसत
ततिष्ठेदभ्याकाशंनिशांस्वपन् त्रिरह्निर्निशायांचसवासाजलमाविशेत् ३८ स्त्रीशूद्रपतितं
श्चापिनाभिभाषेद्व्रतान्वितः पापान्यज्ञानतःकृत्वामुच्येदेवंव्रतोद्विजः ३९ शुभाशुभफलंप्रेत्य
लभतेभूतसाक्षिकं अतिरिच्येतयोयत्रतत्कर्त्तालभतेफलं ४० तस्माज्ज्ञानेनतपसाकर्मणाच
फलंशुभं वर्द्धयेदशुभंहत्वायथास्यादतिरेकवान् ४१ कुर्याच्छुभानिकर्माणिनिवर्त्तेत्पापक
र्मणः दद्यान्नित्यंचवित्तानितथामुच्येतकिल्बिषात् ४२ ॥

यथागमस्तत्रोक्तैर्देवताभिर्यावदेनइत्याद्यैः ३६ मंदइवमंदकःरागद्वेषमानापमानशून्यः अजल्पइतिच्छेदः ३७ तिष्ठेदित्युपवेशनादे
र्व्यावृत्तिः अभ्यवकाशंनिरावरणस्थण्डिलादौ अहःस्वइतिबहुवचनादितापिपापानुसारेणअवराणामह्नांगणनाकल्पनीया ३८
३९ यत्रपुण्येपापेवातिरिच्येततयोधिकोभवतिसइतरेणोत्तरदभिभूयातिरिक्तस्यफलंभुंक्तेइत्यर्थः ४० ४१ ४२ ॥

श्री॰ शां॰ रा॰ टी॰ ७॰

एतादृशं प्रायश्चित्तं महापातकवर्जितेयं ५३ ५४ ५५ ५६ ५७ ५८ ५९ ५० ५१ पंचत्रिंशः ३५ किंभक्ष्यं १ प्रजापतिमनु

एतद्रूपं हि पापस्य प्रायश्चित्तमुदाहृतं महापातकवर्जितं प्रायश्चित्तं विधीयते ५३ महाभक्ष्ये ३
ष्वपानेषु वाच्यावाच्ये तथैव च अज्ञानज्ञानयो राजन् विहितान्यनुजानतः ५४ जानता तु कृ
तं पापं गुरु सर्वं भवत्युत अज्ञानात्स्वल्पको दोषः प्रायश्चित्तं विधीयते ५५ शक्यते विधिना पाप
यथोक्तेन व्यपोहितुं आस्तिके श्रद्दधाने च विधिरेष विधीयते ५६ नास्तिकाश्रद्दधानेषु पुरु
षेषु कदाचन दंभद्वेषप्रधानेषु विधिरेष न दृश्यते ५७ शिष्टाचारश्च शिष्टश्च धर्मो धर्मभृतां व
र सेवितव्यो नरव्याघ्र प्रेत्येह च सुखेप्सुना ५८ स राजन्मोक्ष्यसे पापात्तेन पूर्वेण हेतुना प्रा
णार्थं वा यदि तेषां वा अथ वा नृपकर्मणा ५९ अथ वा ते घृणा काचित्प्रायश्चित्तं चरिष्यसि मा
त्वेवानार्यजुष्टेन मनसा निधनं गमः ५० वैशंपायन उवाच एवमुक्तो भगवता धर्मराजो यु =
धिष्ठिरः चिंतयित्वा मुहूर्तं तु प्रत्युवाच तपोधनं ५१ इति श्रीमहाभारते शांतिपर्वणि राजधा
र्मे प्रायश्चित्तीये ३५ युधिष्ठिर उवाच किं भक्ष्यं चाप्यभक्ष्यं च किं च देयं प्रशस्यते किं च पात्र
मपात्रं वा तन्मे ब्रूहि पितामह १ व्यास उवाच अत्राप्युदाहरंतीममितिहासं पुरातनं सिद्धानां चै
व संवादं मनोश्चैव प्रजापतेः ऋषयस्तु व्रतपराः समागम्य पुरा विभुं धर्मं पप्रच्छुरासीनमादिका ७॰

कथंकेनप्रकारेणान्नमदनीयंकिंद्रव्यकंकर्त्तव्यमित्यर्थः ४ व्यासोविस्तरः ५ अनादेशोविशेषतोऽनुक्तेदोषे यत्रदेशोतत्प
राःप्रायःबहुशःसंतिसोपिगंगादिवत्पावनइत्यर्थः यत्रोपायाश्चित्पाठेस्पष्टोर्थः ६ तथाजपादिवत्पुण्यान्येतानिवक्ष्यमा
णानि यवणीभृतःपर्वताःब्रह्मगिरिप्रभृतयः आदिपदात्सुवर्णस्नानादिअनादिष्टप्रायश्चित्तसामान्यमित्यर्थः ७ ८ गर्वेण

कथमन्नंकथंपात्रंदानमध्ययनंतपः कार्याकार्यंचयत्सर्वंशंसैतत्त्वंप्रजापते ४ तैरेवमु
क्तोभगवान्मनुःस्वायंभुवोऽब्रवीत् शुश्रूषध्वंयथाहंवोधर्मंव्याससमासतः ५ अनादेशेजपो
होमउपवासस्तथैवच आत्मज्ञानंपुण्यनद्योयत्रप्राज्ञाश्चतत्पराः ६ दिष्टान्येतानिपुण्या
निपुण्याश्चयवणीभृतः सुवर्णप्राशनमपिरत्नादिस्नानमेवच ७ देवस्थानाभिगमन
माज्यप्राशनमेवच एतानिमेध्यंपुरुषंकुर्वन्त्याशुनसंशयः ८ नगर्वेणभवेत्प्राज्ञःकदाचि
दपिमानवः दीर्घमायुरथेच्छन्नितित्रिरात्रंचोष्णपोभवेत् ९ अदत्तस्यानुपादानंदानमध्ययनंत
पः अहिंसासत्यमक्रोधऋज्वाधर्मस्यलक्षणं १० सएवधर्मःसोऽधर्मोदेशकालेप्रतिष्ठितः
आदानमनृतंहिंसाधर्मोह्यावस्थिकःस्मृतः ११

शक्तोनभवेत् नावगणयेत् अवगणनेतुत्रिरात्रंउष्णपोभवेदितिन
नकुर्वन्धर्मशास्त्रोक्तंकुर्यादित्यर्थः भवेदित्यत्रपिवेदितिपाठःप्रकल्प्यसुरामित्यध्याहृत्यसुरांनपिवेत् पानेतुउष्णपोभवेत्सुरामेवो
ष्णांकृत्वापिवेदितिकेचित् ९ तपउपवासादि १० आदानंस्तेयंआवस्थिकःअवस्थाविशेषभवःप्राणात्ययादौअधर्मस्यापिस्तेयादेर्धर्म

॥ ५ ॥ [illegible] १२

श्री·
शां·रा·
टी·
७१

वैदिकोऽप्रवृत्त्यप्रवृत्ती मर्त्यत्वामर्त्यत्वप्रदे लौकिकौ तत्र तेऽशुभे चेत् शुभफले अशुभे चेदशुभफले इत्याह द्वाभ्यां द्विविधाविति १२ एत
योर्लौकिकयोः फलेऽपि कारणानुरूपे इत्यर्थः १३ दैवयुक्तं शास्त्रीयं कर्म प्राणाजीवनं एतेषां चतुर्णामपेक्ष्यापूर्वं यत्किंचि
त्क्रियते तर्हि अशुभानां नीचानामपि पुंसां तस्य फलं शुभं भवति १४ ऊर्ध्वमिति सत्यपि संदेहे यल्लोकविगानपरिहारार्थं कृ

द्विविधौ चाशुभावेतौ धर्माधर्मौ विजानताम् अप्रवृत्तिः प्रवृत्तिश्च द्वैविध्यं लोकवेदयोः १२ अप्र
वृत्तेरमर्त्यत्वं मर्त्यत्वं कर्मणः फलं अशुभस्याशुभं विद्यात् शुभस्य शुभमेव च १३ एतयोश्चोभ
योः स्यातां शुभाशुभतया तथा दैवं च दैवसंयुक्तं प्राणाख्यं प्राणदश्च यद् अपेक्ष्यापूर्वकरणादशु
भानां शुभं फलं १४ ऊर्ध्वं भवति संदेहाद् दिष्टदृष्टार्थमेव च अपेक्ष्यापूर्वकरणात्प्रायश्चित्तं विधी
यते १५ क्रोधमोहकृते चैव दृष्टान्तागमहेतुभिः शरीराणामुपक्लेशो मनसश्चाप्रियाप्रि
ये १६ ॥

तं नित्यादियच्चैव केवलं दृष्टार्थं कृतं श्येनादि तत्रोभयत्रापि १५ क्रोधादिना यन्मनसः प्रियमप्रियं कृतं तत्र दृष्टान्तागमहेतुभिः पू
र्वोक्तैर्यावदेनस्त्याद्यैः प्रमाणैर्देहस्य शोषणाउपवासादिकं प्रायश्चित्तं कर्तव्यं औषधैर्देहविध्याशनैः मंत्रैश्च पवित्रजपैः चाद
न्यदपि तीर्थाटनश्रमादिभिः तत्पापं शाम्यतीति सार्द्धः १६ ॥ ७१

९ ९ तयंपुत्रादिमरणनिमित्तंआत्मवधार्थंप्रवृत्तोनम्रियेतचेत्त्रिरात्रमुपवासंचरेत् १९ जातिःब्राह्मणत्वादिः श्रेणिःग्रि
हस्त्यादीनांपंक्तिः अधिवासः जन्मभूमिः जात्यादियर्मान्‌येवर्जयंतितेषांयर्मः प्रायश्चित्तादिस्वरूपः नविद्यते २० पातकाःमा

तदोषयेश्चमंत्रेश्चप्रायश्चित्तेश्चशास्यति ९ उपवासमेकरात्रंदेशोत्सर्गेनराधिपः विशुध्यदा
त्मशुध्यर्थंत्रिरात्रंतपुरोहितः ९ तयंशोकंप्रकुर्वाणोनम्रियेतयदानरः शस्त्रादिभिरुपावि
ष्टःत्रिरात्रंतत्रनिर्दिशेत् १९ जातिश्रेण्यधिवासानांकुलधर्मांश्चसर्वतः वर्जयंतिचयेधर्मंते
षांधर्मोनविद्यते २० दशावावेदशास्त्रज्ञास्त्रयोवायमपातकाः यद्ब्रूयुःकार्यउत्पन्नेसधर्मोध
र्मसंशये २१ अनडुह्वान्स्त्रतिकाचैवतथाल्पद्रपिपीलिका: श्लेष्मातकस्तथाविप्रैरभक्ष्यंविष
मेवच २२ अभक्ष्याब्राह्मणैर्मत्स्याःशल्कैर्येवैविवर्जिताः चतुष्पात्कच्छपादन्योमंडूकाज
लजाश्चये २३ भासाहंसाःसुपर्णाश्चचक्रवाकाःप्लवावकाः काकोमद्गुश्चगृध्रश्चश्येनोलूक
स्तथैवच २४ क्रव्यादादंष्ट्रिणःसर्वेचतुष्पात्पक्षिणश्चये येषांचोभयतोदंताश्चतुर्दंष्ट्राश्चसर्व
शः २५ एडकाश्वखरोष्ट्रीणांस्रूतिकानांगवामपि मानुषीणांमृगीणांवनपिबेद्ब्राह्मणाः
पयः २६ प्रेतान्नैचयच्चकिंचिदनिर्दशं अभोज्यंचाप्यपेयंचयेनोर्ध्वंयमनिर्दशं २७ ॥ पकाःविचार

काइतियावत् कार्यप्रायश्चित्तनिमित्तेदोषे २१ अभक्ष्यानाहचतुर्भिःअनडुह्वानिति २२ २५ एडकामेषी सूतिकानामनिर्दशाहा।

सूतिकान्न

वि २५ अभोज्यापेयसमधिकारः ५ ॥

अवीरायाः पतिपुत्रहीनायाः २८ इन्द्रियं शुक्रं गणिकादिस्त्रीणामन्नं २९ दीक्षितस्याग्नीषोमीयवपाहोमात्प्रागन्नमभो
क्तव्यं कदर्यः धनव्ययभयाद्भोगत्यागहीनः ३० रक्षिणः ग्रामपालकस्य सीमादिरक्षिणो वा ३१ ३२ शोषितं कटुंबायाद

राजान्नं तेज आदत्ते शूद्रान्नं ब्रह्मवर्चसम् आयुः सुवर्णकारान्नमवीरायाश्च योषितः २८ विड्वार्द्धु
षिकस्यान्नं गणिकान्नमथेन्द्रियं भुञ्जन्ति ये चोपपतिं स्त्रीजितान्नं च सर्वशः २९ दीक्षितस्य कदर्यस्य
क्रतुविक्रयिकस्य च तक्ष्णश्चर्मावकर्तुश्च पुंश्चल्या रजकस्य च ३० चिकित्सकस्य यच्चान्नमभोज्यं
रक्षिणस्तथा गणग्रामाभिशस्तानां रङ्गस्त्रीजीविनां तथा ३१ परिवित्तीनां पुंसां च वन्दिद्यूतविदां त
था वामहस्ताहृतं चान्नं भक्तं पर्युषितं च यत् ३२ सुरानुगतमुच्छिष्टमभोज्यं शेषितं च यत् पिष्टे
क्षुवल्लशाकानां विकाराः पयसस्तथा ३३ सक्तुधानाकरम्भाणां नोपभोग्याश्चिरस्थिताः पायस
कृसरं मांसमपूपाश्च वृथाकृताः ३४ अपेयाश्चाप्यभक्ष्याश्च ब्राह्मणैर्गृहमेधिभिः देवानृषीन्मनु
ष्यांश्च पितॄन्गृह्याश्च देवताः ३५ पूजयित्वा ततः पश्चाद्गृहस्थो भोक्तुमर्हति यथा प्रव्रजितो
भिक्षुस्तथैव स्वे गृहे वसेत् ३६ एवंवृत्तः प्रियैर्दारैः संवसन्धर्ममाप्नुयात् न दद्याद्यशसे दानं न

त्वात्मार्थं रक्षितं ३२ धानाः भृष्टयवाः करंभाः दधिसक्तवः सक्त्वादीनां विकाराः नष्टासक्ता भयान्नोपकारिणे ३७ ॥ ७२
दयः ३३ कृसरं तिलमिश्रौदनः वृथाकृताः देवताद्युद्देशं विना कृताः ३४ चात् अपेयापीयूषादयः ३५ ३६ ३७ ॥

हास्यकेषुपरिहासपरेषुभंडेषु ३८ वाग्वीनेमूकेमूर्खेवा ३९ ४० स्वहतोमुनकचर्ममयेकोशे ४३ असूयकःगुणेषुदो
षारोपंकुर्वन् अनुक्रोशात्दयया ४५ आम्नाचरितःइष्टकारीतिबुध्यायधर्मबुध्यावानिर्मंत्रेनदेयमित्याहनवाइति ४५ अवे
नर्त्तपगीतशीलेषुहास्यकेषुचयथार्मिकः नमतेनैवतोन्मत्तेनस्तेनेनचकृतस्के ३८ नवाग्वी
नेविवर्णेवानंगहीनेनवामने नदुर्जनेदौष्कुलेवाव्रतैर्येवानसंस्कृतः ३९ नश्रोत्रियमृते
दानंब्राह्मणेब्रह्मवर्जिते असम्यक्चैवयद्दत्तमसम्यक्प्रतिग्रहः ४० उभयंस्यादनर्थायदा
तुरादातुरेवच ४० यथाप्लविदिमालेव्यशिलांवाप्यर्णवंतरन् मज्जेतमज्जतस्तद्वद्दातायश्च
प्रतिग्रही ४१ काष्टैर्दईयथाप्लवक्रिरुपस्तीर्णेनदीप्यते तपःस्वाध्यायचारित्रैरेवंहीनःप्र
तिग्रही ४२ कपालेयद्वदापःस्युःश्वदृतौचयथापयः आश्रयस्थानदोषेणवृत्तहीनेतथा
श्रुते ४३ निर्मंत्रोनिर्व्रतोयःस्यादशास्त्रज्ञोनसूयकः अनुक्रोशात्प्रदातव्यंहीनेष्वव्रतिके =
षुच ४४ नवैदेयमनुक्रोशात्दीनाहीनतरकेष्वपि आम्नाचरितइत्येवधर्मइत्येववापुनः २
४५ निष्कारणंस्मृतंदत्तंब्राह्मणेब्रह्मवर्जिते भवेदपात्रदोषेणनचात्रास्तिविचार ८
णा ४६ यथादारुमयोहस्तीयथाचर्ममयोमृगः ब्राह्मणश्चानधीयानस्त्रयस्तेनामविभ्रा
वेहेत्वमाहनिष्कारणमिति निष्कारणंनिष्फलं दोषेणयुक्तइतिशेषः ४६ ४७ ॥

श्री·
शां·रा·
टी·
७३

निराकृतोमूर्खे ४९ ५० ५१ षट्त्रिंशः ३६ श्रोतुं १ २ भक्ष्याभक्ष्यविवर्जिताऽऽपवामात्मिका कौतूहलेनप्रसंगेनप्रज्ञा·

यथाषंढोफलःस्त्रीषुयथागौर्गौविचाफला शकुनिर्वाप्यपत्रःस्यान्निर्मंत्रोब्राह्मणस्तथा
४८ ग्रामयान्यंयथाशून्यंयथाकूपश्चनिर्जलः यथाहुतमनग्नौचतथैवस्यान्निराकृतो ४९ देव
तानांपितॄणांचहव्यकव्यविनाशकः शत्रुरर्थहरोमूर्खोनलोकान्प्राप्तुमर्हति ५० एतत्तेकथितं
सर्वंयथावत्तंयुधिष्ठिर समासेनमहद्ध्येतच्छ्रोतव्यंभरतर्षभ ५१ इतिश्रीमहाभारतेशांतिराज
धर्मे ३६ युधिष्ठिरउ· श्रोतुमिच्छामिभगवन्विस्तरेणमहामुने राजधर्मान्द्विजश्रेष्ठचातु
र्वर्ण्यस्याखिलान् १ आपत्सुचयथानीतिःश्रोतव्याद्विजोत्तम धर्ममालक्ष्यपंथानंवि
जयेयंकथंमहीं २ प्रायश्चित्तकथाह्येषभक्ष्याभक्ष्यविवर्जिता कौतूहलानुप्रवणंहर्षंजनयतो
वमे ३ धर्मचर्याचराज्यंचनित्यमेवविरुध्यते एवंमुह्यतिमेचेतश्चिंतयानस्यनित्यशः ४ वै
शंपायनउ· तमुवाचमहाराजव्यासोवेदविदांवरः नारदंसमभिप्रेक्ष्यसर्वज्ञानांपुरातनं ५ श्रोतु
मिच्छसिचेद्धर्माननिखिलेननराधिप प्रेहिभीष्मंमहाबाहोवृद्धंकुरुपितामहं ६ सतेधर्मरहस्येषु
संशयान्मनसिस्थितान् छेत्ताभागीरथीपुत्रःसर्वज्ञःसर्वधर्मवित् ७ जनयामासयंदेवीदि
व्यास्त्रिपथगानदी साक्षाद्ददर्शयोदेवान्सर्वानिंद्रपुरो

प्रवणाऽऽप्रसिद्धाः ३ ५ प्रेहिप्रयाहि ६ ८ ९

७३

सवैयाख्यं व्याख्यासहितं ९ १२ १४ १५ विमुंचति विमोक्ष्यति ततः पुरा १६ १७ वैशसं विनाशनं १८ उपसंप्रष्टुं

धमाना उपनमते ५४ ॥

उशना वेद यच्छास्त्रं यच्च देवगुरुर्द्विजः यच्च धर्मं सवैयाख्यं श्रुतवान् कुरुसत्तमः ९ भार्गवा
च्च्यवनाच्चापि वेदानंगोपबृंहितान् प्रतिपेदे महाबाहुर्वसिष्ठाच्च यतव्रतः ११ पितामहसु
तं ज्येष्ठं कुमारं दीप्ततेजसं अध्यात्मगतितत्त्वज्ञमुपाशिक्षत यः पुरा १२ मार्कण्डेयमुखात्कृत्स्नं
यतिधर्ममवाप्तवान् रामादस्त्राणि शक्राच्च प्राप्तवान् भरतर्षभः १३ मृत्युरात्मेच्छया यस्य संजा
तस्य मनुजेष्वपि यथानपत्यस्य सतः पुण्या लोका दिवि श्रुताः १४ यस्य ब्रह्मर्षयः पुण्या नित्य
मासन् सभासदः यस्य नाविदितं किंचिज्ज्ञानज्ञेयेषु विद्यते १५ स ते वक्ष्यति धर्मज्ञः सूक्ष्मधर्मा
र्थतत्त्ववित् तमभ्येहि पुरा प्राणान् स विमुंचति धर्मवित् १६ एवमुक्तस्तु कौन्तेयो दीर्घप्रज्ञो महा
मतिः उवाच वदतां श्रेष्ठं व्यासं सत्यवतीसुतं १७ युधिष्ठिर उ० वैशसं सुमहत्कृत्वा ज्ञातीनां रोमह
र्षणं आगस्कृत्सर्वलोकस्य पृथिवीनाशकारकः १८ घातयित्वा तमेवाजौ छलेनाजिह्मयोधि
नं उपसंप्रष्टुमर्हामि तमहं केन हेतुना १९ वैशम्पायन उ० ततस्तं नृपतिश्रेष्ठं चातुर्वर्ण्यहितेप्सया
पुनराह महाबाहुर्यदुश्रेष्ठो महामतिः २० वासुदेव उ० नेदानीमतिनिर्बन्धं शोके त्वं कर्तुमर्हसि
यदाह भगवान् व्यासस्तत्कुरुष्व नृपोत्तम २१ ब्राह्मणास्त्वा

महावाहो भारतश्रुद्धिकृतैः पंडितशिवदर्शितैः

पराम्पसम्यक्प्रष्टुं १९ २१ नाथमानाः याचमानाः २२

इतेति उपासतः स्थितवन्तः अपियो जपं २३ २४ २५ २६ विष्टरश्रवसा विष्णुना २७ संतापं शारीरं तापं २८ वाक्यानि वेदा

इतिशिष्टाश्चराजानःकृत्स्नंचैवसमागतं चातुर्वर्ण्यंमहाराजराष्ट्रेतेकुरुजांगले २३ प्रिया
र्थमपिचैतेषांब्राह्मणानांमहात्मनां नियोगादस्यचगुरोर्व्यासस्यामिततेजसः २४ सुहृदा
मस्मदादीनांद्रौपद्याश्चपरंतप कुरुप्रियममित्रघ्नलोकस्यचहितंकुरु २५ वैशंपायनउ॰
एवमुक्तःसकृष्णेनराजाराजीवलोचनः हितार्थंसर्वलोकस्यसमुत्तस्थौमहामनाः २६
सोऽनुनीतोनरव्याघ्रोविष्टरश्रवसास्वयं द्वैपायनेनचतथादेवस्थानेनजिष्णुना २७ एतैश्चा
न्यैश्चबहुभिरनुनीतोयुधिष्ठिरः व्यजहान्मानसंदुःखंसंतापंचमहायशाः २८ श्रुतवाक्यः
श्रुतनिधिःश्रुतश्रव्यविशारदः ततःसमनसःशांतिमगच्छत्पांडुनंदनः २९ सतैःपरि
वृतोराजानक्षत्रैरिवचंद्रमाः धृतराष्ट्रंपुरस्कृत्यस्वपुरंप्रविवेशह ३० प्रविविक्षुःसधर्मज्ञः
कुंतीपुत्रोयुधिष्ठिरः अर्चयामासदेवांश्चब्राह्मणांश्चसहस्रशः ३१

वयवाः निधिः तदर्थविचारग्रंथो मीमांसा अन्यदपि यत् श्रुतं श्रव्यं नीतिशास्त्रादि तत्र विशारदः ऊहापोहकुशलः व्यवस्य क
र्तव्यमर्थं निश्चित्य २९ ३० ३१ ॥

ततइति गोभिर्बलीवर्दैः एतस्मात्लिंगाद्गम्यते यत्पुरं प्रथमं गोरथेन प्रवेष्टव्यमिति मंत्रलिंगादप्येतद्गम्यते संगोभिरांगिरसो
नक्षमाणो भगइवेदर्यमणंनिनाय जनेमित्रोनदंपती अनक्ति बृहस्पते वाजयाशूंरिवाजौ अस्यार्थः हेबृहस्पते बृहस्पतिस्त्वत्प्रेषु
रोहितआंगिरसो बृहस्पतिः गोभिर्वृषैः रथमित्यर्थात् संनक्षमाणः रथस्य संनहनं कुर्वन् यकारलोपआर्षः अर्यमणं देवं भग
इव षड्विधैश्वर्यमिव तं निनाय प्रापितवान् तत्र दृष्टांतः जनेइति नकारउपमायां यथालोके मित्रः सखा दंपती अनक्ति आ

ततो नवं रथश्रेष्ठं कंबलाजिनसंवृतं युक्तं षोडशभिर्गोभिः पांडरैः शुभलक्षणैः ३२ मैत्रेरभ्य
र्चितं शुभ्रैः स्तूयमानश्च वंदिभिः आरुरोह रथं चैव सोमो मरुतमयं यथा ३३ जग्राह रश्मीन्कौ
न्तेयो भीमो भीमपराक्रमः अर्जुनः पांडुरं छत्रं धारयामास भानुमत् ३४ क्षिप्यमाणाचतच्छ
त्रं पांडुरं रथमूर्द्धनि शुशुभे तारकाकीर्णं सितमभ्रमिवांबरे ३५ चामरव्यजने तस्य वीरौ जगृह
तुस्तदा चंद्ररश्मिप्रभे शुभ्रे माद्रीपुत्रावलंकृते ३६ ते पंचरथमास्थाय भ्रातरः समलंकृताः
भूतानीव समस्तानि राजन्ददृशिरे तदा ३७ ॥

न्योन्यसंबद्धे सकरोति एवं नगरगतामै श्वर्यलक्ष्मीपरिणाय्यन्
गोरथेन नगरं प्रविशयेद्राजानं पुरोहितः एवं जयलक्ष्मीपरिणाय्यन् अश्वरथेन आजिं प्रविशेदित्याह वाजयेति आजौ सं
ग्रामे आशून् आजौ संग्रामे आशून् अश्वान् रथे युंजन् वाजयन् मयं यजमानं जयलक्ष्मीपरिणीतमित्यर्थादनुषंजनीयं ३२
अस्तमयं देवतामयं ३३ ३४ तारकास्ताराः तत्तुल्याः छत्रप्रांतस्थमौक्तिकगुच्छाश्च ३५ ३६ यथा देहरथो भूतपंचकमयः

श्री॰ युयुत्सुर्धृतराष्ट्रपुत्रः ३८ ३९ नरयानं तवेतिरवान् इति म्लेच्छभाषायां प्रसिद्धं न तु शिबिका ५० ५३ आकुलाकुलम
शां॰ रा॰ तिसंमर्दवशात् ५४ ५५ माल्येन पुष्पसमूहेन मेदिनी समलंकृता तेन पुनरुच्यते धूपनैः अगुरुप्रभृतिभिर्धूपद्रव्यैः ५६
टी॰ आस्थाय तु रथं शुभ्रं युक्तमश्वैर्मनोजवैः अन्वयात् पृष्ठतो राजन् युयुत्सुः पाण्डवाग्रजं ३८ रथं हे
७५ ममयं शुभ्रं शैब्यसुग्रीवयोजितं सह सात्यकिना कृष्णः समास्थायान्वयात् कुरून् ३९ नरयानेन तु
ज्येष्ठः पिता पार्थस्य भारत अग्रतो धर्मराजस्य गान्धारीसहितो ययौ ५० कुरुस्त्रियश्च ताः सर्वाः कु
न्ती कृष्णा तथैव च यानैरुच्चावचैर्जग्मुर्विदुरेण पुरस्कृताः ५१ ततो रथाश्च बहुला नागाश्च सम
स्वरया लंकृताः पादाताश्च हयाश्चैव पृष्ठतः समनुव्रजन् ५२ ततो वैतालिकैः सूतैर्मागधैश्च सुभाषितैः स्तू
यमानो ययौ राजा नगरं नागसाह्वयं ५३ तत्प्रयाणं महाबाहोर्बभूवाप्रतिमं भुवि आकुलाकुल =
मुत्क्रुष्टं हृष्टपुष्टजनाकुलं ५४ अभियाने तु पार्थस्य नरैर्नगरवासिभिः नगरं राजमार्गश्च य
थावत् समलंकृतं ५५ पाण्डुरेण च माल्येन पताकाभिश्च मेदिनी संस्कृता राजमार्गश्च धूपनैश्च प्रधू २
पितः ५६ अथ चूर्णैश्च गन्धानां नानापुष्पप्रियङ्गुभिः माल्यदामभिरासक्तै राजवेश्माभिसंवृतं ५७
कुम्भाश्च नगरद्वारि वारिपूर्णा नवा दृढाः कन्याः सुमनसो गौराः स्थापितास्तत्र तत्र ह ५८ तथा स्व
लंकृतद्वारेण नगरेण पाण्डुनन्दनः स्तूयमानः शुभैर्वाक्यैः प्रविवेश सुहृद्वृतः ५९ इति महाभारते शा॥
५७ सिताः चूर्णादिना शुक्लीकृताः सुमनसः पुष्पाणि गौराः शुक्लाः ५८ ५९ सप्तत्रिंशः ३७ ॥ ७५

प्रवेशने १२ स्त्रीणांस्त्रीभिः ३ ४ ५ ६ ७ ८ ९ १० ११ १२ ॥

वैशंपायन उवाच प्रवेशने तु पार्थानां जनानां पुरवासिनां दिदृक्षूणां सहस्राणि समाजग्मु
स्सहस्रशः १ स राजमार्गः शुशुभे समलंकृतचत्वरः यथा चंद्रोदये राजन्वर्द्धमानो महोदा
धिः २ गृहाणि राजमार्गेषु रत्नवंति महांति च प्राकंपंतीव भारेण स्त्रीणां पूर्णानि भारत ३
ताः शनैरिव सव्रीडं प्रशशंसुर्युधिष्ठिरं भीमसेनार्जुनौ चैव माद्रीपुत्रौ च पांडवौ ४ धन्या त्वम
सि पांचालि या त्वं पुरुषसत्तमान् उपतिष्ठसि कल्याणि महर्षीनिव गौतमी ५ तव कर्माण्यमो
घानि व्रतचर्या च भामिनि इति कृष्णां महाराज प्रशशंसुस्तदा स्त्रियः ६ प्रशंसावचनैस्तासां
मिथः शब्दैश्च भारत प्रीतिजैश्च तदा शब्दैः पुरमासीत्समाकुलं ७ तमतीत्य यथायुक्तं राजमा
र्गं युधिष्ठिरः अलंकृतं शोभमानमुपायाद्राजवेश्म ह ८ ततः प्रकृतयः सर्वाः पौरजानपदा
ऊचुः कर्णसुखा वाचः समुपेत्य ततस्ततः ९ दिष्ट्या जयसि राजेंद्र शत्रूञ्छत्रुनिषूदन दि
ष्ट्या राज्यं पुनः प्राप्तं धर्मेण च बलेन च १० भव नस्त्वं महाराज राजेह शरदां शतं प्रजाः पालय
धर्मेण यथेंद्रस्त्रिदिवं तथा ११ एवं राजकुलद्वारि मंगलैरभिपूजितः आशीर्वादान्द्विजैरुक्ता
न्प्रतिगृह्य समंततः १२ ॥

श्री॰
शां॰ रा॰
टी॰
७६

१३ १४ अभिरूपान्मंगलद्रव्यपाणीन् १५ १७ किमिच्छसि किमिच्छसीतिएच्छद्भिर्भृत्यैर्विविधैर्गोवस्त्रादिद्रव्यैर्निमंत्र

प्रविश्य भवनं राजा देवराजगृहोपमं श्रद्धाविजयसंयुक्तं रथात्पश्चादवातरत् १३ प्रविश्याभ्यंतरं
श्रीमान्देवतान्यभिगम्य च पूजयामास रत्नैश्च गंधमाल्यैश्च सर्वशः १४ निश्चक्राम ततः श्रीमान्स्तुन
देवमहायशाः ददर्श ब्राह्मणांश्चैव सोऽभिरूपानवस्थितान् १५ समंहृतस्तदा विप्रैराशीर्वादविवत्तभिः
शुभशुभैर्विमलश्च द्रव्यहस्तान्यथाग्नाहृतो यथा १६ तांस्तत्रैव पूजयामास कौंतेयो विधिवद्द्विजान् यौम्यगुरु
पुरुस्कृत्य ज्येष्ठं पितरमेव च १७ सुमनोमोदकै रत्नैर्हिरण्येन च भूरिणा गोभिर्वस्त्रैश्च राजेंद्र विविधै
श्च किमिच्छकैः १८ ततः पुण्याहघोषोऽभूद्दिवं स्तब्ध्वेव भारत सुहृदां प्रीतिजननः पुण्यः श्रुतिसुखावहः
हः १९ हंसवन्नेदुर्घोषा राज्ञा द्विजाना तत्र भारती श्रुष्क वेदविदुर्घोषा पुष्कलार्थपदाक्षरा २० ततो दुंदुभि
निर्घोषः शंखानां च मनोरमः जयं प्रवदतां तत्र स्वनः प्रादुरभून्नृप निःशब्दे च स्थिते तत्र ततो विप्रज
ने पुनः राजानं ब्राह्मणच्छद्मा चार्वाको राक्षसोऽब्रवीत् २२ तत्र दुर्योधनसखा भिक्षुरूपेण संवृतः
सांख्यः शिखी त्रिदंडी च धृष्टो विगतसाध्वसः २३ वृतः सर्वैस्तथा विप्रैराशीर्वादविवक्षुभिः परं सहस्रै
राजेंद्र तपोनियमसंश्रितैः २४ स दुष्टः पापमाशंसुः पांड ७६
यद्धितिनार्थः १८ स्तब्ध्वावाप्य १९ २१ २३ २५ ॥

वानामसहस्र [illegible] अन्नामैश्चैतान्द्विजान्सुवाच महीपतिः २४

२६ २७ प्रत्यासन्नाः समीपस्थाः व्यसनिनः विपदः विनोशत्रादयो यस्य तं प्रत्यासन्नादिदः स्वपरिहारार्थं ममेदं राज्यकरणेनत
चार्वाक उ० इमे प्राहुर्द्विजाः सर्वे समारोप्य वचो मयि धिग्भवंतं कुनृपतिं ज्ञातिघातिनमस्तु वै
किं ते तस्याद्धि कौंतेय कृत्वेमं ज्ञातिसंक्षयं २६ घातयित्वा गुरूंश्चैव मृतं श्रेयो न जीवितं इति ते वै द्वि
जाः श्रुत्वा तस्य घोरस्य रक्षसः २७ विव्यथुश्चुक्रुशुश्चैव तस्य वाक्यप्रधर्षिताः ततस्ते ब्राह्मणाः स
र्वे स च राजा युधिष्ठिरः व्रीडिताः परमोद्विग्नास्तूष्णीमासन् विशांपते २८ युधिष्ठिर उ० प्रसीदंतु
भवंतो मे प्रणतस्याभियाचतः प्रत्यासन्नव्यसनिनं न मां धिक्कर्तुमर्हथ २९ वैशंपायन उ० ततो रा
जन् ब्राह्मणास्ते सर्व एव विशांपते ऊचुर्नैतद्वचोऽस्माकं श्रीरस्तु तव पार्थिव ३० जज्ञुश्चैव महात्मा
नस्ततस्तं ज्ञानचक्षुषा ब्राह्मणा वेदविद्वांसस्तपोभिर्विमलीकृताः ३१ ब्राह्मणा ऊचुः एष दुर्यो
धनसखा चार्वाको नाम राक्षसः परिव्राजकरूपेण हितं तस्य चिकीर्षति ३२ न वयं ब्रूम धर्मात्मन् व्ये
तु ते भयमीदृशं उपतिष्ठतु कल्याणं भवंतं भ्रातृभिः सह ३३ वैशंपायन उ० ततस्ते ब्राह्मणाः सर्वे
हुंकारैः क्रोधमूर्छिताः निर्भर्त्सयंतः शुचयो निजघ्नुः पापराक्षसं ३४ स पपात विनिर्दग्धस्ते
जसा ब्रह्मवादिनां महेंद्राशनिनिर्दग्धः पादपोंऽकुरवानिव ३५ ॥

स्वार्थमित्यर्थः जज्ञुः ज्ञातवंतः ३१ ३२ ३३ ३४ ३५ ॥

श्री॰
शां॰रा॰
टी॰
७७

३६ अष्टत्रिंशः ३८ ब्राह्मणाः १ २ ३ ४ ५ ६ ७ विदितः मयाश्रात्मः ८ ९ १० ११ ॥

पूजिताश्चययुर्विप्राराजानमभिनंद्यतं राजाचहर्षमापेदेपांडवःसहसुहृज्जनः ३६ इतिश्रीमहाभारतेरा
जधर्मेचार्वाकवधेअष्टत्रिंश ३८ वैशंपायनउ॰ ततस्तत्रतुराजानंतिष्ठंतंभ्रातृभिःसह उवाचदेवकीपु
त्रः सर्वदर्शीजनार्दनः १ वासुदेवउ॰ ब्राह्मणास्तातलोकेस्मिन्नर्चनीयाःसदामम एतेभूमिचरादे
वावाग्विषाःसुप्रसादकाः २ पुराकृतयुगेराजंश्चार्वाकोनामराक्षसः तपस्तेपेमहाबाहोबदर्यांबहुवा
र्षिकं ३ वरेणच्छंद्यमानश्चब्रह्मणाचपुनःपुनः अभयंसर्वभूतेभ्योवरयामाससभारत ४ द्विजावमा
नादन्यत्रप्रादाद्वरमनुत्तमं अभयंसर्वभूतेभ्योददौतस्मैजगत्पतिः ५ सतुलब्धवरःपापोदेवानामित
विक्रमः राक्षसस्तापयामासतीव्रकर्मामहाबलः ६ ततोदेवाःसमेताश्चब्रह्माणमिदमब्रुवन् व
धायरक्षसस्तस्यबलविप्रकृतास्तदा ७ तानुवाचाव्ययोदेवोविहितस्तत्रवैमया यथास्यभविताशृ
त्युरचिरेणेतिभारत ८ राजादुर्योधनोनामसखास्यभवितानृप तस्यस्नेहावब
द्धोसौब्राह्मणानवमंस्यते ९ तत्रैनंरुषिताविप्राविप्रकारप्रधर्षिताः
धक्ष्यंतिवाग्बलाःपापंततोनाशंगमिष्यति १० सएषनिहतःशे ७७
तेब्रह्मदंडेनराक्षसः चार्वाकोनृपतिश्रेष्ठमाशुचोभरतर्षभ ११ ॥

१२ १३ नवत्रिंशः ३९ ततःकुंती गतमन्युःवीतदैन्यः गतज्वरःवीतशोकः १ निषीदतुरिति निषेदतुरित्यर्थे आर्षं २

हतास्तेतत्त्वयधर्मेणात्तातयस्तवपार्थिव स्वर्गताश्चमहात्मानोवीराःक्षत्रियपुंगवाः १२ स्वत
मातिष्ठकार्याणिमातेभूद्ग्लानिरच्युत शत्रून्जहिहिशेषंजांश्चपरिपृज्जय १३ इतिश्रीशांतौ जारतदि
राजधर्मेचार्वाकवधः ३९ वैशंपायनउ॰ ततःकुंतीसुतोराजागतमन्युर्गतज्वरः कांचने
प्राङ्मुखोहृष्टोन्यषीदत्परमासने १ तमेवाभिमुखोपीठेप्रदीप्तेकांचनेशुभे सात्यकिर्वासुदे
वश्चनिषीदतुररिंदमौ २ मध्येकृत्वातुराजानंभीमसेनार्जुनावुभौ निषीदतुर्महात्मानोश्ला
क्ष्णयोर्मणिपीठयोः ३ दांतेसिंहासनेशुभ्रेजांबूनदविभूषिते पृथापिसहदेवेनसहास्ते
नकुलेनच ४ सुधर्माविदुरोधौम्योधृतराष्ट्रश्चकौरवः निषेदुर्ज्वलनाकारेष्वासनेषुपृथक्
पृथक् ५ युयुत्सुःसंजयश्चैवगांधारीचयशस्विनी धृतराष्ट्रोयतोराजाततःसर्वेसमा
विशन् ६ तत्रोपविष्टोधर्मात्माश्वेताःसुमनसोस्पृशत् स्वस्तिकानक्षतान्भूमिंसुवर्णंरजतंमणिं
७ ततःप्रकृतयःसर्वाःपुरस्कृत्यपुरोहितं ददृशुर्धर्मराजानमादायबहुमंगलं ८ पृथिवींचसुवर्णंच
रत्नानिविविधानिच आभिषेचनिकंभांडंसर्वसंभारसंभृतं ९ ॥

३ दांतेगजदंतमये ४ सुधर्माकुर्यायनपुरोहितः ५ ६ स्वस्तिकानसर्वतोभद्रांकितानिदेवतापीठानि ७ ८ भांडंउपकरणं ९ ॥

श्री॰
शां॰ रा॰
टी॰
१८

ओडुंबरास्ताम्रमयाः ९ उडुंबरकाष्ठमयः स्रुवः ११ १२ १६ अमृतमुखेः अत्यंतदर्शनीयः ७ ८ १९ २० २१ २२ ॥
कांचनौडुंबरास्तत्रराजताः पृथिवीमयाः पूर्णाः कुंभाः सुमनसोलाजाबर्हींषिगोरसं ९ शमीपि
प्पलपालाशसमिधोमधुसर्पिषी स्रुवऔडुंबरः शंखस्तथाहेमविभूषितः ११ दाशार्हेणाभ्यनुज्ञाता
स्तत्रधौम्यः पुरोहितः प्रागुदक्प्लवणांवेदींलक्षणेनोपलिप्यच १२ व्याघ्रचर्मोत्तरेशुक्लेसर्वतोभद्र
आसने दृढपादप्रतिष्ठानेहुताशनसमत्विषि १३ उपवेश्यमहात्मानंकृष्णांचद्रुपदात्मजां जुहाव
पावकंधीमान्विधिमंत्रपुरस्कृतं १४ ततउत्थायदाशार्हः शंखमादायपूजितं अभ्यषिंचत्पतिंपृथ्व्याः
कुंतीपुत्रंयुधिष्ठिरं १५ धृतराष्ट्रश्चराजर्षिः सर्वाः प्रकृतयस्तथा अनुज्ञातोथकृष्णेनभ्रातृभिःसह
पांडवः १६ पांचजन्याभिषिक्तश्चराजाऽमृतमुखोभवत् ततोनुवादयामासुः पणवानकदुंदुभीन्
१७ धर्मराजोपितत्सर्वंप्रतिजग्राहधर्मतः पूजयामासतांश्चापिविधिवद्भूरिदक्षिणः १८ ततोनिष्क
सहस्रेणब्राह्मणान्स्वस्तिवाचयन् वेदाध्ययनसंपन्नान्धृतिशीलसमन्वितान् १९ तेप्रीताब्राह्म
णाराजन्स्वस्त्यूचुर्जयमेवच हंसाइवचनर्दंतः प्रशशंसुर्युधिष्ठिरं २० युधिष्ठिरमहाबाहोदिष्ट्या
जयसिपांडव दिष्ट्यास्वधर्मंप्राप्तोसिविक्रमेणमहाद्युते २१ दिष्ट्यागांडीवधन्वाचभीमसेनश्चपां
डवः त्वंचापिकुशलीराजन्माद्रीपुत्रौचपांडवौ २२ ॥

१८

२३ २४ युधिष्ठिराभिषेकश्चत्वारिंशत्तमोध्यायः ४० प्रकृतीनां तद्वाक्यं दिष्ट्याजयसीत्यादि अंतरंपश्चात् १ २ ३ ४ ५ ६ ७ ८
मुक्ताविरलयात्तस्मात्संग्रामाद्विजितद्विषः त्रिप्रभुत्तरकार्याणिकुरुसर्वाणिभारत २३ ततःप्रत्य
र्चितःसद्भिर्धर्मराजोयुधिष्ठिरः प्रतिपेदेमहद्राज्यंसुहृद्भिःसहभारत २४ इतिश्रीमहाभारतेशांतौरा
वैशंपायनउ०
जधर्मेयुधिष्ठिराभिषेकः ४० प्रकृतीनांचतद्वाक्यंदेशकालोपबृंहितं श्रुत्वायुधिष्ठिरोराजासौतंवंप्र
त्यभाषत १ धन्याःपांडुसुतान्नूनंयेषांब्राह्मणपुंगवाः तथ्यान्वाप्यथवातथ्यान्गुणानाहुःसमागताः
२ अनुग्राह्यावयंनूनंभवतामितिमेमतिः यदेवंगुणसंपन्नान्नस्मान्ब्रूथविमत्सराः ३ धृतराष्ट्रोमहा
राजः पितानोदैवतंपरं शासनेस्याप्रियेचैवस्थेयंमत्प्रियकांक्षिभिः ४ एतदर्थंहिजीवामिकृत्वाज्ञा
तिवधंमहत् अस्यशुश्रूषणंकार्यंमयानित्यमतंद्रिणा ५ यदिचाहमनुग्राह्योभवतांसुहृदांतथा
धृतराष्ट्रेयथापूर्वंवृत्तिंवर्तितुमर्हथ ६ एषनाथोहिजगतोभवतांचमयासह अस्यैवपृथिवीकृत्स्ना
पांडवाःसर्वएवच ७ एतन्मनसिकर्तव्यंभवद्भिर्वचनंमम अनुज्ञाप्याथतान्राजायथेष्टंगम्य
तामिति ८ पौरजानपदान्सर्वान्विसृज्यकुरुनंदनः यौवराज्येनकौंतेयंभीमसेनमयोजयत् ९
मंत्रेचनिश्चयेचैवषाड्गुण्यस्यचचिंतने विदुरंबुद्धिसंपन्नंप्रीतिमानसमादिशत् १० ॥

श्री० शां० रा० टी० ७६

११ ७ यत्नअस्यकार्यंतदेवममकार्यंतच्चभवद्भिःकर्तव्यमित्यर्थः ८ राजानंधृतराष्ट्रंअनुज्ञाप्यतानिकार्याणिकर्तव्यानीत्यर्थः ९

कृताकृतपरिज्ञाने तथायव्ययचिंतने संजयंयोजयामाससहृदंसर्वगुणोर्युतं १ बलस्यपरिमाणेच
भक्तवेतनयोस्तथा नकुलंव्यादिशद्राजाकर्मणांचान्ववेक्षणे २ परचक्रोपरोधेचदृप्तानांचावम
र्दने युधिष्ठिरोमहाराजफाल्गुनंव्यादिदेशह द्विजानांदेवकार्येषुकार्येष्वन्येषुचैवह धौम्यंपुरोधसं
श्रेष्ठंनित्यमेवसमादिशत् ४ सहदेवंसमीपस्थंनित्यमेवसमादिशत् तेनगोप्योहिनृपतिःसर्वाव
स्थोविशांपते ५ यान्यानमन्यद्योग्यांश्चयेषुयेष्विहकर्मसु तांस्तांस्तेष्वेवयुयुजेप्रीयमाणोमही
पतिः ६ विदुरंसंजयंचैवयुयुत्सुंचमहामतिं अब्रवीत्परवीरघ्नोधर्मात्माधर्मवत्सलः ७ उत्था
योत्थाययत्कार्यमस्यराज्ञःपितुर्मम सर्वंभवद्भिःकर्तव्यमप्रमत्तैर्यथायथं ८ पौरजानपदानांचया
निकार्याणिसर्वशः राजानंसमनुज्ञाप्यतानिकार्याणिभागशः ९ इतिश्रीमहाभारतेशांतौराज
धर्मेषुभीमसेनयौवराज्याभिषेकः ४१ वैशंपायनउ० ततोयुधिष्ठिरोराजाज्ञातीनांयेहतायुधि श्रा
द्धानिकारयामासतेषांपृथगुदारधीः १ धृतराष्ट्रोददौराजापुत्राणामौर्ध्वदेहिकं सर्वकामगुणोपेत
एकचत्वारिंशः ४१ ततोयु० १ २ ३ ॥ मन्नंगाश्चधनानिच २ रत्नानिचविचित्राणिमहार्हाणिमहायशाः

युधिष्ठिरस्तद्रोणास्यकर्णस्यचमहात्मनः ३ ॥

७९

४ ५ ६ उद्दिश्येति सभाः धर्मशालाः तत्तन्नामांकितानि सभादीनि चक्रे इयममुकस्य सभा इयममुकस्य सभेति एतेन सभा
धृष्टद्युम्नाभिमन्युभ्यां हैडिंबस्य च रक्षसः विराटप्रभृतीनां च सुहृदामुपकारिणां ४ द्रुपदद्रौपदेया
नां द्रौपद्या सहितो ददौ ब्राह्मणानां सहस्राणि पृथगेकैकमुद्दिशन् ५ धनैश्च रत्नैश्च गोभिश्च वस्त्रै
श्च समतर्पयत् ये चान्ये पृथिवीपाला येषां नास्ति सुहृज्जनः ६ उद्दिश्योद्दिश्य तेषां च चक्रे राजौर्ध्व
देहिकं सभाः प्रपाश्च विविधास्तडागानि च पांडवः ७ सुहृदां कारयामास सर्वेषामौर्ध्वदेहिकं स
तेषामनृणो भूत्वा गत्वा लोकेष्ववाच्यतां ८ कृतकृत्योऽभवद्राजा प्रजाधर्मेण पालयन् धृतराष्ट्रं
यथापूर्वं गांधारीं विदुरं तथा ९ सर्वांश्च कौरवान्मान्यान्भृत्यांश्च समपूजयत् याश्च तत्र स्त्रियः
काश्चिद्धतवीरा हतात्मजाः १० सर्वास्ताः कौरवो राजा संपूज्यापालयद्घृणी दीनांधकृपणानां च
गृहाच्छादनभोजनैः ११ आनृशंस्यपरो राजा चकारानुग्रहं प्रभुः स विजित्य महीं कृत्स्नामानृण्यं
प्राप्य वैरिषु १२ निःसपत्नः सुखी राजा विजहार युधिष्ठिरः १३ इति श्रीमहाभारते शांतौ राजधर्मे
श्राद्धक्रिया ४२ वैशंपायन उ० अभिषिक्तो महाप्राज्ञो राज्यं प्राप्य युधिष्ठिरः दाशार्हं पुंडरीकाक्षमुवा
च प्रांजलिः शुचिः १ तव कृष्ण प्रसादेन नयेन च बलेन च बुद्ध्या च यदुशार्दूल तथा विक्रमणेन च २
दिकरणात्संतानफलं लभ्यत इति गम्यते ७ ८ ९ १० ११ १२ द्विचत्वारिंशः अभि १ २ ॥

३ पुरुषं सर्वशरीरशायिनं सात्वतां उपासकानां पतिं पालकं ४ विश्वस्य संभवो योनिः ५ सप्तथा विस्तारात् आदित्यो वाम
नश्चेति देव्या अदित्यामेव जन्म ततो अदितेः पुत्रान्तरेषु पृश्निप्रभृतिषु क्रमात् पृश्निगर्भः परशुरामः दाशरथिरामः यादवो वा
मकृष्णश्चेति सर्वेषु गर्भेषु एक एव त्वं नत्वत्प्रति गर्भभिन्नः त्रिषु वर्तमानयुगात्पूर्वेषु भवं त्रियुगं अन्ये तु धर्मज्ञानवैराग्यैश्वर्यं

पुनः प्राप्तमिदं राज्यं पितृपैतामहं मया नमस्ते पुंडरीकाक्ष पुनः पुनररिंदम ३ त्वामेकमाहुः
पुरुषं त्वामाहुः सात्वतां पतिं नामभिस्त्वा बहुविधैः स्तुवंति प्रयता द्विजाः ४ विश्वकर्मन्नमस्ते
स्तु विश्वात्मन्विश्वसंभव विष्णो जिष्णो हरे कृष्ण वैकुंठ पुरुषोत्तम ५ अदित्याः सप्तधा त्वं तु पुरा
णो गर्भं तातातः पृश्निगर्भस्त्वमेवैकस्त्रियुगं त्वां वदंत्यपि ६ शुचिश्रवा हृषीकेशो घृतार्चिर्हं
स उच्यते विचक्षुः शंभुरेकस्त्वं विभुर्दामोदरोऽपि च ७ वराहोऽग्निर्बृहद्भानुर्वृषभस्तार्क्ष्यलक्ष
णः अनीकसाहः पुरुषः शिपिविष्ट उरुक्रमः ८ ॥

श्रीयशसी चेति त्रीणि पुरमानिनं हंतमित्याहुः ६ शुचिश्रवाः पुण्यकीर्तिः घृतार्चिः यज्ञेश्वरः हंसः ब्रह्मणोऽपि गुरुः
त्रीणि चक्षूंषि दर्शनसाधनानि श्रुत्यनुमानप्रत्यक्षाणि यस्मिन् ७ बृहद्भानुः सूर्यः वृषभो धर्मः तार्क्ष्यलक्षणो गरुडध्व ८॰
जः अनीकसाहः शत्रुसेनावमर्दी शिपिविष्टः सर्वशरीरान्तः प्रविष्टः पुरुषः जीवः ८ ॥

वरिष्ठः उत्कृतमः वाजसनिः अन्नप्रदः गुहः देवसेनानीः संस्कृतो विप्रादिरूपः विकृतः अनुलोमजविलोमजादिरूपः द्वेषः श्रे
ष्ठः परिव्राजादिरूपः ८ कृष्णवर्म्मः यज्ञादिरूपः वृषाङ्कः इन्द्रस्तं दश्नातीति वृषदर्भः इन्द्रदर्पहन्ता वृषाकपिः हरिहररूपी सिंधुः
समुद्रः विधर्मः निर्गुणः त्रिककुपकर्मयोग्यप्राग्दक्षिणोशानदिग्रूपः त्रियामा सूर्यचन्द्राग्निप्रभः त्रिदिवात् च्युतोऽवतीर्णः

वरिष्ठ उग्रसेनानीः सत्यो वाजसनिर्गुहः अच्युतस्यावनेभीर्णां संस्कृतिर्विकृतिर्द्वेषः ९ ऊर्ध्ववर्त्मा
त्वसेवाद्रिर्वृषदर्भो वृषाकपिः सिंधुर्विधर्मस्त्रिककुप्त्रियामा त्रिदिवात्च्युतः १० सम्राड्स्वराड्चैव
स्वराजोऽभवोद्भवः विभुर्भूरभिभूः कृष्णः कृष्णवर्त्मा त्वमेव च ११ त्विष्टकृद्भिषजावर्त्तः कपिल
स्त्वं च वामनः १२ यज्ञो ध्रुवः पतंगश्च यज्ञसेन त्वमुच्यसे शिखण्डीनहुषो बभ्रुर्दिवस्पृक्त्वं पु
नर्वसुः १३ सुबभ्रुस्त्वं च यश्चसुषेणो दुन्दुभिस्तथा गभस्तिनेमिः श्रीपद्मः पुष्करः पुष्पधारणः
१४ ऋतुर्विभुः सर्वसूक्ष्मश्चारित्रं चैव पठ्यसे अंभोनिधिस्त्वं ब्राह्मणस्त्वं पवित्रं धामधामवित् हिरण्य
गर्भस्त्वामाहुः स्वधा स्वाहा च केशवः १५ योनिस्त्वमस्य प्रलयश्च कृत्स्नस्त्वमेवेदं सृजसि विश्वमग्रे
विश्वं चेदं त्वद्वशो विश्वयोने नमोऽस्तु ते शार्ङ्गचक्रासिपाणे १६ ॥

९ भूः सत्तारूपः अतिभूः अशरीरः ११ भिषजावर्त्तः भिषजो अश्विनौ आवर्त्तनेत्यावर्त्त[illegible]योः पिता सूर्यः १२ पतंगः गरु
डः बभ्रुः महेश्वरः पुनर्वसुः नक्षत्रभेदः १३ सुबभ्रुः सुतरां पिंगलवर्णः गभस्तिरर्कनेमिः परिधिर्यस्य सकालरूपः १४

स्तवचिन्तामणिः ५ ॥

श्री
शां॰रा॰
टी॰
८१

२ त्रिचत्वारिंशः ४३ ततोविस्पष्टार्थः १ २ ३ ४ ५ ६ ७ ८ ९ १० ॥
एवंस्तुतोधर्मराजेनकृष्णःसभामध्येप्रीतिमान्पुष्करात्तः तमभ्यनंदद्भारतंपुष्कलाभिःवाग्भिर्ज्येष्ठं
पांडवंयादवाग्र्यः ७ इतिश्रीमहाभारतेशांतौराजधर्मेवासुदेवस्तुतिः ४३ वैशंपायनउ॰ ततो
विसर्जयामाससर्वाःप्रकृतयोनृपः विविशुश्चाभ्यनुज्ञातायथास्वानिगृहाणिते १ ततोयुधिष्ठिरो
राजाभीमंभीमपराक्रमं सांत्वयन्नब्रवीच्छ्रीमानर्जुनंयमजौतथा २ शत्रुभिर्विविधैःशस्त्रैःक्षत
देहामहारणे श्रांताभवंतःसुभृशंतापिताःशोकमन्युभिः ३ अरण्येदुःखवसतीर्मत्कृतेभरतर्ष
भाः भवद्भिरनुभूताहियथाकुपुरुषैस्तथा ४ यथासुखंयथाजोषंजयोयमनुभूयतां विश्रां
तान्लब्धविज्ञानान्श्वःसमेतास्मिवःपुनः ५ ततोदुर्योधनगृहंप्रासादैरुपशोभितं बहुरत्न
समाकीर्णंदासीदाससमाकुलं ६ धृतराष्ट्राभ्यनुज्ञातंभ्रात्रादत्तंवृकोदरः प्रतिपेदेमहाबाहु
र्मंदिरंमघवानिव ७ यथादुर्योधनगृहंतथादुःशासनस्यतु प्रासादमालासंयुक्तंहेमतोर
णभूषितं ८ दासीदाससुसंपूर्णंप्रभूतधनधान्यवत् प्रतिपेदेमहाबाहुरर्जुनोराजशासनात्
९ दुर्मर्षणस्यभवनंदुःशासनगृहाद्वरं कुबेरभवनप्रख्यंमणिहेमविभूषितं १० ॥ ८१

१२ १३ १४ १५ १६ १७ १८ १९ २० चतुश्चत्वारिंशः ४४ प्राप्य १ २ ३ ४ ५ ६ ॥

नकुलाय वरार्हाय कर्षिताय महावने ददौ प्रीतो महाराज धर्मपुत्रो युधिष्ठिरः ११ दुर्मुखस्य च वे
श्माग्र्यं श्रीमत्कनकभूषणं पूर्णं पद्मदलाक्षीणां शयनसंकुलं १२ प्रददौ सहदेवाय सततं प्रिय
कारिणे मुमुदे तच्च लब्ध्वा स कैलासं धनदो यथा १३ युयुत्सुर्विदुरश्चैव संजयश्च विशांपते सुध
र्मा चैव धौम्यश्च यथा स्वजन्मगृहालयान् १४ सह सात्यकिना शौरिरर्जुनस्य विवेशनं विवेश पुरु
षव्याघ्रो व्याघ्रो गिरिगुहामिव १५ तत्र भक्ष्यान्नपानैस्ते मुदिताः सुखोषिताः सुखप्रबुद्धा राजा
नमुपतस्थुर्युधिष्ठिरं १६ इति श्रीमहाभारते शान्तौ राजधर्मे ४४ जनमेजय उवाच प्राप्य रा
ज्यं महाबाहुर्धर्मपुत्रो युधिष्ठिरः यदन्यदकरोत् विप्र तन्मे वक्तुमिहार्हसि १ भगवान्वा हृषीके
शस्त्रैलोक्यस्य परो गुरुः ऋषे यदकरोद्वीरस्तच्च व्याख्यातुमर्हसि २ वैशंपायन उ० शृणु तत्त्वे
न राजेन्द्र कीर्त्यमानं मयानघ वासुदेवं पुरस्कृत्य यदकुर्वत पांडवाः ३ प्राप्य राज्यं महाराज कुन्ती
पुत्रो युधिष्ठिरः चातुर्वर्ण्यं यथायोगं स्वे स्वे स्थाने न्यवेशयत् ४ ब्राह्मणानां सहस्रं च स्नातका
नां महात्मनां सहस्रं निष्कमेकैकं दापयामास पांडवः ५ तथानुजीविनो भृत्यान्संश्रितानतिथी
नपि कामैः संतर्पयामास कृपणांस्तार्किकानपि ६ ॥

७ ८ ९ लब्धप्रशमनं लब्धस्यवनादेः यथोचितांशतः पात्रेसमर्पणेनशांतिकं १० ११ १२ १३ १४ १५ १६ १७ १८ १९

पुरोहितायधौम्यायप्रादादयुतशः गवाः धनंसुवर्णंरजतंवासांसिविविधान्यपि ७ कृपाय
चमहाराजगुरुवृत्तिमवर्तत विदुरायचराजासौपूजांचक्रेयतव्रतः ८ भक्ष्यान्नपानैर्विविधैर्वा
सोभिःशयनासनैः सर्वान्संतोषयामाससंश्रितान्ददतांवरः ९ लब्धप्रशमनंकृत्वासराजाराज
सत्तम युयुत्सोर्धार्तराष्ट्रस्यपूजांचक्रेमहायशाः १० धृतराष्ट्रायतद्राज्यंगांधार्यैविदुरायच निवे
द्यसुस्थवद्राजाससावेमास्तेयुधिष्ठिरः ११ तथासर्वंसनगरंप्रसाद्यभरतर्षभ वासुदेवंमहात्मानम
भ्यगच्छत्कृतांजलिः १२ ततोमहतिपर्यंकेमणिकांचनभूषिते ददर्शकृष्णमासीनंनीलमे
घसमद्युतिं १३ जाज्वल्यमानंवपुषादिव्याभरणभूषितं पीतकौशेयवसनंहेम्नेवोपगतंमणिं
१४ कौस्तुभेनोरसिस्थेनमणिनाभिविराजितं उद्यंतेवोदयंशैलंसूर्येणाभिविराजितं १५ नौप
म्यंविद्यतेतस्यत्रिषुलोकेषुकिंच सोभिगम्यमहात्मानंविष्णुंपुरुषविग्रहं १६ उवाचमधुरंरा
जास्मितपूर्वमिदंतदा सुखेनतेनिशाकच्चिद्व्युष्टाबुद्धिमतांवर १७ कच्चिज्ज्ञानानिसर्वाणिप्र
सन्नानितवाच्युत तवैवोपाश्रितादेवीबुद्धिर्बुद्धिमतांवर १८ वयंराज्यमनुप्राप्ताः पृथिवीचवशे ८२
स्थिता तवप्रसादाद्भगवंस्त्रिलोकगतिविक्रम १९ ॥

१९ २८ पंचचत्वारिंशः ४५ किमिदं १ चतुर्थं जाग्रत्स्वप्नसुषुप्तेभ्यः परं आलंब्य अपक्रांतः देहत्रयात् २ पंचकर्मा प्राण
नाडिकारी ३ सत्वं मनः वागुपलक्षितानींद्रियाणि च बुद्धौ महतत्वे गुणाः शब्दादिगुणभाजो देवाः श्रोत्रादीनींद्रियाणि ४ नेंग

जयंग्रामायशस्त्राग्रेनचधर्मच्युतावयं ततस्थाभावमाणातद्धर्मराजमरिंदमं नोवाचभगवान्किंचि
ध्यानमेवान्वपद्यत २८ इतिश्रीमहाभारतेशांतौराजधर्मे ४५ युधिष्ठिरउ॰ किमिदंपरमाश्चर्यं
ध्यायस्यमितविक्रम कच्चिल्लोकत्रयस्यास्यस्वस्तिलोकपरायण १ चतुर्थंध्यानमार्गंत्वमालं
ब्य पुरुषर्षभ अपक्रांतोदेवस्तेनमेविस्मितंमनः २ निगृहीतोहिवायुस्तेपंचकर्माशरीरगः इं
द्रियानिप्रसन्नानिमनसिस्थापितानिते ३ वाक्चसत्वंचगोविंदबुद्धौसंविशितानिते सर्वेचै
वगुणादेवक्षेत्रज्ञेतेनिवेशिताः ४ नेंगंतितवरोमाणिस्थिराबुद्धिस्तथामनः काष्ठकुड्यशि
लाभूतोनिरीहश्चासिमाधव ५ यथादीपोनिवातस्थोनिरिंगोज्वलतेपुनः तथासिभगवन्दे
वपाषाणइवनिश्चलः ६ यदिश्रोतुमिहार्हामिनरहस्यंचतेयदि छिंधिमेसंशयंदेवप्रपन्नाया
भियाचते ७ त्वंहिकर्ताविकर्ताचक्षरंचैवाक्षरंचहि अनादिनिधनश्चाद्यस्त्वमेवपुरुषोत्तम
८ त्वत्प्रपन्नायभक्तायशिरसाप्रणतायच ध्यानस्यास्ययथातत्त्वंब्रूहिधर्मभृतांवर ९ ततःस्वगो
चरेन्यस्यमनोबुद्धींद्रियाणिसः स्मितपूर्वमुवाचेदंभगवान्वासवानुजः १० ॥

तिनकंपते निरीहोनिश्चेष्टः ५ निरिंगःअचलः ६ ७ ८ ९ स्वगोचरेस्वेस्वेस्थाने १० ॥

श्री॰
शां॰ रा॰
टी॰
८३

११ १६ ध्यातिध्यायति ७ ९ चतस्रोविद्याःधर्मार्थकाममोक्षविद्याःसर्ववर्णसाधारणाः चातुर्होत्रंत्रैवर्णिकानांविशेषध
वासुदेवउ॰ शरतल्पगतोभीष्मःशाम्यन्निवहुताशनः संध्यातिपुरुषव्याघ्रस्ततोमेतद्गतंमनः
१ यस्यज्यातलनिर्घोषविस्फूर्जितमिवाशनेः नसेहेदेवराजोपितमस्मिमनसागतः २ येना
भिजित्यतरसासमस्तंराजमंडलं उढास्तिस्रस्तदाःकन्यास्तमस्मिमनसागतः त्रयोविंशति
रात्रंयोयोधयामासभार्गवं नचरामेणनिस्तीर्णस्तमस्मिमनसागतः ४ एकीकृत्येंद्रियग्रामं
मनःसंयम्यमेधया शरणंमामुपागच्छत्ततोमेतद्गतंमनः ५ यंगंगागर्भविधिनाधारया
मासपार्थिव वसिष्ठशिष्यंतंतातंतमस्मिमनसागतः ६ दिव्यास्त्राणिमहातेजायोधारयति
बुद्धिमान् सांगांश्चचतुरोवेदांस्तमस्मिमनसागतः ७ रामस्यदयितंशिष्यंजामदग्न्यस्यपांडव
आधारंसर्वविद्यानांतमस्मिमनसागतः ८ सकृद्भूतंभविष्यच्चभवच्चभरतर्षभः वेत्तिधर्मवि
दांश्रेष्ठंतमस्मिमनसागतः ९ तस्मिन्हिपुरुषव्याघ्रेकर्मभिःस्वैर्दिवंगते भविष्यतिमहीपार्थ
नष्टचंद्रेवशर्वरी २० तद्युधिष्ठिरगांगेयंभीष्मंभीमपराक्रमं अभिगम्योपसंगृह्यपृच्छयत्तेम
नोगतं २१ चातुर्विद्यंचातुर्होत्रंचातुराश्रम्यमेवच राजधर्मांश्चनिखिलान्पृच्छैनंपृथिवीप
ते २२ तस्मिन्नस्तमितेभीष्मेकौरवाणांधुरंधरे ज्ञानान्यस्तंगमिष्यन्तितस्मा
मौयत्वादि २२ ॥ त्वांचोदयाम्यहं २२ ॥ ८२

२४ २५ २६ अनभिध्येयं अविचारणीयं २७ ३२ सइति मसारगल्वर्कमयैर्विटंकैः मसारो मरकतमणिः गल्वश्चंद्रकांतः

तच्छ्रुत्वा वासुदेवस्य तथ्यं वचनमुत्तमं साश्रुकंठः स धर्मज्ञो जनार्दनमुवाच ह यद्भवानाह
भीष्मस्य प्रभावं प्रति माधव तथा तन्नात्र संदेहो विद्यते मम माधव २५ महाभाग्यं च भीष्मस्य प्र
भावश्च महाद्युते श्रुतं मया कथयतां ब्राह्मणानां महात्मनां २६ भवांश्च कर्त्ता लोकानां यद्ब्रवी
त्यरिसूदन तथा तदनभिध्येयं वाक्यं यादवनंदन २७ यदि त्वनुग्रहवती बुद्धिस्ते मयि माधव
त्वामग्रतः पुरस्कृत्य भीष्मं यास्यामहे वयं २८ आवृत्ते भगवत्यर्के स हि लोकान्गमिष्यति त्व
द्दर्शनं महाबाहो तस्मादर्हति कौरवः २९ तव चाद्यस्य देवस्य क्षरस्यैवाक्षरस्य च दर्शनं त्वस्य
लाभः स्यात्त्वं हि ब्रह्ममयो निधिः ३० वैशंपायन उ० श्रुत्वैवं धर्मराजस्य वचनं मधुसूदनः पा
र्श्वस्थं सात्यकिं प्राह रथो मे युज्यतामिति ३१ सात्यकिस्त्वाशु निष्क्रम्य केशवस्य समीपतः दारुकं
प्राह कृष्णस्य युज्यतां रथ इत्युत ३२ स सात्यकेराशु वचो निशम्य रथोत्तमं कांचनभूषितांगं म
सारगल्वर्कमयैर्विटंकैर्विभूषितं हेमनिबद्धचक्रं ३३

अर्कः सूर्यकांतः तन्मयैः विभंगैर्विस्तरैः विटंकैरिति पाठे पक्ष्युपवेशनस्थानैः ३३

श्री॰
शां॰रा॰
टी॰
८४

३४ ३५ षट्चत्वारिंशः ४६ शरतल्पे १ २ ३ ४ ५ ६ ७ ८ ॥

दिवाकरांशुप्रभमाशुगामिनं विचित्रनानामणिभूषितांतरं नवोदितं सूर्यमिव प्रतापिनं विवि
त्रतार्क्ष्यध्वजिनं पताकिनं ३४ सुग्रीवशैब्यप्रमुखैर्वराश्वैर्मनोजवैः कांचनभूषितांगैः संयुक्त
मावेदयदच्युताय कृतांजलिर्दारुको राजसिंह ३५ इति श्रीमहाभारते शांतौ राजधर्म महापुरु
षस्तवः ४६ जनमेजय उ॰ शरतल्पे शयानस्तु भारतानां पितामहः कथमुत्सृष्टवान्देहं कंच
योगमधारयत् १ वैशंपायन उ॰ शृणुष्वावहितो राजञ्शुचिर्भूत्वा समाहितः भीष्मस्य कुरु
शार्दूल देहोत्सर्गं महात्मनः २ निवृत्तमात्रेत्वयने उत्तरे वै दिवाकरे समावेशयदात्मानमात्मन्ये
व समाहितः ३ विकीर्णांशुरिवादित्यो भीष्मः शरशतैश्चितः शुशुभे परया लक्ष्म्या वृतो ब्राह्म
णसत्तमैः ४ व्यासेन वेदविदुषा नारदेन सुरर्षिणा देवस्थानेन वात्स्येन तथाश्मकसुमंतुना
५ तथा जैमिनिना चैव पैलेन च महात्मना शांडिल्यदेवलाभ्यां च मैत्रेयेण च धीमता ६ अ
सितेन वसिष्ठेन कौशिकेन महात्मना हारीतलोमशाभ्यां च तथात्रेयेण धीमता ७ बृहस्पति
श्च शुक्रश्च च्यवनश्च महामुनिः सनत्कुमारः कपिलो वाल्मीकिस्तुंबुरुः कुरुः ८ ॥ ८४

१ ५ आविरायपियशुः वक्तुं तत्त्वावधारणापूर्वकं ध्यानेनाराधनं तत्कर्तुमिच्छुः जिगदिषामि वक्तुमिच्छामि व्याससमा-
सिन्याविस्तरसंक्षेपवत्या १६ तत्र संक्षेपमाह शुचिमिति शुचिं स्रवतः परतो वा दोषहीनं शुचिपदं तादृशं पदं प्राप्तिमार्गो यो

मौद्गल्यो भार्गवो रामस्त्रणाविंदुर्महामुनिः पिप्पलादोथवायुश्च संवर्तः पुलहः कचः ४ का
श्यपश्च पुलस्त्यश्च क्रतुर्दक्षः पराशरः मरीचिरंगिराः काश्यो गौतमो गालवो मुनिः ९ धौ
म्यो विभांडो मांडव्यो धौम्रः कृष्णानुभौतिकः उल्लूकः परमो विप्रो मार्कंडेयो महामुनिः १० भास्क
रिः पूरणः कृष्णः सूतः परमधार्मिकः एतैश्चान्यैर्मुनिगणैर्महाभागैर्महात्मभिः ११ श्रद्धादमश
मोपेतैर्वृतश्चंद्र इवग्रहैः भीष्मः सपुरुषव्याघ्रः कर्मणा मनसा गिरा १२ शरतल्पगतः कृष्णं प्रद
ध्यौ प्रांजलिः शुचिः स्वरेणहृष्टपुष्टेन तुष्टाव मधुसूदनं १३ योगेश्वरं पद्मनाभं विष्णुं जिष्णुं जग
त्पतिं कृतांजलिपुटो भूत्वा वाग्विदां प्रवरः प्रभुः भीष्मः परमधर्मात्मा वासुदेवमथास्तुवत् १५
भीष्म उ॰ आविरायपिषुः कृष्णं वाचं जिगदिषामि यां तया व्याससमासिन्या प्रीयतां पुरुषोत्तमः
१६ शुचिं शुचिपदं हंसं तत्पदं परमेष्ठिनं युक्त्वा सर्वात्मनात्मानं तं प्रपद्ये प्रजापतिं १७ अनाद्यं तं परं
ब्रह्म न देवा नर्षयो विदुः एकोयं वेद भगवान्धाता नारायणो हरिः १८ ॥

गोयस्तं हंसं सर्वातिगं तत्पदं तत्त्वमसीति वाक्ये तत्पदस्यार्थभूतं ईश्वरं परमेष्ठिनं हिरण्यगर्भं आत्मानं देहत्रयं १७ १८

श्री· १९ २१ सदसत्कार्यकारणं चेताभ्यां सहज्ञानतर्यामिभ्यां ग्रथितं विश्वं येनासौ यस्मिन् विश्वं कर्मयस्मात् कोह्येवान्यादि
शा·सा· तिष्ठतेः २२ २३ २४ २५ वाकेषु मंत्रेषु सामान्यतः कर्मप्रकाशकेषु अनुवाकेषु मंत्रार्थविवरणभूतेषु ब्राह्मणवाक्येषु निषत्सुक
टी· र्मांगाद्यवबद्धदेवतादिज्ञानवाक्येषु उपनिषत्सु केवलात्मज्ञापकवाक्येषु गृणन्ति ध्यायंति सत्यं प्रबाधितं सत्येषु प्रबाधिता
८५

नारायणादृषिगणास्तथासिद्धमहोरगाः देवादेवर्षयश्चैवयंविदुःपरमव्ययं १९ देवदानवगं।
धर्वायक्षराक्षसपन्नगाः यंनजानन्तिकोह्येषकुतोवाभगवानिति २० यस्मिन्विश्वानिभूतानिति
ष्ठन्तिचविशन्तिच गुणभूतानिभूतेशे सूत्रेमणिगणाइव २१ यस्मिन्नित्यंतते तन्तौदृढेस्रगिवति
ष्ठति सदसद्ग्रथितंविश्वंविश्वांगेविश्वकर्मणि २२ हरिंसहस्रशिरसंसहस्रचरणेक्षणं सहस्र
बाहुमुकुटंसहस्रवदनोज्ज्वलं २३ प्राहुर्नारायणंदेवंयंविश्वस्यपरायणं अणीयसामणी
यांसंस्थवीयसां २४ गरीयसांगरिष्ठंचश्रेष्ठंचश्रेयसामपि यंवाकेष्वनुवाकेषुनिषत्सूपनिष
त्सुच गृणंतिसत्यकर्माणंसत्यंसत्येषुसामसु २६ चतुर्भिश्चतुरात्मानंसत्त्वस्थंसात्वतांप
तिं यंदिव्यैर्देवमर्चंतिगुह्यैःपरमनामभिः २७ ॥

र्थेषु सामसु ज्येष्ठसामादिषु २६ चतुर्भिर्नामभिः वासुदेवसंकर्षणप्रद्युम्नानिरुद्धरूपैः क्रमात् चतुरात्मानं ब्रह्मजीवमनोऽ
हंकाररूपं सत्त्वस्थां बुद्धौ अभिव्यक्तं सात्वतां भक्तानां पतिं २७ ॥

नित्यंतपः स्वधर्मः तत्तयस्मिन्यत्प्रीत्यर्थंतमस्मत् यत्तयस्मात्अंगेषुचित्तेषुअनुतिष्ठति उपतिष्ठति यश्चसर्वात्मातंप्रपद्यइतिसर्वेषां
यच्छब्दसंबद्धानांप्रथमेनान्वयः ईश्वरार्थमनुष्ठितोधर्मः स्वचित्तशुद्धिद्वारास्वार्थएवभवतीत्याश्चर्यमितिभावः २८ भौमंब्रह्मवे
दाब्राह्मणायज्ञाश्च २९ अनन्यः त्यक्तभेदः आत्मानंप्रपंचमेवआत्मानंसर्वेषांआत्मनिहार्दाकाशेद्रष्टास्वत्वबुद्ध्यास्पृष्टेतिपाठेया

यस्मिन्नित्यंतपस्तस्मिन्यदंगेष्वनुतिष्ठति सर्वात्मासर्ववित्सर्वः सर्वज्ञः सर्वभावनः २८ यंदेवंदेव
कीदेवीवसुदेवादजीजनत् भौमस्यब्रह्मणोगुप्त्यैदीप्तमग्निमिवारणिः २९ यमनन्योव्यपेताशी
रात्मानंवीतकल्मषं दृष्ट्वानंत्यायगोविंदंपश्यत्या त्मानमात्मनि अतिवाय्विंद्रकर्माणमतिसूर्या
तितेजसं अतिबुद्धीन्द्रियात्मानंतंप्रपद्येप्रजापतिं ३१ पुराणेपुरुषंप्रोक्तंब्रह्मप्रोक्तंयुगादिषुक्षयेसं
कर्षणंप्रोक्तंतमुपास्यमुपास्महे ३२ यमेकंबहुधात्मानंप्रादुर्भूतमधोक्षजं नान्यभक्ताः क्रियावंतो
यजंतेसर्वकामदम् ३३ यमाहुर्जगतः कोशंयस्मिन्संनिहिताः प्रजाः यस्मिन्लोकाः स्फुरंतीमे
जलेशकुनयोयथा ऋतमेकाक्षरंब्रह्मयत्तत्सदसतोः परं ३४ ॥

गेनपश्यति अनंत्यायमोक्षाय ३१ पुराणेअतीतकल्पादिविषयेपुरुषंपूर्णंसर्वमस्मिन्अतीतमस्त्येवेतियोगात्पुरुषइतिनाम
युगादिषुयुगारंभेषुब्रह्मकामात्स्रष्टेवंब्रह्मोत्पादः क्षयेसर्वस्यसम्यक्संकर्षणाद्धर्यकेसंकर्षणइत्युक्तः ३२ बहुधाइंद्रादिदेवतारूपे
ण नान्यभक्ताः अनन्यभक्ताः ३३ शकुनयोहंसकारंडवाद्याः ३४ ॥

३५ ३७ जज्ञे जनयामास ३८ ३९ अतितेजसं स्वयंज्योतिषं ज्ञेयात्मने ज्ञेयरूपायात्मने ४० उक्थेषु बह्वृचाः अग्नौ चयने अध्वर्यवः ४१ ऋग्यजुःसामान्येव धामानि यस्य तं दशार्धानि पंच धानाः करंभः परिवापः पुरोडाशः पयस्येति पंच हवींषि तदात्मकं सप्ततंतवः यो

अनादिमध्यपर्यंतं न देवा नर्षयो विदुः यं सुरासुरगंधर्वाः सिद्धा ऋषिमहोरगाः ३५ प्रयता नित्य
मर्चंति परमं दुःखभेषजं अनादिविधनं देवमात्मयोनिं सनातनं ३६ अप्रेक्ष्यमनभिज्ञेयं हरिं नारा
यणं प्रभुं यं वै विश्वस्य कर्तारं जगतस्तस्थुषां पतिं वदंति जगतोध्यक्षमक्षरं परमं पदं ३७ हिरण्य
वर्णं यं गर्भमदितेर्दैत्यनाशनं एकं द्वादशधा जज्ञे तस्मै सूर्यात्मने नमः ३८ शुक्ले देवान्पितॄन्कृ
ष्णे तर्पयत्यमृतेन यः यश्च राजा द्विजातीनां तस्मै सोमात्मने नमः ३९ महतस्तमसः पारे
पुरुषं ह्यतितेजसं यं ज्ञात्वा मृत्युमत्येति तस्मै ज्ञेयात्मने नमः ४० यं बृहंतं बृहत्युक्थे यमग्नौ यं
महाध्वरे यं विप्रसंघा गायंति तस्मै वेदात्मने नमः ४१ ऋग्यजुःसामधामानं दशार्धहविरात्म
कं यं सप्ततंतुं तन्वंति तस्मै यज्ञात्मने नमः ४२ चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पंचभिरेव च हूयते
च पुनर्द्वाभ्यां तस्मै होमात्मने नमः ४३ ॥

जनीयाः गायत्र्यादयो यस्मिन् तं सप्ततंतुं ४२ चतुर्भिरिति आश्रावयेति चतुरक्षरं अस्तु श्रौषडिति चतुरक्षरं यजेति द्व्यक्षरं ये यजामह इति पंचाक्षरं द्व्यक्षरो व
षट्कार इति सप्तदशभिरक्षरैर्यो हूयते तस्मै होमात्मने नमः ४३ ॥ ८९

सुपर्णः वेदस्वरूपः यजुरितियस्यनाम छंदांसिगायत्र्यादीनियस्यगात्राणिहस्तादीनि त्रिवृत्त्रिभिर्ऋग्यजुःसामभिर्वर्ततइति
योगात्सयज्ञःसपवशिरोयस्य यस्यरथंतरंबृहच्चवैकल्पिकंसामगीतिवाक्यं ४४ सहस्रसमेसहस्रसंवत्सरे सत्रेजज्ञेआविर्बभूव ४५
पादाक्षराणिःपदसमूहाःवाक्यानिवाअंगानिहस्तादीनियस्यतंपादांगं संधयःप्राह्निकप्रसिद्धाः पर्वाणिअंगुल्यादिकांडानि स्व

यःसुपर्णोयजुर्नामछंदोगात्रस्त्रिवृच्छिराः रथंतरंबृहत्सामतस्मैस्तोत्रात्मनेनमः ४४ यःसह
स्रसमेसत्रेजज्ञेविश्वसृजामृषिः हिरण्यपक्षःशकुनिस्तस्मैहंसात्मनेनमः ४५ पादांगंसंधिपर्वाणं
स्वरव्यंजनभूषणं यमाहुरक्षरंदिव्यंतस्मैवागात्मनेनमः ४६ यज्ञांगोयोवराहोवैभूत्वागामुज्जहार
ह लोकत्रयहितार्थायतस्मैवीर्यात्मनेनमः ४७ यःशेतेयोगमास्थायपर्यंकेनागभूषिते फणा
सहस्ररचितेतस्मैनिद्रात्मनेनमः ४८ यस्तनोतिसतांसेतुमृतेनामृतयोनिना धर्मार्थव्यवहारांगै
स्तस्मैसत्यात्मनेनमः ४९ यंपृथग्धर्मचरणाःपृथग्धर्मफलैषिणः पृथग्धर्मैःसमर्चंतितस्मैध
र्मात्मनेनमः ५० यतःसर्वेप्रसूयंतेह्यनंगात्मांगदेहिनः उन्मादःसर्वभूतानांतस्मैकामात्मनेनमः

राः अचःव्यंजनानिहलः ४६ ४७ सेतुंतरणोपायंयोगायधर्मंऋतेनवेदोक्तेनउपायेनअमृतयोनिनामोक्षहेतुना धर्मार्थएवनत्वर्थ
कामार्थःव्यवहारोवागादिपरिस्पंदः तदर्थानिअंगानितैःजितैरिंद्रियैरित्यर्थः ४९ धर्मैःपाशुपतपंचरात्रादितंत्रोक्तैः ५० अनंगा
त्मानिकाममयानिअंगानियस्यसःअनंगात्मांगःसचासौदेहीचतस्यअनंगात्मांगदेहिनः ५१ ॥

श्री॰
शां॰ रा॰
टी॰
८०

व्यक्तस्थं देहान्तस्थं क्षेत्रे बुद्धौ ५२ आत्मानं चेतनं आत्मस्थं नित्यस्वरूपस्थितमपि षोडशभिर्गुणैः गुणकार्यैरेकादशभिरिन्द्रियैः
पंचभिर्भूतैश्च त्रियाजाग्रत्स्वप्नसुषुप्तिषु उदावृतं तं प्रत्यग्रूपैर्वृतं ५३ ५७ तत्पुष्करं यस्य नाभ्यां संभूतं यस्मिन् विश्वं प्रतिष्ठितं ५८ चतु

यं च व्यक्तस्थमव्यक्तं विचिन्वन्ति महर्षयः क्षेत्रे क्षेत्रज्ञमासीनं तस्मै क्षेत्रात्मने नमः ५२ यं त्रिधात्मा
नमात्मस्थं वृतं षोडशभिर्गुणैः प्राहुः सप्तदशं सांख्यास्तस्मै सांख्यात्मने नमः ५३ यं विनिद्रा जि
तश्वासाः सत्त्वस्थाः संयतेन्द्रियाः ज्योतिः पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ५४ अपुण्यपापा
क्षये यं पुनर्भवनिर्भयाः शान्ताः संन्यासिनो यान्ति तस्मै मोक्षात्मने नमः ५५ योऽसौ युगसहस्रान्ते प्रदी
प्तार्चिर्विभावसुः संभक्षयति भूतानि तस्मै घोरात्मने नमः ५६ संभक्ष्य सर्वभूतानि कृत्वा चैका
र्णवं जगत् बालः स्वपिति यश्चैकस्तस्मै मायात्मने नमः ५७ अजस्य नाभौ संभूतं यस्मिन्विश्वं प्रति
ष्ठितं पुष्करे पुष्कराक्षस्य तस्मै पद्मात्मने नमः ५८ सहस्रशिरसे चैव पुरुषायामितात्मने चतुःसमु
द्रपर्याययोगनिद्रात्मने नमः ५९ यस्य केशेषु जीमूता नद्यः सर्वाङ्गसन्धिषु कुक्षौ समुद्राश्चत्वारस्त
स्मै तोयात्मने नमः ६० यस्मात्सर्वाः प्रसूयन्ते सर्गप्रलयविक्रियाः यस्मिंश्चैव प्रलीयन्ते तस्मै हेत्वा
त्मने नमः ६१ ॥

र्णोप्रस्वापनत्वविच्छिन्नोदाराणां समुद्राणां कामानां पर्यायः सर्वात्मना निर्गमनं यस्याः सा योग
निद्रा तदात्मने कामं समुद्रमाविशन्ति मंत्रवर्णात् समुद्रः कामः ५९ ६० ६१ ॥

८०

रात्रौ सुषुप्तौ निषण्णः प्रवन्तत्तसन्नः साक्षीत्यर्थः दिवा जाग्रत्स्वप्नयोः विष्ठितः कर्तृरूपेण तद्विपरीतेन स्थितः वस्तुतस्तु द्रष्टा न तु
कर्ता ९२ अकुंठं अनिरुद्धं ९३ पंचधा प्राणादिरूपेण ९४ ९५ युगेषु कृतादिषु आवर्त्तते मत्स्यादिरूपेण किं कर्मवशो यं नेत्या
ह योगैरिति योगमायाबलेन नटवदित्यर्थः ९६ ९७ पतत्त्रिहि वायुगर्भात्परो मायावी परतत्त्वयं शुद्धः ९९ विषयेष्वोत्रादिगो

योऽनिषण्णो भवेद्रात्रौ दिवा भवति विष्ठितः इष्टानिष्टस्य च द्रष्टा तस्मै द्रष्ट्रात्मने नमः ९२ अकुंठं सर्व-
कार्येषु धर्मकार्यार्थमुद्यतं वैकुंठस्य च यद्रूपं तस्मै कार्यात्मने नमः ९३ त्रिःसप्तकृत्वो यः क्षत्रं धर्म-
व्युत्क्रान्तगौरवं क्रुद्धो निजघ्ने समरे तस्मै क्रौर्यात्मने नमः ९४ विभज्य पंचधात्मानं वायुर्भूत्वा शरीरगः
यश्चेष्टयति भूतानि तस्मै वाय्वात्मने नमः ९५ युगेष्वावर्त्तते योंऽशैर्मासर्त्वयनहायनैः सर्गप्रलययोः
कर्ता तस्मै कालात्मने नमः ९६ ब्रह्म वक्त्रं भुजौ क्षत्रं कृत्स्नमूरूदरं विशः पादौ यस्याश्रिताः शूद्रास्त-
स्मै वर्णात्मने नमः ९७ यस्याग्निरास्यं द्यौर्मूर्द्धा खं नाभिश्चरणौ क्षितिः सूर्यश्चक्षुर्दिशः श्रोत्रं तस्मै
लोकात्मने नमः ९८ परः कालात्परो यज्ञात्परात्परतरश्च यः अनादिरादिर्विश्वस्य तस्मै विश्वा- =
त्मने नमः ९९ विषये वर्त्तमानानां यं ते वैशेषिकैर्गुणैः प्राहुर्विषयगोप्तारं तस्मै गोप्त्रात्मने नमः १

चरे वर्त्तमानानां अनादरे षष्ठी तान् अनादृत्य वैशेषिकैर्गुणैः विशेषजै रागद्वेषैः यं विषयगोप्तारं प्राहुः यत्र रागस्तमेवार्थं वासनारूपेण
मनसि रक्षन् संसरति न तु सर्वमित्यर्थः १०० ॥

श्री॰ ७१ अंतर्भूतः अंतःप्रविष्टः ७२ दक्षात्मनेऽक्षसिंहाय ७३ ७४ ७५ आत्मेति शब्दादिविषयकोयोबाधः सविषयमनंतर्भा
शं॰रा॰ कआत्मस्वरूपभूतमेवज्ञानं यथोक्तं परागर्थप्रमेयेषुयाफलत्वेनसंमता संवित्सैवेहमेयोर्थोवेदांतोक्तिप्रमाणतइति ३
टी॰ अन्नपानेयनमयोरसप्राणविवर्द्धनः योधारयतिभूतानितस्मैप्राणात्मनेनमः ७१ प्राणानां
८८ धारणार्थाययोन्नंभुंक्तेचतुर्विधं अंतर्भूतःपचत्यग्निस्तस्मैपाकात्मनेनमः ७२ पिंगेक्षणासटं
यस्यरूपंदंष्ट्रानखायुधं दानवेंद्रांतकरणंतस्मैदक्षात्मनेनमः ७३ यन्नदेवानगंधर्वानदैत्या
नचदानवाः तत्त्वतोहिविजानंतितस्मैसूक्ष्मात्मनेनमः ७४ रसातलगतःश्रीमाननंतोभ
गवान्विभुः जगद्धारयतेकृत्स्नंतस्मैवीर्यात्मनेनमः ७५ योमोहयतिभूतानिस्नेहपाशानुबंध
नैः सर्गस्यरक्षणार्थायतस्मैमोहात्मनेनमः ७६ आत्मज्ञानमिदंज्ञानंज्ञात्वापंचस्ववस्थितं
यंज्ञानेनाभिगच्छंतितस्मैज्ञानात्मनेनमः ७७ अप्रमेयशरीरायसर्वतोबुद्धिचक्षुषे अनंतपा
रिमाणायतस्मैदिव्यात्मनेनमः ७७ जटिनेदंडिनेनित्यंलंबोदरशरीरिणे कमंडलुनिषंगाय
तस्मैब्रह्मात्मनेनमः ७८ शूलिनेत्रिदशेशायत्र्यंबकायमहात्मने भस्मदिग्धांगलिंगायतस्मै
दृशोमेवज्ञानेनज्ञानसाधनेनवाक्येन ७६ अप्रमेयंअगोचरंशरीरंस्वरूपंयस्य अनंतं तस्मैरुद्रात्मनेनमः ७९ ॥
अपारंपरिमेयंविषयजातंयत्रतस्मै ७७ कमंडलुनिषंगायतज्जलैरेववाणभूतैरसुराननाशयेत्यर्थः ७८ ७९ ॥ ८८

८० भूतादेरहंकारस्यनिधनंमरणंतस्मै ८१ ८२ अपवर्गास्यनित्यमुक्तः यतःभूतेभ्यःपरः ८३ त्रिषुलोकेषुतेभ्यःपरतश्चविद्यमानाय

वेदाङ्गकृतशीर्षायव्यालयज्ञोपवीतिने पिनाकशूलहस्तायतस्माउग्रात्मनेनमः ८० सर्वभूतात्मभूता
यतादिनिधनायच अक्रोधद्रोहमोहायतस्मैशान्तात्मनेनमः ८१ यस्मिन्सर्वंयतःसर्वंयःसर्वंसर्वतश्च
यः यश्चसर्वमयोनित्यंतस्मैसर्वात्मनेनमः ८२ विश्वकर्मन्नमस्तेस्तुविश्वात्मन्विश्वसंभव अपवर्गास्थ
भूतानांपंचानांपरतस्थितः ८३ नमस्तेत्रिषुलोकेषुनमस्तेपरतस्त्रिषु नमस्तेदिक्षुसर्वासुत्वंहिसर्वम
योनिधिः ८४ नमस्तेभगवन्विष्णोलोकानांप्रभवाव्यय त्वंहिकर्ताहृषीकेशसंहर्ताचापराजितः ८५
नहिपश्यामितेभावंदिव्यंहित्रिषुवर्त्मसु त्वांतुपश्यामितत्त्वेनयत्तेरूपंसनातनं ८६ दिवंतेशिर
साव्याप्तंपद्भ्यांदेवीवसुंधरा विक्रमेणत्रयोलोकाःपुरुषोसिसनातनः ८७ दिशोभुजारविश्चक्षु
वीर्यंशुक्रःप्रजापतिः सप्तमार्गानिरुद्धास्तेवायोरमिततेजसः ८८ अतसीपुष्पसंकाशंपीतवास
समच्युतं येनमस्यन्तिगोविंदंनतेषांविद्यतेभयं ८९ एकोपिकृष्णस्यकृतःप्रणामोदशाश्वमे
धावभृथेनतुल्यः दशाश्वमेधीपुनरेतिजन्मकृष्णप्रणामीनपुनर्भवाय ९० ॥

तेत्रिषुकालेषुनमः ८४
८५ वर्त्मसुवर्तमानादिषु ८६ दिवंद्यौः ८७ सप्तउपरितनानिच्छिद्राणि प्रवहादयोवासर्वत्रत्वयैवव्याप्तमित्यर्थः ८८ ८९ ॥

श्री॰ ८८ ८९ भीष्मायज्ञानंदत्वापुनःस्वदेहंप्रतिशयनस्थानेययौ आगतवान् तदापियुधिष्ठिरेणप्रबोधितः समुत्थितश्चपार्थः ९० विदित्वा
भा॰रा॰ कृष्णव्रताःकृष्णमनुस्मरंतोरात्रौचकृष्णंपुनरुत्थितायेतेकृष्णदेहाःप्रविशंतिकृष्णमाज्यंयथामंत्रहु
टी॰ तंहुताशे ८१ नमोनरकसंत्रासरक्षामंडलकारिणे संसारनिम्नगावर्त्ततरिकाष्ठायविष्णवे नमोब्र
८९ ह्मण्यदेवायगोब्राह्मणहितायच जगद्धितायकृष्णायगोविंदायनमोनमः ८३ प्राणकांतारपाथेयं
संसारोच्छेदभेषजं दुःखशोकपरित्राणंहरिरित्यक्षरद्वयं ८४ यथाविष्णुमयंसत्यंयथाविष्णुमयं
जगत् यथाविष्णुमयंसर्वंपाप्मामेनश्यतांतथा ८५ त्वांप्रपन्नायभक्तायगतिमिष्टांजिगीषवे य
च्छ्रेयःपुंडरीकाक्षतद्ध्यायस्वसुरोत्तम ८६ इतिविद्यातपोयोनिरयोनिर्विष्णुरीडितः वाग्यज्ञेना
र्चितादेवःप्रीयतांमेजनार्दनः ८७ नारायणःपरंब्रह्मनारायणःपरंतपः नारायणःपरोदेवः
सर्वंनारायणःसदा ८८ वैशंपायनउवाच एतावदुक्त्वावचनंभीष्मस्तद्गतमानसः नमइत्येवकृ
ष्णायप्रणाममकरोत्तदा ८९ अभिगम्यतुयोगेनभक्तिंभीष्मस्यमाधवः त्रैकाल्यदर्शनंज्ञानंदि
व्यंदत्वाययौहरिः ९० तस्मिन्नुपरतेशब्देततस्तेब्रह्मवादिनः भीष्मंवाग्भिर्बाष्पकंठास्तमानर्चुर्महा
मतिं ९१ तेस्तुवंतश्चविप्राग्र्याःकेशवंपुरुषोत्तमं भीष्मंचशनकैःसर्वेप्रशशंसुःपुनःपुनः विदि
योगबलेनज्ञात्वा ९१ ९२ ॥ त्वाभक्तियोगंतुभीष्मस्यपुरुषोत्तमः २ ॥ ८९

९३ ९४ ९५ मुदितमनाभ्यनंदतेति संधिरार्षः ९६ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरि
सहसोत्थाय संहृष्टो यानमेवान्वपद्यत केशवः सात्यकिश्चापि रथेनैकेन जग्मतुः ९३ अपरेण महात्मा
नौ युधिष्ठिरधनंजयौ भीमसेनो यमौ चोभौ रथमेकं समाश्रिताः ९४ कृपो युयुत्सुः सूतश्च संजयस्तप
रंतपः तै रथैर्नगराकारैः प्रयाताः पुरुषर्षभाः ९५ नेमिघोषेण महता कंपयंतो वसुंधरां ९६ ततो
गिरः पुरुषवरस्तवान्विता द्विजेरिताः पथि सुमनाः स शुश्रुवे कृतांजलिप्रणतमथापरं जनं स केशि
हा मुदितमनाभ्यनंदत ९७ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे स्तवराजः ४७ वैशंपायन उ०
ततः स च हृषीकेशः स च राजा युधिष्ठिरः कृपादयश्च ते सर्वे चत्वारः पांडवाश्च ते १ रथैस्तैर्नगराका
रैः पताकाध्वजशोभितैः ययुराशु कुरुक्षेत्रं वाजिभिः शीघ्रगामिभिः २ तेवतीर्य कुरुक्षेत्रं केशम
ज्जास्थिसंकुलं देहन्यासः कृतो यत्र क्षत्रियैस्तैर्महात्मभिः ३ गजाश्वदेहास्थिचयैः पर्वतैरिव संचितं
नरशीर्षकपालैश्च शंखैरिव च सर्वशः ४ चितासहस्रैः प्रचितं सर्वशस्त्रसमाकुलं आपानभूमिं
कालस्य तदा भुक्तोज्झितामिव ५ भूतसंघानुचरितं रक्षोगणनिषेवितं पश्यंतस्ते कुरुक्षेत्रं ययुराशु
सूनोर्नीलकंठस्य कृतौ भारतभावदीपे शांतौ राजधर्मेषु भीष्मस्तवराजो नाम ग्रंथार्थप्रकाशः सप्तचत्वारिंशो महारथाः ६ ॥
ध्यायः ४७ ततः स च १ २ ३ ४ ५ ६ ॥

श्री॰
भा॰ रा॰
टी॰
९॰

७ संतर्पयामासरामइत्यर्थात् एतेनशत्रुकलत्रवधजाग्लानिस्तेमाभूदितिदर्शितं ८ ९ १० ११ १२ १३ १४ आगमोवेदः तज्ज्ञःत

गच्छन्नेवमहाबाहुः सर्वयादवनंदनः युधिष्ठिरायप्रोवाचजामदग्न्यविक्रमं आसीद्रामहृदाः पंचह
ह्रंपतेपार्थहृताः येषुसंतर्पयामासपितॄन्क्षत्रियशोणितैः ८ त्रिःसप्तकृत्वोवसुधांकृत्वानिःक्षत्रि
यांप्रभुः इहेदानींततोरामःकर्मणोविरराम ह ९ युधिष्ठिरउ॰ त्रिःसप्तकृत्वः पृथिवीकृतानिःक्ष
त्रियापुरा रामेणेतियथात्थत्वमत्रमेसंशयोमहान् १० क्षत्रबीजंयदादग्धंरामेणयदुपुंगव कथं
भूयः समुत्पत्तिः क्षत्रस्यामितविक्रम ११ महात्मनाभगवतारामेणयदुपुंगव कथमुत्सादितंक्ष
त्रंकथंवृद्धिमुपागतं १२ महतारथयुद्धेनकोटिशः क्षत्रियाहताः तथाभूच्चमहीकीर्णाक्षत्रियैर्व
दतांवर १३ किमर्थंभार्गवेणेदंक्षत्रमुत्सादितंपुरा रामेणयदुशार्दूलकृष्णदेवेनमहात्मना एत ८ ॥
न्मेछिंधिवार्ष्णेयसंशयंतार्क्ष्यकेतन आगमोहिपरःकृष्णत्वत्तोनोवासवानुज १४ वैशंपायनउ॰
ततोयथावत्सगदाग्रजः प्रभुः शशंसतस्मैनिखिलेनतत्त्वतः युधिष्ठिरायाप्रतिमौजसेतदायथा
भवत्क्षत्रियसंकुलामही १५ इतिश्रीमहाभारतेराजधर्मेरामोपाख्याने ४८ वासुदेवउ॰ शृ

हृचनात्तेपरःनाधिकः १५ १६ अष्टचत्वारिंशः शृणुकौंतेयरामस्यप्रभावोयोमयाश्रुतः महर्षीणांकथय

नाविक्रमंतस्यजनव

भारते भारतसंग्रामे २ ३ ४ ५ ६ ७ गाधेः पुत्रार्थं तस्याश्च पुत्रार्थं चरुं चरुद्वयं ८ उपयोज्याः भोज्याः भोक्तव्यः ९ १० ११ १२ १३

यथा च जामदग्न्येन कोटिशः क्षत्रिया हताः उद्भूता राजवंशेषु ये भूयो भारते हताः २ जह्नोरजस्तु
तनयो बलाकाश्वस्तु तत्सुतः कुशिको नाम धर्मज्ञस्तस्य पुत्रो महीपते उग्रं तपः समातिष्ठत्स
हस्राक्षसमो भुवि पुत्रं लभेयमजितं त्रिलोकेश्वरमित्युत ४ तमुग्रतपसं दृष्ट्वा सहस्राक्षः पुरंदरः
समर्थः पुत्रजनने स्वयमेवाभ्यपद्यत ५ पुत्रत्वमगमद्राजंस्तस्य लोकेश्वरेश्वरः गाधिर्नामाभवत्पुत्रः
कौशिकः पाकशासनः ६ तस्य कन्याभवद्राजन्नाम्ना सत्यवती प्रभो तां गाधिर्भृगुपुत्राय सोर्ची
काय ददौ प्रभुः ७ तस्याः प्रीतः स शौचेन भार्गवः कुरुनंदन पुत्रार्थं श्रपयामास चरुं गाधेस्त
थैव च ८ आहूयोवाच तां भार्यां सोर्चीको भार्गवस्तदा उपयोज्यश्चरुरयं त्वया मात्राप्ययं तव ९ त
स्यां जनिष्यते पुत्रो दीप्तिमान्क्षत्रियर्षभः अजय्यः क्षत्रियैर्लोके क्षत्रियर्षभसूदनः तवापि पुत्रं क
ल्याणि धृतिमंतं शमात्मकं तपोन्वितं द्विजश्रेष्ठं चरुरेषा विधास्यति ११ इत्येवमुक्त्वा तां भार्यां सो
र्चीको भृगुनंदनः तपस्यभिरतः श्रीमान् जगामारण्यमेव हि १२ एतस्मिन्नेव काले तु तीर्थयात्राप
रो नृपः गाधिः सदारः संप्राप्तः सोर्चीकस्याश्रमं प्रति १३ चरुद्वयं गृहीत्वा तु राजन्सत्यवती तदा भ
र्तुर्वाक्यं तथा व्यग्रा मात्रे हृष्टा न्यवेदयत् १४ ॥

व्यग्रा हर्षेणैव १४ ॥

श्री॰ १६ १६ ७ व्यंसिता वंचिता ८ १९ २० २२ २३ २४ २५ २६ ॥
शां॰ रा॰ मातात्वतस्याः कौंतेय दुहित्रे स्वं चरुं ददौ तस्याश्चरुमथादायात्मसंस्थं चकार ह १५ अ
टी॰ थ सत्यवती गर्भं क्षत्रियान्तकरं तदा धारयामास दीप्तेन वपुषा घोरदर्शनं १६ तामृचीकस्त
९१ दा दृष्ट्वा तस्या गर्भगतं द्विजं अब्रवीद्भृगुशार्दूलः स्वां भार्यां देवरूपिणीं १७ मात्रासि व्यंसिता
भद्रे चरुव्यत्यासहेतुना भविष्यति हि ते पुत्रः क्रूरकर्मात्यमर्षणः १८ उत्पत्स्यति हि ते भ्राता ब्र
ह्मभूतस्तपोरतः विश्वं हि ब्रह्म सुमहच्चरौ तव समाहितं १९ तत्र वीर्यं च सकलं तव मात्रे स
मर्पितं विपर्ययेण ते भद्रे नैतदेवं भविष्यति २० मातुस्ते ब्राह्मणो भूयात्तव च क्षत्रियः सु
तः सैवमुक्ता महाभागा भर्त्रा सत्यवती तदा २१ पपात शिरसा तस्मै वेपन्ती चाब्रवीदिदं नार्ह
सि भगवन्नद्य वक्तुमेवंविधं वचः २२ ब्राह्मणापसदं पुत्रं प्राप्स्यसीति हि मां प्रभो २२ ऋचीक
उ॰ नैष संकल्पितः कामो मया भद्रे तथा त्वयि उग्रकर्मा भवेत्पुत्रश्चरुव्यत्यासहेतुना २३
सत्यवत्युवाच इच्छंल्लोकानपि मुने सृजेथाः किं पुनः सुतं शमात्मकमृजुं पुत्रं दातुमर्हसि मे ॥
प्रभो २४ ऋचीक उ॰ नोक्तपूर्वं मया भद्रे स्वैरेष्वपि कदाचन किमुताग्निं समाधाय मन्त्रवच्च ५६
रुसाधने २५ दृष्टमेतत्पुरा भद्रे ज्ञातं च तपसा मया ब्रह्मभूतं हि सकलं पितुस्तव कुलं भवे ८ ९१

२७ २८ २९ ३० ३१ ३२ ३३ ३४ ३५ ३६ ३७ वित्रभानुनाग्निना ३८ ॥

सत्यवत्युवाच काममेवंभवेत्पौत्रोममेदत्तवचशुभो शमात्मकमहंपुत्रंलभेयंजपतांवर २७ ऋ
चीकउ॰ पुत्रेनास्तिविशेषोमेपौत्रेचवरवर्णिनि यथात्वयोक्तंववचनेनतथाभद्रेभविष्यति २८ वाम
देवउवाच ततःसत्यवतीपुत्रंजनयामासभार्गवं तपस्यभिरतंशांतंजमदग्निंयतव्रतं २९ विश्वामि
त्रंचदायादंगाधिःकुशिकनंदनः यंप्रापब्रह्मसममितंविश्वैर्ब्रह्मगुणैर्युतं ३० ऋचीकोजनयामास
जमदग्नितपोनिधिं सोपिपुत्रंह्यजनयज्जमदग्निःसुदारुणं ३१ सर्वविद्यांतगंश्रेष्ठंधनुर्वेदस्यपार
गं रामंक्षत्रियहंतारंप्रदीप्तमिवपावकं ३२ तोषयित्वामहादेवंपर्वतेगंधमादने अस्त्राणिव
रयामासपरशुंचातितेजसं ३३ सतेनाकुंठधारेणज्वलितानलवर्चसा कुठारेणाप्रमेयेणलोके
ष्वप्रतिमोभवत् ३४ एतस्मिन्नेवकालेतुकृतवीर्यात्मजोबली अर्जुनोनामतेजस्वीक्षत्रियोहैह
याधिपः ३५ दत्तात्रेयप्रसादेनराजाबाहुसहस्रवान् चक्रवर्तीमहातेजाविप्राणामाश्वमे
धिके ३६ ददौसपृथिवींसर्वांसप्तद्वीपांसपर्वतां स्वबाहुस्त्रबलेनाजौजित्वापरमधर्मवित्
३७ तृषितेनचकौंतेयभिक्षितश्चित्रभानुना सहस्रबाहुर्विक्रांतःप्रादाद्भिक्षामथाग्नये ३८ ॥

श्री॰
ग्रं॰ रां॰
टी॰
९२

वाणाग्न्यातउद्भूतइतिशेषः ३९ ४० आपवस्यवसिष्ठस्य ४१ दग्धेआश्रमेआश्रमे ४२ ४४ पितृवधेवयनिमित्तंआसन् ४५

ग्रामान्पुरवराणिराष्ट्राणिघोषांश्चैवानुवीर्यवान् जज्वालतस्यबाणाग्निश्चित्रभानुर्दिधक्षता ३९
सतस्यपुरुषेंद्रस्यप्रभावेणमहौजसः ददाहकार्तवीर्यस्यशैलानथवस्पतीन् ४० सशून्यमा
श्रमंरम्यमापवस्यमहात्मनः ददाहपवनेनेद्धश्चित्रभानुःसहैहयः ४१ आपवस्ततोरोषा
च्छशापार्जुनमच्युत दग्धेआश्रमेमहाबाहोकार्तवीर्येणवीर्यवान् ४२ त्वयानवर्जितंयस्मान्ममे
दंहिमहद्वनं दग्धंतस्माद्रणेरामोबाहूंस्तेछेत्स्यतेऽर्जुन ४३ अर्जुनस्तुमहाबलीनित्यंशमा
त्मकः ब्रह्मण्यश्चशरण्यश्चदाताशूरश्चभारत ४४ नाचिंतयत्तदाशापंतेनदत्तंमहात्मना त
स्यपुत्रास्तुबलिनःशापेनासन्पितुर्वधे ४५ निमित्तादवलिप्ताश्चनृशंसाश्चैवसर्वदा जमदग्ने
र्धेन्वास्तेवत्समानिन्युर्भरतर्षभ ४६ अज्ञातंकार्तवीर्येणहैहयेंद्रेणधीमता तन्निमित्तमभूद्युद्धं
जामदग्नेर्महात्मनः ४७ ततोऽर्जुनस्यबाहूंस्तान्छित्त्वारामोरुषान्वितः तंभ्रमंतंततोवत्संजामा
दग्न्यःस्वमाश्रमं ४८ प्रत्यानयतराजेंद्रतेषामंतःपुरात्प्रभुः अर्जुनस्यसुतास्तेतुसंभूयाबुद्धयस्त
दा ४९ गत्वाश्रममसंबुद्धाजमदग्नेर्महात्मनः अपातयंतभल्लाग्रैःशिरःकायान्नराधिप ५०
समित्कुशार्थंरामस्यनिर्यातस्ययशस्विनः ततःपितृवधा

निमित्तात्शापादेवहेतोः ४६ ४७ ५० ५१ ॥

९२

५२ ५५ क्षेपंनिंदां असक्तोरामश्च इति मिथ्याप्रतिज्ञः सर्वेषांक्षत्रियाणांवधाकरणात् ५९ स्तृताव्याप्ता शस्त्रंजग्राहतत्कार्यंक्ष
तिःक्षत्रियांप्रतिश्रुत्यमहींशस्त्रमग्रहीत् ततः सभृगुशार्दूलःकार्त्तवीर्यस्यवीर्यवान् ५२ विक्र
म्यनिजघानाशुपुत्रान्पौत्रांश्चसर्वशः सहैहयसहस्राणिहत्वापरममन्युमान् ५३ चकारभार्गवो
राजन्महींशोणितकर्दमां सतथाशुमहातेजाःकृत्वानिःक्षत्रियांमहीं ५४ कृपयापरया
विष्टोवनमेवजगामह ततोवर्षसहस्रेषुसमतीतेषुकेषुचित् ५५ क्षेपंसंप्राप्तवांस्तत्रप्रकृ
त्याकोपनःप्रभुः विश्वामित्रस्यपौत्रस्तुरैभ्यपुत्रोमहातपाः ५६ परावसुर्महाराजक्षिप्त्वाहजन
संसदि ५७ येतेययातिपतनेयज्ञेसंतःसमागताः प्रतर्दनप्रभृतयोरामकिंक्षत्रियानते ५८
मिथ्याप्रतिज्ञोरामत्वंकथ्यसेजनसंसदि भयात्क्षत्रियवीराणांपर्वतंसमुपाश्रितः सापुनः
क्षत्रियशतैःपृथिवीसर्वतस्तृता परावसोर्वचःश्रुत्वाशस्त्रंजग्राहभार्गवः ६० ततोयेक्षत्रियारा
जन्शतशस्तेनवर्जिताः तेविवृद्धामहावीर्याःपृथिवीपतयोभवन् ६१ सपुनस्तान्जघा
नाशुबालानपिनराधिप गर्भस्थैस्तुमहीव्याप्तापुनरेवाभवत्तदा ६२ जातंजातंसगर्भंतुपुन
रेवजघानह अरक्षंश्चसुतान्कांश्चित्तदाक्षत्रिययोषितः ६३ त्रिःसप्तकृत्वःपृथिवींकृत्वानिः
त्रियाणामंतंकृतवान् ६० वर्जिताःअहताः ६१ ६४ क्षत्रियांप्रभुः दक्षिणामश्वमेधान्तेकश्यपायाददत्ततः ६४

स्रुक्ग्रहवताकरेणेतिकश्यपोऽध्वर्युःसनकर्मांतरएवमाध्यंदिनसवनेदक्षिणाकालेऽदंअब्रवीदितिसूच्यते ६५ ०. ११

सत्त्रियाणांशेषार्थंकरेणोद्दिश्यकश्यपः स्रुक्ग्रहवताराजंस्ततोवाक्यमथाब्रवीत

६५ गच्छतीरंसमुद्रस्यदक्षिणस्यमहामुने नतेमद्विषयेरामवस्तव्यमिहकर्हिचित ६६ त

तःशूर्पारकंदेशंसागरस्तस्यनिर्ममे सहसाजामदग्न्यस्यसोपरांतमहीतलं ६७ कश्यपस्तां

महाराजप्रतिगृह्यवसुंधरां कृत्वाब्राह्मणसंस्थांवैप्रविष्टःसुमहद्वनं ६८ ततःशूद्राश्चवैश्या

श्चयथास्वैरप्रचारिणः अवर्त्तंतद्विजाग्र्याणांदारेषुभरतर्षभ ६९ अराजकेजीवलोकेदुर्बला

बलवत्तरैः पीड्यंतेनहिवित्तेषुप्रभुत्वंकस्यचित्तदा ७० ततःकालेनपृथिवीपीड्यमानादुरा

त्मभिः विपर्ययेणतेनाशुप्रविवेशरसातलं ७१ अरक्ष्यमाणाविधिवत्क्षत्रियैर्धर्मरक्षि

भिः तांदृष्ट्वाद्रवतींतत्रसंत्रासात्समहामनाः ७२ ऊरुणाधारयामासकश्यपःपृथिवींततः

धृतातेनोरुणायेनतेनोर्वीतिमहीस्मृता ७३ रक्षणार्थंसमुद्दिश्ययाचेपृथिवीतदा प्रसा

द्यकश्यपंदेवीवरयामासभूमिपं ७४ पृथिव्युवाच संतिब्रह्मन्मयागुप्ताःस्त्रीषुक्षत्रियपुंगवाः

हैहयानांकुलेजातास्तेसंरक्षंतुमांमुने ७५ अस्तिपौरवदायादोविदूरथसुतःप्रभो ऋक्षैःसं

वर्द्धितोविप्रऋक्षवत्यथपर्वते ७६ तथानुकंपमानेनयज्वनाथामितौजसा पराशरेणदा

द्विजः क्षत्रियोपि ७८ ८३ घोतल्पान्विचित्रप्रसादादीन्कुर्वंतितेघोकाराः शिल्पिनः ज्पाकारेतिपाठांतरं स्पष्टार्थं ८४ ८५

सर्वकर्माणिकुरुतेशूद्रवत्तस्यसद्विजः सर्वकर्मेत्यभिख्यातः समंमांरक्षतुपार्थिवः ७८ शिबि
पुत्रोमहातेजागोपतिर्नामनामतः वनेसंवर्द्धितोगोभिः सोभिरक्षतुमामुने ७९ प्रतर्दनस्यपुत्र
स्तुवत्सोनाममहाबलः वत्सैःसंवर्द्धितोगोष्ठेसमांरक्षतुपार्थिवः ८० दधिवाहनपौत्रस्तुपुत्रोदि
विरथस्यच गूढःसगौतमेनासीद्गंगाकूलेभिरक्षितः ८१ बृहद्रथोमहातेजाभूरिभूतिपरिष्कृतः
गोलांगूलैर्महाभागोगृध्रकूटेभिरक्षितः ८२ मरुत्तस्यान्ववायेचरक्षिताःक्षत्रियात्मजाः मरु
त्पतिसमावीर्यैःसमुद्रेणाभिरक्षिताः ८३ एतेक्षत्रियदायादास्तत्रतत्रपरिश्रिताः घोकारहेम
काराद्जातिंनित्यंसमाश्रिताः ८४ यदिमामभिरक्षंतिततःस्थास्यामिनिश्चला एतेषांपितर
श्चैवतथैवचपितामहाः ८५ मदर्थंनिहतायुद्धेरामेणाक्लिष्टकर्मणा तेषामपचितिश्चैवमया
कार्यामहामुने ८६ नह्यहंकामयेनित्यमतिक्रांतेनरक्षणं वर्त्तमानेनवर्त्तेयंतत्क्षिप्रंसंविधी
यतां ८७ वासुदेवउ॰ ततःपृथिव्यानिर्दिष्टांस्तान्समानीकश्यपः अभ्यषिंचन्महीपालान्क्ष
त्रियान्वीर्यसंमतान् ८८ तेषांपुत्राश्चपौत्राश्चयेषांवंशाःप्रतिष्ठिताः एवमेतत्पुरावृत्तंयन्मांपृ
च्छसिपांडव ८९

अपचितिःआनृण्यार्थपूजा ८६ नित्यमतिक्रांतेनयर्मातिक्रमिणा ८७ ८८ ८९ ॥

प्रकाशन्प्रकाशयन् ९॰ रामोपाख्यानेऊनपंचाशः ४९ ततो १ ४ तथाहतौताहकगोष्ठीयवै ५ ८ अवस्कंद्यअवरुह्यवाहे

श्री॰
शां॰ रा॰
टी॰
४४

वैशंपायनउ॰ एवंब्रुवंस्तुचयदाप्रवीरोयुधिष्ठिरंधर्मभृतांवरिष्ठः स्थितेनतेनाशुययौमहात्मादि
शः प्रकाशन्भगवानिवार्कः ९॰ इतिशांतिपर्वणिराजधर्मेरामोपाख्याने ४९ वैशंपायनउ॰
ततोरामस्यतत्कर्मश्रुत्वाराजायुधिष्ठिरः विस्मयंपरमंगत्वाप्रत्युवाचजनार्दनं १ अहोरामस्यवा
र्ष्णेयशक्रस्येवमहात्मनः विक्रमोवसुधायेनक्रोधान्निःक्षत्रियाकृता २ गोभिःसमुद्रेगुप्ता
श्चगोलांगूलर्क्षवानरैः गुप्तारामभयोद्विग्नाःक्षत्रियाणांकुलोद्वहाः ३ अहोधन्योहिलोकोयं
सभाग्याश्चनराभुवि यत्रकर्मेदृशंधर्म्यंद्विजेनकृतमच्युत ४ कथयंतौकथांतांतुततावच्युत
युधिष्ठिरौ जग्मतुर्यत्रगांगेयःशरतल्पगतःप्रभुः ५ ततस्तेददृशुर्भीष्मंशरप्रस्तरशायिनं
स्वरश्मिजालसंवीतंसायंसूर्यमिवप्रभं ६ उपास्यमानंमुनिभिर्देवैरिवशतक्रतुं देशेपरमध
र्मिष्ठेनदीमोघवतीमनु ७ दूरादेवतमालोक्यकृष्णोराजाचधर्मजः चत्वारःपांडवाश्चैव
तेचशारद्वतादयः ८ अवस्कंद्याथवाहेभ्यःसंयम्यप्रचलंमनः एकीकृत्येंद्रियग्राममुपत
स्थुर्महामुनीन् ९ अभिवाद्यतुगोविंदःसात्यकिस्तेचपार्थिवाः व्यासादींस्तानृषीन्पश्चाद्गां ४४
गेयमुपतस्थिरे १० ॥

भ्यः वाहनेभ्यः ९ १० ॥

११ निशाम्य आलोच्य १२ १४ छंदमृत्युः स्वेच्छामरणः एतत् छंदमृत्युतायाः कारणं पितृतोषणं ममापि न किमुतान्येषा
मित्यर्थः १५ १६ कामं एतन्नयुक्तमिति शेषः सर्वज्ञस्यापि तवोपदेशो न युक्त इत्यर्थः १७ प्रतिष्ठितं वृद्धाविति शेषः १८ १९
तपोवृद्धं तथा दृष्ट्वा गांगेयं यदुकौरवाः परिवार्य ततः सर्वे निषेदुः पुरुषर्षभाः ११ ततो निशा
म्य गांगेयं शाम्यमानमिवानलं किंचिद्दीनमना भीष्ममिति होवाच केशवः १२ कच्चिज्ज्ञा
नानि सर्वाणि प्रसन्नानि यथा पुरा कच्चिन्न व्याकुला चैव बुद्धिस्ते वदतां वर १३ शराभिघातदुः
खात्ते कच्चिद्गात्रं न दूयते मानसादपि दुःखाद्धि शारीरं बलवत्तरं १४ वरदानात्पितुः कामं छं
दमृत्युरसि प्रभो शंतनोर्धर्मनित्यस्य न त्वेतन्मम कारणं १५ सुसूक्ष्मोऽपि तु देहे वै शल्यो
जनयते रुजं किं पुनः शरसंघातैश्चितस्य तव पार्थिव १६ कामं नैतत्तवाख्येयं प्राणिनां प्रभ
वाप्ययौ उपदेष्टुं भवान् शक्तो देवानामपि भारत १७ यद्भूतं भविष्यं च भवच्च पुरुषर्षभ स
र्वं तज्ज्ञानवृद्धस्य तव पाणाविवाहितं संहारश्चैव भूतानां धर्मस्य च फलोदयः विदितस्ते म
हाप्राज्ञ त्वं हि धर्ममयो निधिः १९ त्वां हि राज्ये स्थितं स्फीते समग्रांगमरोगिणं स्त्रीसहस्रैः प
रिवृतं पश्यामीवोर्ध्वरेतसं २० ऋते शांतनवाद्भीष्मात्त्रिषु लोकेषु पार्थिव सत्यधर्मान्महावी
पश्यामीवेतीव शब्दात् प्रतिज्ञातः पूर्वं ऊर्ध्वरेतस्त्वं नासीदिति भावः २० भीष्मादृते र्याच्छूराद्धर्मैकतत्परात् २१
मृत्युमावार्य स्थिते किमपि निसर्गप्रभवं जानीमः सत्त्वं न पश्याम इति द्वयोः संबंधः २१ ॥

२२ २३ २४ २५ वहूनामहातांग्रेशोर्यदितोनवमःगुणोरनवमश्च २६ २७ २८ २९ ३० ३१ ३२ ३३ ३४ ॥

मत्तुमावार्यतनपसाशरसंस्तरशायिनः निसर्गप्रभवंकिंचिन्नचतातानुशुश्रुम २२ सत्येतपसि
दानेचयज्ञाधिकरणेतथा यजुर्वेदेचवेदेचनीत्यांचैवानुवर्तणे अन्दशंसम्पविंदांतेसर्वभूतहितेर
ते महारथंत्वत्सदृशंनकंचिदनुशुश्रुम २४ त्वंहिदेवान्सगंधर्वान्ससुरान्यक्षराक्षसान् शक्तस्ते
करथेनैवविजेतुंनात्रसंशयः २५ सत्वंभीष्ममहावाहोवसूनांवासवोपमः नित्यंविप्रैःसमाख्या
तोनवमोनवमोगुणैः २६ अहंचत्वाभिजानामियस्त्वंपुरुषसत्तम त्रिदशेष्वपिविख्यातस्त्वंश
क्त्यापुरुषोत्तम २७ मनुष्येषुमनुष्येन्द्रनदृष्टोनचमेश्रुतः भवतोवागुणैर्युक्तःपृथिव्यांपुरुषः
क्वचित् २८ त्वंहिसर्वगुणैराजन्देवानप्यतिरिच्यसे तपसाहिभवान्शक्तःस्रष्टुंलोकांश्चराचरान्
२९ किंपुनश्चात्मनोलोकानुत्तमानुत्तमैर्गुणैः तदस्यतप्यमानस्यज्ञातीनांसंक्षयेणवै ३० ज्येष्ठ
स्यपांडुपुत्रस्यशोकंभीष्मव्यपानुद येहिधर्माःसमाख्याताश्चातुर्वर्ण्यस्यभारत ३१ चातुराश्रम्य
संयुक्ताःसर्वेतेविदितास्तव चातुर्विद्येचयेप्रोक्ताश्चातुर्होत्रेचभारत ३२ योगेसांख्येचनियताये
चधर्माःसनातनाः चातुर्वर्ण्यस्ययश्चोक्तोधर्मोनस्मविरुध्यते ३३ सेव्यमानःसेव्यमानः।
सवैयाख्यातोगांगेयविदितस्तव प्रतिलोमप्रसूतानांवर्णानांचैववयःस्मृतः ३४

३५ ३६ ३७ ३८ पंचाशत्तमः ५० श्रुत्वा १ नमस्तेइत्यादयोष्टौश्लोकास्तवराजेव्याख्याताः २ ३ ४ ५ ६ ७ ॥
देशजातिकुलानांचजानीषेधर्मलक्षणं वेदोक्तोयश्चशिष्टोक्तःसदैवविदितस्तव ३५ इतिहास
पुराणार्थाःकार्त्स्न्येनविदितास्तव धर्मशास्त्रंचसकलंनित्यंमनसितेस्थितं ३६ येचकेचनलो
केस्मिन्नर्थाःसंशयकारकाः तेषांछेत्तानास्तिलोकेत्वदन्यःपुरुषर्षभ ३७ सपांडवेयस्यमनःसमु
त्थितंनरेंद्रशोकंव्यपकर्षमेद्यया भवद्विधाह्युत्तमबुद्धिविस्तराविमुह्यमानस्यनरस्यशांतये ३८ इति
श्रीशांतौराजधर्मेपंचाशत्तमः ५० वैशंपायनउ० श्रुत्वातुवचनंभीष्मोवासुदेवस्यधीमतः किं
चिदुन्नाम्यवदनंप्रांजलिर्वाक्यमब्रवीत् १ भीष्मउवाच नमस्तेभगवन्कृष्णलोकानांप्रभवाप्य
य त्वंहिकर्ताहृषीकेशसंहर्ताचापराजितः २ विश्वकर्मन्नमस्तेस्तुविश्वात्मन्विश्वसंभव अपव
र्गस्थभूतानांपंचानांपरतःस्थितः ३ नमस्तेत्रिषुलोकेषुनमस्तेपरतस्त्रिषु योगीश्वरनमस्तेस्तु
त्वंहिसर्वपरायणः ४ मत्संश्रितंयदात्थत्वंवचःपुरुषसत्तम ५ तेनपश्यामितेभावान्दि
व्यान्हित्रिषुवर्त्मसु तच्चपश्यामिगोविन्दयत्तेरूपंसनातनं ६ सप्तमार्गानिरुद्धास्तेवायोरमि
ततेजसः दिवंतेशिरसाव्याप्तंपद्भ्यांदेवीवसुंधरा ७ ॥

श्री०
शां०रा०
टी०
९६

८ १३ पंचाशतंषट्चेतितवजीवितस्यावधिनांदिनानांशेषं पंचषट्चपंचवारमावर्तिताःषडितिरीत्यात्रिंशद्दिनिविंशतिस्तेयंतावदेव आ
शतंशतावधि यद्दिनानांशतेनकर्तृत्वेशक्यंतत्त्रिंशताधिकर्तृत्वंशक्यमित्यर्थः अष्टपंचाशतंराज्यःश्रेयानस्याद्यमेगताइतिभीष्मोव
क्ष्यति तत्रत्रिंशद्दतःपरंशिष्टाः अष्टाविंशतिरितःपूर्वंव्यतीतास्तथाहिभीष्मस्यशरतल्पशयनानंतरंअष्टौदिनानियुद्धं ततोऽर्ध्वं

दिव्योभुजोऽथविश्वस्त्वंवीर्यंशक्रःप्रतिष्ठितः अतसीपुष्पसंकाशंपीतवाससमच्युतं ८ वपुर्ह्यनु
मिमीमस्तेमेघस्येवसविद्युतः त्वत्प्रपन्नायभक्तायगतिमिष्टांजिगीषवे यच्छ्रेयःपुंडरीका
क्षतद्ध्यायस्वसुरोत्तम ९ वासुदेवउ० यतःखलुपराभक्तिर्मयितेपुरुषर्षभ ततोमयावपु
र्दिव्यंत्वयिराजनप्रदर्शितं १० नह्यभक्तायराजेंद्रभक्तायानृजवेनच दर्शयाम्यहमात्मानं
नचाशांतायभारत ११ भवांस्तुममभक्तश्चनित्यंचार्जवमास्थितः दमेतपसिसत्येचदानेच
निरतःशुचिः १२ अर्हस्त्वंभीष्ममांद्रष्टुंतपसास्वेनपार्थिव तवह्युपस्थितालोकायेभ्योनाव
र्ततेपुनः १३ पंचाशतंषट्चकुरुप्रवीरशेषंदिनानांतवजीवितस्य ततःशुभैःकर्मफ
लोदयैस्त्वंसमेष्यसेभीष्मविमुच्यदेहं १४ ॥

यनाशौचंयुयुत्सोः षोडशदिनानि तेनसहपुर्वंप्र
विंशतिःपाण्डवानामपिताववंतिदिनानिगतानिपंचविंशेसर्वेषांश्राद्धदानं षड्विंशेपुरप्रवेशःसप्तविंशे राज्याभिषेकः अष्टाविंशे ९६
प्रकृतिसांत्वनंआभ्युदयिकंदाच ऊनत्रिंशेभीष्मप्रत्यागमनं तद्दिनमारभ्यत्रिंशद्दिनानिशिष्टानीतिज्ञेयं १४ ॥

प्रतिपालयंतिप्रतीतंते पतंगंसूर्यं १५ कालवशंजगतस्रपन्नेप्राप्तेतेनृमितिशेषः १६ १७ १८ एकपंचाशत्तमः ५१
ततः १२ तेतवैववाक्यंतवसन्निधौवाचोगतंवाचांविषयःसर्वोपितववाचिवेदे ३ यद्वेति हितेप्रियेश्रेयसपरत्रचसर्वत्रैका
पतेहिदेवावसवोविमानान्यास्थायसर्वेज्वलिताग्निकल्पाः श्रेतदिताशंप्रतिपालयंतिकाहं
प्रपद्यतमुदक्‌पतंगे १५ व्यावर्तमानेभगवत्युदीचींसूर्येजगत्कालवशंप्रपन्ने गंतास्मिलोका
नपुरुषप्रवीनावर्ततेयानुपलभ्यविद्वान् १६ श्रमुचलोकंत्वयिभीष्मयातेज्ञानानिनंक्ष्यंत्यखिले
लेनवीर श्रतस्तुसर्वेत्वयिसन्निकर्षंसमागतायर्मविवेचनाय १७ तज्ज्ञातिशोकोपहतश्रुता
यसत्याभिसंथायपयुधिष्ठिराय प्रब्रूहियर्मार्थसमाधियुक्तंमर्थ्यंवचोस्यापनुदाशुशोकं १८
इतिश्रीमहाभारतेशांतौराजधर्मे ५१ वैशंपायनउ० ततःकृष्णस्यतद्वाक्यंधर्मार्थसहितंहि
तं श्रुत्वाशांतनवोभीष्मःप्रत्युवाचकृतांजलिः १ लोकनाथमहाबाहोशिवनारायणाच्यु
त तववाक्यमुपश्रुत्यहर्षेणास्मिपरिप्लुतः २ किंचाहमभिधास्यामिवाक्‌पतेतवसन्निधौ
यदावाचोगतंसर्वंतववाचिसमाहितं ३ यच्चकिंचित्क्वचिल्लोकेकर्तव्यंक्रियतेचयत् त्व
त्तस्तन्निःसृतंदेवलोकेबुद्धिमतोहितं ४ कथयेद्देवलोकंयोदेवराजसमीपतः धर्मकामा
र्थमोक्षाणांसोर्थंब्रूयात्तवाग्रतः शराभितापाद्व्यथितंमनोममधुसूदन गात्राणिचावसी
लिंकंत्वत्तोनिःसृतमितिउक्तेर्थेहितंकृष्णाः ४ ५ ६ ॥

दानिनवाढिःप्रक्षेपः ७ ॥

श्री॰ गीं॰रा॰ टी॰ ६०

७ ८ ९ १० ११ १२ १३ १४ १५ १६ आसक्तिःअवसन्नता ७ ८ ९ ॥

नचमेप्रतिभाकाचिद्दिविकिंचित्प्रभाषितं पीड्यमानस्यगोविंदविषानलसमैःघोरैः ७
बलंमेप्रजहातीवप्राणाःसंतरयंतिच मर्माणिपरिकृंतंतिभ्रांतचित्तस्तथाप्यहं ८ दौर्ब
ल्यात्सज्जतेवाङ्मेसकथंवक्तुमुत्सहे साधुमेत्वंप्रसीदस्वदाशार्हकुलवर्द्धन ९ क्षमस्वम
हाबाहोनब्रूयांकिंचिदच्युत त्वत्सन्निधौचसीदेद्धिवाचस्पतिरपिध्रुवम् १० नदिशःसंप्रजाना
मिनाकाशंनचमेदिनीं केवलंतववीर्येणतिष्ठामिमधुसूदन ११ स्वयमेवभवांस्तस्माद्धर्मरा
जस्ययद्धितं तद्ब्रवीत्वाशुसर्वेषामागमानांत्वमागमः १२ कथंत्वयिस्थितेकृष्णशाश्वतेलो
ककर्तरि प्रब्रूयान्मद्विधःकश्चिद्गुरौशिष्यइवस्थिते १३ वासुदेवउ॰ उपपन्नमिदंवाक्यंकौ
रवाणांधुरंधरे महावीर्येमहासत्त्वेस्थिरेसर्वार्थदर्शिनि १४ यत्तुमामात्थगांगेयबाणघात
कृतेप्रति गृहाणात्रवरंभीष्ममत्प्रसादकृतंप्रभो १५ नत्वांग्लानिर्नतेमूर्च्छानदाहोनचतेरुजा
प्रभविष्यतिगांगेयक्षुत्पिपासेनचाच्युत १६ ज्ञानानिचसमस्तानिप्रतिभास्यंतितेनघ
नचतेक्वचिदासक्तिर्बुद्धेःप्रादुर्भविष्यति १७ सत्त्वस्थंचमनोनित्यंतवभीष्मभविष्यति र
जस्तमोभ्यांरहितंघनैर्मुक्तइवोडुराट् १८ यद्यच्चधर्मसंयुक्तमर्थयुक्तमथापिच चिंतयि
ष्यसितत्राग्र्याबुद्धिस्तवभविष्य ति १९ ॥ ६०

२॰ संस्मरंतंसंस्मरत् २१ २२ २३ २४ २५ २६ २८ २९ ३॰ ३१ ॥
श्मंचराजशार्दूलभूतग्रामंचतुर्विधं चतुर्दिक्षुसमाश्रित्यद्रष्टुमस्यमितविक्रम २॰ संस्मरंतंप्रजा
जालंसंयुक्तोत्तानचक्षुषा भीष्मद्रष्टुमसितेवितजेलमीनस्वामले २१ वैशंपायनउ॰ ततस्तेव्यास
सहिताःसर्वएवमहर्षयः अर्घ्यमत्तुःसामसहितैर्वचोभिःकृष्णमर्चयत् २२ ततःसार्वत्तवेदिव्यं
पुष्पवर्षनभस्तलात् पपातयत्रवार्ष्णेयःसगांगेयःसपांडवः २३ वादित्राणिचसर्वाणिजगुश्चाप्स
रसांगणाः नचाहितमनिष्टंचकिंचित्तत्रप्रदृश्यते ववौशिवःसुखोवायुःसर्वगंधवहःशुचिः शां
तायांदिशिशांताश्चप्राद्रवन्मृगपक्षिणः २५ ततोमुहूर्ताद्भगवान्सहस्रांशुर्दिवाकरः दहन्निव
मिवैकांतेप्रतीच्यांप्रत्यदृश्यत २६ ततोमहर्षयःसर्वेसमुत्थायजनार्दनं भीष्ममामंत्रयांचक्रूराजा
नंचयुधिष्ठिरं ततःप्रणाममकरोत्केशवःसहपांडवः सात्यकिःसंजयश्चैवसचशारद्वतःकृपः
ततस्तेधर्मनिरताःसम्यक्तैरभिपूजिताः श्वःसमेष्यामइत्युक्त्वायथेष्टंत्वरिताययुः २९ तथैवा
मंत्र्यगांगेयंकेशवःपांडवास्तथा प्रदक्षिणमुपावृत्यरथानारुरुहुःशुभान् ३॰ ततोरथैः
कांचनचित्रकूबरैर्महीधराभैःसमदैश्चदंतिभिः हयैःसुपर्णैरिवचाशुगामिभिःपदातिभिःप
दातिभिश्चात्तशरासनादिभिः ३१ ॥

श्री॰ शां॰रा॰ टी॰ ४८

३२ ३३ ३४ द्विपंचाशत्तमः ५२ ततःशयनं १ २ ३ ४ ५ ६ ७ ८ ॥

ययौरथानांश्रवतोद्दिसावभूत्तथैवयश्चादतिमात्रमाविशी श्रुवस्यपश्चाच्चययाम्महानदीतमृत्वदंत
गिरिमित्यनर्मदा ३२ ततःपुरस्ताद्भगवान्निशाकरःसमुत्थितस्तामभिहर्षयंश्चमूं दिवाकरापीत
रसामहौषधीःपुनःस्वकेनैवगुणेनयोजन ३३ ततःपुरंसुरपुरसंमितंश्रियाप्रविश्यतेयदुवृषपांड
वास्तदा यथोचितान्भवनवरान्समाविशञ्छ्रमान्वितामृगपतयोगुहाइव ३४ इतिश्रीमहाभार
तेशांतौराजधर्मे ५२ वैशंपायनउ॰ ततःशयनमाविश्यप्रसुप्तोमधुसूदनः याममात्रार्धशेषायां
यामिन्यांप्रत्यबुध्यत १ सध्यानपथमाविश्यसर्वज्ञानानिमाधवः अवलोक्यततःपश्चाद्दध्यौब्रह्मसना
तनं २ ततःस्तुतिपुराणज्ञारक्तकंठाःसुशिक्षिताः अस्तुवन्विश्वकर्माणंवासुदेवंप्रजाप
तिं ३ पठंतिपाणिस्वनिकास्तथागायंतिगायनाः शंखानकमृदंगांश्चप्रवाद्यंतिसहस्रशः ४ वी
णापणववेणूनांस्वनश्चातिमनोरमः महाहासइवविस्तीर्णःशुश्रुवेतस्यवेश्मनः ५ ततोयुधि
ष्ठिरस्यापिराज्ञोमंगलसंहिताः उच्चेरुर्मधुरावाचोगीतवादित्रनिःस्वनाः ६ ततउत्थायदाशार्हः
स्नातःप्रांजलिरच्युतः जप्त्वागुह्यंमहाबाहुरग्नीनाश्रित्यतस्थिवान् ७ ततःसहस्रंविप्राणांचतु
र्वेदविदांतथा गवांसहस्रेणैकैकंवाचयामाससमाधवः ८ ॥

४८

मंगलानां गवादीनामालंभनं स्पर्शः १ ९ ११ ११ १२ १३ १४ १५ १६ १७ १८ १९ २० ॥

मंगलालंभनं कृत्वा आत्मानमवलोक्य च आदर्शे विमले कृष्णस्ततः सात्यकिमब्रवीत् १ गा
च्छ शैनेय जानीहि गत्वा राजनिवेशनं अपि सज्जो महातेजा भीमद्वेष्टा युधिष्ठिरः ९ ततः कृष्णस्य
वचनात् सात्यकिस्त्वरितो ययौ उपगम्य च राजानं युधिष्ठिरमभाषत ११ युक्तो रथवरो राजन्त्वा
सुदेवस्य धीमतः समीपगो यस्य प्रयास्यति जनार्दनः १२ भवत्यतीव नः कृष्णो मोयर्मराज महा
द्युते यदत्रानंतरं कृत्यं तद्भवान्कर्तुमर्हति १३ एवमुक्तः प्रत्युवाच यमपुत्रो युधिष्ठिरः १३ युधिष्ठि
रउ· युज्यतां मे रथवरः फाल्गुनायतिमद्युते न सैनिकैश्च यातव्यं यास्यामो वयमेव हि १४ न
च पीडयितव्यो मे भीभत्सुर्धर्मभृतां वरः अंतःपुरःसराश्चापि निवर्त्तंतु धनंजय १५ अद्य प्रभृति गां
गेयः परं गृह्य प्रवक्ष्यति ततो नेच्छामि कौंतेय पृथक्जनसमागमं १६ वैशंपायन उ· सत
द्धाकामथाज्ञाय कुंतीपुत्रो धनंजयः युक्तोस्य च रथस्तस्मा आचचक्षे नरर्षभः १७ ततो युधि
ष्ठिरो राजा यमौ भीमार्जुनावपि भूतानीव समस्तानि ययुः कृष्णोपि पांडवेषु महात्मसु शै
नेय सहितो धीमान्नस्य रथमेवान्वपद्यत १९ रथस्थाः संविदं कृत्वा साश्वा पृष्ट्वा च शर्वरीं मे
घघोषै रथवरैः प्रययुस्ते नरर्षभाः २० ॥ +कृष्णनिवेशनं २ आगच्छत्वथ ३

श्री॰
शां॰ रा
टी॰
९९

२१ २२ २३ २४ २५ २६ २७ २८ त्रिपंचाशत्तमः ५३ धर्म १ २ ३ ४ ॥

बलाहकं मेघपुष्पं शैब्यं सुग्रीवमेव च दारुकश्चोदयामास वासुदेवस्य वाजिनः २१ ते हया वासु
देवस्य दारुकेण प्रचोदिताः गां खुराग्रैस्तदा राजन्लिखंतः प्रययुस्तदा २२ ते ग्रसंत इवाकाशं वे
गवंतो महाबलाः क्षेत्रं धर्मस्य कृत्स्नस्य कुरुक्षेत्रमवातरन् २३ ततो ययुर्यत्र भीष्मः शरतल्पगा
तः प्रभुः आस्ते महर्षिभिः सार्द्धं ब्रह्मा देवगणैर्यथा २४ ततोवतीर्य गोविंदो रथात्स च युधिष्ठिरः
भीमो गांडीवधन्वा च यमौ सात्यकिरेव च २५ ऋषीनभ्यर्चयामासुः करानुद्यम्य दक्षिणान् सनैः प
रिवृतो राजा नक्षत्रैरिव चंद्रमाः २६ अभ्याजगाम गांगेयं ब्रह्माणमिव वासवः शरतल्पे शयानं
तमादित्यं पतितं यथा २७ स ददर्श महाबाहुं भयाच्चागतसाध्वसः २८ इति श्रीमहाभारते शांतौ रा
जधर्मे भीष्माभिगमने ५३ जनमेजय उवाच धर्मात्मनि महावीर्ये सत्यसंधे जितात्मनि देवव्रते म
हाभागे शरतल्पगते च्युते शयाने वीरशयने भीष्मे शांतनुनंदने गांगेये पुरुषव्याघ्रे पांडवैः पर्यु
पासिते २ काः कथाः समवर्तंत तस्मिन्वीरसमागमे हतेषु सर्वसैन्येषु तन्मे शंस महामुने ३
वैशंपायन उवाच शरतल्पगते भीष्मे कौरवाणां धुरंधरे आजग्मुर्ऋषयः सिद्धा नारदप्रमु
खास्तथा ४ ॥

५ ६ ७ समाचक्षेब्रवीमि अनुयुज्यतां पृच्छ्यतां ८ ९ १० ११ ततः उवाचेतिच्छेदः १२ १३ प्रव्याहारयत् प्रवाचयत् १५ १६
हतशिष्टाश्च राजानो युधिष्ठिरपुरोगमाः धृतराष्ट्रश्च कृष्णश्च भीमार्जुनयमास्तथा ५ तेभिगम्य
महात्मानो भरतानां पितामहं अन्वशोचंत गांगेयमादित्यं पतितं यथा ६ मुहूर्तमिव च ध्यात्वा ना
रदो देवदर्शनः उवाच पांडवान्सर्वान्हतशिष्टांश्च पार्थिवान् ७ प्राप्तकालं समाचक्षे भीष्मोयम
नुयुज्यतां अस्तमेति हि गांगेयो भानुमानिव भारत ८ अयं प्राणानुत्सिसृक्षुस्तं सर्वेभ्यनुपृच्छत कृ
त्स्नान्हि विविधान्धर्मांश्चातुर्वर्ण्यस्य वेत्त्ययं ९ एष वृद्धः परांल्लोकान्संप्राप्नोति तनुं त्यजन् तं शी
घ्रमनुयुंजीध्वं संशयान्मनसि स्थितान् १० एवमुक्ता नारदेन भीष्ममीयुर्नराधिपाः प्रष्टुं चाश
क्नुवंतस्ते वीक्षांचक्रुः परस्परं ११ ततोवाच हृषीकेशं पांडुपुत्रो युधिष्ठिरः नान्यस्त्वद्देवकीपुत्रा
च्छक्तः प्रष्टुं पितामहं १२ प्रव्याहरय यदुश्रेष्ठ त्वमग्रे मधुसूदन त्वं हि नस्तात सर्वेषां सर्वधर्मविदु
त्तमः १३ एवमुक्तः पांडवेन भगवान्केशवस्तदा अभिगम्य दुराधर्षं प्रव्याहारयदच्युतः १४
वासुदेव उ॰ कच्चित्सुखेन रजनी व्युष्टा ते राजसत्तम विस्पष्टलक्षणा बुद्धिः कच्चिच्चोपस्थिता त
व १५ कच्चिज्ज्ञानानि सर्वाणि प्रतिभाति च तेनघ न ग्लायते च हृदयं न च ते व्याकुलं मनः १६ भी
ष्म उवाच दाहो मोहः श्रमश्चैव क्लमो ग्लानिस्तथा रुजा तव प्रसादाद्गोविंद सद्यः प्रतिगतानि मे १७

श्री॰ शां॰ रा॰ टी॰ ९॰

१८ वेदोक्ताः अग्निहोत्रादयः वेदान्ताधिगताः शमदमसंन्यासादयः १९ २० २१ मेमम मनःकर्म बुद्धिराविशत् २२ २६ मम

यच्चभूतंभविष्यच्चभवच्चपरमद्युते तत्सर्वमनुपश्यामिपाणौफलमिवार्पितं १८ वेदोक्ताश्चैवये
धर्मावेदान्ताधिगताश्चये तान्सर्वान्संप्रपश्यामिवरदानात्तवाच्युत १९ शिष्टैश्चधर्मोयःप्रोक्तःस
चमेहृदिवर्त्तते देशजातिकुलानांचधर्मज्ञोस्मिजनार्दन २० चतुर्ष्वाश्रमधर्मेषुयोर्थःसचहृदिस्थि
तः राजधर्मांश्चसकलानवगच्छामिकेशव २१ यच्चयत्रचवक्तव्यंतद्वक्ष्यामिजनार्दन तवप्रसादा
द्धिशुभामनोमेबुद्धिराविशत् २२ युवेवास्मिसमाहृत्तस्त्वदनुध्यानबृंहितः वक्तुंश्रेयःसमर्थोस्मि
त्वत्प्रसादाज्जनार्दन २३ स्वयंकिमर्थंतुभवान्श्रेयोनप्राहपाण्डवं किंतेविवक्षितंचात्रतदाशुवद
माधव २४ वासुदेवउवाच यशसःश्रेयसश्चैवमूलंमांविद्धिकौरव मत्तःसर्वेभिनिर्वृत्ताभावास
दसदात्मकाः २५ शीतांशुश्चंद्रइत्युक्तेलोकेकोविस्मयिष्यति तथैवयशसापूर्णेमयिकोवि
स्मयिष्यति २६ आधेयंतुमयाभूयोयशस्तवमहाद्युते ततोमेविपुलाबुद्धिस्त्वयिभीष्मसम
र्पिता २७ यावद्धिपृथिवीपालपृथ्वीयंस्थास्यतेध्रुवा तावत्तवाक्षयाकीर्तिर्लोकाननुचरि
ष्यति २८ यच्चत्वंवक्ष्यसेभीष्मपाण्डवायानुपृच्छते वेदप्रवादाइवतेस्थास्यन्तिवसुधातले २९ ॥

९॰

३० ३१ अनुयुयुर्वंतः प्रष्टुमिच्छंतः ३२ ३३ ३४ ३५ ३६ ३७ ३८ चतुःपंचाशः ५४ अथा १ ॥

यश्चैतेनप्रमाणेनयोक्ष्यत्यात्मानमात्मना सफलंसर्वपुण्यानांप्रेत्यचानुभविष्यति ३० एतस्मा
त्कारणाद्गांगेयमतिर्दिव्यामयाहिते दत्तायशोविप्रथयेत्कथंभूयस्तवेतिह ३१ यावद्धिप्रथ्यतेलो
केपुरुषस्ययशोभुवि तावत्तस्याक्षयाकीर्तिर्भवतीतिविनिश्चितं ३२ राजानोहतशिष्टास्त्वांरा
जन्नभितआसते धर्माननुयुयुत्संतस्तेभ्यःप्रब्रूहिभारत ३३ भवान्हिवयसाश्रुतःश्रुताचारसम
न्वितः कुशलोराजधर्माणांसर्वेषामपराङ्ध्वेय ३४ जन्मप्र[illegible]तितेकश्चिद्वृजिनंनददर्शह ज्ञा
तारंसर्वधर्माणांत्वांविदुःसर्वपार्थिवाः ३५ तेभ्यःपितेवपुत्रेभ्योराजन्ब्रूहिपरंनयं ऋषयश्चै
वदेवाश्चत्वयानित्यमुपासिताः ३६ तस्माद्वक्तव्यमेवेदंत्वयावश्यमशेषतः धर्मान्शुश्रूषमाणेभ्यः
पृष्टेनचसतांपुनः ३७ वक्तव्यंविदुषावेतिधर्ममाहुर्मनीषिणः अप्रतिब्रुवतःकष्टोदोषोहिभवि
ताप्रभो ३८ तस्मात्पुत्रैश्चपौत्रैश्चधर्मान्पृष्टान्सनातनान् विद्वान्जिज्ञासमानैस्त्वंप्रब्रूहिभ
रतर्षभ ३९ इतिश्रीमहाभारतेशांतौराजधर्मेषु ५४ वैशंपायनउ० अथाब्रवीन्महातेजावा
क्यंकौरवनंदनः हंतधर्मान्प्रवक्ष्यामिदृढेवाङ्मनसीमम १ ॥

भूतात्मा प्राणिनामंतरात्मासि तेन मम अभिप्रायं वेत्सीति भावः २ प्रसंगाद्धर्मश्रवणार्थिकारिणं निरूपयति युधिष्ठिरस्त्विति व्याजेनय

तव प्रसादाद्धृषीकेश भूतात्मा यतोसि अतस्ते युधिष्ठिरस्तु धर्मात्मा मां धर्मानिह पृच्छति एवं प्रीतोभविष्या
मि सर्वान् वक्ष्यामि चाखिलान् २ यस्मिन्राजर्षभे जाते धर्मात्मनि महात्मनि प्रहृष्टमनं लोकत्रयः सर्वः स
मां पृच्छतु पांडवः ३ सर्वेषां दीनयशसां कुरूणां धर्मचारिणां यस्य नास्ति समः कश्चित्स मां पृच्छतु पां
डवः ४ धृतिर्दमो ब्रह्मचर्यं क्षमा धर्मश्च नित्यदा यस्मिन्नोजश्च तेजश्च स मां पृच्छतु पांडवः संबधीन
तिथीन् भृत्यान् संश्रितांश्चैव यो भृशं संमानयति सत्कृत्य स मां पृच्छतु पांडवः ६ सत्यं दानं तपः शौर्यं
शांतिर्दाक्ष्यमसंभ्रमः यस्मिन्नेतानि सर्वाणि स मां पृच्छतु पांडवः ७ यो न कामान्न संरंभान्न भयान्नार्थ
कारणात् कुर्याद्धर्मं धर्मात्मा स मां पृच्छतु पांडवः ८ सत्यनित्यः क्षमानित्यो ज्ञाननित्योतिथिप्रि
यः यो ददाति सतां नित्यं स मां पृच्छतु पांडवः ९ स्वाध्यायनित्यश्च धर्मे च निरतः सदा प्रशांतः
श्रुतरहस्यश्च स मां पृच्छतु पांडवः १० वासुदेव उ॰ लज्जया परयोपेतो धर्मराजो युधिष्ठिरः अभिशाप
भयाद्भीतो भवंतं नोपसर्पति ११ लोकस्य कदनं कृत्वा लोकनाथो विशांपते अभिशापभयाद्भीतो भ ११

स्मिन्नित्यादिना ३ ४ ५ संबधीन् संबंधिनः ६ ७ ८ ९ १० अभिशापो लोकगर्हणा ११ १२ ॥ वंतं नोपसर्पति १२ ॥

१३ गोत्रवधजां ग्लानिं धर्मराजस्यापनेष्यन् भीष्म उवाच ब्राह्मणानामिति ४ तं लोभितं ७ २२ पंचपंचाशत्तमः ५५ प्र
मुज्यात्मानं यामि समक्ष्णां अग्रगुरून्संबंधिबांधवान् अर्घार्हानिषुभिर्भित्वा भवंतं नोपसर्पति १३ भी
ष्म उ० ब्राह्मणानां यथा धर्मो दानमध्ययनं तपः क्षत्रियाणां तथा कृष्ण समरे देहपातनं १४ पितॄ
न्पितामहान्भ्रातॄन्गुरून्संबंधिबांधवान् मिथ्याप्रवृत्तान्यः संख्ये निहन्याद्धर्म एव सः १५ स
मयत्यागिनो लुब्धान्गुरूनपि च केशव निहंति समरे पापान्क्षत्रियः स हि धर्मवित् १६ यो लो
भान्न समीक्षेत धर्मसेतुं सनातनं निहंति यस्तं समरे क्षत्रियो वै स धर्मवित् १७ लोहितोदां केशतृ
णां गजशैलां ध्वजद्रुमां महीं करोति युद्धेषु क्षत्रियो यः स धर्मवित् १८ आहूतेन रणे नित्यं यो
द्धव्यं क्षत्रबंधुना धर्म्यं स्वर्ग्यं च लोक्यं च युद्धं हि मनुरब्रवीत् १९ वैशंपायन उ० एवमुक्तस्तु भीष्मेण
धर्मपुत्रो युधिष्ठिरः विनीतवदुपागम्य तस्थौ संदर्शनेऽग्रतः २० अथास्य पादौ जग्राह भीष्मश्चापि न
नंद तं मूर्ध्नि चैनमुपाघ्राय निषीदेत्यब्रवीत्तदा २१ तमुवाचाथ गांगेयो वृषभः सर्वधन्विनां मां
पृच्छ तात विश्रब्धं मा भैस्त्वं कुरुसत्तम २२ इति श्रीमहाभारते शांतौ राजधर्मेषु ५५ वैशंपायन
उ० प्रणिपत्य हृषीकेशमभिवाद्य पितामहं अनुमान्य गुरून्सर्वान्पर्यपृच्छद्युधिष्ठिरः १ ॥
णिपत्येति गुरूनकृपव्यासादीन् पर्यपृच्छत्धर्मानिति शेषः १ ॥

धर्मः प्रजापालनात्मकः परमः सर्वधर्मश्रेष्ठः एतं धर्मभारं दुर्वहं मन्ये २ परायणं आश्रयः ३ त्रिवर्गः धर्मार्थकामात्मको राजध
र्मेषु दंडनीतौ समासक्तः समाश्रितः ४ प्रग्रहणां नियंत्रणां ५ संस्था मर्यादा व्यवस्था ६ अलोक्यां अप्रकाशात्मिकां अशुभां गतिं

युधिष्ठिर उवाच राजा वै परमो धर्म इति धर्मविदो विदुः महान्तमेतं भारं च मन्ये तद्ब्रूहि पार्थिव
२ राजधर्मान्विशेषेण कथयस्व पितामह सर्वस्य जीवलोकस्य राजधर्मः परायणं ३ त्रिवर्गो
हि समासक्तो राजधर्मेषु कौरव मोक्षधर्मश्च विस्पष्टः सकलोत्र समाहितः ४ यथा हि रश्म
यो श्वस्य द्विरदस्यांकुशो यथा नरेंद्रधर्मो लोकस्य तथा प्रग्रहणं स्मृतं ५ तत्र चेत्संप्रमुह्येत धर्मे
राजर्षिसेविते लोकस्य संस्था न भवेत्सर्वं च व्याकुली भवेत् ६ उदयन्हि यथा सूर्यो नाशय
त्यशुभं तमः राजधर्मास्तथा लोकान्आक्षिपंत्यशुभां गतिं ७ तदग्रे राजधर्मान्हि मदर्थं त्वं पिता
मह प्रब्रूहि भरतश्रेष्ठ त्वं हि धर्मभृतां वरः ८ आगमश्च परस्त्वत्तः सर्वेषां नः परंतप भवंतं
हि परं बुद्धौ वासुदेवोभिमन्यते ९ भीष्म उवाच नमो धर्माय महते नमः कृष्णाय वेधसे
ब्राह्मणेभ्यो नमस्कृत्य धर्मान्वक्ष्यामि शाश्वतान् ९ ॥

तिनरकं निःक्षिपंति हरीकुर्वंति तथा च स्मृतिः राजभिः कृतदंडास्तु शुध्यंति मलिना जनाः कृतार्थाश्च ततो यांति स्वर्गं सुकृतिनो यथे
ति ७ अग्रे उत्तरेभ्यो धर्मेभ्यः पूर्वं ८ परः आगमः परमरहस्यं नः अस्माकं त्वमेव विदितमस्तु ९ शाश्वतान् वेदपरंपरागतान् ९

१ रञ्जनकाम्ययेति यः कश्चिदलितविधेयोपि प्रजापालनाधिकृतः तस्य वृत्तोऽयं धर्मः यत्तद्देवद्विजादिषु यथाविधि प्रवृत्त्य
द्वेष्याः वर्तितव्यमिति २ यद्धर्मलोपाद्राजकरणं भवति तद्देवतार्चनेन नश्यतीत्याह दैवतानीति लोके च तत्तत्पवपूज्यो भ
वतीति संयोगान्तरं ३ उत्थानेन पुरुषकारेण प्रयतेथाः जयाद्यर्थं यतस्व दैवं प्राग्भवीयं कर्म देवताराधनादिकं वा केवलं

शृणु कार्त्स्न्येन मत्तस्त्वं राजधर्मान्युधिष्ठिर निरुच्यमानान्नियतो यच्चान्यदपि वाञ्छसि १ आ
दावेव कुरुश्रेष्ठ राज्ञा रञ्जनकाम्यया देवतानां द्विजानां च वर्तितव्यं यथाविधि २ दैवतान्यर्चयि
त्वा हि ब्राह्मणांश्च कुरूद्वह आनृण्यं याति धर्मस्य लोकेन च समर्च्यते ३ उत्थानेन सदा पुत्र प्रयते
था युधिष्ठिर न ह्युत्थानमृते दैवं राज्ञामर्थं प्रसाधयेत् ४ साधारणं द्वयं ह्येतद्दैवमुत्थानमेव
च पौरुषं हि परं मन्ये दैवं निश्चित्य मुच्यते ५ विपन्ने च समारम्भे संतापं मा स्म वै कृथाः घटस्वै
वं सदात्मानं राज्ञामेष परो नयः ६ न हि सत्यादृते किंचिद्राज्ञां वै सिद्धिकारकं सत्ये हि राजा निरतः
प्रेत्य चेह च नन्दति ७ ऋषीणामपि राजेन्द्र सत्यमेव परं धनं तथा राज्ञः परं सत्यान्नान्यद्विश्वास

उत्थानं विना न राज्ञोऽभीष्टमर्थं साधयेत् ४ साधारणं रथचक्रवत्समानं तत्रापि पौरुषं परं श्रेष्ठं दृष्टद्वारत्वात् दैवं तु फलाफलदाय
निश्चित्य मुच्यते अकरणदोषात्फलासिद्धौ फलसिद्धौ तु दुःखान्मुच्यते ५ विपन्ने इति घटस्व कर्षकवत्प्रयत्नं वै कल्पय यत्तस्यैव
वेत्यर्थः ६ नहीति सत्यात्सामन्तादयोऽपि विश्वासं भजन्ते अन्यथा विश्वासाभावात्स्वीया अपि द्विजन्ते तेषां अपि परेषां प्रार्थनया विजिगीषुत

शान्तिराजधर्मः ५४ ७ ॥

श्री॰
शां॰रा॰
टी॰
१०३

गुणाः शौर्यौदार्यगांभीर्यादयस्तद्वान् शीलं सदाचारस्तद्वान् दांतः अचपलः मृदुर्दयावान् धर्म्मो धर्मादनपेतः जितें॰
द्रियः जितचित्तः सुदर्शः प्रसन्नवक्त्रः स्थूललक्षः बहुप्रदः १८ आर्जवं अक्रूरवर्त्तं नयो नीतिः स्वरंध्रगोपनं परंध्रान्वेष
णं स्वस्वेन क्रियमाणस्य परेभ्यो गोपनं मंत्रगोपनं चेत्यादिः नययुक्तेन विचारेण ऊहापोहेन साधकबाधकोपन्यासेन क्रियमा

गुणवान् शीलवान् दांतो मृदुर्धर्म्मो जितेंद्रियः सुदर्शः स्थूललक्षश्च न भ्रश्येत सदा श्रियः १८
आर्जवं सर्वकार्येषु श्रयेथाः कुरुनंदन पुनर्नयविचारेण त्रयी संवरणेन च १९ मृदुर्हि राजा
सततं लंघ्यो भवति सर्वशः तीक्ष्णाच्चोद्विजते लोकस्तस्मादुभयमाचर २० अदंड्याश्चैव ते पुत्र
विप्राश्च ददतां वर भूतमेतत्परं लोके ब्राह्मणो नाम पांडव २१ मनुना चैव राजेंद्र गीतौ श्लो
कौ महात्मना धर्मेषु स्वेषु कौरव्य हृदि तौ कर्तुमर्हसि २२ अद्भ्योग्निर्ब्रह्मतः क्षत्रमश्मनो लोह
मुत्थितं तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति २३ अयो हंति यदाश्मानमग्निश्चापो निह
न्यते ब्रह्म च क्षत्रियो द्वेष्टि तदा सीदंति ते त्रयः २४ एवं कृत्वा महाराज नमस्या एव ते द्विजाः
भौमं ब्रह्म द्विजश्रेष्ठा धारयंति समर्चिताः २५ एवं चैव नरव्याघ्र लोकत्रयविघातकाः निग्रा
ह्या एव सततं बाहुभ्यां ये स्युरीदृशाः २६ ॥
णेन त्रयीसंवरणो उक्तविधनीतिरूपे आर्जवं यथार्थभाषित्वं च श्रयेथाः
१९ उभयं मृदुत्वं तीक्ष्णत्वं च समुच्चितं श्रेयः २० तत्रापि तीक्ष्णतायापवादमाह अदंड्या इति २१ २४ भौमं ब्रह्म वेदान्यत्तांश्च २५

...पर्वणि २४ ॥
१०३

२७ स्वधर्मेणशास्त्रोद्यमनेन निगृह्णीयादेवनतुहन्यात् २८ विनश्यमानंआततायिदोषात् तेनआततायिनिग्रहेण अ
निग्रहेतुधर्महास्यादेवजीवनतोस्यनिग्रहोऽङ्गःशाकश्चेनतत्राहमन्युस्तन्मन्युमृच्छति यथासूर्यांशुतप्तःस्फटिकस्तूलपिंडगृहीण्यन
तूष्मणास्वयंनश्यतिएवमाततायिक्रोधोऽन्यस्यगृहीण्यनतद्वाराऽततायिनमेवाश्रयदाहेनदहतिनात्रहंतुर्दोषइत्यर्थः २९ एवंचेति

श्लोकौचोशनसागीतौपुरातातमहर्षिणा ॥ तौनिबोधमहाराजत्वमेकाग्रमनान्तृप २७
उद्यम्यशस्त्रमायांतमपिवेदांतगंरणे निगृह्णीयात्स्वधर्मेणधर्मापेक्षीनराधिप २८ विन
श्यमानंधर्मंहियोभिरक्षेत्सधर्मवित् नतेनधर्महासःस्यान्मन्युस्तन्मन्युमृच्छति २९ एवंचैवनरश्रेष्ठ
रक्ष्याएवद्विजातयः सापराधानपिहितान्विषयांतेसमुत्सृजेत् ३० अभिशस्तमपिह्ये
षांकृपायीतविशांपते ब्रह्मघ्नेगुरुतल्पेचभ्रूणहत्येतथैवच ३१ राजद्विष्टेचविप्रस्यविषयां
तेविसर्जनं विधीयतेनशारीरंभयमेषांकदाचन ३२ दयिताश्चनरास्तेस्युर्भक्तिमंतोद्वि
जेषुये नकोशःपरमोऽप्यन्योराज्ञांपुरुषसंचयात् ३३ दुर्गेषुमहाराजषट्स्वयेशास्त्र
निश्चिताः सर्वदुर्गेषुमन्येतनरदुर्गंसुदुस्तरं ३४ तस्मान्नित्यंदयाकार्याचातुर्वर्ण्येविपश्चि
ता धर्मात्मासत्यवाक्चैवराजारंजयतिप्रजाः

यद्यप्येवंतथापिद्विजातयोब्राह्मणारक्ष्याएव ३० अभिशस्तंसताः
सतावादेषयुक्तंतथाप्यापितं ३१ शारीरंकषाघातादिदंडंक्लीवन्वमार्थं ३२ पुरुषसंचयात्ब्राह्मणाभक्तादितिपूर्वार्धार्थः ३३ षट्सु

श्री॰ पुनर्दण्डापवादमाह नचेति समंततः सर्वजातीयेषु अथमो धर्मविरोधी ३६ ३७ गजस्य क्षममाणस्य ३८ ३९ प्रत्यक्षेणापका
पुं॰ रा॰ रापकारादिना अनुमानेन नेत्रवक्त्रविकारादिना यथाकारैर्नेत्रवक्त्रविकारेणान्तर्गतं मन इति औपम्यं उपमानं अन्यत्र कार्यदर्श
टी॰ नेन आगमैः शास्त्रादिना सामुद्रिकलक्षणेन ते पुरुषाः परीक्ष्याः ४० व्यसनानि अष्टादश यथाह मनुः मृगयाक्षो दिवास्वप्नः प
९४ रिवादः स्त्रियो मदः तौर्यत्रिकं वृथाट्या च कामजो दशको गुणः तौर्यत्रिकं वाद्यगीतनृत्यानि पैशुन्यं साहसं द्रोह ईर्ष्यासूयार्थ

नचदण्डेन नेता नित्यं भाव्यं पुत्र समंततः अथमो हि नरो राजा क्षमावानिव कुञ्जरः ३७ क्ष
ममाणं नृपं नित्यं नीचः परिभवेज्जनः हस्तियन्ता गजस्येव शिर एवारुरुक्षति ३८ त
स्मान्नैव मृदुर्नित्यं तीक्ष्णो नैव भवेन्नृपः वासन्तार्क इव श्रीमान्न शीतो न च घर्मदः ३९
प्रत्यक्षेणानुमानेन तथौपम्यागमैरपि परीक्ष्यास्ते महाराज स्वे परे चैव नित्यशः ४० व्य
सनानि च सर्वाणि त्यजेथा भूरिदक्षिण न चैव न प्रयुञ्जीत संगं तु परिवर्जयेत् ४१ ॥

दूषणं वाग्दण्डजं च पारुष्यं क्रोधजो पि गुणो ष्टक इति तत्र च सप्त कष्टतमानि यथाह पानमक्षाः स्त्रियश्चैव मृगया च यथाक्रमं
एतत्कष्टतमं विद्याच्चतुष्कं कामजे गणे दण्डस्य पातनं चैव वाक्पारुष्यार्थदूषणे क्रोधजे पि गणे विद्यात्कष्टमेतत्त्रिकं सदेति न प्रयु ९४
जीतेति न आश्रयेत सर्वदा ४१ ॥

व्यसनीव्यसनंमृगयाद्याः स्त्रियः पानंवत्तद्वान् अतिद्वेषीप्रजाद्रोहपरः ४२ ४३ प्रियमिष्टं ४४ ४५ नेत्यस्यास्पष्टःप्रख्यातो
दंडः रथहस्तिपुरुषादिसमूहोयस्यतस्यस्पष्टदंडस्य ४६ ४७ संहर्षात् अतिसंश्लेषात् ४८ विकल्पन्तेकार्यसंशयंदर्शयंति गु

लोकस्यव्यसनीनित्यंपरिभूतोभवत्युत उद्वेजयतिलोकंचयोतिद्वेषीमहीपतिः भवितव्यंस
दाराज्ञागर्भिणीसहधर्मिणा कारणंचमहाराजशृणुयेनेदमिष्यते ४३ यथाहिगर्भिणीहि
त्वास्वंप्रियंमनसोनुगं गर्भस्यहितमाधत्तेतथाराज्ञाप्यसंशयं ४४ वर्तितव्यंकुरुश्रेष्ठसदाधर्मा
नुवर्तिना स्वंप्रियंतुपरित्यज्ययद्यल्लोकहितंभवेत् ४५ नसंत्याज्यंचतेधैर्यंकदाचिदपिपाण्डव
धीरस्यस्पष्टदंडस्यनभयंविद्यतेक्वचित् ४६ परिहासश्चभृत्यैस्तेनात्यर्थंवदतांवर कर्तव्योराज
शार्दूलदोषमत्रहिमेशृणु ४७ अवमन्यन्तेभर्तारंसंहर्षादुपजीविनः स्वेस्थानेनचतिष्ठंति
चतत्वतः ४८ प्रेष्यमाणाविकल्पन्तेगुह्यंचाप्यनुयुंजते अयाच्यंचैवयाचन्तेभोज्यान्याहा
रयंतिच ४९ क्रुध्यंतिपरिदीप्यंतिभूमिपायापितिष्ठते उत्कोचैर्वंचनाभिश्चकार्याण्यनु
विघ्नंतिच ५० जर्जरंचास्यविषयंकुर्वंतिप्रतिरूपकैः स्त्रीरक्षिभिश्चसज्जंतेतुल्यवेशाभ
वंतिच ५१ वातंनिष्ठीवनंचैवकुर्वतेचास्यसन्निधौ निर्लज्जाराजशार्दूलव्याहरंतिचतद्वचः

ह्यंगोप्यमपिच्छिद्रंअनुयुंजतेप्रकटयंतिभोज्यानिराजयोग्यान्याहारयंतिभक्षयंति ४९ उत्कोचैर्लंचाभिः वंचनाअलीकगुणदोषादिदर्शनं
अनुविघ्नंतिविनिघ्नंति ५० प्रतिरूपकैः कृत्रिमैः शासनपत्रैः विषयंदेशंजर्जरंतितःसारं स्त्रीरक्षिभिः सज्जंतेप्रीतिंकुर्वंति अन्तःपुरप्रवेशा
मिच्छंति ५१ वातंजृंभादिना निष्ठीवनंथूत्कारं तद्वचः राजवाक्यंगुह्यमपिलोकेव्याहरंति ५२ ॥

श्री॰ हर्षुलेपविहासशीले ५३ ५४ विस्रंसयंतिभेदयंति ५६ हेलनानिकुर्वंतितिशेषः उपस्थापवतः स्थापवंतमनादृत्य स्वस्थाः निर्भयाः
शां॰ रा॰ ५७ राजदेयंराजभागं ५८ क्रीडितुंराज्ञासहस्रगयादिक्रीडाकर्तृंससूत्रेणावद्धेनपक्षिणाशयेनेन राज्ञोतिरोधकाश्चयर्थः प्रेणे
टी॰
९५

हयंवादंतिनंवापिरथंवान्रपसंमतं अधिरोहत्यनादृत्य हर्षुलेपार्थिवेसदा ५३ इदंतेऽद्यक्ष
रंराजन्निदंतेऽद्यचेष्टितं अप्येवंसहृदोवाचंवदंतिपरिषद्गताः ५४ क्रुद्धेचास्मिन्हसंत्येवनच
हृष्यंतिपूजिताः संहर्षशीलाश्चतदाभवंत्यन्योन्यकारणात् ५५ विस्रंसयंतिमंत्रंचविवृण्वं
तिचदुष्कृतं लीलयाचैवकुर्वंतिसावज्ञास्तस्यशासनं ५६ अलंकारेचभोज्येचतथास्नाना
नानुलेपने क्रियमाणेनरव्याघ्रस्वस्थास्तस्योपस्थापवतः ५७ निंदंतेस्वानधीकारान्संत्यजंते
चभारत नवृत्त्यापरितुष्यंतिराजदेयंहरंतिच ५८ क्रीडितुंतेनचेच्छंतिससूत्रेणेवपक्षिणा
अस्मत्प्रणेयोराजेतिलोकांश्चैववदंत्युत ५९ एतेचैवापरेचैवदोषाःप्रादुर्भवंत्युत नृप
तौमार्दवोपेतेहर्षुलेचयुधिष्ठिर ६० इतिश्रीमहाभारतेशांतौराजधर्मेषु ५६ ॥

यःस्वास्थ्यः ५९ अपरेदोषापहासादयः ६० इतिषट्पंचाशत्तमोऽध्यायः ५६ ॥ ९५

अस्यैवाख्यायस्य हृत्त्वभूतस्य उन्नरोग्रंथोहत्तिं नृपः तत्र उत्थानेन तयते थाशन्युक्तं तद्धिहणोतिनित्योपेति १ यतः श्लोकं आह ततः तस्मात्तं
श्लोकं निबोध २ अप्रवासिनं वेदाध्ययनार्थं ब्राह्मणं अयतिं वा ३ विरोधयय पर्वतादीनेषां विशेषेणरोधं कुरु ४ सप्तस्वाम्यमात्या

भीष्म उवाच नित्योद्युक्तेन वै राज्ञा भवितव्यं युधिष्ठिर प्रशाम्यते च राजा हि नारीवोद्यमवर्जि
तः १ भगवानुशना चाह श्लोकमत्र विशांपते तदिहैकमना राजन्गदतः सन्निबोध मे २ द्वा
विमौ ग्रसते भूमिः सर्पो बिलशयानिव राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनं ३ तदेतन्न
रशार्दूल हृदि त्वं कर्तुमर्हसि संधेयानपि संधत्स्व विरोध्यांश्च विरोधय ४ सप्ताङ्गस्य च राज्य
स्य विपरीतं य आचरेत् गुरुर्वा यदि वा मित्रं प्रतिहन्तव्य एव सः ५ मरुत्तेन हि राज्ञा वै गीतः श्लो
कः पुरातनः राज्याधिकारे राजेन्द्र बृहस्पतिमते पुरा ६ गुरोरप्यवलिप्तस्य कार्याकार्यम
जानतः उत्पथं प्रतिपन्नस्य दण्डो भवति शाश्वतः ७ बाहोः पुत्रेण राज्ञा च सगरेण च धीमता
असमञ्जाः सुतो ज्येष्ठस्त्यक्तः पौरहितैषिणा ८ असमञ्जाः सरय्वां सपौराणां बालकान्नृप
न्यमज्जयदतः पित्रा निर्भर्त्स्य स विवासितः ९ ऋषिणोद्दालकेनापि श्वेतकेतुर्महातपाः मि
थ्या विप्रानुपचरन्संत्यक्तो दयितः सुतः ९ ॥

सप्ताङ्गस्य विपरीतं यस्य
सुहृत्कोशराष्ट्रदुर्गबलानि अङ्गानि यस्य तस्य
कस्यचिदङ्गस्य प्रतिकूलं ५ ६ शाश्वतः अप्रतिसमाधेयः पर्वतारोहणादिर्दण्डः अन्यस्य तत्र वयप्व ७ ८ ९ ॥

श्री॰
शां॰रा॰
टी॰
९६

११ हिंस्यात् करार्थं देवेषु धान्यानि हस्त्यादिना न नाशयेत् देयं भृत्यानां वेतनं विक्रान्तः पराक्रमी क्षान्तः क्षमावा
न् पथः शुभमार्गात् १२ आत्मवान् जितचित्तः शास्त्रार्थकृतनिश्चयः निःसंदेहः सततं नित्यं पूर्वोक्तो धर्मः सत्याकः ऽर्थ
अपराह्णे कामं अपररात्रे योगं चेति नित्यं सर्वानपि सेवेत १३ वृजिनं संकटं अरक्षणात् मन्त्रस्यागोपनादन्यन्नास्ति १४ य
र्णानां संकरो व्यत्ययः तस्मात्प्रजानां रक्षा धर्मसंकररक्षा १५ न विश्वसेत् चात् विश्वसेदपि आप्तेषु तेष्वपि अत्यर्थं न वि

लोकरंजनमेवात्र राज्ञां धर्मः सनातनः सत्यस्य रक्षणं चैव व्यवहारस्य चार्जवं ११ न हिं
स्यात् परवित्तानि देयं काले च दापयेत् विक्रान्तः सत्यवाक् क्षान्तो नृपो न चलते पथः १२ आ
त्मवांश्च जितक्रोधः शास्त्रार्थकृतनिश्चयः धर्मे चार्थे च कामे च मोक्षे च सततं रतः १३ त्रय्यां सं
वृतमन्त्रश्च राजा भवितुमर्हति वृजिनं च नरेन्द्राणां नान्यच्च परिरक्षणात् १४ चातुर्वर्ण्यस्य धर्मा
श्च रक्षितव्या महीक्षिता धर्मसंकररक्षा च राज्ञां धर्मः सनातनः १५ न विश्वसेच्च नृपतिर्न चात्य
र्थं च विश्वसेत् षाड्गुण्यगुणदोषांश्च नित्यं बुद्ध्यावलोकयन् १६ ॥

स्वसे षण्णां गुणानां भावः षाड्गुण्यं ते च बलवति स्थायिनि यायिनः संधिः समबले विग्रहो युद्धादिः दुर्बले यानेन तदीय दुर्गाद्या
क्रमणं एवं स्थायिनः बलवति यायिनः बलवति यायिनि आसनं दुर्गादावेव स्वरक्षणं मध्यमे द्वैधीभावः अर्द्धेन दंडेन दुर्गाश्र
यणं अर्द्धेन परेषां धान्यादि निरोधनं दुर्बलस्य समाश्रयं मित्रान्तरमाश्रित्य तेन सह युद्धं कर्तव्यं एतेषु कर्तव्येषु गुणान् जयावहा
न् दोषान् पराजयावहांश्च अर्थान् कोशदंडादि पोषकत्वादीन् स्वबुद्ध्या स्वयमेव निश्चिनुयात् १६ ॥ ९६

छिद्रः शत्रोः सप्तस्वराज्याङ्गेषु स्वप्रवेशद्वारशैथिल्यं तत् छिद्रं छिद्रं एवं स्वस्य सप्तस्वराज्याङ्गेषु यत् परप्रवेशद्वारशैथिल्यं तत् परच्छिद्रं छिद्रं छिद्रदर्शी स्यात् एतच्च स्वच्छिद्रगोपनस्याप्युपलक्षणं त्रिवर्गे धर्मादौ विदितार्थः ज्ञाततत्त्वः युक्ताचारः प्रच्छन्नस्पशः उपधिः परकीयानाममात्यादीनामुत्कोचदानादिना भेदनं चैयेन सम्प्रयुक्तचारोपधिः तत्र चारनियोजनस्थानान्युक्तानि नीतिशास्त्रे मन्त्री पुरोहितश्चैव युवराजश्च भूपतिः पञ्चमो द्वारपालश्च षष्ठोऽन्तर्वंशिकस्तथा कारागाराधिकारी च द्रव्यसंचयकृत्तथा कृत्याकृत्येषु चार्थानां नवमो विनियोजकः प्रदेष्टा नगराध्यक्षः कार्यनिर्माणकृत्तथा धर्माध्यक्षः सभाध्यक्षो दण्डपा

छिद्रच्छिद्रदर्शी नृपतिर्नित्यमेव प्रशस्यते त्रिवर्गविदितार्थश्च युक्तचारोपधिश्च यः ७ कोशस्योपार्जनरतिर्यमवैश्रवणोपमः वेत्ता च गुणदोषस्य स्थानवृद्धिक्षयात्मनः ८ अभक्तानां भवेद्भर्त्ता भक्तानामन्ववेक्षकः नृपतिः सुमुखश्च स्यात् स्मितपूर्वाभिभाषिता ९ उपासिता च वृद्धानां जितन्द्रिरलोलुपः सत्ताह्यतेस्थितमतिः सततोद्याचारदर्शीनः १० ॥

लश्चित्रिपंचमः षोडशो दुर्गपालश्च तथा राष्ट्रान्तपालकः अटवीपालकान्तानि तीर्थान्यष्टादशैव तु चारान्विचारयेत्तीर्थेष्वात्मनश्च परस्य च पाषण्डादीनविज्ञातानन्योन्यमितरेष्वपि मन्त्रिणं युवराजं च हित्वा स्वेषु पुरोहितमिति ७ दशवर्गः अमात्यराष्ट्रदुर्गाणि कोशो दण्डश्च पञ्चमः इति प्रकृतिपञ्चकं स्वपक्षे परपक्षे चेति दशको वर्गः स च उभयोः साम्यं स्थानं स्थितिस्तत्कर्त्ता स्वस्याधिक्ये वृद्धिकर्त्ता परस्याधिक्ये क्षयकर्त्ता ८ ९ १० ॥

श्री॰
शां॰ रा॰
टी॰
९७

२१ २२ शूरानसंहार्यानकार्यादिति तृतीयेनान्वयः असंहार्यान्परैरप्रतार्यान् शिष्टाभिसंबंधान् शिष्टपरिवारान् अनवमानिनः अवमानंपरस्याकुर्वतः २३ अचलान् स्थिरान् अचलानिव पर्वतानिव २४ छत्रमात्रेणासहितायाआज्ञा इदमित्थंकुरु इदंनेति

न चाददीत वित्तानि सतां हस्तात्कदाचन असद्भ्यश्च समादद्यात्सद्भ्यस्तु प्रतिपादयेत् २१ स्वयं प्रहर्ता दाता च वश्यात्मा रम्यसाधनः काले दाता च भोक्ता च शुद्धाचारस्तथैव च २२ शूरान्भक्तानसंहार्यान्कुले जातानरोगिणः शिष्टान्शिष्टाभिसंबंधान्मानिनोऽनवमानिनः २३ विद्याविदो लोकविदः परलोकान्ववेक्षकान् धर्मे च निरतान्साधूनचलानचलानिव २४ सहायान्सततं कुर्याद्राजाभूतिपरिष्कृतः तैश्चतुल्यो भवेद्भोगैश्छत्रमात्राज्ञयाधिकः २५ प्रत्यक्षा च परोक्षा च वृत्तिश्चास्य भवेत्समा एवं कुर्वन्नरेन्द्रोपि नखेदमिह विन्दति २६ सर्वाभिशंकी नृपतिर्यश्च सर्वहरो भवेत् स क्षिप्रमनृजुर्लुब्धः स्वजनेनैव बध्यते २७ शुचिस्तु पृथिवीपालो लोकचित्तग्रहे रतः न पतत्यरिभिर्ग्रस्तः पतितश्चावतिष्ठते २८ अक्रोधनोह्यव्यसनी मृदुदंडो जितेन्द्रियः राजाभवति भूतानां विश्वास्यो हिमवानिव २९ ॥

तया॰ धिकः अन्यत्सर्वंशूरैःसमानंभुंजीत २५ इयंचशूरेषुराज्ञोवृत्तिःप्रत्यक्षापरोक्षाचभवेत्सन्निहितेष्वसन्निहितेष्वप्यातुल्यास्यादित्यर्थः २६ सर्वाभिशंकीसर्वत्राहतविश्वासः सर्वहरः सर्वस्वापहारीअनृजुःअन्यतापराधारोपकृत् यतोलुब्धः २७ ॥ ९७

३० ३४ असंघातरताःसंघातेशरीरेप्रीतिमंतोनभवंतिकिंतुनतत्साध्येयधर्मेप्रवेत्यर्थः ३५ नेयाः विनेतुंयोग्याः सं
घर्षःपराभिभवस्तच्छीलिनोन ३६ कूटंदंभःकपटंअन्तरंमत्सरःपरोत्कर्षासहिष्णुत्व ३७ ज्ञानातिज्ञानयुक्ता
प्राज्ञस्त्यागगुणोपेतःपररंध्रेषुतत्परः स्वदर्शीःसर्ववर्णानांनयापनयविज्ञथा ३० द्विप्रकारी
जितक्रोधःस्वप्रसादोमहामनाः अरोषप्रकृतिर्युक्तःक्रियावानविकत्थनः ३१ आरब्धान्येव
कार्याणिसुपर्यवसितानिच यस्यराज्ञःप्रदृश्यंतेसराजाराजसत्तमः ३२ पुत्राइवपितुर्गेहेविष
येयस्यमानवाः निर्भयाविचरिष्यंतिसराजाराजसत्तमः ३३ अगूढविभवायस्यपौराराष्ट्रनिवा
सिनः नयापनयवेत्तारःसराजाराजसत्तमः ३४ स्वकर्मनिरतायस्यजनाविषयवासिनःअ
संघातरतादांताःपाल्यमानायथाविधि ३५ वश्यानेयाविधेयाश्चनचसंघर्षशीलिनः वि
षयेदानरुचयोनरायस्यसपार्थिवः नयस्यकूटकपटंनमायानचमत्सरः विषयेभूमिपाला
स्यतस्यधर्मःसनातनः ३७ यःसत्करोतिज्ञानानित्तेयेपौरहितेरतः सतांवर्त्मानुगस्त्यागीसरा
जाराज्यमर्हति यस्यचाराश्चमंत्राश्चनित्यंचैवकृताकृताः नज्ञायंतेद्विषिपुभिःसराजाराज्यमर्ह
ति ३९ श्लोकश्चापिपुरागीतोभार्गवेणमहात्मना आख्यानेरामचरितेनृपतिंप्रतिभारत ४० राजा
नंप्रथमंविंदेत्ततोभार्यांततोधनं राजन्यसतिलोकस्यकुतोभार्याकुतोधनं ४१ ॥
नपंडितान् तेयेशास्त्रार्थपरस्यहितावहेरताः नतुहिंसामयत्यागीदाता ३८ कृताअप्यकृताकृताः ३९ ४० प्रथमंश्रेष्ठं

राजनीतिः ५९ ॥

४२ रक्षैवरक्षतः कर्मनामअकुर्वन्राजात्याज्यइत्याहप्राचेतसइति ४३ ४४ सप्तपंचाशत्तमोध्यायः ५७ एतत्रक्षणं नवनी
तवत्सर्वधर्मसारं न्याय्यंन्यायादनपेतं १२३ अत्ररक्षणेसाधनंयुक्तिं ४ चारोगुप्तस्पशःप्रणिधिःप्रकटस्पशः दानंभा-

तद्राज्येराज्यकामानांनान्योधर्मःसनातनः ऋतेरक्षांतुविस्पष्टांरक्षालोकस्यधारिणी ४२ प्राचे
तसेनमनुनाश्लोकौचेमावुदाहृतौ राजधर्मेषुराजेंद्रताविहैकमनाःशृणु ४३ षडेतान्पुरुषोजह्या
द्भिन्नांनावमिवार्णवे अप्रवक्तारमाचार्यमनधीयानमृत्विजं ४४ अरक्षितारंराजानंभार्यांचाप्रिया
वादिनीं ग्रामकामंचगोपालंवनकामंचनापितं ४५ इतिश्रीमहाभारतेशांतौराजधर्मेषु ५७
भीष्मउ॰ एतत्तेराजधर्माणांनवनीतंयुधिष्ठिर बृहस्पतिर्हिभगवान्नान्यंधर्मंप्रशंसति १ विशा
लाक्षश्चभगवान्काव्यश्चैवमहातपाः सहस्राक्षोमहेंद्रश्चतथाप्राचेतसोमनुः २ भरद्वाजश्चभग
वान्तथागौरशिरामुनि राजशास्त्रप्रणेतारोब्रह्मण्याब्रह्मवादिनः ३ रक्षामेवप्रशंसंतिधर्मंध
र्मभृतांवर राज्ञोराजीवताम्राक्षसाधनंचात्रमेशृणु ४ चारश्चप्रणिधिश्चैवकालेदानममत्स
रात् युक्त्यादानंनचादानमयोगेनयुधिष्ठिर ५ सतांसंग्रहणंशौर्यंदाक्ष्यंसत्यंप्रजाहितं अ
नार्जवैरार्जवैश्चशत्रुपक्षस्यभेदनं ६ ॥

क्तवेतनयोःयुक्तेःआदानं अयोगेनअनुपायेनआदानंकरग्रहणंनच ५ ६ ॥ ९८

केतनानां गृहादीनां द्विविधस्य शारीरदंडो ऽर्थदंडश्चेति भेदात् ७ निचयानां संग्राह्याणां धान्यादीनां निचयः संग्रहः ८ ९
अविश्वासो ग्रामिकादीनामपि पौराणां संघातस्य परैर्वाणिज्यादिच्छलेन वशीकृतस्य भेदनं १० उपजापः परैः स्वभृत्यानां

केतनानां च जीर्णानामवेक्षा चैव सीदतां द्विविधस्य च दंडस्य प्रयोगः कालचोदितः ७ साधूनामपा
रित्यागः कुलीनानां च धारणं निचयश्च निचयानां सेवा बुद्धिमतामपि ८ बलानां हर्षणं नित्यं
प्रजानामन्ववेक्षणं कार्येष्वखेदः कोशस्य तथैव च विवर्द्धनं ९ पुरगुप्तिरविश्वासः पौरसंघातभेद
नं अरिमध्यस्थमित्राणां यथावच्चान्ववेक्षणं १० उपजापश्च भृत्यानामात्मनः पुरदर्शनं अविश्वा
सः स्वयं चैव परस्याश्वासनं तथा ११ नीतिधर्मानुसरणं नित्यमुत्थानमेव च रिपूणामनवज्ञानं
नित्यं चानार्यवर्जनं १२ उत्थानं हि नरेन्द्राणां बृहस्पतिरभाषत राजधर्मस्य तन्मूलं श्लोकांश्चात्र
निबोध मे १३ उत्थानेनामृतं लब्धमुत्थानेनासुरा हताः उत्थानेन महेन्द्रेण श्रैष्ठ्यं प्राप्तं दिवीह
च १४ उत्थानवीराः वाग्वीरान् रमयन्त उपासते उत्थानवीरः पुरुषो वाग्वीरानधितिष्ठति उत्था
नहीनो राजा हि बुद्धिमानपि नित्यशः धर्षणीयः शत्रूणां भुजंग इव निर्विषः १६ न च शत्रुरवज्ञे
यो दुर्बलोपि बलीयसा अल्पोपि हि दहत्यग्निर्विषमल्पं हिनस्ति च १७

भेदनं अविश्वासः भृत्यानामेव ११ उत्थानं
उद्योगः अनार्यहीनकर्मकदर्यत्वादित्तद्वर्जनं ११ १२ १४ वाग्वीरान् पंडितान् उत्थानमेव महत्वापादकमिति पर्यः १५ १६ १७ ॥

श्री·
शां·रा·
टी·
९९

एकांगेनहस्त्यश्वरथपादातानामन्यतमेनापिसंभूतःसम्पन्नः सहद्धिनःसमृद्धिमतः १८ स्वीयेनआर्जवेनयत्रहस्यंवाक्यंयोवा।
जयार्थंलोकसंग्रहः यच्चास्यकारणेनशत्रुजयादिहेतुनाजिह्मंकपटंयच्चवृजिनंहीनंकार्यंतत्सर्वंसमीकुर्यादित्याहद्वाभ्यां।

एकांगेनापिचोद्भूतःशत्रुर्दुर्गमुपाश्रितः सर्वंतापयतेदेशमपिराज्ञःसमृद्धिनः १८ राज्ञोरहस्यं
तयद्वाक्यंयथार्थंलोकसंग्रहः हृदियच्चास्यजिह्मंस्यात्कारणेनचयद्भवेत् १९ यच्चास्यकार्यं
वृजिनमार्जवेनेहनिर्जयेत् दंभनार्थंचलोकस्यधर्मिष्ठामाचरेत्क्रियां २० राज्यंहिसुमहत्तंत्रं
धार्यतेनाकृतात्मभिः नशक्यंमृदुनावोढुमायासस्थानमुत्तमं २१ राज्यंसर्वामिषंनित्यमार्जवेने
हधार्यते तस्मान्मिश्रेणसततंवर्तितव्यंयुधिष्ठिर २२ यद्यप्यस्यविपत्तिःस्याद्रक्षमाणस्यवैप्र
जाः सोप्यस्यविपुलोधर्मएवंहिनृपतेर्भवेत् भूमिपाः २३ एषतेराजधर्माणांलेशःसमनुवर्तितः भूयः
स्तेयत्रसंदेहस्तद्ब्रूहिकुरुसत्तम २४ वैशंपायनउ· ततोव्यासश्चभगवान्देवस्थानोश्मएवच वासु
देवःकृपश्चैवसात्यकिःसंजयस्तथा २५ साधुसाध्वितिसंहृष्टाःपुष्यमाणैरिवाननैः अस्तुवंस्तेन
रव्याघ्रंभीष्मंधर्मभृतांवरं २६ ततोदीनमनाभीष्ममुवाचकुरुसत्तमः नेत्राभ्यामश्रुपूर्णाभ्यांपादौत
स्यशनैःस्पृशन् २७ श्वइदानींस्वसंदेहंप्रक्ष्यामित्वांपितामह उपैतिसविताप्यस्तंरसमापीयपार्थिवं २८

तइति ४४ दंभनार्थंसंख्यानार्थं २० अकृतात्मभिःक्रूरैः २१ मिश्रेणक्रौर्यमार्दवाभ्यां २२ २४ २६ २७ २८ ॥

९९

२९ ३० अष्टपंचाशत्तमोध्यायः ५८ ततःकल्यमित्यध्यायोदंडनीतिशास्त्रस्यराजत्वस्यचउत्पत्तिंवक्तुंप्रवर्त्तते कल्यंप्रातः १४ मात्र

ततोद्विजातीनभिवाद्यकेशवः कृपश्चतेचैवयुधिष्ठिरादयः प्रदक्षिणीकृत्यमहानदींततस्ततेर
थानारुरुहुर्मुदान्विताः २९ दृषद्वतीमाप्यवगाह्यसुव्रताः कृतोदकार्थाःकृतजप्यमंगलाः उपा
स्यसंध्यांविधिवत्परंतपास्ततःपुरंतेविविशुर्गजाह्वयं ३० इतिश्रीमहाभारतेशांतौराजधर्मेषु ५८
वैशंपायनउ० ततःकल्यंसमुत्थायकृतपौर्वाह्णिकक्रियाः ययुस्तेनगराकारैरथैःपांडवयादवाः
१ प्रतिपद्यकुरुक्षेत्रंभीष्ममासाद्यचानघं सुखांचरजनींपृष्ट्वागांगेयंरथिनांवरं २ व्यासादीनभि
वाद्यर्षीन्सर्वैस्तैश्चाभिनंदिताः निषेदुरभितोभीष्मंपरिवार्यसमंततः ३ ततोराजामहातेजा
धर्मराजोयुधिष्ठिरः अब्रवीत्प्रांजलिर्भीष्मंप्रतिपूज्ययथाविधि ४ युधिष्ठिरउ० यएषराजन्
राजेतिशब्दश्चरतिभारत कथमेषसमुत्पन्नस्तन्मेब्रूहिपरंतप ५ तुल्यपाणिभुजग्रीवस्तुल्य
बुद्धींद्रियात्मकः तुल्यदुःखसुखात्माचतुल्यपृष्ठभुजोदरः ६ तुल्यशुक्रास्थिमज्जाच
तुल्यमांसासृगेवच निश्वासोच्छ्वासतुल्यश्चतुल्यप्राणशरीरवान् ७ समानजन्ममरणः
समः सर्वैर्गुणैर्नृणां विशिष्टबुद्धीन्शूरांश्चकथमेकोधितिष्ठति

घत्वेसमानेपिकिंनिमित्तेयंएकस्मिन्निग्रहानुग्रहशक्तिरितिपृच्छतियएषइत्यादिना ५ ६ ७ ८ ॥

श्री॰
शां॰ रा॰
टी॰
११

१३ दण्डः दमनं दाण्डिको दण्डप्रणेता १४ धर्मेणैव नतुमात्स्यन्त्वेदेन मत्स्यवद्धेततेनेनवा खेदं श्रमं मोहो वैचित्यं १५ प्रतिपत्ति
विमोहात् ज्ञानलोपात् १६ प्रथमं ज्ञानलोपः ततो मोहः ततो लोभः लोभाद्विषयाभिलाषः अभिलषितसंयोगादिन्द्रियप्रीत्यास्वेः

कथमेको महीं कृत्स्नां शूरवीरार्यसंकुलां बहुत्वेपि च लोकोस्य प्रसादमभिवाञ्छति ९ एकस्य तु प्र
सादेन कृत्स्नो लोकः प्रसीदति व्याकुले चाकुलः सर्वो भवतीति विनिश्चयः १० एतदिच्छाम्यहं श्रो
तुं तत्त्वेन भरतर्षभ कृत्स्नं तन्मे यथातत्त्वं प्रब्रूहि वदतां वर ११ नैतत्कारणमल्पं हि भविष्यति वि
शांपते यदेकस्मिन् जगत्सर्वं देववद्याति सन्नतिं १२ भीष्म उ॰ नियतस्त्वं नरव्याघ्र शृणु सर्वम
शेषतः यथा राज्यं समुत्पन्नमादौ कृतयुगेभवत् १३ नैव राज्यं न राजासीन्न च दण्डो न दाण्डिकः ध
र्मेणैव प्रजाः सर्वा रक्षन्ति स्म परस्परं १४ पाल्यमानास्तथान्योन्यं नरा धर्मेण भारत खेदं परमुपा
जग्मुस्ततस्तान्मोह आविशत् १५ ते मोहवशमापन्ना मनुजा मनुजर्षभ प्रतिपत्तिविमोहाच्च धर्म
स्तेषामनीनशत् १६ नष्टायां प्रतिपत्तौ च मोहवश्या नरास्तथा लोभस्य वशमापन्नाः सर्वे भरत
सत्तम १७ अप्राप्तस्याभिमर्षं तु कुर्वन्तो मनुजास्ततः कामो नामापरस्तत्र प्रत्यपद्यत वै प्रभो १८ तां
स्तु कामवशं प्राप्तान् रागो नामाभिसंस्पृशत् रक्ताश्च नाभ्यजानन्त कार्याकार्यं युधिष्ठिर १९ ॥ ११

ततस्तद्विषये रागः रागात्कर्तव्याकर्तव्यप्रतिपत्तिशून्यत्वं ततः पुनर्मोह इत्यादि चक्रमाह नष्टायामिति त्रिभिः १७ १८ १९ ॥

नात्यजन्निदमदर्हं चसर्वंस्वीचक्रुरित्यर्थः २० ब्रह्मवेदः धर्मोयज्ञः २१ २४ मर्त्यैः समतांयाताः स्वस्वाहाद्यभावेनक्षीणाः स्मइत्यर्थः २५ नराः यजमानाः हविर्धाराभिरूर्ध्वप्रवर्षिणः ततश्चान्नाभावान्नश्यामइत्यर्थः २६ नोऽस्माकं स्वभावपेक्ष

अगम्यागमनंचैववाच्यावाच्यंतथैवच भक्ष्याभक्ष्यंचराजेन्द्रदोषादोषंचनात्यजन् २० वि
प्लुतेनरलोकेवैब्रह्मचैवननाशह नाशाच्चब्रह्मणोराजन्धर्मोनाशमथागमत् २१ न
ष्टेब्रह्मणिधर्मेचदेवास्त्रासःसमाविशन् तेत्रस्तानरशार्दूलब्रह्माणंशरणंययुः २२ प्रसा
ते द्यभगवंतंतेदेवंलोकपितामहं ऊचुःप्रांजलयःसर्वेदुःखवेगसमाहताः २३ भगवन्नरलो
कस्थंग्रस्तंब्रह्मसनातनं लोभमोहादिभिर्भावैस्ततोनोभयमाविशत् २४ ब्रह्मणश्चप्र
णाशेनधर्मोप्यनशदीश्वर ततःस्मसमतांयातामर्त्यैस्त्रिभुवनेश्वर २५ अधोहिवर्षमस्माकंनरा
स्तूर्ध्वप्रवर्षिणः क्रियाव्युपरमात्तेषांततोगच्छामसंशयं २६ अत्रनिःश्रेयसंयन्नस्तद्ध्यायस्वपिता
मह त्वत्प्रभावसमुत्थोसौस्वभावोनोविनश्यति २७ तानुवाचसुरान्सर्वान्स्वयंभूर्भगवांस्ततः
श्रेयोहंचिंतयिष्यामिव्येतुवोभीःसुरर्षभाः २८ ततोध्यायसहस्राणांशतंचक्रेस्वबुद्धिजं यत्र =
धर्मस्तथैवार्थःकामश्चैवाभिवर्णितः २९ त्रिवर्गइतिविख्यातोगणएषस्वयंभुवा चतुर्थोमो भं
क्षइत्येवपृथगर्थःपृथग्गुणः ३० ॥

र्यसत्यसंकल्पत्वादिकं २७ २९ पृथगर्थः त्रिवर्गफलापेक्षयाविपरीतफलः पृथग्गुणः त्रिवर्गसाधनापेक्षयाविपरीतसाध ङ्क

श्री॰ मोक्षस्य त्रिवर्गो धर्मादिरन्यो निष्कामः धर्मादेर्भेदश्च सत्त्वादिगुणप्राधान्यनिमित्त इत्यर्थः दण्डात् स्थानं साम्यं वाणिज्यं वृद्धिस्तप
शां॰ रा॰ स्विनां क्षयश्चोराणां च भवतीत्याहार्द्धेन स्थानमिति ३१ नीतिजान् षड्गुणानाहात्मेति आत्मा चित्तं नीतिबलात् प्रजानां
टी॰ चित्तं दुःस्थितमपि सुस्थितं भवति कुदेशोऽपि सुदेशो भवति कलिरपि कृतं भवति उपायाः साधनानि कृत्यं कृतिनिर्दिष्टसंप्रा
१११ योजनं सहायाः सुहृदादयः एते सर्वेऽपि विकला भवंति तत्र कारणं नीतिजः षड्वर्गो नीतिप्रोक्तं मित्रस्त्रिचत्वादिरित्यर्थः ३२ त्रयीक

मोक्षस्यापि त्रिवर्गोऽन्यः प्रोक्तः सत्त्वं रजस्तमः स्थानं वृद्धिः क्षयश्चैव त्रिवर्गश्चैव दण्डजः ३१ आ
त्मा देशश्च कालश्चाप्युपायाः कृत्यमेव च सहायाः कारणं चैव षड्वर्गो नीतिजः स्मृतः ३२ त्र
यी चान्वीक्षिकी चैव वार्त्ता च भरतर्षभ दण्डनीतिश्च विपुला विद्यास्तत्र निदर्शिताः अमात्यव
ताप्रणीधी राजपुत्रस्य लक्षणं चारश्च विविधोपायः प्रणिधेयः पृथग्विधः ३४ सामभे
दः प्रदानं च ततो दण्डश्च पार्थिव उपेक्षा पंचमी चात्र कार्त्स्न्येन समुदाहृता ३५ मन्त्रश्च वा
र्णितः कृत्स्नस्तथा भेदार्थ एव च विभ्रमश्चैव मन्त्रस्य सिद्ध्यसिद्ध्योश्च यत्फलं ३६ ॥

मेकांडः आन्वीक्षिकी ज्ञानकांडः वार्त्ता कृषिवाणिज्यादिजीविकाकांडः दण्डनीतिः पालनविद्या एते धर्मादयस्तत्र ब्रह्मणा
प्रोक्तसहस्राध्याये दर्शिता ३३ दर्शकयात्रमात्यानामपि रक्षा कर्तव्या तदर्थं प्रणिधिः गुप्तचारः स च चारो विविधोपायः ब्रह्मचर्यादिवेष
धारी प्रणिधेयः पृथग्विधः एकैकस्मिन् स्थाने पृथक् पृथग् वेषा त्रयस्त्रय इति ३४ सामादि चतुष्टयं उपेक्षा च पंचमीत्युपायाः ३५ वि १११

भयेन संधिर्हीनः सत्कारेण मध्यमः वित्तग्रहणेनोत्तमः ततस्त्रयं संधिकारणं वर्णितं ३७ चत्वारः मित्रवृद्धिः कोशसंचयश्च बलस्य
मित्रनाशः कोशहानिश्च परस्येति ३८ आसुरो विजयः सौप्तिकेयानः पंचवर्गः अमात्यराष्ट्रदुर्गाणि बलं कोशश्च पंचमः त्रिविधः
उत्तममध्यमाधमभेदेन ३९ दंडः सेना ४० विष्टिर्विष्टिगृहीताः भारवाहाः भारवाहाः चराः देशिकाः उपदेष्टारः गुरवः ४१ जंग

संधिश्च त्रिविधो भिन्नो हीनो मध्यस्तथोत्तमः भयसत्कारवित्ताख्यं कार्त्स्न्येन परिवर्णितं ३७
यात्राकालाश्चत्वारस्त्रिवर्गस्य च विस्तरः विजयो धर्मयुक्तश्च तथार्थविजयश्च ह ३८ आसुरश्चै
व विजयस्तथा कार्त्स्न्येन वर्णितः लक्षणं पंचवर्गस्य त्रिविधं चात्र वर्णितं ३९ प्रकाशश्चाप्रका
शश्च दंडोथ परिशब्दितः प्रकाशोष्टविधस्तत्र गुह्यस्य च सुविस्तरः ४० रथा नागा हयाश्चैव पा
दाताश्चैव पांडव विष्टिर्नावश्चराश्चैव देशिकाः इति चाष्टमं ४१ अंगान्येतानि कौरव्य प्रकाशानि
बलस्य तु जंगमाजंगमाश्चोक्ताश्चूर्णयोगा विषादयः ४२ स्पर्शे चाभ्यवहार्ये चाप्युपांशुश्च विवि
धः स्मृतः अरिमित्रमुदासीन इत्येतेप्यनुवर्णिताः ४३ कृत्स्ना मार्गगुणाश्चैव तथा भूमिगुणा
श्च ह आत्मरक्षणमाश्वासः स्पशानां चान्ववेक्षणं ४४ ॥

माः महावृश्चिकादिजाः अजंगमाः रक्तशृंगिकादयः ४२ स्पर्शे वस्त्रादौ अभ्यवहार्ये अन्नादौ उपांशुः अभिचारादिति त्रिविधो
विषयोगरूपो दंडः ४३ मार्गगुणाः ग्रहनक्षत्रादिमार्गगुणाः भूमिगुणाः चतुरशीतिभूबलानि यामलोक्तानि आत्मरक्षणमंत्र

श्री· शां·रा· टी· ९२ कल्पनाः बलपुष्टिकराः योगाः विविधाभिख्याः चक्रव्यूहक्रौञ्चव्यूहादिनामानः ४५ उत्पाताः ग्रहयुद्धादयो धूमकेत्वादयश्च निपा-
ताः उल्कापातभूमिकम्पादयः शस्त्राणां पालनं तीक्ष्णीकरणं ४६ पीडा च आपदां समूहः आपदं तस्य कालः आपत्कालः ४७ आख्या-
तं अभिमंत्रितं डिंडिमध्वनिना प्रयाणादिकथनं योगाः पताकादिमंत्रणादिः तयोः संचारः श्रवणादर्शनेन परमोहनं एतत्सर्वं तत्र

कल्पना विविधाश्चापि नृनागरथवाजिनां व्यूहाश्च विविधाभिख्या विचित्रं युद्धकौशलं ४५
उत्पाताश्च निपाताश्च सम्यग्युद्धं सुपलायितं शस्त्राणां पालनं ज्ञानं तथैव भरतर्षभ ४६ बलव्यसन-
युक्तं च तथैव बलहर्षणं पीडाचापत्कालश्च पत्तिज्ञानं च पाण्डव ४७ तथाख्यातविधानं च यो-
गसंचार एव च चौरैराटविकैश्चोग्रैः परराष्ट्रस्य पीडनं ४८ अग्निदैर्गरदैश्चैव प्रतिरूपकका-
रकैः श्रेणीमुख्योपजापेन वीरुधच्छेदनेन च ४९ दूषणेन च नागानामातङ्कजननेन च
आराधनेन भक्तस्य प्रत्ययोपार्जनेन च ५० सप्ताङ्गस्य च राज्यस्य ह्रासवृद्धिसमंजसं दूतसाम-
र्थ्ययोगाश्च राष्ट्रस्य च विवर्धनं ५१ ॥

उक्तमिति सर्वत्र योज्यं ४८ गरदैः विषदैः प्रतिरूपकं प्रतिमा तत्कारकैः तत्र द्वारा कार्मणकारिभिः कौलिकैः श्रेणीमुख्याः बला-
ध्यक्षादयस्तेषां उपजापो भेदनं तेन वीरुधच्छेदनेन धान्यादिच्छेदेन ४९ नागानां दूषणं मंत्रतंत्रौषधादिना तेन प्रत्ययोपार्जनेन ९२
विश्वासोत्पादनेन च परराष्ट्रस्य पीडनमुक्तमिति प्रपूर्वेणास्संबंधः ५० समंजसं समत्वं ५१ ॥

५२ कंटकशोधनं खलानामुन्मूलनं श्रमो मल्लक्रीडा व्यायामयोगः आयुधप्रयोगाभ्यासः त्यागो दानं ५३ अप्रसंगिता अ
संबंधः ५४ राजगुणाः उत्थानादयः सेनापतिगुणाः मौलतादयः ५५ ५६ पात्रे दानं प्रथमं ५७ विसर्गो दानं धर्मार्थं यज्ञार्थं हि
अरिमध्यस्थमित्राणां सम्यक्चोक्तं प्रपंचनं प्रवमर्दः प्रतीघातस्तथैव च बलीयसां ५२ व्यव
हारः सुसूक्ष्मश्च तथा कंटकशोधनं श्रमो व्यायामयोगश्च त्यागो द्रव्यस्य संग्रहः ५३ अभृती
नां च भरणं भृतानां चान्ववेक्षणं अर्थस्य काले दानं च व्यसने चाप्रसंगिता ५४ तथा राजगुणाश्चै
व सेनापतिगुणाश्च ह कारणं च त्रिवर्गस्य गुणदोषास्तथैव च ५५ दुश्चेष्टितं च विविधं वृत्तिश्चैवा
नुवर्त्तिनां शंकितत्वं च सर्वस्य प्रमादस्य च वर्जनं ५६ अलब्धलाभो लब्धस्य तथैव च विवर्द्धनं
प्रदानं च विवृद्धस्य पात्रेभ्यो विधिवत्ततः ५७ विसर्गोऽर्थस्य धर्मार्थं कामहेतुकमुच्यते चतुर्थं व्यस
नाघाते तथैवात्रानुवर्णितं ५८ क्रोधजानि तथोग्राणि कामजानि तथैव च दशोक्तानि कुरुश्रे
ष्ठ व्यसनान्यत्र चैव ह मृगयाक्षास्तथा पानं स्त्रियश्च भरतर्षभ कामजान्याहुराचार्याः प्रोक्ता
नीह स्वयंभुवा ६० वाक्पारुष्यं तथोग्रत्वं दंडपारुष्यमेव च निग्रहो ह्यात्मनस्त्यागो ऽथार्थदूषण
मेव च ६१ यंत्राणि विविधान्येव क्रियास्तेषां च वर्णिता प्रवमर्दः प्रतीघातः केतनानां च भंजनं ६२
तीयं दानं कामं तृतीयं व्यसनाघाते चतुर्थं ५८ ५९ ६० परिशेषात् वाक्पारुष्यादीनि षट् क्रोधजानि आत्मनो देहस्य ६१ ६२

श्री॰ कर्मान्तः कृष्यादिफलं तत्रानुशासनं रोधः अपस्करउपकारणानि वसनं कवचादिकं उपायास्तन्निर्माणोपयुक्तयः ६३ तानिद्रव्या
शुं॰ रा॰ णि षट्सगुणाः पशवः ष्ट्रीवासोदास्यादिकांचनमिति ६४ ६५ मंगलं स्वर्णादितस्यालंभं स्पर्शः प्रतिक्रिया अलंकरणं ६६
टी॰ पकस्याप्युत्थानप्रकारः केतनजाः गृहजाः क्रियाः ध्वजारोहणाद्याः ६७ अधिकरणोपजनोपवेशनस्थानेषु चत्वरादिषु ६८ जाति
११३

चैत्यद्रुमावमर्दश्च रोधः कर्मानुशासनं अपस्करोपगमनं तथापायाश्च वर्णिताः ६३ पणावा
नकशालानां भेरीणां च युधिष्ठिर उपार्जनं च द्रव्याणां परिमर्दश्च तानि षट् ६४ लब्धस्य च प्रशमनं
सतां चैवाभिपूजनं विद्वद्भिरेकीभावश्च दानहोमविधिज्ञता ६५ मंगलालंभनं चैव शरीरस्य प्रति
क्रिया आहारयोजनं चैव नित्यमास्तिक्यमेव च ६६ एकेन च यथोत्थेयं सत्यत्वं मधुरा गिरः ॥
उत्सवानां समाजानां क्रियाः केतनजास्तथा ६७ प्रत्यक्षाश्च परोक्षाश्च सर्वाधिकरणेष्वथ वृत्ते ९
भरतशार्दूल नित्यं चैवान्ववेक्षणं ६८ अदंड्यत्वं च विप्राणां युक्त्या दंडनिपातनं अनुजीविस्व
जातिभ्यो गुणेभ्यश्च समुद्भवः रक्षणं चैव पौराणां राष्ट्रस्य च विवर्द्धनं मंडलस्था च या चिंता राज
न् द्वादशराजिकी ७० द्वासप्ततिविधा चैव शरीरस्य प्रतिक्रिया देशजातिकुलानां च धर्माः सम

शुक्रनीतिः

तो गुणतश्च समुद्भवो मान्यत्वं ६९ द्वादशानां राज्ञां समूहो द्वादशराजिकी मध्यस्थस्य विजिगीषोश्चतद्दिक्षु चत्वारोऽरयः तेभ्यः परे च ११३
त्वारो मित्राणि तेभ्यः परे चत्वार उदासीन इति ७० द्वासप्ततिविधा वैद्यकशास्त्रप्रसिद्धा प्रतिक्रिया संस्कारः शौचाभ्यंगादिः ७१ ॥

हेभूरिदत्तिणा ७२ मूलकर्माणिकोशवृद्धिकराणिकृष्यादीनितेषांक्रियाकरणप्रकारः ७३ ७७ नीयतेऽरुषार्थफलाय

धर्मश्चार्थश्चकामश्चमोक्षश्चात्रानुवर्णितः उपायश्चार्थलिप्साचविविधाभूरिदत्तिणाः ७२
मूलकर्मक्रियाचात्रमायायोगश्चवर्णितः दूषणंस्रोतसांचैववर्णितंचस्थिरांभसां ७३ यैर्यै
रुपायैर्लोकस्तुनचलेदार्यवर्त्मनः तत्सर्वंराजशार्दूलनीतिशास्त्रेभिवर्णितं ७४ एतत्कृत्वा
शुभंशास्त्रंततःसभगवान्प्रभुः देवानुवाचसंहृष्टःसर्वान्शक्रपुरोगमान् ७५ उपकारायलो
कस्यत्रिवर्गस्थापनायच नवनीतंसरस्वत्याबुद्धिरेषाप्रभाविता ७६ दंडेनसहिताह्येषालोक
रक्षणकारिका निग्रहानुग्रहरतालोकाननुचरिष्यति ७७ दंडेननीयतेचेदंदंडंनयतिवा
पुनः दंडनीतिरितिख्याताऽत्रीन्लोकानभिवर्तते ७८ षाड्गुण्यगुणसारैषास्थास्यत्यग्रेमहात्म
सु धर्मार्थकाममोक्षाश्चसकलाह्यत्रशब्दिताः ७९ ततस्तांभगवान्नीतिंपूर्वंजग्राहशंकरः
बहुरूपोविशालाक्षःशिवःस्थाणुरुमापतिः ८० प्रजानामायुषोह्रासंविज्ञायभगवाञ्छिवः
संचिक्षेपततःशास्त्रंमहार्थंब्रह्मणाकृतं ८१ वैशालाक्षमितिप्रोक्तंतदिन्द्रःप्रत्यपद्यत दशाध्या
यसहस्राणिसुब्रह्मण्योमहातपाः भगवानपिततःशास्त्रंसंचिक्षेपपुरन्दरः सहस्रैःपंचभिस्तात

इदंजगत् दंडंनयतिप्रणयतिअनयावावतिवा ७८ ८० संचिक्षेपसंक्षिप्तंकृतवान् ८१ विशालाक्षंबाहुदंतकंबार्हस्पत्यमित्युपरोक्तसंज्ञा

मूलकर्माद्याडंडकं ८३ ॥

विमर्शिनीदंडप्रकाशनामानि ८४ ८३ ॥

८४ ८६ एवंशास्त्रोत्पत्तिमुक्त्वानृपोत्पत्तिमाह अथेत्यादिना ८७ ८९ पंचातिगः विषयातिगः मुक्तः ९ अनंगइत्यंगस्यैवनामांतरं ९१

अध्यायानांसहस्रैस्तुत्रिभिरेवबृहस्पतिः संचिक्षेपेश्वरोबुद्ध्याबार्हस्पत्यंयदुच्यते ८४ अध्याया
नांसहस्रेणकाव्यःसंक्षेपमब्रवीत् तच्छास्त्रममितप्रज्ञोयोगाचार्योमहायशाः ८५ एवंलोकानु
रोधेनशास्त्रमेतन्महर्षिभिः संक्षिप्तमायुर्विज्ञायमर्त्यानांह्रासमेवच ८६ अथदेवाःसमागम्य
विष्णुमूचुःप्रजापतिं एकोयोर्हतिमर्त्येभ्यःश्रैष्ठ्यंवैतंसमादिश ८७ ततःसंचिंत्यभगवान्देवोना
रायणःप्रभुः तैजसंवैविरजसंसोसृजन्मानसंसुतं ८८ विरजास्तुमहाभागःप्रभुत्वंभुविनैच्छ
त न्यासायैवाभवद्बुद्धिःप्रणीतातस्यपांडव ८९ कीर्तिमांस्तस्यपुत्रोभूत्सोपिपंचातिगोभवत्
कर्दमस्तस्यतुसुतःसोप्यतप्यन्महत्तपः ९० प्रजापतेःकर्दमस्यत्वनंगोनामवैसुतः प्रजार
क्षयितासाधुर्दंडनीतिविशारदः ९१ अनंगपुत्रोतिबलोनीतिमानभिगम्यवै प्रतिपेदेमहा
राज्यमथेंद्रियवशोभवत् मृत्योस्तुदुहिताराजन्सुनीथानाममानसी प्रख्यातात्रिषुलो
केषुयासावेनमजीजनत् ९३ तंप्रजासुविधर्माणंरागद्वेषवशानुगं मंत्रपूतैःकुशैर्जघ्नुरृ
षयोब्रह्मवादिनः ९४ ममंथुर्दक्षिणंचोरुमृषयस्तस्यमंत्रतः ततोस्यविकृतोजज्ञेह्रस्वांगः
पुरुषोभुवि ९५ दग्धस्थूलप्रतीकाशोरक्ताक्षःकृष्णमूर्धजः निषीदेत्येवमूचुस्तमृषयोब्रह्म

९७ ९९ १० १२ १४ १६ स्ववशः स्वानीन्द्रियाणि तद्वशः नकदाचनभविष्यामीशेषः स्वतिस्वस्थःपाठः ७ ८ ९
तस्मान्निषादाः संभूताः क्रूराः शैलवनाश्रयाः येचान्येविंध्यनिलयाम्लेच्छाः शतसहस्रशः
९७ भूयोस्यदक्षिणंपाणिंममंथुस्तेमहर्षयः ततःपुरुषउत्पन्नोरूपेणेन्द्रइवापरः ९८ कवची
बद्धनिस्त्रिंशः सशरः सशरासनः वेदवेदांगविच्चैवधनुर्वेदेचपारगः ९९ तंदंडनीतिःसक
लाश्रितारजन्नरोत्तमं ततस्तुप्रांजलिर्वैन्योमहर्षीस्तानुवाचह १० सुसूक्ष्मामेसमुत्पन्नाबुद्धि
र्धर्मार्थदर्शिनी अनयाकिंमयाकार्यंतन्मेतत्त्वेनशंसत १ यन्मांभवंतोवक्ष्यंतिकार्यमर्थसमन्वि
तं तदहंवैकरिष्यामिनात्रकार्याविचारणा २ तमूचुस्तत्रदेवास्तेतेचैवपरमर्षयः नियतोयत्र
धर्मोवैतमशंकःसमाचर ३ प्रियाप्रियेपरित्यज्यसमःसर्वेषुजंतुषु कामक्रोधौचलोभंचमानं
चोत्सृज्यदूरतः यश्चधर्मात्प्रविचलेल्लोकेकश्चनमानवः निग्राह्यस्तेस्वबाहुभ्यांशश्वद्धर्ममवे
क्षता ५ प्रतिज्ञांचाधिरोहस्वमनसाकर्मणागिरा पालयिष्याम्यहंभौमंब्रह्मइत्येवचासकृ
त् ६ यश्चात्रधर्मोनित्योक्तोदंडनीतिव्यपाश्रयः तमशंकःकरिष्यामिस्ववशोनकदा
चन ७ अदंड्यामेद्विजाश्चेतिप्रतिजानीहिहेविभो लोकंचसंकरात्कृत्स्नंत्रातास्मीतिपरंत
प ८ वैन्यस्ततस्तानुवाचदेवानृषिपुरोगमान् ब्राह्मणामेमहाभागानमस्याःपुरुषर्षभाः ९

१० सांवत्सरो ज्योतिषिकः ११ आत्मनाऽष्टमः स्वशरीरेणाष्टमः पृथुर्विष्णोः सकाशादित्यर्थः तथाहि विष्णुः प्रथमः विरजा द्वितीयः की

एवमस्त्विति वैन्यस्तु तैरुक्तो ब्रह्मवादिभिः पुरोधाश्चाभवत्तस्य शुक्रो ब्रह्ममयो निधिः १० मंत्रि
णो वालखिल्याश्च सारस्वत्यो गणास्तथा महर्षिर्भगवान् गर्गस्तस्य सांवत्सरोऽभवत् ११ आत्मना
ष्टम इत्येव श्रुतिरेषा परा नृषु उत्पन्नौ वंदिनौ चास्य तत्पूर्वौ सूतमागधौ १२ तयोः प्रीतो ददौ राजा पृथु
र्वैन्यः प्रतापवान् अनूपदेशं सूताय मगधं मागधाय च १३ समतां वसुधायाश्च स सम्यगुपपादयत्
वैषम्यं हि परं भूमेरासीदिति च नः श्रुतं १४ मन्वंतरेषु सर्वेषु विषमा जायते मही उज्जहार ततो वैन्यः
शिलाजालान्समंततः १५ धनुःकोट्या महाराज तेन शैला विवर्द्धिताः स विष्णुना च देवेन शक्रे
ण विबुधैः सह १६ ऋषिभिश्च प्रजापालैर्ब्राह्मणैश्चाभिषेचितः तं साक्षात्पृथिवी भेजे रत्नान्या
दाय पांडव १७ सागरः सरितां भर्ता हिमवांश्चाचलोत्तमः शक्रश्च धनमक्षय्यं प्रादात्तस्मै युधिष्ठि
र १८ रुक्मं चापि महामेरुः स्वयं कनकपर्वतः यक्षराक्षसभर्ता च भगवान्नरवाहनः १९ ध
र्मे चार्थे च कामे च समर्थं प्रददौ धनं हया रथाश्च नागाश्च कोटिशः पुरुषास्तथा २० प्रादुर्बभूवुर्वै
न्यस्य चिंतनादेव पांडव न जरा न च दुर्भिक्षं नाधयो व्याधयस्तथा २१ ॥

र्तिमांस्तृतीयः कर्दमश्चतुर्थः अनंगः पंचमः अतिबलः षष्ठः वेनः सप्तमः पृथुरष्टम इति १२ १३ १४ १५ १६ १९ २० २१

२२ २५ प्रथिताः वनतताचेति विग्रहे वर्णलोपविकाराभ्यां पृथिवी २६ स्थापनं मर्यादा २७ २८ दंडेति रक्षितव्यं राज्यं न चान्यो

सरीसृपेभ्यः स्तेनभ्यो न चान्योन्यात्कदाचन भयमुत्पद्यते तत्र तस्य राज्ञोभिरक्षणात् २२
आपस्तस्तंभिरे चास्य समुद्रमभियास्यतः पर्वताश्च ददुर्मार्गं ध्वजभंगश्च नाभवत् २३ तेनेयं पृ
थिवी दुग्धा सस्यानि दश सप्त च यक्षराक्षसनागैश्चापीप्सितं यस्य यस्य यत् २४ तेन धर्मोत्तरश्चा
यं कृतो लोको महात्मना रंजिताश्च प्रजाः सर्वास्तेन राजेति शब्द्यते २५ ब्राह्मणानां क्षतत्रा
णात्ततः क्षत्रिय उच्यते प्रथिता धर्मतश्चेयं पृथिवी बहुभिः स्मृता २६ स्थापनं चाकरोद्विष्णुः
स्वयमेव सनातनः नातिवर्तिष्यते कश्चिद्राजंस्त्वामिति भारत २७ तपसा भगवान्विष्णुरावि
वेश च भूमिपं देववन्नरदेवानां नमते यं जगन्नृप २८ दंडनीत्या च सततं रक्षितं तं नरेश्वर
नाधर्षयत्तथा कश्चिच्चारनित्यात्स्वदर्शनात् २९ ॥

नश्चाधर्षयेत् तत्र हेतुः चाराणां नित्यानंदः संचारस्तद्वाय दर्शनं लोकवृत्तांतस्य दृष्ट्वा च पालनं तत्तज्ज्ञत्यर्थः २९ ॥

आत्मनाचिंत्तेनकारणौः क्रियाभिश्चसमस्यमहीदितिः कर्मेतिसंबंधः ३॰ विसर्गभूमिपंचआविवेशत्वक्तंतत्रोपपत्तिःकश्यपेंदन ३१ प

शुभंह्यकर्मराजेंद्रशुभत्वायोपकल्पते आत्मनाकारणैश्चैवसमस्येहमहीदितिः ३॰ कोहि
त्वयेहशेतिष्टलोकोदैवादतेशृणात विसोर्ललाटात्कमलंसौवर्णमभवत्तदा ३१ श्रीःसंभूता
यतोदेवीपत्नीधर्मस्यधीमतः श्रियःसकाशादर्थश्चजातोधर्मेणपाण्डव ३२ अर्थोधर्मस्तथै
वार्थःश्रीश्चराज्येप्रतिष्ठिता सुकृतस्यक्षयाच्चैवस्वर्लोकादेत्यमेदिनी ३३ पार्थिवोजायते
तातदंडनीतिविशारदः महत्वेनचसंयुक्तोवैष्णवेननरोभुवि बुद्धाभवतिसंयुक्तोमाहात्म्यं
चाधिगच्छति ३४ स्थापितंचततोदेवैर्नकश्चिदतिवर्तते तिष्ठत्येकस्यचवशेतंचेदनविधी
यते ३५ शुभंह्यकर्मराजेंद्रशुभत्वायोपकल्पते तुल्यलोकस्ययस्यायंलोकोवचसितिष्ट
ति ३६ ॥

त्वीपालयित्री ३२ ३३ ३४ स्थापितंअभिषिक्तं एकस्यराज्ञोवशेहृदंति तंचेदंलत्वीकृत्यनविधीयतेइदंजगद्विधानसम
र्थंनभवति ३५ तुल्यस्यदृक्ताघवयवैःसमम्य ३६ ॥ ११९

अस्य राज्ञः यः सौम्यं स्वं वपुः अदर्शयत् सुभगादि रूपं चैवं पश्यति अस्य दृष्टः राजा वशानुगः आज्ञाकारीति ज्ञेयं ३७ महत्त्वादिति दंड

योस्य योस्य स्वं वपुः पश्येत सौम्यं सौम्यवशानुगः सुभगं चार्थवन्तं च रूपवन्तं च पश्यति ३७ महत्त्वा
त्तस्य दंडस्य नीतिर्विस्पष्टलक्षणा नयचारश्च विपुलो येन धर्ममिदं ततं ३८ आगमश्च पुरा
णानां महर्षीणां च संभवः तीर्थवंशश्च वंशश्च नक्षत्राणां युधिष्ठिर ३९ सकलं चातुराश्रम्यं
चातुर्होत्रं तथैव च चातुर्वर्ण्यं तथैवात्र चातुर्विद्यं च कीर्तितं इतिहासाश्च वेदाश्च न्यायः कृत्स्न
श्च वर्णितः तपो ज्ञानमहिंसा च सत्यासत्ये नयः परः ४१ वृद्धोपसेवा दानं च शौचमुत्थानमेव च
सर्वभूतानुकंपा च सर्वमत्रोपवर्णितं ४२ भुवि वाचो गतं यच्च तच्च सर्वं समर्पितं तस्मिन्पै
तामहे शास्त्रे पांडवैतन्न संशयः ४३ ततो जगति राजेन्द्र सततं शब्दितं बुधैः देवाश्च नरदेवाश्च
तुल्या इति विशांपते ४४ एतत्ते सर्वमाख्यातं महत्त्वं प्रति राजसु कार्त्स्न्येन भरतश्रेष्ठ किमन्य
दिह वर्तते ४५ इति श्रीमहाभारते शांतिपर्वणि राजधर्मेषु ५९ वैशंपायन उवाच ततः
पुनः स गांगेयमभिवाद्य पितामहं प्रांजलिर्नियतो भूत्वा पर्यपृच्छद्युधिष्ठिरः १ ॥

सामर्थ्यादेवलोके नीत्यादिकं दृश्यत इत्यर्थः ३८ आगमादिकं चात्र ग्रंथे कीर्तितं ३९ ४२ ४५ इति श्रीशांतौ राजधर्मेषु ५८ ततः

= ८ शां

श्री० शां० रा० टी० १२

सर्ववर्णानांअनुलोमविलोमजादीनां चातुर्वर्ण्यस्ययेआश्रमाःब्राह्मणस्यचत्वारआश्रमाःक्षत्रियस्यत्रयोवैश्यस्यद्वौ
शूद्रस्यैकइतितेषां २ ३ ४ ५ ६ सर्ववर्णधर्मानाअद्रोहअक्रोधइतिसार्द्धेन ७ ८ तत्राध्ययने तावत्तेवनेष्टिकःकृतार्थो
केधर्माःसर्ववर्णानांचातुर्वर्ण्यस्यकेपृथक् चतुर्वर्णाश्रमाणांचराजधर्माश्चकेमताः २ केन
वैवर्द्धतेराष्ट्रंराजाकेनविवर्द्धते केनपौराश्चभृत्याश्चवर्द्धन्तेभरतर्षभ ३ कोशंदंडंचदुर्गंचसहायान्
मंत्रिणस्तथा ऋत्विक्पुरोहिताचार्यान्कीदृशान्वर्जयेन्नृपः ४ केषुविश्वसितव्यंस्यात्राज्ञाकस्यां
चिदापदि कुतोवात्मादृढंरक्ष्यस्तन्मेब्रूहिपितामह ५ भीष्मउ० नमोधर्मायमहतेनमःकृष्णायवे
धसे ब्राह्मणेभ्योनमस्कृत्यधर्मान्वक्ष्यामिशाश्वतान् ६ अक्रोधःसत्यवचनंसंविभागःक्षमातथा
प्रजनःस्वेषुदारेषुशौचमद्रोहएवच ७ आर्जवंभृत्यभरणंनवैतेसार्ववर्णिकाः ब्राह्मणस्यतुयोधर्म
स्तंतेवक्ष्यामिकेवलं ८ दममेवमहाराजधर्ममाहुःपुरातनं स्वाध्यायाभ्यसनंचैवतत्रकर्मसमाप्य
ते ९ तंचेद्वित्तमुपागच्छेद्वर्त्तमानंस्वकर्मणि अकुर्वाणंविकर्माणिशांतंप्रज्ञानतर्पितं १० कुर्वीत
तापत्यसंतानमथोदद्याद्यजेतच संविभज्यहिभोक्तव्यंधनंसद्भिरितीर्यते ११ परिनिष्ठितकार्यस्तुस्वाध्या
येनैवब्राह्मणः कुर्यादन्यन्नवाकुर्यान्मैत्रोब्राह्मणउच्यते १२ क्षत्रियस्यापियोधर्मस्तंतेवक्ष्यामिभा
भवतीत्यर्थः ९ स्वयमुपागतेवित्तेदारक्रियापूर्वकंअपत्यसंतानमिच्छेत्स्वइत्याहद्वाभ्यांतंचेदिति १० ११ ॥ रत्त दद्या

११७

१९ १७ २४ षण्णांयेनूनांरक्तकोवैश्यपकस्यातीरंस्ववेतनंहरेत् शातस्यरक्तकोवर्षेपक्वंगोद्वयमिथुनंवेतनंहरेत् वाणिज्येनतस्य
प्रवित्तेनदेहेनसमवायोनिवर्त्तते क्षत्रियोनास्यतत्कर्मप्रशंसन्तिपुराविदः १९ एवंहितत्रबहूनां
मार्गमाजःप्रधानतः नास्यकृत्यतमंकिंचिदन्यद्दस्युनिबर्हणात् १७ दानमध्ययनंयज्ञोराज्ञांदेमा
विधीयते तस्माद्राज्ञाविशेषेणयोद्धव्यंधर्ममीप्सता १८ स्वेषुधर्मेष्ववस्थाप्यप्रजाःसर्वामहीपतिःध
र्मेणसर्वंकृत्वानिशामनिष्ठानिकारयेत् १९ परिनिष्ठितकार्यस्तुनृपतिःपरिपालनात् कुर्यादन्यन्न
वाकुर्यादैन्द्रोराजन्यउच्यते २० वैश्यस्यापिहियोधर्मस्तंतेवक्ष्यामिशाश्वतं दानमध्ययनंयज्ञःशौ
चेनधनसंचयः २१ पितृवत्पालयेद्वैश्योयुक्तःसर्वान्पशूनिह विकर्मतद्भवेदन्यत्कर्मयत्ससमा
चरेत् २२ रक्षयासहितेषांवैमहत्सुखमवाप्नुयात् प्रजापतिर्हिवैश्यायसृष्ट्वापरिददौपशून् २३
ब्राह्मणायचराज्ञेचसर्वाःपरिददेप्रजाः तस्यवृत्तिंप्रवक्ष्यामियच्चतस्योपजीवनं २४ षण्णामेकांपि
बेद्धेनूनांशताच्चमिथुनंहरेत् लब्धाच्चसप्तमंभागंतथाशृङ्गेकलाखुरे २५ सस्यानिसर्वबीजानामे
षासांवत्सरीभृतिः नचवैश्यस्यकामःस्यान्नरक्षेयंपशूनिति २६ वैश्येचेच्छतिनान्येनरक्षित
व्याःकथंचन शूद्रस्यापिहियोधर्मस्तंतेवक्ष्यामिभारत २७ प्रजापतिर्हिवर्णानांदासंशूद्रमका
ल्पयत् तस्माच्छूद्रस्यवर्णानांपरिचर्याविधीयते २८ ॥
व्यात्सप्तमंधनिकाहरेत् २५ एवंसस्यानामपिसप्तममेवांशंहरेत् २६ २७ २८ ॥

२९ ३० कुर्वीत संचयानित्यपकृष्यते धार्मिकः धर्मप्रधानः न तु भोगाल्लोभप्रधानः ३१ औशीरं वेष्टनं वीरणमूलकृताछदिः ३२ यातयामा
नि भुक्तभोगानि जीर्णानीति यावत् ३३ द्विजातीनामध्येयं किंचित्प्रभृति तेन द्विजातिना ३४ ३५ अतिरेकेण स्वकुटुंबपोषणादाधिक्येन भर्ता
पोष्यः ३६ अन्यत्र स्वेत्या ऽर्जितमपि धनं शूद्रस्य स्वामिनैव हार्यं यथोक्तं त्रय एवाधना राजन् भार्या दासस्तथा सुतः यत्ते समधिगच्छंति यस्यैते

तेषां शुश्रूषणाच्चैव महत्सुखमवाप्नुयात् शूद्र एतान्परिचरेत् त्रीन्वर्णाननसूयकः २९ संचयांश्च न कुर्वी
त जातु शूद्रः कथंचन पापीयान्हि धनं लब्ध्वा वशे कुर्याद्गरीयसः ३० राज्ञा वा समनुज्ञातः कामं कुर्वीत
धार्मिकः तस्य वृत्तिं प्रवक्ष्यामि यच्चास्योपजीवनं ३१ अवश्यभरणीयो हि वर्णानां शूद्र उच्यते छत्रं वे
ष्टनमौशीरमुपानद्व्यजनानि च ३२ यातयामानि देयानि शूद्राय परिचारिणे अधार्याणि विशीर्णानि वसना
नि द्विजातिभिः ३३ शूद्रायैव प्रदेयानि तस्य धर्मधनं हि तत् यश्च कश्चित् द्विजातीनां शूद्रः शुश्रूषुराव्रजेत् क
ल्प्यां तेन तु ते प्राहुर्वृत्तिं धर्मविदो जनाः ३४ देयः पिंडोनपत्याय भर्तव्यौ वृद्धदुर्बलौ ३५ शूद्रेण तु न हातव्यो
भर्ता कस्यांचिदापदि अतिरेकेण भर्तव्यो भर्ता द्रव्यपरिक्षये ३६ न हि स्वमस्ति शूद्रस्य भर्तृहार्यधनो हि
सः उक्तस्त्रयाणां वर्णानां यज्ञस्तस्य च भारत ३७ स्वाहाकारवषट्कारौ मंत्रः शूद्रे न विद्यते तस्माच्छूद्रः
पाकयज्ञैर्यजेताव्रतवान्स्वयं पूर्णपात्रमयीमाहुः पाकयज्ञस्य दक्षिणां ३८ ॥

तत्तस्य तद्धनमिति तस्माद्युक्तं भर्तृहार्यधनो हि स इति तस्य च शूद्रस्य चामंत्रको यज्ञोस्तीत्यर्थः ३७ तस्मादिति पाकयज्ञेषु त्वद्यज्ञैर्ग्रहशांतिवैश्व
देवादिभिर्यजेत अव्रतवान् श्रौतव्रतोपायहीनः अष्टमुष्टिर्भवेत्किंचित्किंचिदष्टौ तु पुष्कलं पुष्कलानि तु चत्वारि पूर्णपात्रं प्रचक्षते इत्युक्तला
णाः पूर्णपात्रमयी यज्ञे गवामि पूर्णपात्राणामेव गणनाय यज्ञानुसारेण मंत्रास्तेषां पौराणिकाः नाममंत्रा वा प्रणववर्जिता इति सर्वशूद्रयज्ञस्य
कं द्रष्टव्यं ३८ ॥

सहस्राणांशतंलक्षंपूर्णपात्राणि ऐन्द्राग्नस्यविधिर्यथाश्रौतेचराः पशोर्वाविधिस्तथैवामंत्रकं अस्यविधानंतेन ३९
नत्वतस्माच्छूद्रोयज्ञेः नवक्लृप्त इतिश्रुतेः कथमस्यामंत्रोपियज्ञः इत्याशंक्याह यतइति सर्ववर्णानांत्रैवर्णिकानांयोयज्ञः स
तस्यैवशूद्रस्यैवभवतितस्यतत्सेवकत्वात् यथाहिश्रद्धयागुर्वग्नीन्परिचरन्तउपकोसलस्याग्नयोब्रह्मविद्यांददुरेवंतः एवंश्रद्धया
ब्राह्मणादीनांयाययतः शूद्रस्यापिब्राह्मणाकृतयज्ञफलभागित्वमस्त्येवेत्यर्थः सार्द्धश्लोकः ४० ४१ सृष्टयः संतानानि तेनसर्वा

शूद्रः पैजवनोनामसहस्राणांशतंददौ ऐन्द्राग्नेनविधानेनदक्षिणामितिनःश्रुतं ३९ यतो
हिसर्ववर्णानांयज्ञस्तस्यैवभारत अग्रेसर्वेषुयज्ञेषुश्रद्धायज्ञोविधीयते ४० दैवतंहिमहच्छ्र
द्धापवित्रंयजतांचयत् दैवतंहिपरंविप्राःस्वेनस्वेनपरस्परंहितं ४१ अथजनिर्हिसत्रैस्तै
स्तैःकामैःसमाहितैः संसृष्टाब्राह्मणैरेवत्रिषुवर्णेषुसृष्टयः ४२ देवानामपियेदेवायद्ब्रू
युस्तेपरंहितं तस्माद्वर्णैःसर्वयज्ञाःसंसृज्यन्तेनकाम्यया ४३ ऋग्यजुःसामवित्पूज्योनित्यं
स्याद्देववद्द्विजः अनृग्यजुरसामाचप्राजापत्यउपद्रवः ४४ ॥

णांवर्णाब्राह्मणजत्वादस्त्येवशूद्रस्यापियज्ञेधिकारइत्यर्थः ४२ यद्ब्रूयुस्तेनतत्तेनवपरंहितं वर्णैः सशूद्रैः सर्वयज्ञाः श्रौताः स्मार्त्ता
श्चनकाम्ययास्वभावात्संसृज्यन्तइतिपूर्वस्योपसंहारः ४३ अत्रहेतुमाह ऋगिति द्विजस्त्रैवर्णिकः पूज्यः शूद्रेण उपद्रवतीतितत्
त्समीपगामित्वादुपद्रवः दासः शूद्रः सवेदहीनोपिप्राजापत्यः प्रजापतिदेवताकः यथाग्नेयोब्राह्मणइन्द्रः क्षत्रियस्तद्वत् ४४ ॥

श्री·
शा·रा·
टी·
१९९

तथा च मानसे देवतोद्देशेन द्रव्यत्यागात्मके यज्ञे सर्वे वर्णा अधिक्रियन्त इत्यर्थः सार्धश्लोकः अस्य मानस यज्ञ कार्तः देवाः इतरे जना अश्नन्ति
हूते इति न अपि तु श्रद्धापूतत्वात् सर्वे ऽस्य यज्ञे भागं कामयन्त इत्यर्थः नास्य यज्ञस्येति पाठे एनं यज्ञं देवा अपि कर्त्तुं न ईहन्ते न समर्था भवन्ती
तियोज्यं ५५ नन्वग्निहीनस्य शूद्रस्य कथं पाकयज्ञेष्वधिकार इत्याशंक्याह स्वदैवतं ब्राह्मणः स्वेन नित्यं परान् वर्णानयजन्नेवमासी
त् अथ रो वितानः संसृष्टो वैश्यो ब्राह्मणस्त्रिषु वर्णेषु यज्ञसृष्ट इति ब्राह्मणस्त्रयाणामपि वर्णानां स्व असाधारणां दैवतं अतः कारणा
त् ते स्वे आत्मीयाः ब्राह्मणाः परान् वर्णान् उद्दिश्य न आयजन्निति नैवं आसीत् अपि तु अशुककामेनाशुकशर्मणा दृष्टतो ऽशुकयज्ञेन यत्पा

यज्ञो मनीषया तात सर्ववर्णेषु भारत नास्य यज्ञकृतो देवा ईहन्ते नेतरे जनाः ततः सर्वेषु वर्णेषु श्र
द्धायज्ञो विधीयते ५५ स्वदैवतं ब्राह्मणाः स्वेन नित्यं परान् वर्णानायजन्नेवमासीत् अथ रो विता
नः संसृष्टो वैश्यो ब्राह्मणस्त्रिषु वर्णेषु यज्ञसृष्टः ५६ ॥

इत्युद्देशं कृत्वा ऽयजन्नेव यागं कृतवन्त एवेत्येवमेवासीत् एवं पाकल्पप्रदर्शनमुखेनायं विधिर्ज्ञेयः अयजन्निति परस्मैपदप्रयोगात्स्व
परगामित्वात् क्रियाफलस्य युक्तः अथ रो नीचः वैवाहिकात् श्रौतात् चान्यत्वात् वितानो ऽग्नीनां विस्तारः तस्य अग्नयो लौकिका एव
पंचकुंडीविधानादौ ज्ञेयाः एककुंड एव तेत्वेक एव लौकिकः स एवाथ खल्वयज्ञकाच होष्यत्स्यादित्युपक्रम्याग्निं प्रतिष्ठाप्येति गृह्यकारैर्द
र्शितः संसृष्ट इति तत्रापि मंत्रसंसर्ग उच्यते वैश्यः वैश्यगृहादानीतः श्रौतो ऽपि विट्कुलाद्धि त्रवतो वेति वैश्यगृहाद्दक्षिणाग्न्यर्थमग्या
नयनं दृश्यते यस्मादेवं तस्मात् ब्राह्मणस्त्रिष्वपि वर्णेषु यज्ञः स्रष्टा येन स यज्ञस्रष्टा भवतीत्यर्थः पाठान्तरे वैश्यपदे विभक्तिलोप आर्षः ५८

यस्मात्त्रिषु वर्णेषु ब्राह्मणो यज्ञसृष्टस्तस्मात्सर्वेऽपि वर्णाः ऋजवः साधव एव यज्ञसंयोगात् एवं धर्मसाम्येऽपि जातिसाम्यं नास्ती-
त्याशंक्याह जातिवर्णा अपि तत्क्षत्रियवैश्यशूद्रास्तस्य ब्राह्मणस्य विकारास्तत्क्षत्रियादिकन्यासूत्पन्ने मूर्धाभिषिक्तादौ संसृज्यन्त एव तेन यथ-
र्मतो जन्मतश्च सर्ववर्णा ब्राह्मणसंसृष्टा इति स्थितं तत्र हेतुमाह एक इति नेष्टतत्त्वनिश्चये क्रियमाणे एको विप्रो ब्रह्मैव प्रथमो ब्रा-
ह्मणः सृष्टो जातः ब्राह्मणसंततित्वात्सर्वेऽप्येते ब्राह्मणा एवेत्यर्थः तत्र दृष्टान्तः एकं सामेति अकारो वै सर्वा वाक्सैषा स्पर्शोष्मभिर्व्य-

तस्माद्वर्णा ऋजवो जातिवर्णाः संसृज्यन्ते तस्य विकार एव । एकं साम यजुर्भिरेकं ऋगेका विप्रश्चै-
को निश्चये तेषु सृष्टः ॥ ४७ ॥ अत्र गाथा यज्ञगीताः कीर्तयन्ति पुराविदः । वैखानसानां राजेन्द्र मुनी-
नां यष्टुमिच्छताम् ॥ ४८ ॥ उदितेऽनुदिते वापि श्रद्दधानो जितेन्द्रियः । वह्निं जुहोति धर्मेण श्रद्धा वै कारणं
महत् ॥ ४९ ॥ यत्स्कन्नमस्य तत्पूर्वं यदस्कन्नं तदुत्तरं । बहूनि यज्ञरूपाणि नानाकर्मफलानि च ॥ ५० ॥

ज्यमाना बह्वी नानारूपा भवतीति श्रुतेरेकं अकाररूपमेव अक्षरं यथा सामादिरूपं तथा ब्रह्मैव ब्राह्मणादिरूपमित्यर्थः ॥ ४७ ॥ वैखा-
नसानां वानप्रस्थानां गाथाः यज्ञस्तुतिश्लोकाः यज्ञगीताः विष्णुगीताः ॥ ४८ ॥ ४९ ॥ यत्स्कन्नमिति रौद्रं वा विसृष्टाय यमुपावसृष्टमि-
त्यादि बह्वृचब्राह्मणे षोडशकलमग्निहोत्रमुक्तं तत्र माहृतं विष्यन्दमानमिति स्कन्नमपि महद्देवत्यं भवतीति तत्पूर्वं आद्यं अग्निहोत्रेय-
त् अस्कन्नं यथाविधि जुहुतं उत्तरं सर्वोत्कृष्टं बहूनीति रौद्रादीनि ॥ ५० ॥

श्री· शां·रा· टी· १२९

तानिषोडशअग्निहोत्ररूपाणि ५१ यत्तद्विस्वयष्टव्यंयत्तद्दानादिनाआराधितं ५२ ऋषयस्तंतिसार्द्धः ५३ श्रद्धापवित्रंयथास्यात्तथाय
ष्टव्यमितिसंबंधः ५४ षष्टितमः ६० आश्रमा १ वानप्रस्थमितिपाठक्रमोनविवक्षितः चतुर्थंसंन्यासंतंवजटाधरणासंस्कारंशुद्धिना

तानियःसंप्रजानातिज्ञानंनिश्चयतिश्चितः द्विजातिःश्रद्धयोपेतःसयष्टुंपुरुषोर्हति ५१ स्तेनोवायदि
वापापोयदिवापापकृत्तमः यष्टुमिच्छतियज्ञंयःसाधुमेववदंतितं ५२ ऋषयस्तंप्रशंसंतिसाधुवै
तदसंशयं सर्वथासर्वदावर्णैर्यष्टव्यमितिनिर्णयः नहियज्ञसमंकिंचित्त्रिषुलोकेषुविद्यते ५३ य
स्माद्यष्टव्यमित्याहुःपुरुषेणानसूयता श्रद्धापवित्रमाश्रित्ययथाशक्तियथेच्छया ५४ इतिश्रीम
हाभारतेशांतिपर्वणिराजधर्मेषु ६० भीष्मउवाच आश्रमाणांमहाबाहोशृणुसत्यपराक्रम चतु
र्णामपिनामानिकर्माणिचयुधिष्ठिर १ वानप्रस्थंभैक्ष्यचर्यंगार्हस्थ्यंचमहाश्रमं ब्रह्मचर्याश्रमंप्रा
हुश्चतुर्थंब्राह्मणैर्वृतं २ जटाधरणसंस्कारंद्विजातित्वमवाप्यच आधानादीनिकर्माणिप्राप्यवेदमधी
त्यच ३ सदारोवाप्यदारोवाआत्मवान्संयतेंद्रियः वानप्रस्थाश्रमंगच्छेत्कृतकृत्योगृहाश्रमात् ४
तत्रारण्यकशास्त्राणिसमधीत्यसधर्मवित् ऊर्ध्वरेताप्रव्रजित्वागच्छत्यक्षरसात्मतां ५ ॥

चवदंति २ द्विजातित्वमवाप्यवेदमधीत्यआधानादीनिकर्माणिप्राप्यवानप्रस्थाश्रमंगच्छेदित्यन्वयः ३ ४ आरण्यकानांवानप्रस्था
नांशास्त्राणिशासनानिसमधीत्यसम्यगनुष्ठानेनप्राप्य अक्षरसात्मतांकैवल्यं ५ ॥ १२८

एतानि द्विजत्वावास्यादीनि एवशब्दः प्रकारांतरमोक्षप्राप्तौ वारयति ६ ब्रह्मचर्यादेव प्रव्रजेदिति श्रुतेर्मध्यमाश्रमद्वयमनि
त्यमित्याह चरितेति ७ ८ विकाराः कामसंकल्पादयस्तद्वत् विन्नतद्वदितोनिर्विकारवानश्रमनस्कारं त्यर्थः ९ गृहिणोपि
मुक्तिमाहाधीत्येति समाहितः योगयुक्तः सन् गार्हस्थ्यधर्मं यः प्रचरेत्सोपि अक्षरसात्मतां गच्छतीति पूर्वेणसंबंधः १० अस

एतान्येव निमित्तानि मुनीनामूर्ध्वरेतसां कर्तव्यानीह विप्राणां राजन्नादौ विपश्चिता ६ चरितब्रा
ह्मचर्यस्य ब्राह्मणस्य विशांपते भैक्षचर्यास्वधीकारः प्रशस्तइह मोक्षिणः ७ यत्रास्तमितशा
यी स्यान्निराशीरनिकेतनः यथोपलब्धजीवि स्यान्मुनिर्दान्तो जितेंद्रियः ८ निराशीः स्यात्सर्व
समो निर्भोगो निर्विकारवान् विप्रः क्षेमाश्रमं प्राप्तो गच्छत्यक्षरसात्मतां ९ अधीत्य वेदा
न्कृतसर्वकृत्यः संतानमुत्पाद्य सुखानि भुक्त्वा समाहितः प्रचरेद्दुश्चरं यो गार्हस्थ्यधर्मं मुनिध
र्मजुष्टं १० स्वदाररतुष्टस्त्वृतुकालगामी नियोगसेवी न शठो न जिह्मः मिताशनो देवरतः कृत
ज्ञः सत्यो मृदुश्चानृशंसः क्षमावान् ११ दांतो विधेयो हव्यकव्येऽप्रमत्तो ह्यन्नस्य दाता सततं द्वि
जेभ्यः अमत्सरी सर्वलिंगिप्रदाता वैताननित्यश्च गृहाश्रमी स्यात् १२ ॥

माहितं प्रत्याह स्वदारेति शठः धूर्तः जिह्मः कुटिलः ११ विधेयः गुरुशास्त्राज्ञापालकः अप्रमत्तः अवहितः सर्वेभ्यो लिंगयुक्तेभ्य आ
श्रमेभ्यः प्रदाता ऽन्नादेः लिंगिप्रदातेति मध्यमपदलोपी समासः वैतानं श्रौतकर्म तत्र नित्यः १२ ॥

१३ १५ वृत्तिजीविकां विशोध्य शुद्धां कृत्वा न्यायागतेन धनेन जीवन्नित्यर्थः १६ तस्येति तस्य गृहस्थस्य स्वदेहपरित्यागात्समाधि
तश्चेदिहैव देहाभिमानत्यागात् असमाधितस्य मरणानंतरं इष्टाः कामाः विषयाः दार्ढ्यकाशे स्वर्गे वा उपतिष्ठंति कामाः अनंतया
इतिच्छेदः स्थिरार्थः सर्वतोक्षिशिरोमुखोऽस्यनेन कामानां किंकराणामिव वश्यत्वमुक्तं यत्रयत्रदेशेकालेवायोग्यमयोग्यं

अथात्र नारायणगीतमाहुर्महर्षयस्तात महानुभावाः महार्थमत्यंततपःप्रयुक्तं तदुच्य
मानं हि मया निबोध १३ सत्यार्जवं चातिथिपूजनं च धर्मस्तथार्थश्च रतिश्च दारैः निषेवितव्या
नि सुखानि लोके ह्यस्मिन्परे चैव मतं ममैतत् १४ भरणं पुत्रदाराणां वेदानां धारणं तथा वस
तामाश्रमं श्रेष्ठं वदंति परमर्षयः १५ एवं हि यो ब्राह्मणो यज्ञशीलो गार्हस्थ्यमध्यावसते
यथावत् गृहस्थवृत्तिं प्रविशोध्य सम्यक् स्वर्गे विशुद्धं फलमाप्नुते सः १६ तस्य देहपरित्या
गादिष्टाः कामा अक्षयाः मताः आनंत्यायोपतिष्ठंति सर्वतोक्षिशिरोमुखाः १७ स्मरन्नेको
जपन्नेकः सर्वानेकोऽपि युधिष्ठिर एकस्मिन्नेव चाचार्ये शुश्रूषुर्मलपंकवान् १८ ब्रह्मचारी व्रती
नित्यं नित्यं दीक्षापरो वशी परिचर्यां तथा वेदं कृत्यं कुर्वन्वसेत्सदा १९ शुश्रूषां सततं कुर्वन् गु

वासकल्पयंति तत्सर्वं सद्य उपतिष्ठतीत्यर्थः १७ ब्रह्मचारिणोऽपि कैवल्यमाह स्मरन्निति सर्वान्देवान्मंत्रांश्च १८ दीक्षानियमा
दिविशेषस्वीकारः वेदं वेदांतान् कृत्यं कर्तुमर्हं ध्यानयोगं १९ तदविरोधेन शुश्रूषां च कुर्वन् निहन्तः निहन्तिमान् २० ॥ १२१

अधिकारेणानिग्रहानुग्रहेण २९ एकषष्टितमः ६१ शिवान् १ उक्तविशेषणविशिष्टाःब्राह्मणस्यैवधर्माइत्याशयेनाहब्राह्म
णस्येति एतेनशूद्रस्यापिब्राह्मणस्याहिंस्रोधर्मःकामकारएवनविधिचोदितइतिदर्शितं वक्ष्यतिचमातद्धर्मेषु पशुयज्ञैःकथंचिद्

नचरत्यधिकारेणसेवेतद्विषतोनच एषोश्रमपदस्तातब्रह्मचारिणइष्यते २९ इतिश्रीमहाभा
रतेशांतिपर्वणिराजधर्मेचातुराश्रमधर्मः ६१ युधिष्ठिरउ० शिवान्सुखान्महोदर्कानहिंस्रान्लो
कसंमतान् दुःखधर्मान्सुखोपायान्मद्विधानांसुखावहान् १ भीष्मउ० ब्राह्मणस्यतुचत्वारस्त्वा
श्रमाविहिताःप्रभो वर्णास्तान्नानुवर्तंतेत्रयोभरतसत्तम २ उक्तानिकर्माणिबहूनिराजन्स्वर्ग्या
णिराजन्यपराजन्यपरायणानि नेमानिदृष्टांतविधौस्मृतानिक्षात्रेहिसर्वंविहितंयथावत्
३ क्षात्राणिवैश्यानिचसेवमानःशौद्राणिकर्माणिचब्रह्मणःसन् अस्मिंल्लोकेनिंदितोमंदचेताः
परेचलोकेनिरयंप्रयाति ४ यासंज्ञाविहितालोकेदासेशुनिवृकेपशौ विकर्मणिस्थितेविप्रे
सैवसंज्ञाचपांडव ५ ॥

वैर्मादृशोयष्टुमर्हतीति त्रयोहिंसापराःवर्णास्तान्नानुवर्तंतइत्येतत्प्रपंचयतिउक्तानीत्यादिना राजन्यानांपरायणानियुद्धजयादीनि
दृष्टांतविधौत्वयापृष्टस्यप्रतिवचने नयोग्यानि यतःक्षात्रेविहितंविधिप्रधानंप्रवृत्तिशास्त्रमितियावत् तत्कथंनिवृत्तिप्रधानेब्राह्म
णधर्मैःसमतामेतीत्यर्थः ४ ५ ॥

श्री·
भा·पु·
टी·
१२२

षट्कर्माणि प्राणायामः प्रत्याहारो ध्यानं धारणा तर्कः समाधिरिति इज्यादीनामाश्रमांतरेष्वयोगात्सर्वाश्रमयोग्यान्येतान्येव ष
ट्कर्माणि सर्वधर्मः अहिंसा संवृतस्याचपलस्य कृतात्मनः जितचित्तस्य ६ तपस्विविचारे अन्नदत्तसंमिताः अत्तयाः ७ नन्वेवं ब्रा
ह्मणः स्वधर्मं त्यक्त्वा किमिति हीनधर्मं वर्ततइत्याशंक्याह यइति यः पुमान् यस्मिन्नवस्थाविशेषे यत्र देशे काले वा येन फलेन निमित्ते
न यत्कर्म करोति साधु असाधु वा न तत्फललोभाच्चिराभ्यासाच्च स्वगुणमेवेति प्रतिपद्यते नत्विदं निंद्यमिति ततो विरज्यतइत्यर्थः ८ ना

षट्कर्मसंप्रवृत्तस्य आश्रमेषु चतुर्ष्वपि सर्वधर्मोपपन्नस्य संवृत्तस्य कृतात्मनः ६ ब्राह्मणस्य विशु
द्धस्य तपस्यभिरतस्य च निराशिषो वदान्यस्य लोकाद्युत्तरसंमिताः ७ यो यस्मिन् कुरुते कर्म
यादृशं येन यत्र च तादृशं तादृशेनैव स गुणं प्रतिपद्यते ८ कृष्याकृषिवणिकत्वेन जीवसंजीवने
न च वेत्तुमर्हसि राजेंद्र स्वाध्यायगणितं महत् ९ कालसंचोदितः कालपर्यायनिश्चितः उत्तमा
धममध्यानि कर्माणि कुरुते वशः १० ॥

त्यवाहवृत्त्येति जीवैः संजीवनं मृगया अजीवितं तेन महदपि स्वाध्यायगणितं वेदाभ्यसनं ह्यादिभिः समानमिति वेत्तुं अर्हसि उक्तहेतोरित्य
र्थः ९ अभ्यासात्कर्माणि रोचंते चेत् उत्तमान्येव तानि कुतो नाभ्यस्यंतइत्याशंक्याह कालेति कालेन पर्येति आविर्भवतीति कालपर्या
यः प्राग्भवीयो वासनासमूहः तेन कालेन प्रेरितस्तदनुगुणं कर्म करोति यतः अवशः कालाधीनः १० ॥ १२२

एवं चेत्कृतं विधिनिषेधाभ्यामित्यत आह अन्तवन्तीति पुराश्रेयस्कराणि प्राचीनानि देहारम्भकाणि तानि अन्तवन्ति देहस्यैव अन्तवत्त्वात् देहसंबन्धि यत्सुखं दुःखं वा यच्चावगमनं तत्तदपरिहार्यं अन्यत्र तु शुभाशुभप्रवृत्त्यादौ लोकः स्वकर्मनिरतः स्वस्य अभीष्टं यत् कर्म रागादिविषयभूतं तत्रैव निरतः तत्र यतः सर्वतोमुखः प्रवृत्तौ वा स्वतन्त्रः अक्षरो जीवः तत्र तत्र कामकारेण प्रवर्तते ततो विधिनिषेधशास्त्रस्यास्त्येवा

अन्तवन्ति प्रयानानि पुराश्रेयस्कराणि च स्वकर्मनिरतो लोको ह्यक्षरः सर्वतोमुखः ११ इति श्रीमहाभारते शान्तिपर्वणि ६२ भीष्म उ० ज्याकर्षणं शत्रुनिबर्हणं च कृषिर्वणिज्या पशुपालनं च शुश्रूषणं चापि तथार्थहेतोरकार्यमेतत्परमं द्विजस्य १ सेव्यं तु ब्रह्मषट्कर्म गृहस्थेन मनीषिणा कृतकृत्यस्य चारण्ये वासो विप्रस्य शस्यते २ राजप्रेष्यं कृषिधनं जीवनं च वणिक्यया कौटिल्यं कौलटेयं च कुसीदं च विवर्जयेत् ३ शूद्रो राजन्भवति ब्रह्मबन्धुर्दुश्चारित्रो यश्च धर्मादपेतः वृषलीपतिः पिशुनो नर्तनश्च ग्रामप्रेष्यो यश्च भवेद्विकर्मा ४ जपन्वेदानजपंश्चापि राजन् समः शूद्रैर्दासवच्चापि भोज्यः एते सर्वे शूद्रसमा भवन्ति राजन्नेतान्वर्जयेद्देवकृत्ये ५ ॥

र्थवत्त्वमित्यर्थः ११ द्विषद्धितमः ज्याकर्ष १ २ कौटिल्यमनार्जवं कौलटेयं कुलटाप्रधानं जारकर्म पारदार्यं वा अन्ये तु कौटलेयमिति पाठं प्रकल्प्य मात्सर्यमिति व्याचक्षते कुसीदं वृद्धिजीविका ३ ४ राजप्रेष्यादिः वेदान् जपन् अजपन् वा शूद्रः पङ्क्तेर्बहिर्भोजनीय एवेति भावः ५ ॥

श्री॰ शां॰ रा॰ टी॰ १२३

४ धर्मंचसक्तान्विसृजेन्नेच्छतिचेत्कालहानिरतआह लोकइति लोकेस्वर्गे इदंब्राह्मणादिआश्रमस्थाश्चस्वधर्मेणतिष्ठेयुःस्वर्गादिकंसर्वं
विष्णुप्रसादादेवतदभावेसर्वंकृतंकर्मव्यर्थमितिभावः ५ योराजात्रयाणांब्राह्मणवैश्यशूद्राणांस्वराज्येआश्रमधर्ममेवंनयथोक्तंर

निर्मर्यादेचाशुचौक्रूरवृत्तौहिंसात्मकेत्यक्तधर्मस्ववृत्ते इत्थंकर्मायानिचान्यानिराजन्देयान्यदेया
निभवंतिचास्मै ६ तस्माद्धर्मोविहितोब्राह्मणस्यदमःशौचमार्जवंचापिराजन् तथाविप्रस्याश्र
माःसर्वएवपुराराजन्ब्रह्मणावैविसृष्टाः ७ यःस्याद्दांतःसोमपआर्यशीलःसानुक्रोशःसर्वसहो
निराशीः ऋजुर्मृदुरनृशंसःक्षमावान्सवैविप्रोनेतरःपापकर्मा ८ शूद्रंवैश्यंराजपुत्रंचराजन्लो
काःसर्वेसंश्रिताधर्मसंश्रिताधर्मकामाः तस्माद्वर्णान्शांतिधर्मेषुसक्तान्मत्वाविष्णुर्नेच्छतिपांडु
पुत्र ९ लोकेचेदंसर्वलोकस्यनस्याच्चातुर्वर्ण्यंवेदवादाश्चनस्युः सर्वाश्चेज्याःसर्वलोकक्रियाश्च
सद्यःसर्वेचाश्रमस्थानवैस्युः १० यश्चत्रयाणांवर्णानामिच्छेदाश्रमसेवनं चातुराश्रम्यदृष्टांश्च
धर्मांस्तान्शृणुपांडव ११ शुश्रूषोःकृतकार्यस्यकृतसंतानकर्मणः अभ्यनुज्ञातराजस्यशू
द्रस्यजगतीपते १२ ॥

च्छेत्तेनतेनावश्यंज्ञातव्यान्धर्मान्शृणु ११ शुश्रूषोःवेदांतेष्वनधिकारात्पुराणादावात्मानंश्रोतुमिच्छोःकृतकार्यस्ययावज्जी १२१
वस्वामसर्थ्यसेवितत्रैवर्णस्यजातपुत्रस्यअभ्यनुज्ञातोराज्ञाऽत्यभ्यनुज्ञातराजकस्तस्य १२ ॥

अत्यांतरगतस्य आचारनिष्पात्रैवर्णिकसमस्य दशधर्मगतस्येति मत्तप्रमत्तादीनकृत्यदशधर्मानज्ञानेनीत्युक्तेर्वत्रयोगाद्धर्मानभिज्ञ
स्य ग्रहणं तस्यापि आश्रमाः सर्वे विहिताः शूद्रोपि नैष्ठिकं ब्रह्मचर्यं वानप्रस्थं वा सकलविक्षेपककर्मत्यागरूपं संन्यासं वाऽनुतिष्ठेदेव नि

अत्यांतरगतस्यापि दशधर्मगतस्य वा आश्रमा विहिताः सर्वे वर्जयित्वा निराशिषं १३ भैक्ष्यचर्यां
ततः प्राङ्क्तस्य तद्धर्मचारिणः यथा वैश्यस्य राज्यं द्राजपुत्रस्य चैव हि १४ कृतकृत्यो वयोतीतो रा
तः कृतपरिश्रमः वैश्यो गच्छेदनुज्ञातो नृपेणाश्रमसंश्रयं १५ वेदानधीत्य धर्मेण राजशास्त्राणि
चानघ संतानादीनि कर्माणि कृत्वा सोमं निषेव्य च १६ पालयित्वा प्रजाः सर्वा धर्मेण वदतां वर
राजसूयाश्वमेधादीन्मखानाहृत्य तथैव च १७ आनयित्वा यथापाठं विप्रेभ्यो दत्तदक्षिणः सं
ग्रामे विजयं प्राप्य तथाल्पं यदि वा बहु १८ स्थापयित्वा प्रजापालं पुत्रं राज्ये च पांडव अन्यगोत्रं प्र
शस्तं वा क्षत्रियं क्षत्रियर्षभ १९ अर्चयित्वा पितॄन्सम्यक्पितृयज्ञैर्यथाविधि देवान्यज्ञैरृषीन्वे
दैरर्चयित्वा तथा यतः २० अंतकाले च संप्राप्ते यदिच्छेदाश्रमांतरं सोनुपूर्व्याश्रमाद्राजन्गत्वा सिद्धि
मवाप्नुयात् २१ ॥

राशिषं शांतिदांत्यादिकल्याणगुणरहितं १३ भैक्ष्यचर्या पारिव्राज्यं तस्य शूद्रस्य तद्धर्मचारिणः तान्सर्वोक्तान्स्वधर्मानाचरतीति तथाभूतस्य तथा
वैश्यस्य पुत्रस्य च भैक्ष्यचर्या प्राङ्गिन्यन्वयः १४ १५ १६ १७ १८ १९ २० २१ ॥

राजात्वर्षित्वेन मंत्रार्थद्रष्टृत्वेन वेदांतश्रवणकर्तृत्वेन दत्तनाभैक्ष्यचर्याभिक्षोरिति पूर्वेण संबंधः नत्वेवं यथाश्रवणमकुर्वन्नन्नमात्रार्थमित्य
र्थमित्यर्थः तत्कुर्वन्तु जीवितकांक्षया भैक्ष्यचर्यां चरेदेवेत्यर्थः २२ एतत्भैक्ष्यं नैष्ठिकं नित्यं त्रयाणां राजादीनि तेषामाश्रमसंन्यासो नित्यो

राजर्षित्वेन राजेंद्र भैक्ष्यचर्यां न सेवया अपेतगृहधर्मोपि चरेज्जीवितकाम्यया २२ नचैतन्नैष्ठिकं धर्म
त्रयाणां भूरिदक्षिण वर्णानां राजशार्दूल प्राहुराश्रमवासिनां २३ बाह्वायत्तं क्षत्रियैर्मानवानां लो
कश्रेष्ठं धर्ममासेवमानैः सर्वे धर्माः सोपधर्मास्त्रयाणां राज्ञो धर्मादिति वेदाच्छृणोमि २४ यथा
राजन् हस्तिपदे पदानि संलीयंते सर्वसत्वोद्भवानि एवं धर्मान् राजधर्मेषु सर्वान् सर्वावस्थं संप्रलीनान्
निबोध २५ अल्पाश्रयानल्पफलान्वदंति धर्मानन्यान्धर्मविदो मनुष्याः महाश्रयं बहुकल्या
णरूपं क्षात्रं धर्मं नेतरं प्राहुरार्याः २६ सर्वे धर्मा राजधर्मप्रधानाः सर्वे वर्णाः पाल्यमाना भवंति स =
र्वस्त्यागो राजधर्मेषु राजंस्त्यागं धर्मं चाहुरग्र्यं पुराणं २७ मज्जेत्त्रयी दंडनीतौ हतायां सर्वे धर्माः प्र
क्षयेयुर्विवृद्धाः सर्वे धर्माश्चाश्रमाणां हताः स्युः क्षात्रे त्यक्ते राजधर्मे पुराणे २८ सर्वे त्यागा राज ५
धर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु चोक्ताः सर्वा विद्या राजधर्मेषु युक्ताः सर्वे लोका राजधर्मे प्रविष्टाः

नास्ति प्रपितृवितृपककर्मत्यागरूपः काम्यपवासीत्यर्थः स च चतुर्णामप्याश्रमाणामस्तीति प्राहुः २३ राजधर्मं प्रशंसति बा
ह्वायत्तमित्यादिना २४ २७ सर्वेषां त्यागिनां षड्भागहारी राजापि सर्वत्यागी भवतीत्यर्थः २८ २९ ॥

यथेति जीवाः मृगादयः प्राकृतैर्नीचैः बध्यमानाः हन्तॄणां धर्मस्य श्रुतहृष्टादीनां च नाशाय भवंति एवं राजधर्मैर्नीत्यादिभिर्वियुक्ताः
धर्मा अग्निहोत्रादयः चौरैर्नाश्यमानाः कर्तॄणां धर्मं चिंतं चावदयंति कर्त्तारश्च संचिन्वंतः स्वात्मसमत्वेन चयंतो व्याकुलतया स्वधर्मं नाद्रियं
ते तस्माद्राजधर्म एव श्रेयो धर्म इत्यर्थः २९ इति षष्टित्रितमः ६३ चातुरा १२ धर्मं बहुद्वारं विद्धि अन्ये तत्तद्भावं धर्मस्य स्वरूपं को

यथा जीवाः प्राकृतैर्बध्यमाना धर्मश्रुतानामुपपीडनाय एवं धर्मा राजधर्मैर्वियुक्ताः संचिन्वंतो
नाद्रियंते स्वधर्मं २९ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे ६३ भीष्म उ० चातुराश्रमया
मांश्च यतिधर्मांश्च पांडव लोकवेदोत्तरांश्चैव क्षात्रधर्मे समाहिताः १ सर्वाण्येतानि कर्माणि क्षा
त्रे भरतसत्तम निराशिषो जीवलोकाः क्षात्रधर्मे व्यवस्थिते २ अप्रत्यक्षं बहुद्वारं धर्ममाश्रमवा
सिनां प्रकोपयंति तद्भावमागमैरेव शाश्वतं ३ अपरे वचनैः पुण्यैर्वादिनो लोकनिश्चयं अनि
श्चयज्ञा धर्माणामदृष्टांते परे रताः ४ प्रत्यक्षसुखभूयिष्ठमात्मसाक्षिकमच्छलं सर्वलोकहि
हितं धर्मं क्षत्रियेषु प्रतिष्ठितं ५ धर्माश्रमव्यवसितानां ब्राह्मणानां युधिष्ठिर यथा त्रयाणां वर्णा
पयंति विरुद्धागमैः ३ अदृष्टांते न दृष्टोऽतो यस्य तस्मिन् परे धर्मे रताः नष्टधियः निश्चयं प्रकोपयं नां संख्यातोपश्रुतिः पुरा
ति ४ ५ धर्माश्रमे गार्हस्थ्ये त्रयाणां वर्णानां धर्माणामुपश्रुतिरंतर्भावः संख्याता प्रकटा तथाऽव्यवसितानां नैष्ठिकवानप्रस्थयतीनां ब्रा
ह्मणानां च धर्माणामुपश्रुतिः संख्याता तथा राजधर्मैः सह लोकाः प्रभूता इति सार्द्धश्लोकः ६ ॥

श्री॰ शां॰ रा॰ टी॰ १२५

अत्र पूर्वोक्तां कथां स्मारयति उदाहृतमिति सार्द्धः ७ । ८ आश्रमं आश्रमविहितं कर्म धर्मं तुलयित्वा किं दंडनीतिजो धर्मो महा

राजधर्मेष्वनुमता लोकाः सुचरितैः सह उदाहृतं ते राजेंद्र यथा विष्णुं महौजसं ७ सर्वभूतेश्वरं
देवं प्रभुं नारायणं पुरा जग्मुः सुबहुशः शूरा राजानो दंडनीतये ८ एकैकमात्मनः कर्म तुलयि
त्वाश्रमे पुरा राजानः पर्युपासंते दृष्टांतवचने स्थिताः ९ साध्या देवा वसवश्चाश्विनौ च रुद्राश्च
विश्वे मरुतां गणाश्च सृष्टाः पुराद्यादिदेवेन देवाः क्षात्रे धर्मे वर्त्तयंते च सिद्धाः १० अत्र ते वर्त्तयिष्या
मि धर्ममर्थविनिश्चयं निर्मर्यादे वर्त्तमाने दानवैकार्णवे पुरा ११ बभूव राजा राजेंद्र मांधाता ना
म वीर्यवान् पुरा वसुमतीपालो यज्ञं चक्रे दिदृक्षया १२ अनादिमध्यनिधनं देवं नारायणं प्र
भुं स राजा राजशार्दूल मांधाता परमेश्वरं १३ जगाम शिरसा पादौ यज्ञे विष्णोर्महात्मनः द
र्शयामास तं विष्णू रूपमास्थाय वासवं १४ स पार्थिवैर्वृतः सद्भिरर्चयामास तं प्रभुं तस्य पा
र्थिवसिंहस्य तस्य चैव महात्मनः संवादोऽयं महानासीत् विष्णुं प्रति महाद्युतिं १५ इंद्र उ॰ किं
मिष्यते धर्मभृतां वरिष्ठ यत् द्रष्टुकामोऽसि तमप्रमेयं अनंतमायामितमंत्रवीर्यं नारायणं
ह्यादिदेवं पुराणं १६ नासौ देवो विश्वरूपो मयापि शक्यो द्रष्टुं ब्रह्मणा वापि साक्षात् येन्ये का

नृउक्त आश्रमधर्मे इति संदिग्धे दृष्टांतवचने सिद्धांते श्रौते प्रभुं उपासंते इति योजना ९ । १० अर्थस्य निश्चयो यत्र तं ११ । १२ । १३ वासवं पंद्र

॥ २ ३ ॥ १२५

१८ त्वाहंत्वामृते १९ तंत्वात्रात्धर्मान्नश्रेष्ठंकर्तुंनजानामि २० नमंतिसैनिकाः अराजानः धर्मविषयेपरांगतिंकाष्ठांननयंते
नप्रापयंतिअन्यस्वयंचनव्रजंति राजानस्तुप्रयुक्तैर्धर्मैर्हृदयमधिकुर्वंति अयुक्तमितिपाठेहिप्रसिद्धयुक्तंअभितिवेधूत्वंयथास्या

समये स्थितो धर्मपरो जितेंद्रियः शूरो दृढंप्रीतिरतः सुराणां बुद्ध्या भक्त्या चोत्तमः श्रद्धया च तत स्तेहं
ददामि वरान्यथेष्टं १८ मांधातोवाच अहं शिरसा भगवन्नादिदेवं द्रक्ष्यामि त्वाहं शिरसा प्रसाद्य त्यक्त्वा
कामान्धर्मकामो ह्यरण्यमिच्छे गंतुं सत्पथं लोकजुष्टं १९ त्वात्रात्धर्मात्विपुलादप्रमेयात्लोकाः प्रा
प्ताः स्थापितं स्वं यशश्च धर्मो योसावादिदेवात्प्रवृत्तो लोकश्रेष्ठं तं न जानामि कर्तुं २० इंद्र उवाच अ
सैनिका धर्मपराश्च धर्मपरां गतिं न व्रजंते ह्ययुक्तं क्षात्रो धर्मो ह्यादिदेवात्प्रवृत्तः पश्चादन्ये शेषभू
ताश्च धर्माः २१ शेषाः सृष्टा ह्यंतवंतो ह्यनंताः सप्रस्थानाः क्षत्रधर्मा विशिष्टाः अस्मिन्धर्मे सर्व
धर्माः प्रविष्टास्तस्माद्धर्मं श्रेष्ठमिमं वदंति २२ कर्मणा वै पुरा देवा ऋषयश्चामितौजसः त्राताः
सर्वे प्रसह्यारीन्क्षत्रधर्मेण विष्णुना २३ यदि ह्यसौ भगवान्नाहनिष्यद्रिपून्सर्वान्वसुवानप्रमेयः
न ब्राह्मणा न च लोकादिकर्ता न सद्धर्मा नादिधर्मा भविष्यन् २४ इमामुर्वीं नाजयद्विक्रमेण देवः
श्रेष्ठः सासुरामादिदेवः चातुर्वर्ण्यं चातुराश्रम्यधर्माः सर्वे न स्युर्ब्रह्मणो वै विनाशात् २५ ॥

नयाहेलयैवनयंतेइत्यर्थः शेषभूताः अंगभूताः २१ सप्रस्थानाः परिव्राज्यसहिताः शेषाः धर्माः अंतवत्फलाः संख्याताः अनंताः

२२ कर्मणा क्रियया २३ अंगजाताः प्राविशन्न २४
२५ ॥

श्री॰ शां॰ रा॰ टी॰ १२६

२६ आत्मत्यागो युद्धे मरणं २७ २९ अन्तरपर्यंतमोक्तावसानं ३० ततः षष्टितमः एवं १ भूसंस्कारं भुवः संपन्नसस्यं राजसं
नष्टा धर्माः शतधा शाश्वतास्ते क्षात्रेण धर्मेण पुनः प्रवृत्ताः युगे युगे ह्यादिधर्माः प्रवृत्ता लोकज्येष्ठं
क्षत्रधर्मं वदंति आत्मत्यागः सर्वभूतानुकंपा लोकज्ञानं पालनं मोक्षणं च विषण्णानां मोक्षणं पी
डितानां क्षात्रे धर्मे विद्यते पार्थिवानां २७ निर्मर्यादाः काममन्युप्रवृत्ता भीता राज्ञो नाधिगच्छंति पा
पं शिष्टाश्चान्ये सर्वधर्मोपपन्नाः साध्वाचाराः साधुधर्मं वदंति २८ पुत्रवत्पाल्यमानानि राजधर्मेण
पार्थिवैः लोके भूतानि सर्वाणि चरंते नात्र संशयः २९ सर्वधर्मपरं क्षात्रं लोकश्रेष्ठं सनातनं श
श्वदक्षरपर्यंतमक्षरं सर्वतोमुखं ३० इति श्रीमहाभारते शांतिपर्वणि राजधर्मे ६४ इंद्र उवाच ए
वंवीर्यः सर्वधर्मोपपन्नः क्षात्रः श्रेष्ठः सर्वधर्मेषु धर्मः पाल्यो युष्माभिर्लोकहितैरुदारैर्विपर्यये स्या
दभावः प्रजानां १ भूसंस्कारं राजसंस्कारयोगमभैक्षचर्यां पालनं च प्रजानां विद्याद्राजा सर्वभूता
नुकंपी देहत्यागं चाहवे धर्ममग्र्यं २ त्यागं श्रेष्ठं मुनयो वै वदंति सर्वश्रेष्ठं यच्छरीरं त्यजेत नित्यं
युक्ता राजधर्मेषु सर्वे प्रत्यक्षं ते भूमिपाला यथैव ३ बहुश्रुत्या गुरुशुश्रूषया च परस्परात्संहननाद्
वदंति नित्यं धर्मं क्षत्रियो ब्रह्मचारी चरेदेको ह्याश्रमं धर्मकामः ४ ॥

स्कारो राजसूयाश्वमेधावभृथस्नानं अभैक्षचर्या संन्यासो वा क्षात्रधर्मे रतश्चक्रं २ यथैव शारीराणि त्यक्तवंतः ३ ४ ॥ १२८

श्रौतस्मैः पौरुषैः ५ येन त्वाश्रयधर्मेण अन्यथार्थास्तांस्तान्धर्मान्वदंति ६ ७ यागतिर्यत्नादिः आश्रमधर्मश्च एततद्वयं ८ ९ १० नो
सामान्यार्थव्यवहारेषु प्रवृत्तेषु प्रियेवर्जयन्नेव यत्नात् चातुर्वर्ण्यस्थापनात्पालनाच्च तैस्तैर्योगैर्निय
मैरौरसैश्च ५ सर्वाघोरैर्वाश्रमं धर्ममाहुः त्रात्रश्रेष्ठं सर्वधर्मोपपन्नं स्वंस्वं धर्मं ये न चरंति वर्णास्तां
स्तान्धर्माननन्यथार्थान्वदंति ६ निर्मर्यादा नित्यमर्थे निविष्टानाहुस्तान्वै पशुभूतान्मनुष्यान्
यथा नीतिं गमयत्यर्थयोगाच्छ्रेयस्तस्मादाश्रमात्तत्त्रधर्मः ७ त्रैविद्यानां या गतिर्ब्राह्मणानां
ये चैवोक्ताश्चाश्रमा ब्राह्मणानाम् एतत्कर्म ब्राह्मणस्याहुरग्र्यमन्यत्कुर्वञ्छूद्रवच्छस्त्रवध्यः
८ चातुराश्रम्यधर्माश्च वेदधर्माश्च पार्थिव ब्राह्मणेनानुगंतव्या नान्यो विद्यात्कदाचन ९ अ
न्यथा वर्तमानस्य ना सोऽवृत्तिः प्रकल्प्यते कर्मणा वर्धते धर्मो यथा धर्मस्तथैव सः १० यो विकर्म
स्थितो विप्रो न स सन्मानमर्हति कर्मस्वनोपयुञ्जानमविश्वास्यं हि तं विदुः ११ एते धर्माः सर्वव
र्णेषु दीना उत्क्रष्टव्याः क्षत्रियैरेष धर्मः तस्माज्ज्येष्ठा राजधर्मा न चान्ये वीरज्येष्ठा वीरधर्मा मता
मे १२ मांधातोवाच यवनाः किराता गांधाराश्चीनाः शबरबर्बराः शकास्तुषाराः कंकाश्च
पह्लवाश्चांध्रमद्रकाः १३ पौंड्राः पुलिंदा रमठाः कांबोजाश्चैव सर्वशः ब्रह्मक्षत्रप्रसूताश्च वै
पर्युञ्जानं नाचरंतं ११ उत्क्रष्टव्याः उत्कर्षं प्रापणीयाः एष धर्मः क्षत्रियस्य १२ १३ १४ ॥ श्याः शूद्राश्च मानवाः १४

श्री॰ शां॰ रा॰ टी॰ १२७

दस्युजीविनः दस्युवृत्तिजीविनः १५ एतदिति संस्कारजातानां चोराणां च कथं धर्मस्थापनं कर्त्तव्यमिति प्रश्नार्थः १६ तेषामपि मात्रा

कथं धर्मांश्चरिष्यन्ति सर्वे विषयवासिनः मद्विधैश्च कथं स्थाप्याः सर्वे वै दस्युजीविनः १५ एतदि
च्छाम्यहं श्रोतुं भगवंस्तद्ब्रवीहि मे त्वं बंधुभूतो ह्यस्माकं क्षत्रियाणां सुरेश्वर १६ इंद्र उवाच मा
तापित्रोर्हि शुश्रूषा कर्त्तव्या सर्वदस्युभिः आचार्यगुरुशुश्रूषा तथैवाश्रमवासिनां १७ भूमिपानां च
शुश्रूषा कर्त्तव्या सर्वदस्युभिः वेदधर्मक्रियाश्चैव तेषां धर्मो विधीयते १८ पितृयज्ञास्तथा कूपाः
प्रपाश्च शयनानि च दानानि च यथाकालं द्विजेभ्यो विसृजेत्सदा १९ अहिंसा सत्यमक्रोधो वृ
त्तिदायानुपालनं भरणं पुत्रदाराणां शौचमद्रोह एव च २० दक्षिणा सर्वयज्ञानां दातव्या भूति
मिच्छता पाकयज्ञा महार्हाश्च दातव्याः सर्वदस्युभिः २१ एतान्येवं प्रकाराणि विहितानि पुरानघ
सर्वलोकस्य कर्माणि कर्त्तव्यानीह पार्थिव २२ मांधातोवाच दृश्यन्ते मानुषे लोके सर्ववर्णेषु दस्य
वः लिंगांतरे वर्त्तमाना आश्रमेषु चतुर्ष्वपि २३ इंद्र उवाच विनष्टायां दंडनीत्यां राजधर्मे निराकृते
संप्रमुह्यंति भूतानि राजदौरात्म्यतोनघ २४ असंख्याता भविष्यंति भिक्षवो लिंगिनस्तथा आश्रमा
णां विकल्पाश्च निवृत्तेस्मिन्कृते युगे २५ ॥

द्विशुश्रूषादिरूपो धर्मः स्थापनं कर्त्तव्यमित्याह मातेति १७ १८ १९ २० महा
र्हाः इति पाकयज्ञमुद्दिश्य ब्राह्मणाय धनं देयं एवं श्राद्धमपि आमेन हिरण्येन चेति त्रयं २१ २२ २३ २४ २५ ॥

१२७

२६ पापःपापादितिशेषः २७ २८ ३० गतिंफलंप्राप्तिकत्वात्समेमान्यः ३१ ३३ अन्यायेनतत्रधर्मोवर्त्तया ३४ चक्रेयात्तत्रात्तायां
आदिपरायणोपूर्वंयाश्शरणाभूतेवर्त्तस्वतेत्वांसंविजानामिसम्यक्समर्थोसीतिजानामि ३५ इतिश्रीमहाभारतेशांतिपंचषष्टितमः

अशृण्वानाःपुराणानांधर्माणांपरमागतीः उत्पथंप्रतिपत्स्यंतेकामंमन्युसमीरिताः २६ यदा
निवर्त्यतेपापोदंडनीत्यामहात्मभिः तदाधर्मोनचलतेसद्भूतःशाश्वतःपरः २७ सर्वलोकगुरुंचैव
राजानंयोवमन्यते नतस्यदत्तंनहुतंनश्राद्धंफलतिक्वचित् २८ मानुषाणामधिपतिंदेवभूतंसना
तनं देवापिनावमन्यंतेधर्मकामंनरेश्वरं २९ प्रजापतिर्हिभगवान्सर्वंचैवासृजज्जगत् सप्रवृत्ति
निवृत्यर्थंधर्माणांक्षत्रमिच्छति ३० प्रवृत्तस्यहिधर्मस्यबुद्ध्यायःस्मरतेगतिं समेमान्यश्चगुरुश्च
तत्रक्षत्रंप्रतिष्ठितं ३१ भीष्मउ० एवमुक्त्वासभगवान्मरुद्गणवृतःप्रभुः जगामभवनंविष्णोरक्षरंशा
श्वतंपदं ३२ एवंप्रवर्तितेधर्मेपुरासुचरितेनघ कःक्षत्रमवमन्येतचेतनावान्बहुश्रुतः ३३ अन्या
येनप्रवृत्तानिनिवृत्तानितथैवच अंतरावित्तलयंयांतियथापथिविचक्षुषः ३४ आदौप्रवर्तितेच
क्रेतथैवादिपरायणे वर्त्तस्वपुरुषव्याघ्रसंविजानामितेनघ ३५ इतिशांतौराजधर्मेषु ६५ यु
धिष्ठिरउ० श्रुतामेकथिताःपूर्वंचत्वारोमानवाश्रमाः व्याख्यानयित्वाव्याख्यानमेतदाचक्ष्वपृच्छ

६५ श्रुताः मानवस्यमनुष्यमात्रस्यआश्रमाःचत्वारइतिश्रुतंततःकथंदस्युनामप्युत्तमाश्रमयोगः एषांआश्रमाणांव्या तः १॥
ख्यानंस्पष्टीकरणंआख्यानंयित्वाविस्तरंनीत्वाआचक्ष्व आख्यानयित्वेतिनामधातुपदं १ ॥

श्री॰ यथाममविदितास्तथातवविदिताइत्यन्वयः २ लिंगस्यसूक्ष्मस्याभ्यंतरंकारणंहार्दाकाशंतन्नतंसर्वज्ञमित्यर्थः ३ एतानिचा
शां॰ रा॰ तुराश्रम्यकर्मणांलिंगानिसन्ताराज्ञांराजधर्मेष्वेववर्णितेत्यर्थः ४ अत्रयोयस्याश्रमस्यासाधारणोधर्मःसयत्रक्वचिदाश्रमेया
टी॰ स्यांकस्यांचिज्जातौहृष्टश्चेत्सतत्तदाश्रमधर्मप्राप्यंस्थानमाप्नोतिनतुउत्तमपदप्राप्तौजातिराश्रमोवाकारणमित्यध्यायार्थस्तमाह
१२८

भीष्मउवाच विदिताःसर्वएवेहधर्मास्तवयुधिष्ठिर यथामममहा
बाहोविदिताःसाधुसंमताः २ यत्तुलिंगांतरगतंपृच्छसेमांयुधिष्ठि
र धर्मंधर्मभृतांश्रेष्ठतन्निबोधनराधिप ३ सर्वाण्येतानिकौंतेयवि
द्यंतेमनुजर्षभ साध्वाचारप्रवृत्तानांचातुराश्रम्यकारिणां ४ अका
मद्वेषयुक्तस्यदंडनीत्यायुधिष्ठिर समदर्शिनश्चभूतेषुभैक्ष्याश्रमपदंभ
वेत् वेत्तिज्ञानंविसर्गंचनिग्रहानुग्रहंतथा यथोक्तवृत्तेर्धीरस्यक्षे
माश्रमपदंभवेत् ६ ॥

अकामेत्यादिना कामद्वेषराहित्यंसमदर्शित्वंचयतेरसाधारणोधर्मस्तद्वान्राजायदिदंडनीत्याभूतेषुवर्तेततर्हितस्ययतेः भैक्ष्याश्रमस्यसंन्या १२८
सिनोयत्पदंब्रह्मलोकप्राप्तिस्तद्भवेत् एवंसर्वत्रज्ञेयं ५ क्षेमाश्रमोगार्हस्थ्यं ६ ॥

भैक्षाश्रमो ब्रह्मचर्यं ७ दीक्षाश्रमो वैखानसः ८ ११ परराष्ट्राणां वनौषधीनामिव शिष्टसंरक्षणार्थं कुर्वन् वनितुल्यः १२ दीक्षाबहु

अर्हान्पूजयतो नित्यं संविभागेन पाण्डव सर्वतस्तस्य कौन्तेय भैक्ष्याश्रमपदं भवेत् ७ ज्ञातिसंबंधि
मित्राणि व्यापन्नानि युधिष्ठिर समभ्युद्धरमाणस्य दीक्षाश्रमपदं भवेत् ८ लोकमुख्येषु सत्कारं
लिंगमुख्येषु चासकृत् कुर्वतस्तस्य कौन्तेय वन्याश्रमपदं भवेत् ९ आह्निकं पितृयज्ञांश्च भूतयज्ञा
न्समानुषान् कुर्वतः पार्थ विपुलान्वन्याश्रमपदं भवेत् १० संविभागेन भूतानामतिथीनां तथार्च
नात् देवयज्ञैश्च राजेन्द्र वन्याश्रमपदं भवेत् ११ मर्दनं परराष्ट्राणां शिष्टार्थं सत्यविक्रम कुर्वतः पु
रुषव्याघ्र वन्याश्रमपदं भवेत् १२ पालनात्सर्वभूतानां स्वराष्ट्रपरिपालनात् दीक्षा बहुविधा
राजन्सत्याश्रमपदं भवेत् १३ वेदाध्ययननित्यत्वं क्षमाथाचार्यपूजनं अथोपाध्यायशुश्रूषा ब्रह्मा
श्रमपदं भवेत् १४ आह्निकं यजमानस्य देवान्पूजयतः सदा धर्मेण पुरुषव्याघ्र धर्माश्रमपदं भवेत्
१५ मृत्युर्वा रक्षणं वेति यस्य राज्ञो विनिश्चयः प्राणद्यूते ततस्तस्य ब्रह्माश्रमपदं भवेत् १६ अजिह्म
मशठं मार्गं वर्तमानस्य भारत सर्वदा सर्वभूतेषु ब्रह्माश्रमपदं भवेत् १७ वानप्रस्थेषु विप्रेषु त्रैविद्येषु
च भारत प्रयच्छतोऽर्थान्विपुलान्वन्याश्रमपदं भवेत् १८ ॥

विधेति यावतां पालनं तावन्तो यज्ञाः कृता इत्यर्थः सत्याश्रमो ब्रह्मलोकप्रपद आश्रमः संन्यासः १४ १४ १५ १६ १७ १८ ॥

श्री॰ शां॰ रा॰ टी॰ १२९

अनुक्रोशो दयां आनृशंस्यं अतिष्ठुरत्वं १९ ३० दर्शयर्मगतो भीतस्त्वादिना आर्त्यं तं व्याकुलतया धर्माधर्मप्रतिपत्तिशून्योपि सोऽश्रमी

सर्वभूतेष्वनुक्रोशं कुर्वंस्तस्य भारत आनृशंस्यप्रवृत्तस्य सर्वावस्थं पदं भवेत् १९ बालवृद्धेषु कौंते
य सर्वावस्थं युधिष्ठिर अनुक्रोशक्रियापार्थ सर्वावस्थं पदं भवेत् २० बलात्कृतेषु परित्राणं कुर्व
द्वद्ध शरणागतेषु कौरव्य कुर्वन् गार्हस्थ्यमावसेत् २१ चराचराणां भूतानां रक्षणं चापि सर्वशः
यथार्हपूजां च तथा कुर्वन् गार्हस्थ्यमावसेत् २२ ज्येष्ठानुज्येष्ठपत्नीनां भ्रातॄणां पुत्रनप्तॄणां नि
ग्रहानुग्रहौ पार्थ गार्हस्थ्यमिति तत्तपः २३ साधूनामर्चनीयानां पूजा सुविदितात्मना पालनं पुरु
षव्याघ्र गृहाश्रमपदं भवेत् आश्रमस्थानि भूतानि यस्तु वेश्मनि भारत आददीत हि भोज्येन तत्
द्गार्हस्थ्यं युधिष्ठिरः २५ यः स्थितः पुरुषो धर्मे धात्रा सृष्टे यथार्थवत् आश्रमाणां हि सर्वेषां फलं
प्राप्नोत्यनामय २६ यस्मिन्न नश्यन्ति गुणाः कौंतेय पुरुषे सदा आश्रमस्थं तमप्याहुर्नरश्रेष्ठ युधि
ष्ठिर २७ स्थानमानं कुले मानं वयोमानं तथैव च कुर्वन्वसति सर्वेषु ह्याश्रमेषु युधिष्ठिर २८
देशधर्मांश्च कौंतेय कुलधर्मांस्तथैव च पालयन् पुरुषव्याघ्र राजा सर्वाश्रमे भवेत् २९ काले
विभूतिं भूतानामुपहारांस्तथैव च अर्हयन् पुरुषव्याघ्र साधूनामाश्रमे वसेत् ३० दर्शयर्मग

सः आश्रमी सर्वाश्रमफलभागित्यर्थः ३१ ॥

तस्यापि यो धर्मं प्रत्यवेक्षते सर्वलोकस्य कौंतेय राजाभ

३२ ३६ धर्मइति राजधर्मात्मिकानौः धर्मेऽआविवस्थिता सत्वमेववीर्यंकर्णधारबलंयत्र धर्मसेतुः शास्त्रंसैवघटारकाबंध
येधर्मकुशलालोकेधर्मंकुर्वंतिभारत पालितायस्यविषयेधर्मांशस्तस्यभूपतेः ३१ धर्मारामा
न्धर्मपरान्येनरक्षंतिमानवान् पार्थिवाःपुरुषव्याघ्रतेषांपापंहरंतिते ३२ येचाप्यत्रसहायाः
स्युःपार्थिवानांयुधिष्ठिर तेचैवांशहराःसर्वेधर्मेपरकृतेनघ ३३ सर्वाश्रमपदेप्याहुर्गार्हस्थ्यं
दीप्तनिर्णयं पावनंपुरुषव्याघ्रयंधर्मंपर्युपास्महे ३५ आत्मोपमस्तुभूतेषुयोवैभवतिमानवः
न्यस्तदंडोजितक्रोधःप्रेत्येहलभतेमहत्वं ३६ धर्मेस्थितासत्ववीर्याधर्मसेतुवटारका त्यागवाता
धगाशीघ्रानौस्त्वंसंतारयिष्यति ३७ यदानिवृत्तःसर्वस्मात्कामोयोहृदिस्थितः तदाभवति
सत्वस्थस्ततोब्रह्मसमश्नुते ३८ सुप्रसन्नस्तुभावेनयोगेनचनराधिप धर्मंपुरुषशार्दूलप्राप्स्य
तेपालनेरतः ३९ वेदाध्ययनशीलानांविप्राणांसाधुकर्मणां पालनेयत्नमातिष्ठसर्वलोक
स्यचैवह वनेचरंतियेधर्ममाश्रमेषुचभारत रक्षणात्तच्छतगुणंधर्मंप्राप्नोतिपार्थिवः ४१ प
वतेविविधोधर्मःपांडवश्रेष्ठकीर्तितः अनुतिष्ठत्वमेनंवैपूर्वदृष्टंसनातनं ४२ ॥ =
नरज्जर्यत्रत्यागवातेनैव
शीघ्रगा ३७ सत्वस्थःधीसत्वमात्रनिष्ठः ३८ भावेनचेतसा योगेनचित्तनिरोधेन ३९ ४१ पूर्वदृष्टमनादिं सनातनंपारंपर्यागतं ८

श्री॰
शां॰रा॰
टी॰
१३॰

अध्यायार्थमुपसंहरतिचातुराश्रम्यमिति ४२ षट्षष्टितमः ६५ चातु १ राष्ट्रस्यतात्स्थ्यात्राष्ट्रवासिनोजनस्य कृत्यतमंमुख्यं
कार्यं अनिंद्रअराजकंअतएवाबलं २ नव्यवतिष्ठंतेअन्योन्यंलोकाः धर्मव्यवस्थापनंनकुर्वंतीत्यर्थः ३ ५ अथेतिराज्यार्थीअन्योपि

चातुराश्रम्यमेकाग्रंचातुर्वर्ण्यंचपांडव धर्मंपुरुषशार्दूलप्राप्स्यसेपालनेरतः ४२ इतिश्रीमहाभा
रतेशांतिपर्वणिराजधर्मेषुचातुराश्रम्यविधिः ६६ युधिष्ठिरउ॰ चातुराश्रम्यमुक्तमेचातुर्वर्ण्यंतथैव
च राष्ट्रस्ययत्कृत्यतमंतन्मेब्रूहिपितामह १ भीष्मउ॰ राष्ट्रस्यैतत्कृत्यतमंराज्ञएवाभिषेचनं अनिं
द्रमबलंराष्ट्रंदस्यवोभिभवंत्युत २ अराजकेषुराष्ट्रेषुधर्मोनव्यवतिष्ठते परस्परंचखादंतिसर्वथा
धिगराजकं ३ इंद्रमेवप्रवृणुतेयद्राजानमितिश्रुतिः यथैवेंद्रस्तथाराजासंपूज्योभूतिमिच्छता ४ं
नाराजकेषुराष्ट्रेषुवस्तव्यमितिरोचये नाराजकेषुराष्ट्रेषुहव्यमग्निर्वहत्युत अथचेदभिवर्तेतरा
ज्यार्थीबलवत्तरः अराजकानिराष्ट्राणिहतवीर्याणिवापुनः ६ प्रत्युद्गम्याभिपूज्यःस्यादेतद
त्रसुमंत्रितं नहिपापात्पापतरमस्तिकिंचिदराजकात् ७ सचेत्समनुपश्येतसमग्रंकुशलंभवे
त् बलवान्हिप्रकुपितःकुर्यान्निःशेषतामपि ८ भूयांसंलभतेक्लेशंयागौर्भवतिदुर्दुहा अ
यथासद्दुहाराजन्नैवंतांवितुदंत्यपि

कश्चिदायातितदासपूज्यः राष्ट्रस्थैः अपूजनेदोषमाहनहीति ६ ७ सचेतितत्प्रसादप्रकोपाभ्यांकुशलेराष्ट्रस्येत्यर्थः ८ ९ ॥

१३॰

९ ११ धनादेरर्थउपभोगः १२ ९ वाक्शूरः निष्ठुरभाषी दंडपरुषः उग्रदंडः पारजायिकः परस्त्रीगामी ९ १९ असुखवार्त्ताः
यदतंप्रणमतेनैनतत्संतापमर्हति यत्स्वयंनमतेदात्कृनततत्संतापयंत्यपि ९ एवंयोपमयावीर
सुनमेतबलीयसे इंद्रायसप्रणमतेनमतेयोबलीयसे ९ तस्माद्राजैवकर्त्तव्यः सततंभूतिमि
च्छतानधनार्थोनदारार्थस्तेषांयेषामराजकं १२ प्रीयतेहिहरन्पापः परवित्तमराजके य
दास्यउद्धरंत्यन्येतदाराजानमिच्छति १३ पापाह्यपितदाक्षेमंनलभंतेकदाचन एकस्यहिद्वौह
रतोद्वयोश्चबहवोपरे १४ अदासःक्रियतेदासोह्रियंतेचबलात्स्त्रियः एतस्मात्कारणाद्देवाःप्र
जापालंचक्रिरे १५ राजाचेन्नभवेल्लोकेपृथिव्यांदंडधारकः जलेमत्स्यानिवाभक्ष्यन्दुर्बलं
बलवत्तराः १६ अराजकाःप्रजाःपूर्वंविनेशुरितिनःश्रुतं परस्परंभक्षयंतोमत्स्याइवजलेकृ
शान् समेत्यतास्ततश्चक्रुःसमयानितिनःश्रुतं ९ वाक्शूरोदंडपरुषोयश्चस्यात्पारजायि
कः यःपरस्वमथादद्यात्त्याज्यानस्तादृशाइति ९ विश्वासार्थंचसर्वेषांवर्णानामविशे
षतः तास्तथासमयंकृत्वासमयेनावतस्थिरे १९ सहितास्तास्तदाजग्मुरसुखार्त्ताःपितामहं
अनीश्वराविनश्यामोभगवन्नीश्वरंदिश २० यंपूजयेमसंभूययश्चनःप्रतिपालयेत् ततोमनुं
डःस्वपीडिताः असुखार्त्ताइतिपाठेसुखैरर्थैश्चहीनाः दिशादेहि २० ताः प्रजाः नाभिननंदनांगीचकार २१ ॥

॥ ४

श्री॰
शां॰ रा॰
टी॰
१३१

२२ अधिपंचाशतंपंचाशतमधिकृत्य पंचाशत्पशूनांमेएकंभागंतुभ्यंदास्याम इत्यर्थः तथैवहिरण्यस्यापि २३ विवाहेषूद्य-
तासुकन्यासुशुल्केमौल्यप्रसंगेसतिसुरूपांकन्यांतुभ्यंदास्यामइतिपूर्वेणान्वयः विवादेषुततासुचेतिप्राचांपाठः इयंमया

मनुरु॰ बिभेमिकर्मणःपापाद्राज्यंहिभृशदुष्करं विशेषतोमनुष्येषुमिथ्यावृत्तेषुनित्यदा २२
भीष्मउ॰ तमब्रुवन्प्रजामाभैःकर्तॄनेनोगमिष्यति पशूनामधिपंचाशद्धिरण्यस्यतथैवच धा
न्यस्यदशमंभागंदास्यामःकोशवर्धनं कन्यांशुल्केचारुरूपांविवाहेषूद्यतासुच २४ मुखेनश
स्त्रपत्रेणयेमनुष्याःप्रधानतः भवंतंतेऽनुयास्यंतिमहेंद्रमिवदेवता २५ सत्वंजातबलोराजादुः
प्रधर्षःप्रतापवान् सुखेधास्यसिनःसर्वान्कुबेरइवनैरृतान् २६ यंचधर्मंचरिष्यंतिप्रजाराज्ञा
सुरक्षिताः चतुर्थंतस्यधर्मस्यत्वत्संस्थंवैभविष्यति २७ तेनधर्मेणमहतासुखलब्धेनभा
वितः पाह्यस्मान्सर्वतोराजन्देवानिवशतक्रतुः २८ विजयायहिनिर्याहिप्रतपन्रश्मिवानि
व मानंविधमशत्रूणांधर्मोजयतुनःसदा २९ सनिर्ययौमहातेजाबलेनमहतावृतः महा
भिजनसंपन्नस्तेजसाप्रज्वलन्निव ३० ॥

क्रयेतिविवादविषयासु इतितदर्थः विवादेषूततासुचेतिपाठेघूतेनाघूतेपाणीकृतत्वं २४ मुखेनप्रमुखतःप्रथमसित्यर्थःशास्त्रप
त्रेणावाहनेनच प्रधानतःश्रेष्ठाःप्रथमार्थेतसि २५ मानंदर्पंविधमनाशय २९ ३० ॥ १३१

अपतत्रसिरेत्रासंप्राप्ताः ३१ ३५ पत्रंवाहनं ३६ ३८ संविभागीविभज्यभोक्ता वल्गुशोभनं ३९ समष्टित्तमः ६७ किमाङ्गः
तस्यदृष्ट्वामहत्त्वंतेमहेन्द्रस्येवदेवताः अपतत्रसिरेसर्वेस्वधर्मेचरद्दमनः ३१ ततोमहीपरिययौ
पर्जन्यइववृष्टिमान् शमयन्सर्वतःपापान्स्वकर्मसुचयोजयन् ३२ एवंयेभूतिमिच्छेयुः
पृथिव्यांमानवाःक्वचित् कुर्युराजानमेवाग्रेप्रजानुग्रहकारणात् ३३ नमस्येरंश्चतंभक्त्या
शिष्याइवगुरुंसदा देवाइवचदेवेन्द्रंतत्रराजानमंतिके ३४ सत्कृतःस्वजनेनेहपरोपिबहुमन्यते
स्वजनेनत्ववज्ञातंपरेपरिभवंत्युत ३५ राज्ञःपरैःपरिभवःसर्वेषामसुखावहः तस्माच्छत्रंच
पत्रंचवाहनान्याभरणानिच ३६ भोजनान्यथपानानिराज्ञेदद्युर्गृहाणिच आसनानिचशय्या
श्चसर्वोपकरणानिच ३७ गोप्तातस्मात्दुराधर्षः स्मितपूर्वाभिभाषिता आभाषितश्चमधुरंप्र
त्याभाषेतमानवान् ३८ कृतज्ञोदृढभक्तिःस्यात्संविभागीजितेन्द्रियः ईक्षितःप्रतिवीक्षेतमृ
दुवल्गुचसुष्ठुच ३९ इतिश्रीमहाभारतेशान्तिपर्वणिराजधर्मेषु ६७ युधिष्ठिरउ० किमा
हुर्दैवतंविप्राराजानंभरतर्षभ मनुष्याणामधिपतिंतन्मेब्रूहिपितामह १ भीष्मउ० अत्राप्युदाह
रंतीममितिहासंपुरातनं बृहस्पतिंवसुमनायथापप्रच्छभारत २ राजावसुमनानामकौशल्यो
धीमतांवरः महर्षिंकिलपप्रच्छकृतप्रज्ञंबृहस्पतिं ३ ॥ १ २ ३ ॥

श्री॰
शां॰ रा॰
टी॰
१३२

वैनयिकंअभ्युत्थानाभिवादनादिकं दक्षिणादक्षिणोऽसमीपेभूत्वाप्रदक्षिणीकृत्येत्यर्थः ४ ८ समुदीर्णांत्यक्तमर्यादं समुत्सु
कंपरदाराद्यासक्तंप्रसादयतिदंडेनशुद्धंकरोति ९ ९ अनुदकेअल्पोदकेनिराक्रंदेदस्युभयरहिते ११ १३ परिग्रहान्गृहादीन्

सर्वंवैनयिकंकृत्वाविनयज्ञोबृहस्पतिं दक्षिणानंतरोभूत्वाप्रणम्यविधिपूर्वकं ४ विधिंपप्रच्छ
राज्यस्यसर्वलोकहितेरतः प्रजानांसुखमन्विच्छन्धर्मशीलोबृहस्पतिं ५ वसुमनाउ॰ केनभूता
निवर्द्धंतेक्षयंगच्छंतिकेनवा कमर्चंतोमहाप्राज्ञसुखमत्यंतमाप्नुयुः ६ एवंपृष्टोमहाप्राज्ञःकौश
ल्येनामितौजसा राजसत्कारमव्यग्रःशशंसास्मैबृहस्पतिः ७ बृहस्पतिरुवाच राजमूलोमहा
प्राज्ञधर्मोलोकस्यलक्ष्यते प्रजाराजभयादेवनखादंतिपरस्परं ८ राजाह्येवाखिलंलोकंसमुदीर्णाः
अंधेतमसिमज्जेयुरपश्यंतःपरस्परं ९ यथाह्यनुदकेमत्स्यानिराक्रंदेविहंगमाः विहरेयुर्यथाका
मंविहिंसंतःपुनःपुनः १० विमथ्यातिक्रमेरंश्चविषह्यापिपरस्परं अभावमचिरेणैवगच्छेयुर्नात्रसं
शयः ११ एवमेवविनाराज्ञाविनश्येयुरिमाःप्रजाः अंधेतमसिमज्जेयुरगोपाःपशवोयथा १२ ह
रेयुर्बलवंतोपिदुर्बलानांपरिग्रहान् हन्युर्व्यायच्छमानांश्चयदिराजानपालयेत् १४ ममेदमिति
लोकेस्मिन्नभवेत्संपरिग्रहः नदारानचपुत्रःस्यान्नधनंनपरिग्रहः १५ ॥ +णंसमुत्सुकं प्रसादयतिधर्मेणप्रसा १३२

[illegible]

व्यायच्छमानान् स्वस्वमर्थंआग्रहेणरक्षमाणान् १४ ममेदमितिनस्यात् अपितुबलवतइदमित्येवस्यात् १५ ॥

विषक्तर्वृत्तः लोपः अर्थानां लुंपनं १५ १९ अंताः म्लेच्छः दस्युसमात् चोरादीनः २० योनिदोषः व्यभिचारे विगानं २१ २२ संप्रवर्त्ते

विषयलोपः प्रवर्तेत यदि राजा न पालयेत् १५ यानं वस्त्रमलंकारान् रत्नानि विविधानि च हेमा
युः स्हस्मापापाय यदि राजा न पालयेत् पैतृकं विविधं शास्त्रं बहुधा धर्मचारिषु अधर्मः प्रगृहीतः।
स्याद्यदि राजा न पालयेत् १७ मातरं पितरं वृद्धमाचार्यमतिथीन् गुरून् क्लिश्नीयुरपि हिंस्युर्वा यदि
राजा न पालयेत् १८ वधबंधपरिक्लेशो नित्यमर्थवतां भवेत् ममत्वं च न विंदेयुर्यदि राजा न पाल
येत् १९ अंता श्वाकालपवस्युर्लोको यदस्युसाद्भवेत् पतेयुर्नरके घोरे यदि राजा न पालयेत् २०
न योनिदोषो वर्तेत न कृषिर्न वणिक्पथः मज्जेद्धर्मस्त्रयीनस्याद्यदि राजा न पालयेत् २१ न य
ज्ञाः संप्रवर्तेयुर्विधिवत्स्वाप्तदक्षिणाः न विवाहाः समाजो वा यदि राजा न पालयेत् २२ न वृषाः
संप्रवर्तेरन्न मथ्येरंश्च गर्गराः घोषाः प्रणाशं गच्छेयुर्यदि राजा न पालयेत् २३ त्रस्तमुद्विग्नहृ
दयं हाहाभूतमचेतनं क्षणेन विनशेत्सर्वं यदि राजा न पालयेत् २४ न संवत्सरसत्राणि तिष्ठेयु
रकुतोभयाः विधिवद्दक्षिणावंति यदि राजा न पालयेत् २५ ब्राह्मणाश्चतुरो वेदान्नाधीयीरंस्त
पस्विनः विद्यास्नाता व्रतस्नाता यदि राजा न पालयेत् २६ न लभेद्धर्मसंश्लेषं हतविप्रहतो जनः

स्तनतटेतः स्त्रिचेस्तन्यं गो रोमीन भेदे स्त्रीमंथत्वामिति मेदिनी २३ २७ हर्तास्वस्य दिशं गच्छेद्यदि राजा न पालयेत् २७ ॥

श्री· हस्ताद्धस्तस्थमपिचोराहरेयुः २८ अनयाः अनायासमितिपाठेअक्लेशंयथास्यात्तथाप्रवर्त्तेरन्परदारादिषु २९ विवृत्यउद्घाट्य ३०

शां·रा· हस्तलाघवंतत्साध्यंताडनंआक्रुष्टंगालितंवाकुतोनसहतेअपितुअनायकत्वात्सहतएव गांपृथ्वीं ३१ ३२ अपुरुषाःअरक्षि

टी·

१३३

हस्ताद्धस्तंपरिमुषेद्भिद्येरन्सर्वसेतवः भयार्त्ताविद्रवेत्सर्वंयदिराजानपालयेत् २८ अनयाःसंप्र
वर्तेरन्भवेद्वैवर्णसंकरः दुर्भिक्षमाविशेद्राष्ट्रंयदिराजानपालयेत् २९ विवृत्यहियथाकामंगृहद्वा
राणिशेरते मनुष्यारक्षिताराज्ञासमंतादकुतोभयाः ३० नाक्रुष्टंसहतेकश्चित्कुतोवाहस्तलाघवं
यदिराजानसम्यग्गांरक्षत्यपिधार्मिकः ३१ स्त्रियश्चापुरुषामार्गंसर्वालंकारभूषिताः निर्भयाः
प्रतिपद्यंतेयदिरक्षतिभूमिपः ३२ धर्ममेवप्रपद्यंतेनहिंसंतिपरस्परं अनुगृह्णंतिचान्योन्यंयदा
रक्षतिभूमिपः ३३ यजंतेचमहायज्ञैस्त्रयोवर्णाःपृथग्विधैः युक्ताश्चाधीयतेविद्यांयदारक्षति
भूमिपः ३४ वार्त्तामूलोह्ययंलोकस्त्रय्यावैधार्यतेसदा तत्सर्वंवर्त्ततेसम्यग्यदारक्षतिभूमिपः ३५
यदाराजाधुरंश्रेष्ठामादायवहतिप्रजाः महताबलयोगेनतदालोकःप्रसीदति ३६ यस्याभावे
चभूतानामभावःस्यात्समंततः भावेचभावोनित्यंस्यात्कस्तंनप्रतिपूजयेत् ३७ तस्ययोवहते
भारंसर्वलोकाभयावहं तिष्ठत्प्रियहितेराज्ञउभौलोकाविभोजयेत् ३८ ॥

ताअपि ३३ ३४ वार्त्ताजीविकातन्मूलः त्रय्याचदृष्टादिहेतुतत्रय्याधार्यतेरक्ष्यते सर्वंत्रयीवार्त्तादि ३५ ३६ ३७ ३८ ॥ १३३

३९ ४० आसीदतः समीपस्थान् मिथ्योपचरितो वंचितः ४२ ४९ कृष्णगतिः अग्निः अभिपन्नस्य तिरस्कृतस्य ५० ॥

यस्तस्य पुरुषः पापं मनसाप्यनुचिंतयेत् असंशयमिह क्लिष्टः प्रेत्यापि नरकं व्रजेत् ३९ न हि ज्ञात
वमंतव्यो मनुष्य इति भूमिपः महती देवता ह्येषा नररूपेण तिष्ठति ४० कुरुते पंचरूपाणि कालयुक्तानि
यः सदा भवत्यग्निस्तथादित्यो मृत्युर्वैश्रवणो यमः ४१ यदा ह्यासीदतः पापान्दहत्युग्रेण तेजसा मि
थ्योपचरितो राजा तदा भवति पावकः ४२ यदा पश्यति चारेण सर्वभूतानि भूमिपः क्षेमं च कृत्वा व्र
जति तदा भवति भास्करः ४३ अशुचींश्च यदा क्रुद्धः क्षिणोति शतशो नरान् सपुत्रपौत्रान्सामात्यां
स्तदा भवति सोंतकः ४४ यदा त्वधार्मिकान्सर्वांस्तीक्ष्णैर्दंडैर्नियच्छति धार्मिकांश्चानुगृह्णाति भ
वत्यथ यमस्तदा ४५ यदा तु धनधाराभिस्तर्पयत्युपकारिणः आच्छिनत्ति च रत्नानि विविधान्यपा
कारिणां ४६ श्रियं ददाति कस्मैचित्कस्माच्चिदपकर्षति तदा वैश्रवणो राजँल्लोके भवति भूमिपः
४७ नास्यापवादे स्थातव्यं दक्षेणाक्लिष्टकर्मणा धर्ममाकांक्षता लोकमीश्वरस्यानसूयता ४८
न ह्यस्य ते प्रतीपानि कुर्वन्सुखमवाप्नुयात् पुत्रो भ्राता वयस्यो वा यश्चात्मसमो भवेत् ४९ कु
र्यात्कृष्णगतिः शेषं ज्वलितोनिलसारथिः न तु राजाभिपन्नस्य शेषं क्वचन विद्यते ५० ॥

श्री॰
शां॰रा॰
टी॰
१३४

सर्वाणिद्रव्याणिरत्नाण्येवनतुदर्शनमाति यद्वारत्नानीयानिद्रव्याण्येवरत्नानि ५१ कूटंमारणयंत्रं कूटोऽस्त्रीसीरावयववयंत्रयोरि-
तिमेदिनी ५२ ५३ राजारंजकः भोजः हवानांभोजयिता विविधंराजतइतिविराट्श्रीमानसम्राडितिराज्ञामधिराजेत्यर्कंदितैः

शांतिपर्वणि ६३ ॥

तस्मसर्वाणिरत्नाणिहर्तृतः परिवर्जयेत् मृत्योरिवजुगुप्सेतराजस्वहरणान्नरः ५१ नश्येदभिमृश
न्सद्योमृगःकूटमिवस्पृशन् आत्मस्वमिवरक्षेतराजस्वमिहबुद्धिमान् ५२ महान्तंनरकंघोरमप्रति
ष्ठमचेतनं पतंतिचिररात्रायराजवित्तापहारिणः ५३ राजाभोजोविराट्सम्राट्क्षत्रियोभूपतिर्नृपः
यएभिस्तूयतेशब्दैः कस्तंनार्चितुमर्हति ५४ तस्माद्बुभूषुर्नियतोजितात्मानियतेंद्रियः मेधावीस्मृ
तिमान्दक्षः संश्रयेतमहीपतिं ५५ कृतज्ञंप्राज्ञमक्षुद्रंदृढभक्तिंजितेंद्रियं धर्मनित्यंस्थितंनीत्यांमंत्रि
णंपूजयेन्नृपः ५६ दृढभक्तिंकृतप्रज्ञंधर्मज्ञंसंयतेंद्रियं शूरमक्षुद्रकर्माणंनिषिद्धजनमाश्रयेत्
५७ प्रज्ञाप्रगल्भंकुरुतेमनुराजाकृशान्वैकुरुतेमनुष्यान् राजाभिपन्नस्यकुतःसुखानिराजाभ्युपे
तंसुखिनंकरोति ५८ राजाप्रजानांहृदयंगरीयोगतिःप्रतिष्ठासुखमुत्तमंच समाश्रितालोकमिमं
परंचजयंतिसम्यक्पुरुषानरेंद्र ५९ नराधिपश्चाप्यनुशिष्यमेदिनींदमेनसत्येनचसौहृदेन महा-

इति श्रीमहाभारते शान्तिपर्वणि राजधर्मानुशासनपर्वणि

त्रिषष्टितमोऽध्यायः ६३ ॥

स्मार्यः ५४ बुभूषुर्भवितुमिच्छुः ५५ ५६ निषिद्धजनंअहमेकएवेदंकार्यंकरिष्यामिकिमेतैरितिवादिनंपकांगवीरं ५७ ५८ समाश्रिताःरा

१९ श्रेष्ठतमः २० एवं राज्ञां माहात्म्यं श्रुत्वा तत्कर्तव्यं पृच्छति पार्थिवेनेति १ भृत्यादीनपि कथं प्रयुञ्जीत विश्वासयेच्चेति योज्यम्।
२ पार्थिवेन दृष्टपूर्वं श्रेष्ठेन राज्ञा पार्थिवप्रकृतेन वा विजातीयेनापि तत्कार्यकारिणा प्रहितेनेति पाठान्तरे ३ आत्मा चित्तं ४ पंचवर्गः

स एवमुक्तोऽङ्गिरसा कौशल्यो राजसत्तमः प्रयत्नात्कृतवान्वीरः प्रजानां परिपालनं २० इति
श्रीमहाभारते शान्तिपर्वणि राजधर्मे ६८ युधिष्ठिर उ० पार्थिवेन विशेषेण किं कार्यमवशिष्य
ते कथं रक्ष्यो जनपदः कथं जेयाश्च शत्रवः १ कथं चारं प्रयुञ्जीत वर्णान्विश्वासयेत्कथं कथं भृत्या
न्कथं दारान्कथं पुत्रांश्च भारत २ भीष्म उ० राजवृत्तं महाराज शृणुष्वावहितोऽखिलं यत्कार्यं पा
र्थिवेनादौ पार्थिवप्रकृतेन वा ३ आत्मा जेयः सदा राज्ञा ततो जेयाश्च शत्रवः अजितात्मा नरपति
र्विजयेत कथं रिपून् ४ एतावानात्मविजयः पंचवर्गविनिग्रहः जितेन्द्रियो नरपतिर्बाधितुं शक्नु
यादरीन् ५ न्यसेत गुल्मान्दुर्गेषु संधौ च कुरुनन्दन नगरोपवने चैव पुरोद्यानेषु चैव हि ६ संस्था
नेषु च सर्वेषु पुरेषु नगरेषु च मध्ये च नरशार्दूल तथा राजनिवेशने ७ प्रणिधींश्च ततः कुर्याज्जडां
धबधिराकृतीन् पुंसः परीक्षितान्प्राज्ञान्क्षुत्पिपासाश्रमक्षमान् ८ अमात्येषु च सर्वेषु मित्रे
षु विविधेषु च पुत्रेषु च महाराज प्रणिदध्यात्समाहितः ९ ॥

श्रोत्रादिः ५ गुल्मान् रक्षिगणः पतीन् संधौ सी
मान्ते ६ संस्थानेषु कोष्ठपालाद्युपवेशनस्थानेषु मध्ये अन्तःपुरे ७ प्रणिधीन्चारान् ८ प्रणिदध्यात्गुप्तचारान्नियुञ्ज्यात् ९ ॥

९ आपणेषु वणिजां हट्टेषु विहारेषु पूर्णा मल्लक्रीडास्थानेषु समाजेषु महाजनसमुदायेषु ११ आरामेषु पुष्पवाटिकासु उद्यानेषु दी-
र्घवाटिकासु देशेषु प्राकारस्थानेषु चत्वरेषु अर्थिकारिणां उपवेशनस्थाने सभासु राजसंसत्सु आवसथेषु तत्र तत्र महत्सु गृहेषु

पुरेषु जनपदे चैव तथा सामंतराजसु यथा न विद्युरन्योन्यं प्रणिधेयास्तथा हि ते ९ चारांश्च वि-
द्यात्प्रहितान्परेण भरतर्षभ आपणेषु विहारेषु समाजेषु च भिक्षुषु १० आरामेषु तथोद्याने पंडि-
तानां समागमे देशेषु चत्वरे चैव सभास्वावसथेषु च ११ एवं विचिनुयाद्राजा परं विचक्षणः चारे
हि विदिते पूर्वं हितं भवति पांडव १२ यदा तु हीनं नृपतिर्विद्यादात्मानमात्मना अमात्यैः सह संमंत्र्य
कुर्यात्संधिं बलीयसा १३ अज्ञायमानो हीनत्वं संधिं कुर्यात्परेण वै लिप्सुर्वा कंचिदेवार्थं त्वरमा-
णो विचक्षणः १४ गुणवंतो महोत्साहा धर्मज्ञाः साधवश्च ये संदधीत नृपस्तैश्च राष्ट्रं धर्मेण पाल-
यन् १५ उच्छिद्यमानमात्मानं ज्ञात्वा राजा महामतिः पूर्वापकारिणो हन्याल्लोकद्विष्टांश्च सर्व-
शः १६ यो नोपकर्तुं शक्नोति नापकर्तुं महीपतिः न शक्यरूपश्चोद्धर्तुमुपेक्ष्यस्तादृशो भवेत् १७

१२ विचिनुयात् १३ १४ १५ नैर्हीनभूतैः तान् हार्यो न संदध्यात् बलवद्भिः स्वल्पैः सह संधिं कुर्यात् १६ पूर्वापकारिणः पूर्वं दुष्टा
इति अपकृतवन्तः पश्चाद्दयया अनुगृहीता ये पूर्वापकारवन्तः तान् १७ तत्रापि विशेषमाह य इति १८

यात्रायांयदिइच्छास्यात् तर्हिदुर्बलत्वादिनाविज्ञातंशत्रुंप्रत्येवयात्रामात्तापयेदित्युत्तरेणसंबंधः यात्रांयायादविज्ञातमितिपाठेदुर्बलं शत्रुमुद्दिश्यतेनाविज्ञातं यथास्यात्तथायात्रांयायादितियोजना अनाक्रंदमित्रहीने अनंतरंबंधुजनहीने व्यासक्तेअन्येनयुद्धंकुर्वाणे प्रमत्तेअनवहिते १९ विधानेरक्षणेरक्षणादिसामग्रीसंपादने २० कर्षयन्वीर्यवंतंतत्परःकर्षणपरः २१ कर्षणमेवाहराष्ट्रंचेति

यात्रायांयदिविज्ञातमनाक्रंदमनंतरं व्यासक्तंचप्रमत्तंचदुर्बलंचविचक्षणः १९ यात्रामात्तापयेद्धीरःकल्यःपुष्टबलःस्वयं पूर्वंकृत्वाविधानंचयात्रायांनगरेतथा २० नचवश्योभवेदस्यन्योयस्मातिवीर्यवान् हीनश्चबलवीर्याभ्यांकर्षयंस्तत्परोवसेत् २१ राष्ट्रंचपीडयेत्तस्यशस्त्राग्निविषमूर्छनैः अमात्यवल्लभानांचविवादांस्तस्यकारयेत् २२ वर्जनीयंसदायुद्धंराज्यकामेनधीमता उपायैस्त्रिभिरादानमर्थस्याहबृहस्पतिः २३ सांत्वेनतुप्रदानेनभेदेनचनराधिप यमर्थंशक्नुयात्साधुंतेनयुध्येतपंडितः २४ ॥

कारयेत्भृत्यादिद्वारा २२ २३ बलिनोराष्ट्रकर्षणेनदुर्बलस्ततः सांत्वेनार्थयत्यावत्साधंशक्नुयात्तेननयुध्येत् भवद्भिर्मत्तोवार्षिकःकरोनग्राह्यो मयाचभवतांराष्ट्रंनोपहंतव्यमितिसांत्वं महाग्रामद्वयंतेनाहंदास्यामिइत्यत्रार्थप्रदानं भेदेनराजामात्यान्भेदयित्वाराज्ञः स्वोपरिप्रयाणस्यविघ्नादिकंवाकर्तव्यमित्यादिनाहीनःप्रबलेनसहदैवेर्वितत्संग्रामंविना एवंउपायत्रयेणस्वार्थंसाधयेदित्यर्थः २४

श्री॰ प्रजाभ्यः स्वाभ्यः २५ दशधर्मगताः मत्तोन्मत्तादयः तेभ्यः दंडेभ्यो यद्वसु ग्राह्यं तत्पौराणां रक्षणाय भवति अदंडितास्ते पुरं बाधेरन्निति भा-
शां॰रा॰ वः २६ भक्तिः स्वीयत्वेन स्नेहः पक्षपात इति २७ व्यवहारेषु अर्थिप्रत्यर्थिवाक्यविचारेषु राजा प्राज्ञान् पंडितान् न्यसेत् २८ आकरेषु वर्णादिषु

टी॰ आददीत बलिं चापि प्रजाभ्यः कुरुनंदन स षड्भागमपि प्राज्ञस्तासामेवाभिगुप्तये २५ दशधर्मगते-
१३६ भ्यो यद्वसु बह्वल्पमेव च तन्नाददीत सहसा पौराणां रक्षणाय वै २६ यथा पुत्रास्तथा पौरा द्रष्टव्या-
स्ते न संशयः भक्तिश्चैषां न कर्तव्या व्यवहारे प्रदर्शिते २७ श्रोतुं चैव न्यसेद्राजा प्राज्ञान्सर्वार्थदर्शि-
नः व्यवहारेषु सततं तत्र राज्यं प्रतिष्ठितं २८ आकरे लवणे शुल्के तरे नागबले तथा न्यसेदमात्या-
न्नृपतिः स्वाप्तान्वा पुरुषान्हितान् २९ सम्यग्दंडधरो नित्यं राजा धर्ममवाप्नुयात् राज्ञो हि सततं दं-
डः सम्यग्धर्मः प्रशस्यते ३० वेदवेदांगवित्प्राज्ञः सुतपस्वी नृपो भवेत् दानशीलश्च सततं यज्ञशी-
लश्च भारत ३१ एते गुणाः समस्ताः स्युर्नृपस्य सततं स्थिराः व्यवहारस्य लोपे हि नृपतेः कुतः स्वर्गः कुतो य-
शः ३२ यदा तु पीडितो राजा भवेद्राज्ञा बलीयसा तदाभिसंश्रयेद्दुर्गं बुद्धिमान्पृथिवीपतिः ३३ वि-
धायाक्रम्य मित्राणि विधानमुपकल्पयेत् सामभेदान्विरोधार्थं विधानमुपकल्पयेत् ३४ घो-
षान्न्यसेत मार्गेषु ग्रामानुत्थापयेदपि प्रवेशयेच्च तान्सर्वान् शाखानगरकेष्वपि ३५ ॥

त्पत्तिस्थाने लवणोत्पत्तिस्थाने शुल्के धान्यादिविक्रयस्थाने तरे नदीसंतरणे नागबले एतेषु आयव्ययविचारार्थममात्यान्न्यसेत् २९ ३४ १३६
घोषान् व्रजस्थानं मार्गेषु राजपथेषु न्यसेत् शाखानगराणि महानगरस्योपनगराणि ३५ ॥

येदिति यतिकादीन् दुर्गेषु प्रवेशयेदित्यर्थः ३६ अतिहारं समीपमानयन्तं दहेत् परेषां तन्माभूदिति ३७ उपजपेत् भेदयित्वा तद्द्वारा दाहयेत्
३८ संक्रामान् अवतरणार्थान् सेतून् जलं तडागादिस्थं विस्रावयेत् तदयोग्यं वापीकूपादिस्थं विषादिना नाशयेत् ३९ तदात्वेन वर्त्तमान
कालेनायतीभिः उत्तरकालेश्च अपवर्गात्तृतीया सर्वदा मित्रकार्य उपस्थितेपि तद्विहायेत्यर्थात् आजौ परस्य शत्रोः प्रतीघातं हन्तारं भूम्या।

ये गुप्ताश्चैव दुर्गाश्च देशास्तेषु प्रवेशयेत् यतिनो बलशब्द्यांश्च सान्त्वयित्वा पुनः पुनः तस्याभिहारं
कुर्याच्च स्वयमेव नराधिपः असंभवे प्रवेशस्य दहेद्वा वाग्निना भृशम् ३७ तत्रस्थेषु च सस्येषु शत्रो।
रुपजपेन्नरान् विनाशयेद्वा तत्सर्वं बलेनाथ स्वकेन वा ३८ नदीमार्गेषु च तथा संक्रमान् अवसाद
येत् जलं विस्रावयेत्सर्वमविस्राव्यं च दूषयेत् ३९ तदात्वेनायतीभिश्च निवसेद्भूम्यनन्तरं प्रति
घातं परस्याजौ मित्रकार्येष्वुपस्थिते ४० दुर्गाणां चाभितो राजा मूलच्छेदं प्रकारयेत् सर्वेषां तु
क्षुद्रवृक्षाणां चैत्यवृक्षान् विवर्जयेत् ४१ प्रवृद्धानां च वृक्षाणां शाखाः प्रच्छेदयेत्तथा चैत्यानाम
वेथा त्याज्यमपि पत्रस्य पातनं ४२ ॥

नन्तरं निकटदेशवासिनं तत्क्षत्रमाश्रित्य निवसेत् अयमर्थः स्वराष्ट्रे यन्मुख्यं स्थानं तदाक्रम्य वसन् शत्रोः शत्रुभिः सर्वदा स्नेहं कृत्वा तद्ब
लेन शत्रून् स्वराष्ट्राद्दूरीकुर्यादिति ४० दुर्गाणां तु दुर्गाणां परेषामाश्रयो माभूदिति मूलच्छेदं कुर्यात् ४१ ४२ ॥

प्रगंडीः कारयेत्सम्यक् षाड्गुण्यं सत्रिवर्गकं योवेत्ति पुरुषव्याघ्रस भुंक्ते पृथिवीमिमामिति प्राचां पाठः तस्मात्व्यानेन च तदीयमेव संचारोय
त्रलोकानां हृद्यादेवावबुध्यते प्रगंडीस्ताश्च वित्तियाबहिः प्राकारसंततिना शोणितस्तत्रयत्नेन कर्त्तव्यो भूतिमिच्छता सएवाकाशोस्त्रलोका
रत्नीति सूच्यते शास्त्रकोविदैरिति तास्तत्तदित्तकारयेदित्यर्थः षाड्गुण्यं संधिविग्रहादि त्रिवर्गाः स्थानवृद्धिक्षयरूपो वा प्रति मित्रोदासीनरूपो
वामंत्रोत्साहप्रभुशक्तिरूपो वा भूमितित्रहिरण्यादिरूपो वा धर्मार्थकामरूपो वा उत्तरार्द्धार्थः स्पष्टः प्रगंडीः दुर्गप्राकारभित्तौ शूराणां सुप्रवेश

प्रगंडीः कारयेत्सम्यगाकाशजननीस्तदा आपूरयेच्च परिखांस्थाणुनक्रझषाकुलां ५३ सं
कटद्वारकाणि स्युः सम्यक्सामर्थ्यपुरस्य च तेषां च द्वारवद्गुप्तिः कार्या सर्वात्मना भवेत् ५४ द्वारेषु
च गुरूण्येव यन्त्राणि स्थापयेत्सदा आरोपयेच्छतघ्नीश्च स्वाधीनानि च कारयेत् ५५ काष्ठा
नि चाभिहार्याणि तथा कूपांश्च खानयेत् संशोधयेत्तथा कूपान्कृतपूर्वान्पयोर्थिभिः ५६ तृणा
च्छन्नानि वेश्मानि पंकेनाथ प्रलेपयेत् निर्हरेच्च तृणं मासि चैत्रे वह्निभयात्तथा ५७ नक्तमेव
च भक्तानि पाचयेत नराधिपः न दिवा ज्वालयेदग्निं वर्जयित्वाग्निहोत्रिकं ५८ ॥

तस्थानानि आकाशजननीः तत्र च पकपत्तायां भित्तौ तत्रत्यानां रक्षणाभूतायां बाह्यार्थदर्शनार्थानि दृढच्छिद्राणि यद्वारा आग्नेयास्त्रगु
लिकाः प्रक्षिप्यंते स्थाणवः सशूलाः येषु पतन विदीर्यते नक्रैर्वा भक्ष्यते ५३ संकटद्वारकाणि सूक्ष्मद्वाराणि तेषां च द्वारवत्गुप्तिः का १३०
र्या तेषां चाचारवद्गुप्तिरिति पाठे आचारवद्भिः शिष्टैर्गुप्तिः कार्या ५४ ५५ ५६ ५७ ५८ ॥

कर्मारः लोहकारादिस्तच्छाला अरिष्टं सूतिकागृहं तद्गृहमपास्य शालास्व अन्तर्विधेयो आच्छादितः कर्तव्यः ४९ महादंडो वधः ५० चाक्रि-
कान्शाकटिकान् कुशीलवान्फाललेखान्कीनाशानिति यावत् ५१ तीर्थेषु मंत्र्यादिषु अष्टादशसु प्राग्व्याख्यातेषु ५२ ५४ प्रतोलीर-

कर्मारारिष्टशालासु ज्वलेदग्निः सदा ततः गृहाणां च प्रवेशं त विधेयः स्याद्धुताशनः ४९ महादं-
डश्च तस्य स्याद्यस्याग्निर्वै दिवा भवेत् प्रबोधयेदथैवं च रक्षणार्थं पुरस्य च ५० भिक्षुकांश्चाक्रिकांश्चै-
व क्लीबोन्मत्तान्कुशीलवान् बाह्यान्कुर्यान्नरश्रेष्ठ दोषाय स्युर्हितेन्यथा ५१ चत्वरेषु च तीर्थेषु सभा-
स्वावसथेषु च यथार्थं वर्णप्रणिधिं कुर्यात्सर्वेषु पार्थिवः ५२ विशालान्राजमार्गांश्च कारयीत नरा-
धिपः प्रपाश्च विपणांश्चैव यथोद्देशं समादिशेत् ५३ भांडागारान्पुथागारान्योधागारांश्च सर्व-
शः अश्वागारान्गजागारान्बलाधिकरणानि च ५४ परिखाश्चैव कौरव्य प्रतोलीर्निष्कुटानि च न
जातु नृपः प्रपश्येत गुह्यमेतद्युधिष्ठिर ५५ अर्थसंनिचयं कुर्याद्राजा परबलार्दितः तैलं वसां मधु घृत-
मौषधानि च सर्वशः ५६ अङ्गारकुशमुञ्जानां पलाशशरवर्णिनां यवसेन्धनदिग्धानां कारयीत च संः-
चयान् ५७ आयुधानां च सर्वेषां शक्त्यृष्टिप्रासवर्मणां संचयानेवमादीनां कारयीत नराधिपः ५७

थ्या निष्कुटानि गृहारामाः ५५ वर्णिनां लेखकानां वर्णी स्याल्लेखके चित्रकरेपि ब्रह्मचारिणीति मेदिनी यवसं घासः दिग्धानां विषाक्तबा-
णानां दिग्धो विषाक्तबाणे स्यादिति मेदिनी ५६ ॥

चतुर्विधान् विषशल्यरोगकृत्याहरान् ५८ ६१ अस्थानेकोपेनपरस्यनिर्वेदस्ताऽनेवाकृतंचेत्‌दानमानादिनापुनस्तत्समीकर्त्तव्यमित्याह
निर्वेदयित्वेति ६२ ६५ संधानासनंसंधिंकृत्वावस्थितिः यात्रासंधानेयानं ६६ विगृह्यैववैरंकृत्वावस्थानंविग्रहः यात्रांसंपरिगृह्यआसनंश-

औषधानिचसर्वाणिमूलानिचफलानिच चतुर्विधांश्चवैद्यान्वैसंगृह्णीयाद्विशेषतः ५९ नटा-
श्चनर्तकाश्चैवमल्लामायाविनस्तथा शोभयेयुःपुरवरंमोदयेयुश्चसर्वशः ६० यतःशङ्काभवेच्चा-
पिभृत्यतोवापिमन्त्रितः पौरेभ्योनृपतेर्वापिस्वाधीनान्कारयीततान् ६१ कृतेकर्मणिराजेन्द्रपूजये-
द्धनसंचयैः दानेनचयथार्हेणसान्त्वेनविविधेनच ६१ निर्वेदयित्वातुपरंहत्वावाकुरुनन्दन ततोऽ-
नृणोभवेद्राजायथाशास्त्रनिदर्शितं ६२ राज्ञासप्तैवरक्ष्याणितानिचैवनिबोधमे आत्मामात्या-
श्चकोशश्चदण्डोमित्राणिचैवहि ६३ तथाजनपदाश्चैवपुरंचकुरुनन्दन एतत्सप्तात्मकंराज्यंपरि-
पाल्यंप्रयत्नतः ६४ षाड्गुण्यंचत्रिवर्गंचत्रिवर्गपरमंतथा योवेत्तिपुरुषव्याघ्रसभुङ्क्तेपृथिवीमिमा
६५ षाड्गुण्यमितियत्प्रोक्तंतन्निबोधयुधिष्ठिर संधानासनमित्येवयात्रासंधानमेवच ६६ विगृ-
ह्यासनमित्येवयात्रांसंपरिगृह्यच द्वैधीभावस्तथान्येषांसंश्रयोथपरस्यच ६७ ॥

त्रोर्भयप्रदर्शनार्थंयानंप्रदर्श्यस्वस्थानेऽवस्थानं द्वैधीभावःउभयत्रसंधिकरणं अन्यस्यआश्रयोदुर्गादेर्महाराजस्यवा ६७ ॥

६८ ७२ अत्राध्यायं केचित्समापयंति दंडेति इदं द्वयं समस्तं व्यस्तं वा तत्र केन कस्य किं क्रियत इति प्रश्नत्रय ७३ दंडनीत्याः सकाशात्राज्ञा प्रजा
नां चयत महाभाग्यं ततः शृणु ७४ तत्र दंडनीत्या राजा स्वर्गादिकं प्राप्नोति राज्ञा च दंडनीतिः कृतादीन् जनयति तावुभौ च प्रजानां क्षेमं जनय

त्रिवर्गश्चापि यः प्रोक्तस्तमिहैकमनाः शृणु । क्षयः स्थानं च वृद्धिश्च त्रिवर्गः परमस्तथा ६८ धर्म
श्चार्थश्च कामश्च सेवितव्योथ कालतः धर्मेण च महीपालश्चिरं पालयते महीं ६९ अस्मिन्नर्थे च श्लो
कौ द्वौ गीतावंगिरसा स्वयं यादवीपुत्र भद्रं ते तावपि श्रोतुमर्हसि ७० कृत्वा सर्वाणि कार्याणि सम्य
क्संपाल्य मेदिनीं पालयित्वा तथा पौरान्परत्र सुखमेधते ७१ किं तस्य तपसा राज्ञः किं च तस्याध्वै
रपि सुपालितप्रजो यः स्यात्सर्वधर्मविदेव सः ७२ युधिष्ठिरउ॰ दंडनीतिश्च राजा च समस्तौ
तावुभावपि कस्य किं कुर्वतः सिद्धिं तन्मे ब्रूहि पितामह ७३ भीष्मउ॰ महाभाग्यं दंडनीत्याः सिद्धैः
शब्दैः सहेतुकैः शृणु मे शंसतो राजन्यथावदिह भारत ७४ दंडनीतिः स्वधर्मेभ्यश्चातुर्वर्ण्यं निय
च्छति प्रयुक्ता स्वामिना सम्यगधर्मेभ्यो नियच्छति ७५ चातुर्वर्ण्ये स्वकर्मस्थे मर्यादानामसंक
रे दंडनीतिकृते क्षेमे प्रजानामकुतोभये ७६ सामे प्रयत्नं कुर्वंति त्रयो वर्णा यथाविधि तस्मादेवम
नुष्याणां सुखं विद्धि समाहितं ७७ ॥ अधर्मेभ्य इति पंचमी ७५ असं

त इत्युत्तरमाह दंडनीतिरित्यादिना स्वधर्मेभ्यः स्वधर्मार्थं
करोति हृपदे क्षेमे ७६ सामे साम्यत निमित्तं तस्मात्सामाद्वर्णसंकरात् ७७ ॥

७८ ७९ ८० ८१ ८२ ८३ ८४ ८५ ८६ अशुभस्यचतुर्थांशस्य ८७ ८८ ८९ अयोगेनप्रजापायेन ९० ॥

कालोवाकारणंराज्ञोराजावाकालकारणं इतितेसंशयोमाभूद्राजाकालस्यकारणं ७८ दंडनीत्यां
यदाराजासम्यक्कार्त्स्न्येनवर्त्तते तदाकृतयुगंनामकालःश्रेष्ठःप्रवर्त्तते ७९ ततःकृतयुगेधर्मो
नाधर्मोविद्यतेक्वचित् सर्वेषामेववर्णानांनाधर्मेरमतेमनः ८० योगक्षेमाःप्रवर्त्तंतेप्रजानांनात्र
संशयः वैदिकानिचसर्वाणिभवंत्यपिगुणान्युत ८१ ऋतवश्चसुखाःसर्वेभवंत्युतनिरामयाः
प्रसीदंतिनराणांचस्वरवर्णमनांसिच ८२ व्याधयोनभवंत्यत्रनाल्पायुर्दृश्यतेनरः विधवानभवं
त्यत्रकृपणोनतुजायते ८३ अकृष्टपच्यापृथिवीभवंत्योषधयस्तथा त्वक्पत्रफलमूलानि
वीर्यवंतिभवंतिच ८४ नाधर्मोविद्यतेतत्रधर्मएवतुकेवलं इतिकार्तयुगानेतान्धर्मान्विद्धियुधि
ष्ठिर ८५ दंडनीत्यायदाराजात्रीनंशाननुवर्त्तते चतुर्थमंशमुत्सृज्यतदात्रेताप्रवर्त्तते ८६ अशुभ
स्यचतुर्थांशस्त्रीनंशाननुवर्त्तते कृष्टपच्यैवपृथिवीभवंत्योषधयस्तथा ८७ अर्द्धंत्यक्त्वायदारा
जानीत्यर्द्धमनुवर्त्तते ततस्तुद्वापरंनामसकालःसंप्रवर्त्तते ८८ अशुभस्ययदात्वर्द्धंद्वावंशावनु
वर्त्तते कृष्टपच्यैवपृथिवीभवत्यल्पफलातदा ८९ दंडनीतिंपरित्यज्ययदाकार्त्स्न्येनभूमिपः
प्रजाःक्लिश्नात्ययोगेनप्रविशंतितदाकलिः ९० ॥ १३९

९१ ९२ ९३ ९४ ९५ ९६ चतुर्थस्यकलेः ९७ ९८ ९९ ९० ९१ सीमंतकरीव्यवस्थापिका ९२ ९३ ॥

कलावधर्मोभूयिष्ठंधर्मोभवतिनक्वचित् सर्वेषामेववर्णानांस्वधर्माच्च्यवतेमनः ९१ शूद्राभैक्षे
णजीवंतिब्राह्मणाःपरिचर्यया योगक्षेमस्यनाशश्चवर्ततेवर्णसंकरः ९२ वैदिकानिचकर्मा
णिभवंतिविगुणान्युत ऋतवोनसुखाःसर्वेभवंत्यामयिनस्तथा ९३ ह्रसंतिचमनुष्याणां
स्वरवर्णमनांस्युत व्याधयश्चभवंत्यत्रम्रियंतेचागतायुषः ९४ विधवाश्चभवंत्यत्रनृशंसाजायते
प्रजा क्वचिद्वर्षतिपर्जन्यःक्वचित्सस्यंप्ररोहति ९५ रसाःसर्वेक्षयंयांतियदानेच्छतिभूमिपः प्र
जाःसंरक्षितुंसम्यग्दंडनीतिसमाहितः ९६ राजाकृतयुगस्रष्टात्रेतायाद्वापरस्यच युगस्यच च
तुर्थस्यराजाभवतिकारणं ९७ कृतस्यकरणाद्राजास्वर्गमत्यंतमश्नुते त्रेतायाःकरणाद्राजास्व
र्गंनात्यंतमश्नुते ९८ प्रवर्तनाद्द्वापरस्ययथाभागमुपाश्नुते कलेःप्रवर्तनाद्राजापापमत्यंतमश्नुते
९९ ततोवसतिदुष्कर्मानरकेशाश्वतीःसमाः प्रजानांकल्मषेमग्नोऽकीर्तिंपापंचविंदति ९० दं
डनीतिंपुरस्कृत्यविजानन्क्षत्रियःसदा अनवाप्तंचलिप्सेतलब्धंचपरिपालयेत् ९१ लोकस्यसी
मंतकरीमर्यादालोकभाविनी सम्यङ्नीतादंडनीतिर्यथामातायथापिता ९२ यस्यांभवंतिभूता
नितद्विद्धिमनुजर्षभ एषएवपरोधर्मोयद्राजादंडनीतिमान् ९३ ॥

श्री॰ शां॰ रा॰ टी॰ ९४

९४ नववष्टितमः ६९ केनदंडनीतिसम्यक्प्रयोज्या केनवृत्तेनवर्तेतेतिप्रश्नः १ षट्त्रिंशत्एतत्संख्याकोधर्मचर्यादिगुणगणः स
चप्रत्येकंएकैकगुणयोगात्षट्त्रिंशद्गुणैःअकटुकतादिभिःसंयुतःअतएवगुणोपेतःयान्गुणान्धर्मादीन्गुणांकल्याणान्अवाप्नुयात्
सोयंषट्त्रिंशत्कोगणस्तयाश्रोतव्यइत्यर्थः २ अकटुकःरागद्वेषहीनःधर्मान्सर्वांश्चरेत् १ ननास्तिकःपरलोककामुकःसन्स्नेहं

तस्मात्कौरव्य धर्मेण प्रजाः पालय नीतिमान् एवंवृत्तः प्रजारक्षन्स्वर्गंजेतासि दुर्जयं ९४
इति श्रीमहाभारते शान्तौ राजधर्मे ६९ युधिष्ठिरउ॰ केन वृत्तेन वृत्तज्ञ वर्तमानो महीपतिः स
खेनार्थान्सुखोदर्कानिह च प्रेत्य चाप्नुयात् १ भीष्मउ॰ अयं गुणानां षट्त्रिंशत्षट्त्रिंशद्गुणसं
युतः यान्गुणांस्तु गुणोपेतः कुर्वन्गुणमवाप्नुयात् २ चरेद्धर्मानकटुको मुंचेत्स्नेहं न ना
स्तिकः अनृशंसश्चरेदर्थं चरेत्काममनुद्धतः ३ प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः दा
ता नापात्रवर्षी स्यात्प्रगल्भः स्यादनिष्ठुरः ४ संदधीत न चानार्यैर्विगृह्णीयान्न बंधुभिः ना
भक्तं चारयेच्चारं कुर्यात्कार्यमपीडया ५ ॥

कुर्यात्तत्तुलोभादिना २ अनृशंसःअनिष्ठुरःसन्नर्थमर्जयेत् ३ अनुद्धतःधर्मार्थौविनाशयन्कामंइंद्रियप्रीतिंचरेत् ३ ४ अकृ
पणःअदीनः ५ अविकत्थनःश्लाघाहीनः ७ अविष्ठुरःसदयः ८ ४ आर्यत्वंजानन्संधिंकुर्यात् बंधुत्वंजानन्विग्रहंनकुर्या
दितिसर्वत्रगुणोपेतोगुणोद्रष्टव्यः ९ अभक्तंअल्पान्नपक्कलान्नदस्थानान्कुर्यात् ११ अपीडयन्भक्तंदद्यात् १२ ॥ ५ ॥

साधुत्वेनपरीक्ष्यार्थप्रयोजनंब्रूयात् १२ श्रोतारउपहसिष्यन्तीतिज्ञात्वाआत्मनोगुणान्नब्रूयात् १४ १५ १६ चोक्षःशुद्धः २२ २८ २९
प्रणयंनम्रतांहित्वाहित्वेतितियान्नोरूपं २९ ३० नचमोक्षायफलंदित्सन्नेवसान्त्वयेदित्यर्थः ३१ ३२ ९ अविज्ञायप्राग्दोषंचेतिशेषः ३३

अर्थंब्रूयान्नचासत्सुगुणान्ब्रूयान्नचात्मनः आदद्यान्नचसाधुभ्योनासत्पुरुषमाश्रयेत् ६
नापरीक्ष्यनयेद्दण्डंनचमन्त्रंप्रकाशयेत् विसृजेन्नचलुब्धेभ्योविश्वसेन्नापकारिषु ७ अनीर्षुर्गु
प्तदारःस्याच्चोक्षःस्यादघृणीनृपः स्त्रियःसेवेतनात्यर्थंमृष्टंभुञ्जीतनाहितं ८ अस्तब्धःपूजये
न्मान्यान्गुरून्सेवेदमायया अर्चेद्देवान्नदम्भेनश्रियमिच्छेदकुत्सितां ९ सेवेतप्रणयंहित्वादक्षः
स्यान्नत्वकालवित् सान्त्वयेन्नप्रमोक्षायअनुगृह्णन्नचाक्षिपेत् १० प्रहरेन्नत्वविज्ञायहत्वाशत्रून्न
शोचयेत् क्रोधंकुर्यान्नचाकस्मान्मृदुःस्यान्नापकारिषु ११ एवंचरस्वराज्यस्थोयदिश्रेयइहेच्छसि
अतोन्यथानरपतिर्भयमृच्छत्यनुत्तमं १२ इतिसर्वान्गुणानेतान्यथोक्तान्योनुवर्तते अनुभूयेह
भद्राणिप्रेत्यस्वर्गेमहीयते १३ वैशंपायनउ० इदंवचःशान्तनवस्यशुश्रुवान्युधिष्ठिरःपाण्डवमु
ख्यसंवृतः तदाववन्देचपितामहंनृपोयथोक्तमेतच्चचकारबुद्धिमान् १४ इतिश्रीमहाभारतेशा
न्तिपर्वणिराजधर्मेषु ७०

नशोचयेत्शत्रुबन्धूनांशोकंअपनुदेत् ३४ अकस्मात्कारणंविना ३५ ३६ अनुत्तमंमहत्तरं १२
१३ पाण्डवमुख्यैःपाण्डुपुत्रैर्भीमादिभिर्वृतःसंवृतोयुतः १४ सप्ततितमः ७० ॥

श्री० शां० रा० टी० १४१

कथं बह्वीनां प्रजानां परिपालनं कथं स्यादिति चिंताधिः स एव बंधस्तेन न युज्यते नापराध्नोति नान्यथा करोति धर्मे व्यवहारनिर्णयादौ एतत् द्वयं कथं स्यादिति प्रश्नः १ उत्तरं वक्तुं प्रतिजानीते समासेनैवेति २ रागद्वेषादीनां ब्राह्मणान्पुरस्कृत्य व्यवहारनिर्णयं कुर्वन् धर्मे पि।

युधिष्ठिर उ० कथं राजा प्रजा रक्षन्नाधिबंधेन युज्यते धर्मे च नापराध्नोति तन्मे ब्रूहि पितामह १

भीष्म उ० समासेनैव ते राजन् धर्मान् वक्ष्यामि शाश्वतान् विस्तरेणैव धर्माणां न जात्वंतमवाप्नुयात् २ धर्मनित्याञ्छ्रुतवतो वेदव्रतसमाहितान् अर्चयित्वा यजेथास्त्वं गृहे गुणवतो द्विजान् ३ प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च अथ सर्वाणि कुर्वीथाः कार्याणि सपुरोहितः ४ धर्मकार्याणि निर्वर्त्य मंगलानि प्रयुज्य च ब्राह्मणान्वाचयेथास्त्वमर्थसिद्धिजयाशिषः ५ आर्जवेन च संपन्नो धृत्या बुद्ध्या च भारत यथार्थं प्रतिगृह्णीयात्कामक्रोधौ च वर्जयेत् ६ कामक्रोधौ पुरस्कृत्य योऽर्थं राजानुतिष्ठति न स धर्मं न चाप्यर्थं प्रतिगृह्णाति बालिशः ७ मा स्म लुब्धांश्च मूर्खांश्च कामार्थे च प्रयूयुजः अलुब्धान्बुद्धिसंपन्नान्सर्वकर्मसु योजयेत् ८ मूर्खो ह्यधिकृतोऽर्थेषु कार्याणामविशारदः प्रजाः क्लिश्नात्ययोगेन कामक्रोधसमन्वितः ९ ॥

नापराध्नोतीत्यस्योत्तरमाह धर्मनिष्ठानिति चतुर्भिः ३ ६ विपक्षे दोषमाह कामेति ७ आद्यस्योत्तरमाह मास्मेत्यादिना साधून्सर्वत्र कार्येषु नियोज्य स्वयं नाधिबंधेन युज्यत इत्यर्थः ८ अयोगेन योगक्षेमप्राप्तिः तदभावेन ९ ॥ १४१

बलिः राजदेयं न देवसम्पादेः षड्भागः स्तेन बलिषड्भागेन शुल्केन शुद्धेन गणानादनयिकेनेत्यर्थः शुल्को घट्टादिदेयं इति मेदिनी वेतनेन
पथि रक्षितैर्वणिग्भिर्यद्दत्तं तद्राज्ञो वेतनं नक्षेवाधनं च तेन च धनागमं लिप्सेत राजा १० धान्यादेः षष्ठांशे द्वितीये शेषाण्प्रजानां यदि वार्षिको

बलिषड्भागेन शुल्केन दण्डेनाथापराधिनां । शास्त्रानीतेन लिप्सेथा वेतनेन धनागमं १० दापयित्वा
करं धर्म्यं राष्ट्रं नीत्याय यथाविधि । तथैतं कल्पयेद्राजा योगक्षेममतन्द्रितः ११ गोपायित्वा च दातारं
धर्मं नित्यमतन्द्रितः । अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः १२ मा स्माधर्मेण लोभेन लिप्सेथास्त्वं
धनागमं । धर्मार्थावध्रुवौ तस्य यो न शास्त्रपरो भवेत् १३ अर्थशास्त्रपरो राजा धर्मार्थौ नाधिगच्छति
अस्थाने चास्य तद्वित्तं सर्वमेव विनश्यति १४ अर्थमूलोऽपि हिंसां च कुरुते स्वयमात्मनः । करैर
शास्त्रदृष्टैर्हि मोहात्संपीडयन्प्रजाः १५ ऊधश्छिन्द्याद्धि यो धेन्वाः क्षीरार्थी न लभेत्पयः । एवं राष्ट्रम
योगेन पीडितं न विवर्धते १६ यो हि दोग्ध्रीमुपास्ते च स नित्यं विन्दते पयः । एवं राष्ट्रमुपायेन भुञ्जानो ल
भते फलं १७ अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितं । जनयत्यतुलां नित्यं कोशवृद्धिं युधिष्ठिर १८
दोग्ध्री धान्यं हिरण्यं च मही राज्ञा सुरक्षिता । नित्यं स्वेभ्यः परेभ्यश्च तृप्ता माता यथा पयः १९ मा
लाकारोपमो राजन्भव मागारिकोपमः । तथा युक्तश्चिरं राज्यं भोक्तुं शक्ष्यसि पालयन् २० ॥ =

ग्रासो न भवेन्नदा राजेवना सा योगक्षेमं कल्पयेदित्याह दापयित्वेति ११ १३ धर्मसहितानर्थान्धर्मार्थान् १४ १५ अर्थमूलोऽर्थार्थी प्रा
जाः पीडयन्नात्मानमेव हिनस्तीत्युक्तं तत्र दृष्टान्तमाह ऊध इति १६ १७ दोग्ध्री पृथिवी १९ अंगारिकः अंगालक

५
८

श्री॰
शां॰ प॰
टी॰
१४२

२१ २४ यथायुक्तः उक्तेनप्रकारेणप्रवर्तितः २५ योदर्याकृतेनंतंधर्मंमन्यंतेइतियोजना २६ अंतंयातनाभोगेननिष्कृतिं २८ २९ स्वि

एवचक्राभियानेनयदितेस्याद्धनंतयः अथसाम्नैवलिप्सेथाधनमब्राह्मणेषुयत् २१ मास्मतेब्राह्म
णाहृष्टाधनस्थाःप्रबलेन्मनः अंत्यायामप्यवस्थायांकिमुस्फीतस्यभारत २२ धनानितेभ्योदद्यास्त्वं
यथाशक्तियथार्हतः सांत्वयन्परिरक्षंश्चस्वर्गमाप्स्यसिदुर्जयं २३ एवंधर्मेणवृत्तेनप्रजास्त्वंपरिपा
लय स्वर्गंपुण्यंयशोनित्यंप्राप्स्यसेकुरुनंदन २४ धर्मेणव्यवहारेणप्रजाःपालयपांडव युधिष्ठिरय
थायुक्तोनाधिबंधेनयोक्ष्यसे २५ एषएवपरोधर्मोयद्राजारक्षतिप्रजाः भूतानांहियदाधर्मोरक्षणं
परमादया २६ तस्मादेवपरंधर्मंमन्यंतेधर्मकोविदाः योराजारक्षणेयुक्तोभूतेषुकुरुतेदयां २७ य
दकृतंकुरुतेपापमरक्षन्भयतःप्रजाः राजावर्षसहस्रेणतस्यांतमधिगच्छति २८ यदकृतंकुरुतेध
र्मंप्रजाधर्मेणपालयन् दशवर्षसहस्राणितस्यभुंक्तेफलंदिवि २९ स्विष्टिःस्वधीतिःसुतपा
लोकाञ्जयतियावतः क्षणेनतानवाप्नोतिप्रजाधर्मेणपालयन् ३० एवंधर्मंप्रयत्नेनकौंते
यपरिपालय ततःपुण्यफलंलब्ध्वानाधिबंधेनयोक्ष्यसे ३१ स्वर्गलोकेचमहतींश्रियंप्राप्स्य
सिपांडव असंभवश्चधर्माणामीदृशानामराजसु ३२ ॥

स्विष्टिःस्वधीतिःसुतपाइतिक्रमेणगृहस्थब्रह्मचारिवानप्रस्थधर्मान्सम्यगनुतिष्ठन् ३० ३१ ३२ ॥

३३ एकसप्ततितमः ७१ यतः निवर्त्तयेत् राज्यात् हरीकारयेत् १ २ ३ ४ ५ ६ ७ ८ ९ १० ॥

तस्मात् राजैव नान्योस्ति यो धर्मफलमाप्नुयात् स राज्यं धृतिमान्प्राप्य धर्मेण परिपालय
इन्द्रं तर्पय सोमेन कामैश्च सुहृदो जनान् ३३ इति श्रीमहाभारते शान्तौ राजधर्मे ७१ भीष्म
उ० य एव तु सतो रक्षेदसतश्च निवर्त्तयेत् स एव राज्ञा कर्त्तव्यो राजन् राजपुरोहितः १ अत्राप्यु
दाहरंतीममितिहासं पुरातनं पुरूरवस ऐलस्य संवादं मातरिश्वनः २ पुरूरवा उवाच कुतः स्वि
द्ब्राह्मणो जातो वर्णाश्चापि कुतस्त्रयः कस्माच्च भवति श्रेष्ठस्तन्मे व्याख्यातुमर्हसि ३ मातरि
श्वोवाच ब्रह्मणो मुखतः सृष्टो ब्राह्मणो राजसत्तम बाहुभ्यां क्षत्रियः सृष्ट ऊरुभ्यां वैश्य एव च
४ वर्णानां परिचर्यार्थं त्रयाणां भरतर्षभ वर्णश्चतुर्थः संभूतः पद्भ्यां शूद्रो विनिर्मितः ५ ब्राह्म
णो जायमानो हि पृथिव्यामनुजायते ईश्वरः सर्वभूतानां धर्मकोशस्य गुप्तये ६ अतः पृथिव्या
यन्तारं क्षत्रियं दण्डधारणे द्वितीयं दण्डमकरोत् प्रजानामनुगुप्तये ७ वैश्यस्तु धनधान्येन त्रीन्वर्णा
न्बिभृयादिमान् शूद्रो ह्येतान्परिचरेदिति ब्रह्मानुशासनं ८ पेल उ० द्विजस्य क्षत्रबंधोर्वा कस्येयं
पृथिवी भवेत् धर्मतः सह वित्तेन सम्यग्वायो प्रचक्ष्व मे ९ वायुरु० विप्रस्य सर्वमेवैतद्यत्किं

[illegible]

श्री
शां॰ रा॰
टी॰
१४३

११ २१ छायायामिति उत्सृष्टं शीतजं च भयं छायादिना गुप्त्यादिना वनस्पतिशब्दादिना चरमते अराजकभयाक्रान्तस्त्वकृत्वापि स्वं वन
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च गुरुर्हि सर्ववर्णानां ज्येष्ठः श्रेष्ठश्च वै द्विजः ११ पत्यभावे यथैव
स्त्री देवरं कुरुते पतिं एषते प्रथमः कल्प आपद्यन्यो भवेदतः १२ यदि स्वर्गे परं स्थानं स्वधर्मं परि
मार्गसि यत्किंचिद्विजये भूमिं ब्राह्मणाय निवेदय १३ श्रुतवृत्तोपपन्नाय धर्मज्ञाय तपस्विने स्व
धर्मपरितृप्ताय यो न वित्तपरो भवेत् १४ यो राजानं नयेद्बुद्ध्या सर्वतः परिपूर्णया ब्राह्मणो हि कुले
जातः कृतप्रज्ञो विनीतवान् १५ श्रेयो नयति राजानं ब्रुवंश्चित्रां सरस्वतीं राजा चरति यं धर्मं ब्राह्म
णेन निदर्शितं १६ शुश्रूषुरनहंवादी क्षत्रधर्मव्रते स्थितः तावता सत्कृतः प्राज्ञश्चिरं यशसि तिष्ठ
ति १७ तस्य धर्मस्य सर्वस्य भागी राजपुरोहितः एवमेव प्रजाः सर्वा राजानमभिसंश्रिताः १८ स
म्यग्वृत्ताः स्वधर्मस्थान कुतश्चिद्भयान्विताः राष्ट्रे चरति यं धर्मं राजा साधुभिरन्विताः चतुर्थं त
स्य धर्मस्य राजा भागं तु विन्दति देवा मनुष्याः पितरो गन्धर्वोरगराक्षसाः २० यज्ञमेवोपजीवन्ति
नास्ति चेष्टमराजके इतो दत्तेन जीवन्ति देवताः पितरस्तथा २१ राजन्येवास्य धर्मस्य योगक्षेमः प्र
तिष्ठितः छायायामप्सु वायौ च सुखमुष्णेऽधिगच्छति २२ अग्नौ वाससि
लभते इति श्लोकद्वयतात्पर्यं २२ २३

यतएवं अतः अभयदानमेव मुख्यं दानं तद्दातृत्वाद्विरूपप्येत्याह द्वाभ्यां अभयमभयमिति २४ २६ द्विसप्ततितमः ७२ राज्ञा अप्रमे-
योगाहतो अनंतरं शीघ्रमेव पुरोहितः कार्यो भवेत् १ धर्मात्मेति धर्मसाधकः २ ६ ब्रह्मकर्म तत्रैकार्थे अनुपश्चात्प्रकाशमानं बलं

तेषु भोगेषु सर्वेषु न भीतो लभते सुखं अभयस्य हि यो दाता तस्यैव सुमहत्फलं २४ न हि प्राणसमं
दानं त्रिषु लोकेषु विद्यते इंद्रो राजा यमो राजा धर्मो राजा तथैव च २५ राजा बिभर्ति रूपाणि राज्ञा स-
र्वमिदं धृतं २६ इति श्रीमहाभारते शांतौ राजधर्मे ७२ भीष्म उ॰ राज्ञा पुरोहितः कार्यो भवेद्वि-
द्वान्बहुश्रुतः उभौ समीक्ष्य धर्मार्थावप्रमेयावनंतरं १ धर्मात्मा मंत्रविद्येषां राज्ञां राजन्पुरोहितः
राजा चैवं गुणो येषां कुशलं तेषु सर्वतः २ उभौ प्रजा वर्द्धयतो देवान्सर्वान्सुतान्पितॄन् भवेया-
तां स्थितौ धर्मे श्रद्धेयौ सुतपस्विनौ ३ परस्परस्य सुहृदौ विहितौ समचेतसौ ब्रह्मक्षत्रस्य संमा-
नात्प्रजा सुखमवाप्नुयात् ४ विमाननात्तयोरेव प्रजा नश्येयुरेव हि ब्रह्मक्षत्रं च सर्वेषां व-
र्णानां मूलमुच्यते ५ अत्राप्युदाहरंतीममितिहासं पुरातनं ऐलकश्यपसंवादं तन्निबोध यु-
धिष्ठिर ६ ऐल उवाच यदा हि ब्रह्म प्रजहाति क्षत्रं क्षत्रं यदा वा प्रजहाति ब्रह्म अन्वग्बलं कतमे-
स्मिन्भजंते तथा वर्णाः कतमस्मिन्ध्रियंते ७ ॥

यथास्यात्तथाऽस्मिन्ब्रह्मक्षत्रान्यतरस्मिन्कतमे भजंते किं क्षत्रेण ब्रह्मवद्भवत्युत ब्रह्मणा क्षत्रमित्यर्थः ७ ॥

श्री० शां० रा० टी० १५५

हृदं छिन्नं क्षत्रकर्तं तत्र तत्रैसतः वर्णा विंदंति ब्राह्मणानामवमंता म्लेच्छजातीयोयं राजेत्यनुमानाज्जानंति यथोक्त भोगेन त्रायते कर्म
कर्मणा त्रायते जनिरिति ८ अपध्वस्ताः संकरजा इव कंस्मादिवत् साई श्लोकः ९ १० अभिप्रपन्नो अन्योन्यशरणौ तत्र शरणौ ब्रह्मतपस्

कश्यप उ० हृद्धं राष्ट्रं क्षत्रियस्य भवति ब्रह्मक्षत्रं यत्र विरुध्यतीह अन्वग्बलं दस्यवस्तद्भजंते तथा
वर्णास्तत्र प्रियंति मध्यः ८ नैषां ब्रह्म च वर्द्धते नोत पुत्रा न गर्गरो मथ्यते नो यजंते नैषां पुत्रा वेदमधी
यते च यदा ब्रह्म क्षत्रियाः संत्यजंति ९ नैषामर्थो वर्द्धते जातु गेहे नाधीयते सप्रजा नो यजंते अप
ध्वस्ता दस्युभूता भवंति ये ब्राह्मणान् क्षत्रियाः संत्यजंति १० एतौ हि नित्यं संयुक्तौ वितरेतरधारणे
क्षत्रं वै ब्रह्मणो योनिर्योनिः क्षत्रस्य वै द्विजाः ११ उभावेतौ नित्यमभिप्रपन्नौ संप्रापतुर्महतीं संप्रति
ष्ठां तयोः संधिर्भिद्यते चेत्पुराणास्ततः सर्वं भवति हि संप्रमूढं १२ नात्र पारं लभते पारगामी महा
गाधे नौरिव संप्रपन्ना चातुर्वर्ण्यं भवति हि संप्रमूढं प्रजास्ततः
तयं सस्या भवति १२ ब्रह्मवृक्षो रक्ष्यमाणो मधु हेम
च वर्षति अरक्ष्यमाणः सततमश्रु पापं च वर्षति
१३ ॥

१५५

तिब्रह्मशरणं क्षत्रं जयतीति भावः ११ अत्र ब्रह्मक्षत्रयोर्वियोगे संप्रपन्ना विपन्ना १२ मधुहेमत्वे अश्रुदुःखे पापं नरकं १३ ॥

नत्वत्रियंब्रह्मब्राह्मणजातिर्ब्रह्मचारीचरणात्प्रथीतशाखत्वातः अपेतः दस्युभिर्वीवितः सन् ब्रह्मणिवेदे ऽध्येतव्येत्राणं रक्षणं इच्छे
त्रादितिब्रह्मभावात् तदादेवस्तत्र आश्चर्यतोवर्षति तत्रवर्षं अप्यतड़र्लभमित्यर्थः ड़ःसहाः मारीड़र्भिक्षादयः अब्रह्मचारीतिनाश्च
र्यतइतिचपाठेब्रह्मचरणादपेतत्वादब्रह्मचारीवेदाध्ययनशून्यः सन्नूत्राणमिच्छेन्नहितत्राश्चर्यतोपिनवर्षतीतियोज्यं ५४ स्त्रियंब्रा
ह्मणंवापिहत्वा ऽनुवादंप्रशंसां ५५ रुद्रः हिंस्रः देवोराजा रुद्रंकलि ५६ ५७ कुतोराज्ञोरुद्रत्वमितिपृष्टेआहआत्मेति मानवा

नब्रह्मचारीचरणादपेतोयदाब्रह्मब्रह्मणित्राणमिच्छेत् आश्चर्यतोवर्षतितत्रदेवस्तत्राभीत्णा
ड़ःसहाश्चाविशंति ५४ स्त्रियंहत्वाब्राह्मणंचापिपापः सभायांयत्रलभतेनुवादं राज्ञः सकाशेनबिभ
तिचापितत्तोभयंविद्यतेतत्र ५५ पापैः पापेक्रियमाणेहिचैलततोरुद्रोजायतेदेवएषः पापैः
पापाः संजनयंतिरुद्रंततः सर्वान्साधसाधून्हिनस्ति ५६ चैलठः कुतोरुद्रः कीदृशोवापिरुद्रः स
त्वैः सत्वैर्दृश्यतेवध्यमानः एतत्सर्वंकश्यपमेप्रचक्ष्व कुतोरुद्रोजायतेदेवएषः ५७ कश्यपठः आ
त्माहृद्रोहृदयेमानवानांस्वंस्वंदेहंपरदेहंचहंति वातोत्पातैः सदृशंरुद्रमाहुर्देवैर्जीमूतैः सदृशंरू
पमस्य ५८
नाहृदयेयआत्माजीवोस्तिसएवरुद्रः संहर्ताभवतियथाचग्रहाविष्टस्यशरीरंदेहस्वामिनः स्वंनभवतिकिंतुतदानीत
त्यग्रहस्यैवस्य एवंरुद्रावेशकालेहृपस्यशरीरंरौद्रमेवभवतीत्यर्थः नतुकुतः शांतस्यात्मनोरुद्रत्वमतआहवातेति यथाउत्पातवातः आ
काशोत्यआकाशोत्थामेघदेवतांश्चतस्तेनयतिगर्जयतिविद्युदशनिवारिणिचततआविर्भवत्येवंआत्मोत्थितंजीवमात्मोत्थिताः काम

क्रोधादयः सर्वहिंसंकारयंतीत्यर्थः ९ ॥

श्री॰ इदमादित्यपतिनवाइति यथा आकाशेन युक्तास्ततः पृथग्भूता वाता मेघाश्चमेघप्रवर्तकदेवता च अत्यन्तेषां शास्त्रज्ञानेन च दृश्यन्ते नैवं

शां॰ रा॰ जीवो वातदग्निभावकः कामादिर्वा पृथक् दृश्यते किंत्वात्मन्येव वर्तते योऽस्य वत्कामद्वेषावर्तते तो चैतस्य बंधको मोहको च भवतइत्य

टी॰ र्थः १९ अत्रोत्तरमाह यथेति यथाऽल्पोपि वह्निरधिकमधिकं काष्ठभारमुपारूढः कृत्स्नं ग्रामं दहति तत्र न केवलं काष्ठानां दाहक

१९५ त्वनापि काष्ठान्यनुपारूढस्याग्नेः किंतु तदुभयसंघातस्यैव तत्रापि विवेक क्रियमाणे वह्नेरेवउपाध्यावेशाद्दाहकत्वं एवं आत्मा

ऐल उवाच नैव वातः परिहरति कश्चिन्न जीमूतो वर्षति नापि देवः न चायुक्तो दृश्यते मानुषे षु कामद्वेषाद्बध्यते मुच्यते च १९ कश्यप उवाच यथैकगेहे जातवेदाः प्रदीप्तः कृत्स्नं ग्रामं दहते चत्वरं वा विमोहनं कुरुते देव एष ततः सर्वं स्पृशति प्राणिपापैः २० ऐल उवाच यदिदं डः स्पृशते पुण्यपापं पापैः पापे क्रियमाणे विशेषात् कस्य हेतोः सुकृतं नाम कुर्याद्दुष्कृतं वा। कस्य हेतोर्न कुर्यात् २१ ॥

नमारुह्याहंकारवह्निः कामक्रोधादिवा तैरुद्दीपितोरुद्रत्वं प्रतिपद्यते ततश्च अयोदहतिप
योसिपचतीतिवत् अहंकारेणात्मन्युपचर्यते मोहात्तेन च सर्वं जगदसंगमपि जलचंद्रन्यायेन पुण्यैः पापैश्च स्पृश्यते तत्त्वा
लोचनेन त्वसंगएवात्मेत्यर्थः २० अपुण्यपापमपि आत्मानं यदि विशेषात् क्रियमाणे पापे निमित्तभूते सति दंडः पापं दंडात्मकं पापं गाल
नताडनादिदंडः स्वकर्तृ स्पृशते मोहादिति ब्रवीषि तर्हि पुण्यकरणं पापवर्जनं च शास्त्रचोदितं वृथैव स्यात् आत्मनिवास्तवस्य दुःख
भावात्सैवस्य सिद्धत्वात्तदर्थं साधनोपादानं व्यर्थं स्यादिति भावः २१ ॥

आत्माहंकारयोर्मिश्रीभावादहंकारगतं दुःखमात्मनि प्रतीयते नाहंकारत्यागान्न किंचिदात्मनो दुःखमस्तीत्युत्तरयति असंयो
गादिति २२ अहंकर्त्रादीन् अधिष्ठानभूत आत्मा भूमिसूर्यादिवदसंग एव सन्धारयत्प्रकाशयत्वायुवच्चालयत्समन्ततयाप्या
ययत्वा कर्त्रात्मनः संबंधो ऽहंकारधर्मैर्न हन्यते नातो आत्मा दुःखं स्पृष्टमित्याशयः २३ ननु दुःखाद्यध्यैवं तथापि पैहिकामुष्मि

कश्यप उ॰ असंयोगात्पापकृतामपापांस्तुल्योदंडः स्पृशते मिश्रभावात् शुष्केणार्द्रं दह्य
ते मिश्रभावान्न मिश्रः स्यात्पापकृद्भिः कथंचित् २२ पैल उवाच साधसाधून्धारयतीह भूमिः
साधसाधूंस्तापयतीव सूर्यः साधसाधूंश्चापि वातीह वायुरापस्तथा साधसाधून्पुनंति २३ का
श्यप उ॰ एवमस्मिन्वर्त्तते लोक एष नामुत्रैवं वर्त्तते राजपुत्र प्रेत्यैतयोरंतरावान्विशेषो यो वै पु
ण्यं चरते यश्च पापं २४ पुण्यस्य लोको मधुमान्घृतार्चिर्हिरण्यज्योतिरमृतस्य नाभिः तत्र प्रे
त्य मोदते ब्रह्मचारी न तत्र मृत्युर्न जरा नोत दुःखं २५ पापस्य लोको निरयोऽप्रकाशो नित्यं दुःखं
शोकभूयिष्ठमेव तत्रात्मानं शोचति पापकर्मा बह्वीः समाः प्रतपन्नप्रतिष्ठः २५ ॥

कव्यवहारदृष्ट्या दुःख एवात्मनो दुःखत्वमित्युत्तरयति एवमस्मिन्नित्यादिना एषएवं नूपोर्थः अस्मिन्नन्यगात्मनि लोके लोक्यत इति लोको द
र्शनं तत्र विषये वर्त्तते सिद्धांतोऽस्ति न तु अमुत्र परलोकविषये एवं दर्शनं वर्त्तते किं तर्हि अमुत्र वर्त्तते यः पापं चरते यश्च पुण्यं एतयोः प्रेत्य मर
णानंतरं विशेषोऽस्ति स चांतरावान् तिरोहितः शास्त्रैकगम्यो धर्माधर्मफले इत्यर्थः २४ शास्त्रमेवाह द्वाभ्यां पुण्यस्येति २५ २६ ॥

श्री॰ शां॰ रा॰ टी॰ ९९६

प्रकृतमनुसरति मिथ इति नैकविद्यः बहुविद्यः २७ तं पुरोहितं कृत्वा अनु पश्चात् आत्मानं राज्येऽभिषिंचेत् २८ ३१ इति त्रिसप्ततितमः ७३ योग १

मिथोभेदात्ब्राह्मणक्षत्रियाणां प्रजादुःखं दुःसहं चाविशंति एवं ज्ञात्वा कार्यएवेह नित्यं पुरोहितो नै
कविद्यो नृपेण २७ तं चैवान्वभिषिंचेत तथा धर्मो विधीयते अग्रं हि ब्राह्मणः प्रोक्तः सर्वस्यैवेह धर्मतः
२८ पूर्वं हि ब्रह्मणः सृष्टिरिति ब्रह्मविदो विदुः ज्येष्ठेनाभिजनेनास्य प्राप्तं पूर्वं यदुत्तरं २९ तस्मान्मान्य
श्च पूज्यश्च ब्राह्मणः प्रसृताग्रभुक् सर्वं श्रेष्ठं विशिष्टं च निवेद्यं तस्य धर्मतः ३० अवश्यमेव कर्तव्यं राज्ञा
बलवतापि हि ब्रह्म वर्धयति क्षत्रं क्षत्रतो ब्रह्म वर्धते ३१ एवं राज्ञा विशेषेण पूज्या वै ब्राह्मणाः सदा ३२
इति श्रीमहाभारते शांतौ राजधर्मेषु ७३ भीष्म उ॰ योगक्षेमो हि राष्ट्रस्य राजन्यायत्त उच्यते योग
क्षेमो हि राज्ञो हि समायत्तः पुरोहिते १ यत्रादृष्टं भयं ब्रह्म प्रजानां शमयत्युत दृष्टं च राजा बाहुभ्यां
तद्राज्यं सुखमेधते २ अत्राप्युदाहरंतीममितिहासं पुरातनं मुचुकुंदस्य संवादं राज्ञो वैश्रवणस्य च
३ मुचुकुंदो विजित्येमां पृथिवीं पृथिवीपतिः जिज्ञासमानः स्वबलमुपेयादलकाधिपं ४ ततो वै
श्रवणो राजा राक्षसान्सृजत्तदा ते बलान्यवमृद्नंतः मुचुकुंदस्य नैरृताः ५ स हन्यमाने सैन्ये स्वे मु
चुकुंदो नराधिपः गर्हयामास विद्वांसं पुरोहितमरिंदम ५ ॥

अदृष्टं अनावृष्ट्यादि जं ब्रह्म ब्राह्मणः दृष्टं परचक्रादि जं २ ४ असृजत अतिसृष्टवान् आज्ञापितवानिति यावत् ५ ६ ॥

तस्य मुचुकुन्दस्य पंथानं गतिं मार्गं अविंदन्न ज्ञातवान् ७ १५ अतिर्दिष्टं ऐश्वर्येणानन्तु ज्ञातं विद्यास्मि ददामि १६ नाछिंदेन हरामि च त्वा

ततउग्रं तपस्तप्त्वा वसिष्ठो धर्मवित्तमः रक्षांस्युपावधीत्तस्य पंथानं चाप्यविंदत ७ ततो वैश्रव
णो राजा मुचुकुन्दमदर्शयत् वध्यमानेषु सैन्येषु वचनं चेदमब्रवीत् ८ धनदः बलवंत
स्त्वया पूर्वे राजानः सपुरोहिताः नचैवं समवर्तंत यथा त्वमिह वर्तसे ९ ते बल्वपि कृतास्त्रा
श्च बलवंतश्च भूमिपाः आगम्य पर्युपासंते मामीशं सुखदुःखयोः १० यद्यस्ति बाहुवीर्यं ते तन
दर्शयितुमर्हसि किं ब्राह्मणबलेन त्वमतिमात्रं प्रवर्तसे ११ मुचुकुंदस्ततः क्रुद्धः प्रत्युवाच
धनेश्वरं न्यायपूर्वमसंरब्धमसंभ्रांतमिदं वचः १२ ब्रह्मक्षत्रमिदं सृष्टमेकयोनि स्वयंभुवा
पृथग्बलविधानं तन्न लोकं परिपालयेत् १३ तपोमंत्रबलं नित्यं ब्राह्मणेषु प्रतिष्ठितं अस्त्रबा
हुबलं नित्यं क्षत्रियेषु प्रतिष्ठितं १४ ताभ्यां संभूय कर्तव्यं प्रजानां परिपालनं तथा च मां प्रवर्तंतं
किं गर्हसि अलकाधिप १५ ततोऽब्रवीद्वैश्रवणो राजानं सपुरोहितं नाहं राज्यमनिर्दिष्टं कस्मैचि =
द्विदधाम्युत १६ नाछिंदे चाप्यनिर्दिष्टमिति जानीहि पार्थिव प्रशाधि पृथिवीं कृत्स्नां मम ५
दत्तामखिलामिमां एवमुक्तः प्रत्युवाच मुचुकुंदो महीपतिः १७ मुचुकुंद उ० नाहं राज्यं भव
त्तां मद्दत्तं ७ ९ ॥ त्तो भोक्तुमिच्छामि पार्थिव बाहुवीर्यार्जितं राज्यमश्नीयामिति का दि

श्री॰
शां॰ रा॰
टी॰
१४७

१९ २० चतुःसप्ततितमः ७४ एवंकृतपुरोहितोराजाकथंप्रजाहृत्वापरलोकंजयेदितिपृच्छतिययेति १ तत्रप्रवृत्तिप्रकारमाहदानेति

भीष्मउ॰ ततोवैश्रवणोराजाविस्मयंपरमंययौ तत्रधर्मेस्थितंदृष्ट्वामुचुकुंदमसंभ्रमं १९ ततो
राजामुचुकुंदःसोन्वशासद्वसुंधरां बाहुवीर्यार्जितांसम्यक्तत्रधर्ममनुव्रतः २० एवंयोधर्मवि
द्राजाब्रह्मपूर्वंप्रवर्तते जयत्यविजितामुर्वींयशश्चमहदश्नुते २१ नित्योदकीब्राह्मणःस्यान्नित्य
शस्त्रश्चक्षत्रियः तयोर्हिसर्वमायत्तंयत्किंचिज्जगतीगतं २२ इतिश्रीमहाभारतेशांतौराजधर्मे
मुचुकुंदोपाख्याने ७४ युधिष्ठिरउ॰ ययावृत्त्यामहीपालोविवर्धयतिमानवान् पुण्यांश्च
लोकान्जयतितन्मेब्रूहिपितामह १ भीष्मउ॰ दानशीलोभवेद्राजायज्ञशीलश्चभारत उप
वासतपःशीलःप्रजानांपालनेरतः २ सर्वाश्चैवप्रजानित्यंराजाधर्मेणपालयन् उत्थाने
नप्रदानेनपूजयेच्चापिधार्मिकान् ३ राज्ञाहिपूजितोधर्मस्ततःसर्वत्रपूज्यते यद्यदाचरतेराजात
त्प्रजानांस्मरोचते ४ नित्यमुद्यतदंडश्चभवेन्मृत्युरिवारिषु निहन्यात्सर्वतोदस्यून्नकामात्कस्य
चित्क्षमेत् ५ यंहिधर्मंचरंतीहप्रजाराज्ञासुरक्षिताः चतुर्थंतस्यधर्मस्यराजाभारतविंदति यद
धीतेयद्ददातियज्जुहोतियदर्चति राजाचतुर्थभाक्तस्यप्रजाधर्मेणपालयन् ७ ॥

२ उत्थानेननित्योद्योगेन ३ ५ परलोकजयप्रकारमाह यंहीति ६ यदधीतेब्राह्मणादिः ७ ॥

विपत्तेर्दोषमाह यद्राष्ट्रइति अकुशलमितिच्छेदः ८ नृशंसोऽनृतवाक्चयत्कर्मकरोतितस्यकर्मणः सर्वंयत्ततोभूयोवापापमाप्नोतीत्य
न्येआहुर्निश्चयस्त्वहमित्यर्थः ९ अशक्तेनराज्ञा उपजीवतः यनोपजीवतः यनोपजीविनोवणिजादेः साहं १० ११ नाहमिति अत्रत्रा

यद्राष्ट्रेऽकुशलंकिंचिद्राज्ञोरक्षयतःप्रजाः चतुर्थंतस्यपापस्यराजाभारतविंदति ८ अप्याहुःसर्वमे
वेतिभूयोर्द्धमितिनिश्चयः कर्मणःपृथिवीपालनृशंसोऽनृतवागपि ९ तादृशात्किल्बिषाद्राजाशृ
णुयेनप्रमुच्यते प्रत्याहर्तुमशक्यंस्याद्धनंचोरैर्हृतंयदि १० तत्स्वकोशात्प्रदेयंस्यादशक्तेनोपजीवतः
११ सर्ववर्णैःसदारक्ष्यंब्रह्मस्वंब्राह्मणायथा नस्थेयंविषयेतेनयोपकुर्याद्द्विजातिषु १२ ब्रह्मस्वेरक्ष्य
माणेतुसर्वंभवतिरक्षितं तस्मात्तेषांप्रसादेनकृतकृत्योभवेन्नृपः पर्जन्यमिवभूतानिमहाद्रुममिव
द्विजाः नरास्तमुपजीवंतिनृपंसर्वार्थसाधकं १३ नहिकामात्मनाराज्ञासततंकामबुद्धिना नृशं
सेनातिलुब्धेनशक्यंपालयितुंप्रजाः १४ युधिष्ठिरउ॰ नाहंराज्यसुखान्वेषीराज्यमिच्छाम्य
पिक्षणं धर्मार्थंरोचयेराज्यंधर्मश्चात्रनविद्यते तदलंममराज्येनयत्रधर्मोनविद्यते वनमेवगमि
ष्यामितस्माद्धर्मचिकीर्षया १५ तत्राहंमेध्येष्वरण्येषुन्यस्तदंडोजितेंद्रियः धर्ममाराधयिष्यामिमु
निर्मूलफलाशनः १६ भीष्मउ॰ वेदाहंतवयाबुद्धिरानृशंस्यागुणैवसा नचशुद्धानृशंस्येनशक्यंरा

ज्येशुणएवसत्तत्रर्थांशः पापस्यत्वर्द्धंकात्स्न्येनवालभ्यंतइतिपापाधिक्याद्धर्मोनास्तीत्यर्थः १५ १६ आनृशंस्य ज्यमुपासितुं १८ ॥
स्यापरउःवेदा साचात्रजयधर्मेषुदस्युवधप्रधानेष्वगुणैव १८ ॥

श्री॰
शां॰रा॰
टी॰
१४८

घृणाकृपा १९ २० आशास्सि प्राप्स्यसि २१ २४ एतत्तदानादिकं धर्ममधर्ममेवास्तु तथापि तत्कर्तृजन्मनैव त्वं जातोसि तथा च श्रेयान्स्वधर्मो विगु
ण इति न्यायेन तत्त्वं तं विना गतिर्नास्तीत्यर्थः २५ २६ समंतत इति शिष्टैर्हितोऽप्यापि समयावदति किमुत त्वमात्मघहस्त्यर्थः २७ धर्मीयधर्मवानएका।

अपितन्नामस्त्वप्रमत्तमत्यार्थमतिधार्मिकं क्लीवंधर्मघृणायुक्तंनलोकोबहुमन्यते १९ हन्तित्वम
पेतस्वपित्र्यपैतामहोचितं नैवराज्ञांतथाहैत्तं यथात्वंस्थातुमिच्छसि २० नहिवैक्लव्यसंसृष्टमानृश
स्यमिहास्थितः प्रजापालनसंभूतमाप्ताधर्मफलंह्यसि २१ नह्येतामाशिषंपाण्डुर्नचकुन्तीन्ययाचत
नचैतांप्रज्ञतांतातयथाचरसिमेधया २२ शौर्यंबलंचसत्त्वंचपितातवसदाब्रवीत् माहात्म्यंचमहो
दार्यंभवतःकुन्त्ययाचत २३ नित्यंस्वाहास्वधानित्यंचोभेमानुषदैवते पुत्रेष्वाशासतेनित्यंपितरो
दैवतानिच २४ दानमध्ययनंयज्ञःप्रजानांपरिपालनं धर्ममेतदधर्मंवाजन्मनैवाभ्यजायथाः का
लेधुरिवियुक्तानांवहतांभारमाहितं सीदतामपिकौन्तेयनकीर्तिरवसीदति २६ समंततोविनि
यतोवहत्यस्खलितोहयः निर्दोषःकर्मवचनात्सिद्धिःकर्मणएवसा २७ नैकान्तविनिपातेनवि
चचारेहकश्चन धर्मीगृहीवाराजावाब्रह्मचारीयथापुनः २८ अल्पंहिसारभूयिष्ठंयत्कर्मोदार
मेवतत् कृतमेवाकृताच्छ्रेयोनपापीयोस्त्यकर्मणः २९ ॥

नविनिपातेनअत्यंतताभिनिवेशेनधर्मंकश्चिदपिदविचचा १४८
रसूक्ष्मस्याधर्मस्यापरिहार्यत्वादितिभावः २८ अल्पंतुच्छंहिंसामयत्वात्तुच्छमपिबहुजनसुखहेतुत्वात्सारभूयिष्ठं २९ ॥

ऐश्वर्यं सा विद्या यथाधिकारं ३० प्रतिशृण्णीयात् वशीकुर्यात् ३१ ३२ दरिद्रैर्वैर्यैर्धर्तव्यः भयार्दितत्राणं सदान् धर्म इत्याह यस्मि

यदा कुलीनो धर्मज्ञः प्राप्नोत्यैश्वर्यमुत्तमम् योगक्षेमस्तदा राष्ट्रः कुशलायैव कल्पते ३०
दानेनान्यं बलेजाताद्यहृत्तिभयपीडिताः प्राप्यरक्षाः प्रतिष्ठन्ति धर्मः कोऽभ्यधिकस्ततः ३१
यं हि वैद्याः कुलेनान्यमन्ये तुन्दतया गिरा सर्वतः प्रतिशृण्णीयाद्राज्यं प्राप्येह धार्मिकः ३२
युधिष्ठिर उ॰ किं तात परमं स्वर्ग्यं कात्ततः प्रीतिरुत्तमा किं ततः परमैश्वर्यं ब्रूहि मे यदि पश्यसि
३३ भीष्म उ॰ यस्मिन्भयार्दितः सम्यक्क्षेमं विन्दत्यपि क्षणम् स स्वर्गजित्तमोऽस्माकं सत्यमेतद्ब्रवी
मि ते ३४ त्वमेव प्रीतिमांस्तस्मात्कुरूणां कुरुसत्तम भव राजा जय स्वर्गं सतो रक्षासतो जहि
३५ अनु त्वां तात जीवन्तु सुहृदः साधुभिः सह पर्जन्यमिव भूतानि स्वादुद्रुममिव द्विजाः ३६ धृ
ष्टं शूरं प्रहर्तारमनृशंसं जितेन्द्रियं वत्सलं संविभक्तारमुपजीवन्ति तं नराः ३७ इति श्रीमहाभारते
शान्तिपर्वणि राजधर्मे पंचसप्ततितमः ७५ युधिष्ठिर उ॰ स्वकर्मण्यपरे युक्तास्तथैवान्ये विकर्म
णि तेषां विशेषमाचक्ष्व ब्राह्मणानां पितामह १ भीष्म उ॰ विद्यालक्षणसंपन्नाः सर्वत्र समद
र्शिनः एते ब्रह्मसमा राजन्ब्राह्मणाः परिकीर्तिताः २ ॥

न्निति ३४ ३७ पंचसप्ततितमः ७५ स्वकर्मणि १ लक्षणानि शमो दमस्तपः शौचमित्यादीनि २ ॥

श्री·
ग्रा·रा·
टी·
४४९

३ जन्मकर्मजन्मोचितकर्मतेनविहीनाः ४ बलिंकरदानंविष्टिंविनावेतनंराजसेवां ५ आज्ञायकाः धर्माधिकारिणः देवला

ऋग्यजुःसामसंपन्नाः स्वेषुकर्मस्ववस्थिताः एतेदेवसमाराजन्ब्राह्मणाभवंत्युत ३ जन्म
कर्मविहीनायेदरिद्राब्रह्मबंधवः एतेशूद्रसमाराजन्ब्राह्मणानाभवंत्युत ४ अश्रोत्रियाःसर्व
एवसर्वेचानाहिताग्नयः तान्सर्वान्धार्मिकोराजाबलिंविष्टिंचकारयेत् ५ आज्ञायकादेवा
लकानक्षत्रग्रामयाजकाः एतेब्राह्मणाश्चांडालामहापथिकपंचमाः ६ ऋत्विक्पुरोहितोम
त्रीदूतोवार्तानुकर्षकः एतेक्षत्रसमाराजन्ब्राह्मणानांभवंत्युत ७ अश्वारोहागजारोहारथि
नोथपदातयः एतेवैश्यसमाराजन्ब्राह्मणानांभवंत्युत ८ एतेभ्योबलिमादद्याद्धीनकोशोम
हीपतिः ऋतेब्रह्मसमेभ्यश्चदेवकल्पेभ्यएवच ९ अब्राह्मणानांवित्तस्यस्वामीराजेतिवैदिकं
ब्राह्मणानांचयेकेचित्विकर्मस्थाभवंत्युत १० विकर्मस्थाश्चनोपेक्ष्याविप्राराज्ञाकथंचन
नियम्याःसंविभज्याश्चधर्मानुग्रहकारणात् ११ यस्यस्मविषयेराजन्स्तेनोभवतिवैद्विजः
राज्ञएवापराधंतंमन्यंतेतद्विदोजनाः १२ अवृत्त्यायोभवेत्स्तेनोवेदवित्स्नातकस्तथा राज
न्सराज्ञाभर्तव्यइतिवेदविदोविदुः १३ सचेन्नोपनिवर्तेतकृतवृत्तिःपरंतप ततोनिर्वासनीयः

काःवेतनेनदेवपूजाकर्तारः महापथिकःसमुद्रेनौयानेनगच्छन् यद्वामहापथेशुल्कग्राहकः ६ १४ षट्सप्ततितमः ७६ ॥

केषां १ २ ३ ४ येनब्राह्मणानामपालनेन ५ ६ ७ ८ अविद्वानितिच्छेदः ९ १० ११ १२ ॥

युधिष्ठिर उ॰ केषांप्रभवतेराजावित्तस्यभरतर्षभ कयाचवृत्त्यावर्त्ततत्तन्मेब्रूहिपितामह १ भी
ष्म उ॰ अब्राह्मणानांवित्तस्यस्वामीराजेतिवैदिकं ब्राह्मणानांचयेकेचिद्विकर्मस्थाभवन्त्युत २
विकर्मस्थाश्चनोपेक्ष्याविप्राराज्ञाकथंचन इतिराज्ञांपुराहत्तमभिजल्पन्तिसाधवः ३ यस्यस्म
विषयेराज्ञः स्तेनोभवतिवैद्विजः राज्ञःएवापराधंतंमन्यन्तेकिल्बिषंनृप ४ अभिशस्तमिवात्मा
नंमन्यन्तेतेनकर्मणा तस्माद्राजर्षयःसर्वेब्राह्मणानन्वपालयन् ५ अत्राप्युदाहरन्तीममितिहास
पुरातनं गीतंकैकेयराज्ञेनह्रियमाणेनरक्षसा ६ केकयानामधिपतिंरक्षोजग्राहदारुणं स्वा
ध्यायेनान्वितंराजन्नरण्येसंशितव्रतं ७ राजोवाच नमेस्तेनोजनपदेनकदर्योनमद्यपः नाना
हिताग्निर्नायज्वामामकान्तरमाविशः ८ नचमेब्राह्मणोविद्वान्नाव्रतीनाप्यसोमपः नानाहिता
ग्निर्नायज्वामामकान्तरमाविशः ९ नानाप्तदक्षिणैर्यज्ञैर्यजन्तेविषयेमम नाधीतेनाव्रतीकश्चि
न्मामकान्तरमाविशः १० अध्यापयन्त्यधीयन्तेयजन्तेयाजयन्तिच ददतिप्रतिगृह्णन्तिषट्स्वकर्म
स्ववस्थिताः ११ पूजिताःसंविभक्ताश्चमृदवःसत्यवादिनः ब्राह्मणामेस्वकर्मस्थामामकान्तरमावि

नयाचंतीति प्रतिग्रहादिजीविकोपायानिवृत्ताः १३ १४ २२ २३ स्वपतित्स्वापं कुर्वंतिसति २३ २४ ॥

नयाचंतिप्रयच्छंति सत्यधर्मविशारदाः नाध्यापयंत्यधीयंते यजंते याजयंतिन १३ ब्राह्मणान्र
क्षंति संग्रामेष्वपलायिनः क्षत्रियामेस्वकर्मस्थामामकांतरमाविशः १४ कृषिगोरक्ष्यवा
णिज्यमुपजीवंत्यमायया अप्रमत्ताः क्रियावंतः सुव्रताः सत्यवादिनः १५ संविभागंदमंशौचंसौ
हृदंचव्यपाश्रिताः ममवैश्याः स्वकर्मस्थामामकांतमाविशः १६ त्रीन्वर्णाननुपजीवंतियथावद
नसूयकाः ममशूद्राः स्वकर्मस्थामामकांतरमाविशः १७ कृपणानाथवृद्धानांदुर्बलातुरयो
षितां संविभक्तास्मिसर्वेषांमामकांतरमाविशः १८ कुलदेशादिधर्माणांप्रथितानांयथावि
धि अव्युच्छेत्तास्मिसर्वेषांमामकांतरमाविशः १९ तपस्विनोमेविषयेपूजिताःपरिपालिताः
संविभक्ताश्चसत्कृत्यमामकांतरमाविशः २० नासंविभज्यभोक्तास्मिनाविशामिपरस्त्रियं स्व
तंत्रोजातुनक्रीडेमामकांतरमाविशः २१ नाब्रह्मचारीभिक्षावान्भिक्षुर्वाब्रह्मचर्यवान् अनृत्वि
जाहुतंनास्तिमामकांतरमाविशः २२ नावजानाम्यहंवैद्यान्नवृद्धान्नतपस्विनः राष्ट्रेस्वपतिजाग
र्मिमामकांतरमाविशः २३ आत्मविज्ञानसंपन्नस्तपस्वीसर्वधर्मवित् स्वामीसर्वस्यराष्ट्रस्यधीमान्म

मनुजीविताः २४ ॥

वांछयामिवांछामि २५ २६ अध्यायतात्पर्यंसंगृह्णातियेषामिति ३१ ३४ षट्सप्ततितमः ७६ व्याख्याताब्राह्मणस्येतिशेषः

शां [illegible] ॥

दानेनविद्यामभिवांछामिलोकान्सत्येनाथोब्राह्मणानांचगुप्त्या शुश्रूषयाचापिगुरूनुपा

स्मिनमेभयंविद्यतेराक्षसेभ्यः २५ नमेराष्ट्रेविधवाब्रह्मबंधुर्नब्राह्मणःकितवोनोतचौरः अ

याज्ययाजीनचपापकर्मानमेभयंविद्यतेराक्षसेभ्यः २६ नमेशस्त्रैरनिर्भिन्नंगात्रेद्व्यंगुलमं

तरं धर्मार्थंयुध्यमानस्यमामकांतरमाविश २७ गोब्राह्मणार्थेयज्ञार्थंनित्यंस्वस्त्ययनेनमा

म आशासतेजनाराष्ट्रेमामकांतरमाविश २८ राक्षसउ० यस्मात्सर्वास्ववस्थासुधर्ममेवा

न्ववेक्षसे तस्मात्त्वंप्राप्नुहिकैकेयगृहान्स्वस्तिव्रजाम्यहं २९ येषांगोब्राह्मणारक्ष्याःप्रजारक्ष्याश्च

कैकय नरक्षोभ्योभयंतेषांकुतएवतुमानुषात् ३० येषांपुरोगमाविप्रायेषांब्रह्मपरंबलं

प्रियातिथ्यास्तथापौरास्तेवैस्वर्गजितोनृपाः ३१ भीष्मउ० तस्माद्द्विजातीन्रक्षेततेहिरक्षंतिरक्षि

ताः आशीरेषांभवेद्राजन्राज्ञांसम्यक्प्रवर्ततां ३२ तस्माद्राज्ञाविशेषेणविकर्मस्थाद्विजातयः

नियम्याःसंविभज्याश्चतदनुग्रहकारणात् ३३ एवंयोवर्ततेराजापौरजानपदेष्विह अनुभूयेहभ

द्राणिप्राप्नोतींद्रसलोकतां ३४ इतिश्रीमहाभारतेराजधर्मेषुकैकेयोपाख्याने ७७ युधिष्ठिरउ०

राजधर्मेणेतिशास्त्रयाजनादिनावृत्तिर्जीविका आपदिविकर्मस्थोपिब्राह्मणादिर्निरातःपापायभवतीतिभावः १ ॥ व्याख्याताराज

श्री॰
शां॰रा॰
टी॰
१५१

वर्ज्जयेद्ब्राह्मणः २ ३ केसरिणः अश्वान्पशून् गोजाविमहिषादीन् कृतान्नं पक्वमन्नं ४ ५ अजादीनां विक्रेयेऽग्न्यादयो देवता एव
विक्रीतास्ततश्चायुक्तियो भवतीत्यर्थः विराट् अन्नमिति श्रावः अन्नविक्रयात्पृथिवीक्रयपापं भवतीति तेषामाशयः पृथिवीवि

भीष्म उ॰ अशक्तः क्षत्रधर्मेण वैश्यधर्मेण वर्त्तयेत् कृषिगोरक्षमास्थाय व्यसने वृत्तिसं-
क्षये २ युधिष्ठिर उ॰ कानि पण्यानि विक्रीय स्वर्गलोकान्न हीयते ब्राह्मणो वैश्यधर्मेण
वर्त्तयन्भरतर्षभ ३ भीष्म उ॰ सुरालवणमित्येव तिलान्केसरिणः पशून् ऋषभान्म-
धुमांसं च कृतान्नं च युधिष्ठिर ४ सर्वास्ववस्थास्वेतानि ब्राह्मणः परिवर्जयेत् एतेषां
विक्रयात्तात ब्राह्मणो नरकं व्रजेत् ५ अजोऽग्निर्वरुणो मेषः सूर्योऽश्वः पृथिवी विराट् धे-
नुर्यज्ञश्च सोमश्च न विक्रेयाः कथंचन ६ पक्वेनामस्य निमयं न प्रशंसन्ति साधवः निमयो-
त्पक्वमामेन भोजनार्थाय भारत ७ वयं सिद्धमशिष्यामो भवान्साधयतामिमं एवं स-
वीक्ष्य निमयन्नाधर्मोऽस्ति कथंचन ८ अत्र ते वर्त्तयिष्यामि पुरा धर्मः सनातनः व्यवहारेषु ॥ ७८ ॥
वृत्तानां तन्निबोध युधिष्ठिर ९ भवतेऽहं ददानीदं भवानेतत्प्रयच्छतु रुचितो वर्त्तते धर्मो
न बलात्संप्रवर्त्तते १० इत्येवं संप्रवर्त्तन्ते व्यवहाराः पुरातनः ऋषीणामितरेषां च साधु चैतत्

क्रयात्सर्वदेवतासमष्टिरूपो विराजेव विक्रीतः स्यात्तेन ततः सर्वयागादेर्बहिर्गतो भवतीत्यर्थः ६ पक्वेनामस्य विनिमये पक्वदो दुष्यति न त्वाम

नियतिनः सर्वैर्विविनिमयाद्युक्ताः तत्तल्लाभश्रो मतत्वार्थः ॥ ८ ॥

[illegible] ७ [illegible] ७८ [illegible]

प्रजाः वैश्यशूद्राख्याः प्रजाः १२ १३ क्षीणबलो राजा कथमन्यांस्त्रायेतेत्याह द्वाभ्यां दानेनेति १४ १५ यदि ताः स्पर्द्धेरन्तर्हि राजा ब्राह्म
णानेवाश्रित्य प्रजाः वशीकुर्यादित्याह द्वाभ्यां राज्ञोऽपीति १६ १७ कालविशेषे सर्वेषामपि शस्त्रधारणमुक्तमित्याह उन्मर्यादे इति १८

युधिष्ठिर उ॰ अथ तात यदा सर्वाः शस्त्रमाददते प्रजाः व्युत्क्रामन्ति स्वधर्मेभ्यः क्षत्रस्य क्षीयते ब
लं २ राजा त्राता तु लोकस्य कथं च स्यात्परायणम् एतन्मे संशयं ब्रूहि विस्तरेण नराधिप ३
भीष्म उ॰ दानेन तपसा यज्ञैरद्रोहेण दमेन च ब्राह्मणप्रमुखा वर्णाः क्षेममिच्छेयुरात्मनः ४
तेषां ये वेदबलिनस्ते ऽभ्युत्थाय समन्ततः राज्ञो बलं वर्धयेयुर्महेन्द्रस्येव देवताः ५ राज्ञोऽपि क्षीय
माणस्य ब्रह्मैवाहुः परायणम् तस्माद्ब्रह्मबलेनैव समुत्थेयं विजानता ६ यदा तु विजयी रा
जा क्षेमं राष्ट्रेऽभिसंदधेत् तदा वर्णा यथाधर्मं निविशेयुः कथंचन ७ उन्मर्यादे प्रवृत्ते तु दस्यु
भिः संकरे कृते सर्वे वर्णा न दुष्येयुः शस्त्रवन्तो युधिष्ठिर ८ युधिष्ठिर उ॰ अथ चेत्सर्वतः क्षत्रं प्र
दुष्येद्ब्राह्मणं प्रति कस्तस्य ब्रह्मणस्त्राता को धर्मः किं परायणम् ९ भीष्म उ॰ तपसा ब्रह्मच
र्येण शस्त्रेण च बलेन च अमायया मायया च नियन्तव्यं तदा भवेत् २० क्षत्रियस्यातिवृत्तस्य ब्राह्म
णेषु विशेषतः ब्रह्मैव संनियन्तृ स्यात्क्षत्रं हि ब्रह्मसंभवं २१ ॥

ब्राह्मणान्द्विषतः क्षत्रियस्य ब्रह्मैव परायणमिति प्रश्नपूर्वकमाह अथेत्यादिना १९ नियन्तव्यं क्षत्रं ब्राह्मणेनेति शेषः २१ ॥

श्री॰
शां॰रा
टी॰
१५२

२२ सर्वैर्वर्णैर्ब्रह्मक्षत्रयोरभिभवे ब्राह्मणार्थं क्षत्रेणामर्त्तव्यमेवेत्याह ब्रह्मेत्यादिना २५ २७ अतीति यज्ञाध्ययनतपोयुक्तानां अन
शनाग्निप्रवेशकारिणामप्येषत्तया ब्राह्मणार्थं म्रियमाणा उत्कृष्टान् लोकानाप्नोतीत्यर्थः २८ एवमेव युद्धधर्मेण २९ नो॰स्मा

अद्भ्योग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितं तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति २२ य
दा छिनत्त्ययोश्मानमग्निश्चापोभिमर्षति क्षत्रं च ब्राह्मणं द्वेष्टि तदा नश्यन्ति ते त्रयः २३ तस्माद् ब्र
ह्मणि शाम्यन्ति क्षत्रियाणां युधिष्ठिर समुदीर्णान्यजेयानि तेजांसि च बलानि च २४ ब्रह्मवीर्ये
मृदूभूते क्षत्रवीर्ये च दुर्बले दुष्टेषु सर्ववर्णेषु ब्राह्मणान् प्रति सर्वशः २५ ये तत्र युद्धं कुर्वन्ति त्य
क्त्वा जीवितमात्मनः ब्राह्मणान् परिरक्षन्तो धर्ममात्मानमेव च २६ मनस्विनो मन्युमन्तः पु
ण्यलोका भवन्ति ते ब्राह्मणार्थं हि सर्वेषां शस्त्रग्रहणमिष्यते २७ अतिस्विष्टमधीतानां लोका
न्नति तपस्विनां अनाशकाग्न्योर्विशतां शूरा यान्ति परां गतिं २८ ब्राह्मणस्त्रिषु वर्णेषु शस्त्रं गृह्णन्
न दुष्यति एवमेवात्मनस्त्यागान्नान्यं धर्मं विदुर्जनाः २९ तेभ्यो नमश्च भद्रं च ये शरीराणि
जुह्वते ब्रह्मद्विषो नियच्छन्तस्तेषां नोस्तु सलोकता ३० ब्रह्मलोकजितः स्वर्ग्यान् वीरांस्ता
न्मनुरब्रवीत् यथाश्वमेधावभृथे स्नाताः पूता भवन्त्युत दुष्कृतः पापाः शस्त्रेणाशस्त्रेण तथा शस्त्रहत्

कमस्तु ३० यथेति नितरां तथा ३१ भवतीति धर्माधर्मौ क्रमात् धर्मोधर्मश्च भवतः कारणविशेषात् ३२ ॥ नाशेण ३१ भव

१५२

मैत्राः उत्तंकपराशरादयः क्रूराणि सर्पराक्षसमत्रादीनि धर्म्याः धर्मादनपेताः क्षत्रियाः पापानि परराष्ट्रावमर्दादीनि अधर्मस्यध
र्मत्वे उदाहरणद्वयमुक्तं इदमेव अहिंसाख्यो परमोऽअयं अधर्मरूपमपि भवतीति ज्ञेयं ३३ वर्णदोषे क्षत्रियादिदुष्टत्वपथगामिषु सत्सु ३४ दस्यू
दयः सति क्षत्रार्थे प्रजापालननिमित्ते लोकेषु मूढेषु वर्णसंकरे ऽन्यान्यदारहरणादोषप्रवृत्ते सति यद्यन्यो ऽक्षत्रियः बली दस्यूनभिभवेत्

मैत्राः क्रूराणि कुर्वन्तो जयन्ति स्वर्गमुत्तमं धर्म्याः पापानि कुर्वाणा गच्छन्ति परमां गतिं ३३ ब्राह्म
णस्त्रिषु कालेषु शस्त्रं गृह्णन्न दुष्यति आत्मत्राणे वर्णदोषे दुर्दम्यनियमेषु च ३४ युधिष्ठिर उ॰ अ
भ्युत्थिते दस्युबले क्षत्रार्थे वर्णसंकरे संप्रमूढेषु क्षत्रेषु यद्यन्योऽभिभवेद्बली ३५ ब्राह्मणो यदि वा वैश्यो
भवेन्न वा तस्माच्छस्त्रं ग्रहीतव्यमन्यत्र तत्र वै ध्रुवं ३७ भीष्म उवाच अपारे यो भवेत्पारमप्लवे यः
प्लवो भवेत् शूद्रो वा यदि वाप्यन्यः सर्वथा मानमर्हति ३८ यमाश्रित्य नरा राजन्वर्तयेयुर्यथासुखं
अनाथाः परिकाल्यन्तो दस्युभिः परिपीडिताः ३९ तमेव पूजयेयुस्ते प्रीत्या स्वमिव बान्धवं अभीर
भीरुणां कौरव्य कर्त्ता सन्मानमर्हति ४० किं तैर्येनडुहो नो ह्या किं धेन्वा वाप्यदुग्धया वंध्यया

भार्यया कोऽर्थः कोऽर्थो राज्ञाप्यरक्षता ४१ ॥ आद्ये अक्षत्रियोपिमा

प्रजाश्च दस्युभ्यो रक्षेत् निर्हिंसः राजकार्यं कुर्यान्नवा
न्यः स्यात् अंत्ये सर्वनाश इत्याह त्रिभिः अभ्युत्थित इति ३५ ३७ आद्यमेवमन्त्यपादेन अपार इत्यादिना ३८ ३९ ॥

श्री॰
शां॰ रा॰
टी
१५३

४२ ४४ अष्टसप्ततितमः ७८ कोति स्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबलानांसप्तानांराज्यप्रकृतीनांमध्येस्वामिरूपाप्रकृतिःऋत्विक्पुरोहि
तद्रूपभेदेनद्विविधातत्राभ्यर्हितत्वात्प्रथमंपुरोहितस्ततःस्थापित्वाद्राजावनिरूपितइदानीऋत्विजोनिरूपयतिकोत्पादिना किंसमुत्थाःकस्मि
न्निमित्तेउदिताःकिमेषांकर्त्तव्यंकर्मेत्यर्थः १ प्रतीति यथायोगशास्त्रैमेध्यादिभिश्चित्तप्रसादनाख्यप्रतिकर्मविधीयते एवंराज्ञांशान्तिकपौ

यथादाहमयोहस्तीयथाचर्ममयोमृगः यथाह्यनर्थःषंढोवापार्थक्षेत्रंयथोषरं ४२ एवंवि
प्रोनधीयानोराजायश्चनरक्षिता मेघोनवर्षतेयश्चसर्वएतेनिरर्थकाः ४३ नित्यंयस्तुसतोरक्षे
दसतश्चनिवर्त्तयेत् सएवराजाकर्त्तव्यस्तेनसर्वमिदंधृतं ४४ इतिश्रीमहाभारतेशान्तिपर्वणि
राजधर्मेषु ७८ युधिष्ठिरः किंसमुत्थाःकिंशीलाऋत्विजःस्युःपितामह कथंविधाश्चरा
जेन्द्रतद्ब्रूहिवदतांवर १ भीष्मः प्रतिकर्मपुराचारऋत्विजांस्मविधीयते छन्दःसामादिविद्वा
न्द्विजानांकृतमेवच २ येत्वेकरतयोनित्यंधीरानाप्रियवादिनः परस्परस्यसुहृदःसमता
स्समदर्शिनः अनृशंस्याःसत्यवाक्याअकुसीदाअथार्जवः अद्रोहोनभिमानश्चह्रीस्तितिक्षाद
मःशमः ४ ॥

ष्टिकादिकर्मप्रयोगःशुद्धाख्यप्रतिकर्मऋत्विग्भिःकर्त्तव्यं तत्रपुराचारःअनृतांताभियोगेनाचरणंऋत्विजां
विधीयते कीदृशानां छन्दःऋचःसामःआदिपदार्थःयजुःकृतंमीमांसानानिविज्ञायस्थितानामितिशेषः २ एवंकिंसमुत्थाइत्यस्यो १५
त्तरमुक्त्वाकिंशीलाइत्यस्योत्तरमाह येत्विति ३ कथंविधाइत्यस्याहत्रिभिः अनृशंस्याइति ४ ॥

त्रिभिः कृतवृत्तवंशैः शुक्लैर्निर्दोषैः ५ महर्त्विजो ब्रह्मादयः उपर्त्विजो ब्राह्मणाच्छंसादयस्ते यथार्हतः यथायोग्यं मान्याः धनादिना ऽऽ
राधनीयाः ६ ऋत्विक्प्रसंगान्नद्यानार्थी दक्षिणां विचारयति यदिदमिति नक्वचित् व्यवतिष्ठते व्यवस्थां प्राप्नोति अल्पेणापक्षे दनि
मित्ते सर्वस्वदक्षिणाविधानात्तु नरकात्तकाललोपप्राप्तेः ७ ततश्चनेदं शास्त्रं प्रतियत्नेयनविभागाभिप्रायं अपि तु आपत्कल्पाभिप्रायं द्रा

धीमान्सत्यव्रतो दान्तो भूतानामविहिंसकः अकामद्वेषसंयुक्तस्त्रिभिः शुक्लैः समन्वितः ५
अहिंसको ज्ञानतृप्तः स ब्रह्मासनमर्हति एते महर्त्विजस्तात सर्वे मान्या यथार्हतः ६ युधि
ष्ठिर उ॰ यदिदं वेदवचनं दक्षिणाभिर्विधीयते इदं देयमिदं देयं न क्वचिद्व्यवतिष्ठते ७ नेदं प्र
तिधनं शास्त्रमापद्धर्मास्तु शास्त्रतः आज्ञा शास्त्रस्य घोरेयं न शक्तिं समवेक्षते ८ श्रद्धावतां च
यष्टव्यमित्येषा वैदिकी श्रुतिः मिथ्योपेतस्य यज्ञस्य किं शुश्रद्धा करिष्यति ९ भीष्म उ॰ नवे
दानां परिभवान्न शाठ्येन न मायया कश्चिन्महदवाप्नोति मा तेऽभूद्बुद्धिरीदृशी १० यज्ञाङ्गं दक्षि
णा तात वेदानां परिबृंहणं न यज्ञा दक्षिणाहीनास्तारयन्ति कथंचन ११ ॥

दशाशतदक्षिणादानासमर्थस्य सर्वस्वदानं विधेयं अन्यथा दरिद्रस्य याग एव न घटेतेत्यर्थः ८ ननु यावतीर्गास्तावन्ति वासांसि च हुत्वा
दद्यादिति दरिद्रं प्रत्यनुकल्पोऽप्यस्तीति चेन्नेत्याह मिथ्येति गाः स्थाने चरुमात्रदानं मिथ्या वा वस्तु उपेतो यज्ञः श्रद्धयापि न संपूर्यत इ
त्यर्थः ९ सर्वस्वदानशास्त्रं दरिद्रपरं कुर्वतो वेदाबज्ञा शाठ्यं च भवतीति नेदं शास्त्रतात्पर्यमित्याह नेति महत्पदं १० ११ ॥

श्री॰ या॰ वा॰ टी॰ १५४

पूर्णपात्रेणेति यथा सक्तप्रस्थस्य दानं अश्वमेधादप्यधिकं तद्वद्दरिद्रस्य पूर्णपात्रं द्वादशशतसममित्यर्थः १२ सोमविक्रयादिना प्या-
र्थं प्रसाध्य यष्टव्यमित्याह द्वाभ्यां सोम इति हृथा यज्ञादिति मिन्नं विनाहृत्तिर्वर्तनं न इष्यते १३ तेन सोमविक्रयलब्धेन यत्नेन क्रीतो
यो यज्ञः सोमस्तेन यज्ञः प्रतायते १४ न्यायहृतः शाठ्यादिरहितः १५ शारीरेति देहधारणमात्रं आस्थाय प्रहृतानां ब्राह्मणा-

शक्तितः पूर्णपात्रेण संमितानसमा भवेत् अवश्यं तात यष्टव्यं त्रिभिर्वर्णैर्यथाविधि १२
सोमो राजा ब्राह्मणानामित्येषा वैदिकी स्थितिः तं च विक्रीय भिक्षित्वा न हृत्याहुत्तिरिष्यते
१३ तेन क्रीतेन यज्ञेन ततो यज्ञः प्रतायते इत्येवं धर्मतो ध्यातं महर्षिभिर्धर्मचारिभिः १४ शुमा-
न यज्ञस्य सोमस्य न्यायहृतो यदा भवेत् अन्यायहृतः शुक्लेन परस्य न चात्मनः १५ शारीर-
वृत्तमास्थाय इत्येषा श्रूयते श्रुतिः नातिसम्यक् प्रणीतानि ब्राह्मणानां महात्मनां १६ तपो
यज्ञादपि श्रेष्ठमित्येषा परमा श्रुतिः तत्ते तपः प्रवक्ष्यामि विद्वंस्तदपि मे शृणु ७ अहिंसा
सत्यवचनमानृशंस्यं दमो घृणा एतत्तपो विदुर्धीरा न शरीरस्य शोषणं ८ अप्रामाण्यं च
वेदानां शास्त्राणां चाभिलङ्घनं अव्यवस्था च सर्वत्र तद्वै नाशनमात्मनः ९ ॥

नां प्रणीतानि प्रणीतानि हिंसाद्यानि यज्ञादीनि तानि सम्यक् हिंसामयत्वान्न शुभं तत् १६ किं तर्हि शुभमत आह तप इति ७ अहिंसे- १५४
ति तपः अध्ययनं तदर्थानुसंधानं च घृणा दयात्र पावा ८ ९ ॥

कर्माण्यपि ज्ञानपराण्येवेत्याह निबोधेति दशहोतॄणां चित्तिः स्रुक् चित्तमाज्यमित्यादीनां मन्त्राणां चित्तिः संधानं जीवब्रह्मणोरेकी-
करणसाधनं योगः तत्स्थानेत्र स्रुक् होतव्यं द्रव्यं परात्मनि प्रविलापनीयं चित्तं तत्स्थानेत्र आज्यमिति यज्ज्ञानेन तद्देवात्पूतं पवित्रेन केवा-
लेनायत्त इत्यर्थः २९ जिह्मं शाठ्यं आर्जवं अवक्रत्वं २९ नवसप्ततितमः ७९ एवं स्वामिसंपदं विविच्यामात्यसंपदं विविनक्ति यदपीत्या-

निबोध दशहोतॄणां विधानं पार्थ यादृशं । चित्तिः स्रुक् चित्तमाज्यं च पवित्रं ज्ञानमुत्तमं २९
सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदं । एतावान् ज्ञानविषयः किं प्रलापः करिष्यति ३० इति श्री
महाभारते शान्तिपर्वणि राजधर्मेषु ७९ युधिष्ठिर उ० यदप्यल्पतरं कर्म तदप्येकेन दुष्करं । पुरु-
षेणासहायेन किमु राज्ञा पितामह १ किंशीलः किंसमाचारो राज्ञोथ सचिवो भवेत् । कीदृशे
विश्वसेद्राजा कीदृशे न च विश्वसेत् २ भीष्म उ० चतुर्विधानि मित्राणि राज्ञां राजन् भवन्त्युत । स-
हार्थो भजमानश्च सहजः कृत्रिमस्तथा ३ ॥

दिना १ यत्तावत्तद्राज्यमप्येकाकिना कर्तुमशक्यमतः ऋत्विजामिव सचिवानामपि परीक्षा ऽवश्यं कर्तव्येत्यर्थः २ उत्तरमाह चतुर्विधानीति
सहार्थः अयं शत्रुरुभाभ्यामुन्मूलनीयः अस्य राज्यमुभाभ्यां विभज्य ग्राह्यमिति पणपूर्वं कृतः भजमानः पितृपैतामहक्रमागतः स-
हजमातृष्वस्रीयादिः कृत्रिमो धनादिना आवर्जितः ३ ॥

श्री॰
शां॰रा॰
टी॰
१५५

नैकस्येतिपक्षपातशून्यः नह्ययोविश्वसयेवेततत्वेनकपटकारी यः अप्रार्थितोपियर्मपक्षपातीभवति तस्यउदासीनत्वेनुयोय
मेस्थः सतंआश्रयेदित्यर्थः ४ अर्थीयर्मापेतत्वात्स्वयमपि सोर्थस्याज्यस्तत्याशंकयाहयर्मेति केवलेनयर्मेणाजिगीषवोनसिद्ध्यती।
त्यर्थः ५ मध्यमोभजमानसहजो अपरौसहार्थकृत्रिमो आद्यः फलप्राप्तिकालेबलवांश्चेत्सर्वमपिजिहीर्षतीतिशंकयपव कृ

यर्मात्मापंचमस्त्वापिमित्रंनैकस्यनद्वयोः यतोयर्मस्ततोवास्यादुदर्मस्थोवाततोभवेत् ४ यस्त
स्यार्थोनरोचेतनतंतस्यप्रकाशयेत् यर्माधर्मेणराजानश्चरंतिविजिगीषवः ५ चतुर्णांमा
ध्यमोश्रेष्ठोनित्यंशंक्योतथापरौ सर्वेनित्यंशंकितव्याः प्रत्यक्षंकार्यमात्मनः ६ नहिराज्ञा
प्रमादोवैकर्तव्योमित्ररक्षणे प्रमादिनंहिराजानंलोकाः परिभवंत्युत ७ असाधुः साधु
तामेतिसाधुर्भवतिदारुणः अरिश्चमित्रंभवतिमित्रंचापिप्रदुष्यति ८ अनित्यचित्तः पुरु
षस्तस्मिन्कोजातुविश्वसेत् तस्मात्प्रयानेयत्कार्यंप्रत्यक्षंतत्समाचरेत् ९ ॥

त्रिमोविशेषयनलाभात्परकीयोभविष्यतीतिसोपिशंकयपव सर्वेपंचापि प्रत्यक्षंकार्यंउद्दिश्यमंत्रितमपिदृष्टामात्यनिग्रहादिकं
कार्यंपंचानामपिसमक्षंनकुर्यादित्यर्थः ६ नहीतिकुमित्रंसर्वथाहंतव्यमेवेत्यर्थः ७ यस्मात्तुगुणाचलचित्तत्वाद्विपर्यासोमित्रादी १५५
नांदृश्यतेतस्मात्क्वचिदपिविश्वासमकृत्वाकोशादुर्गादिसंव्यापारणांस्वप्रत्यक्षमेवकुर्याद्राजेत्याहद्वाभ्यामसाधुरिति ८ ९

अत्यंतं विश्वासाविश्वासावपि विरुद्धावित्याह त्रिभिः एकांतेनेति १ २ अविश्वासस्थानान्याह यमिति मयि मृते ऽयं राजा भविष्यती
ति यं मन्येत प्रतिवेशी भ्राता वा पुत्रो वा स्त्रु तस्माच्छंकितव्यमेवेत्यर्थः ३ अमित्रस्य लक्षणांतरमाह यस्येति द्वाभ्यां यथा महातडाग
सेतु समीपे यस्य क्षेत्रं स चेत्सेतुं खनति तर्हि तत्तो ऽर्वाचीनानि क्षेत्राणि समोदकानि सम्यक् फलंति स चेत्सेतुं भिनत्ति तदाति जलप्रवाहात्क्षे

एकांतेन हि विश्वासः कृत्स्नो धर्मार्थनाशकः अविश्वासश्च सर्वत्र मृत्युना च विशिष्यते १
अकालमृत्युर्विश्वासो विश्वसन् हि विपद्यते यस्मिन्करोति विश्वासमिच्छतस्तस्य जीवति २
तस्माद्विश्वसितव्यं च शंकितव्यं च केषुचित् एषा नीतिर्गतिस्तात लक्ष्या चैव सनातनी ३ यं
मन्येत ममाभावादिममर्थागमं स्पृशेत् नित्यं तस्माच्छंकितव्यममित्रं तद्विदुर्बुधाः ४ य
स्य क्षेत्रादप्युदकं क्षेत्रमन्यस्य गच्छति न तत्रानिच्छतस्तस्य भिंद्युरन्सर्वसेतवः ५ तथैवा
त्युदकाद्भीतस्तस्य भेदनमिच्छति यमेवं लक्षणं विद्यात्तममित्रं विनिर्दिशेत् ६ ॥

त्राणामुपघातो भवति एवं महति शत्रौ सीमांतपालः सम्यक् सीमां पालयति तदा परराष्ट्राद् उत्तमपण्यागमेन स्वराष्ट्रस्य विभा
क भवति स चेत् सीमां भिनत्ति तदा स्वराज्यं विपक्षप्रवेशान्नश्यति तत्र यस्मात्सीमांतपालाद् यं संभावितं स शत्रुरिति तेयं यदधी
नौ शत्रुप्रकोपाप्रकोपौ सीमांतपालो ऽप्यविश्वसनीय इत्यर्थः उत्तरार्धः स्पष्टः ५ ६ ॥

मित्रलक्षणमाहयस्येति क्षुद्धानन्त्येतपनडक्तमितिच पाठान्तरेक्षुदमेवामित्रलक्षणं अदीनेनेतिविच्छेदः १६ यन्मित्रा
कर्ते ७ १८ २३ स्मृति तत्रार्थप्रकृतिर्धर्मः प्रकृतिरर्थधर्मप्रकृतिश्चेतित्रेयाप्रकृतिस्ता तत्राद्या कृषिवाणिज्यथोडर्गसेतुः

यस्य क्षुद्धानन्त्येतन्न येदीनतरो भवेत् पनडुत्तम मित्रस्य तिमित्रमितिचवदति १६ यन्मन्ये
तमसाभावादस्याभावो भवेदिति तस्मिन्कुर्वीत विश्वासं यथा पितरि वै तथा १७ तं शक्त्या
वर्धमानश्च सर्वतः परिरक्षयेत् नित्यं वृत्ताद्वारयति यो धर्मेष्वपि कर्मसु १८ तत्ताद्रीति विजा
नीयादुत्तमं मित्रलक्षणम् येतस्य वृत्तिमिच्छन्ति ते तस्य रिपवः स्मृताः १९ व्यसनान्नित्यभी
तोयः समृद्ध्यायोनतुष्यति यत्स्यादेवंविधं मित्रं तदात्मसममुच्यते २० रूपवान्स्थिरोपेत
स्तितिर्ज्ञवतस्तूयकः कुलीनः कुलसंपन्नः सततस्मात्यसंततः २१ मेधावी स्मृतिमान्द
क्षः प्रकृत्या चानृशंस्यवान् यो मानितोमानितो वा नचदुष्येत कदाचन २२ ऋत्विग्वाय
दिवाचार्यः सखा वात्यंतसंस्तुतः गृहेवसेदमात्यस्तेसः स्यात्परमपूजितः २३ सतेविद्या
त्परेमंत्रप्रकृतिं चार्थधर्मयोः विश्वासस्तेभवेत्तत्र यथा पितरि वै तथा २४ ॥ कुंजरबंधनं खन्याक
रकादानं शून्यानां च निवेशने अष्टौ संधानकर्माणि प्रयुक्तानि मनीषिभिरिति संधानं स्वार्थप्राप्तिः तथा डर्गाण्यत्तोबलाध्यदो

एकार्थे एकस्मिन्प्रयोजने एक एवाध्वगः कार्यः चारैस्तत्तद्गुणदोषान्संकलयेन्न तु एकार्थे द्वावध्वगौ कार्याविति आह एकार्थे
इति २५ समये नीतिमर्यादायां २६ प्रत्यनंतरः प्रतिनिधिः प्रधान इति यावत् २७ प्रतिपत्तिविशारदः कार्याकार्यविवेककुशलः

नैव द्वौ न त्रयः कार्या न मृष्येरन्परस्परं एकार्थेष्वेवभूतानां भेदो भवति सर्वदा २५ कीर्तिप्रधानो
यस्तस्याद्यश्च स्यात्समये स्थितः समर्थान्यश्च न द्वेष्टि नानर्थान्कुरुते च यः २६ यो न कामाद्भ
याल्लोभात्क्रोधाद्वा धर्ममुत्सृजेत् दक्षः पर्याप्तवचनः स ते स्यात्प्रत्यनंतरः २७ कुलीनः शील
संपन्नस्तितिक्षुरविकत्थनः शूरश्चार्यश्च विद्वांश्च प्रतिपत्तिविशारदः २८ एते ह्यमात्याः कर्तव्याः
सर्वकर्मस्ववस्थिताः पूजिताः संविभक्ताश्च सुसहायाः स्वनुष्ठिताः २९ कृत्स्नमेते विनिक्षि
प्ताः प्रतिरूपेषु कर्मसु युक्ता महत्सु कार्येषु श्रेयांस्युत्पादयंत्युत ३० एते कर्माणि कुर्वंति स्पर्ध
माना मिथः सदा अनुतिष्ठंति चैवार्थमाचक्षाणाः परस्परं ३१ ज्ञातिभ्यश्चैव बुध्येथा मृत्योरिव
भयं सदा उपराजेव राजर्द्धिं ज्ञातिर्न सहते सदा ३२ ऋजोर्मृदोर्वदान्यस्य ह्रीमतः सत्यवादि
नः नान्यो ज्ञातेर्महाबाहो विनाशमभिनंदति ३३ अज्ञातित्वेऽपि न सुखं नावज्ञेयास्ततः परं अज्ञा
तिमंतं पुरुषं परे चाभिभवंत्युत ३४ ॥ २८ स्वनुष्ठिताः सुष्ठु अनुष्ठितं कर्तव्यं येषां ते २९ कृत्स्नं अप्रतिकुंचकं यथा
स्यात्तथा विनिक्षिप्ताः अधिकृताः प्रतिरूपेषु कर्मसु आयव्ययसंकलनादिषु कार्येषु पराभिभवादिषु ३० ३१ उपराजा समीपवर्ती साम

॥ नी° ५४ ॥

श्री· निकृतस्यनान्यःपरायणं कथंचनकथमपिनसहतेइत्यन्वयः ३५ बांधवैःसंबंधिभिर्निकृतेकस्मिंश्चित्पुरुषेतज्ज्ञातिःकात्स्न्या
शां·रा· आत्मानमेवनिकृतंजानातितेषुज्ञातिषु यथोक्तं परस्परविरोधेहिवयंपंचचतेशतं अन्यैःसहविरोधेतुवयंपंचोत्तरंशतमिति
टी·
१५७

निकृतस्यनरैरन्यैर्ज्ञातिरेवपरायणं नान्यैर्निकारंसहतेज्ञातिर्ज्ञातेःकथंचन ३५ आत्मा
नमेवजानातिनिकृतंबांधवैरपि तेषुसंतिगुणाश्चैवनैर्गुण्यंचैवलक्ष्यते ३६ नाज्ञातिरनुगृ
ह्णातिनचाज्ञातिर्नमस्यति उभयंज्ञातिवर्गेषुदृश्यतेसाध्वसाधुच ३७ संमानयेत्पूजयेच्च
वाचानित्यंचकर्मणा कुर्याच्चप्रियमेतेभ्योनाप्रियंकिंचिदाचरेत् ३८ विश्वस्तवदविश्वस्तस्ते
षुवर्तेतसर्वदा नहिदोषोगुणोवेतिनिरूप्यस्तेषुदृश्यते ३९ अस्यैवंवर्तमानस्यपुरुषस्या
प्रमादिनः अमित्राःसंप्रसीदंतितथामित्रीभवंत्यपि ४० यएवंवर्त्ततेनित्यंज्ञातिसंबंधिमं
डले मित्रेषमित्रेमध्यस्थेचिरंयशसितिष्ठति ४१ इतिश्रीमहाभारतेशांतौराजधर्मेषु ८०
युधिष्ठिरउ· एवमग्राह्यकेतस्मिन्ज्ञातिसंबंधिमंडले मित्रेष्वमित्रेष्वपिचकथंभावोवि
भाव्यते १ ॥

३६ ४१ अध्यायः ८० एवं अग्राह्यकेवशीकर्तुमशक्येद्वयोरन्योन्यंस्पर्द्धमानयोरेकस्माद्देशान्तरस्यकोपोत्पत्तेरवश्यंमित्रतांयाति। १५७
अतःसर्वेषांभावःचित्तंकथंविभाव्यतेवशीक्रियतेइतिप्रश्नः १ ॥

२ ४ दास्यमेवाहमर्द्धमिति अर्जितस्यार्द्धं ज्ञातिभ्यो देयं तदुरुक्तानि च दंतव्यानीत्येवं ज्ञातिदास्यं ५ वाशब्द इवार्थः वाचादुरुक्तं
आहुकस्तेहात्कस्मान्मां द्वेष्टीति अक्रूरदुरुक्तं अक्रूरस्तेहात्कस्मान्मां द्वेष्टीत्याहुकदुरुक्तं ६ असहायः आहुकाक्रूरयोः सात्वनेन
तिशेषः ७ ८ नैयस्य पक्षे तेन स्युः स न स्यात् न शोभेदेव यस्य पक्षे ते स्युः तत्कुलं कृत्स्नमेव ज्ञ्मूहगाथार्थं लभते ९ ईदृशा अपि मम साहाय्यं न

भीष्म उ॰ अत्राप्युदाहरंतीममितिहासं पुरातनं संवादं वासुदेवस्य महर्षेर्नारदस्य च २ वा
सुदेव उ॰ नासुहृत्परमं मंत्रं नारदार्हति वेदितुं अपंडितो वापि सुहृत्पंडितो वाप्यनात्मवान्
३ स ते सौहृदमास्थाय किंचिद्वक्ष्यामि नारद कृत्स्नां बुद्धिं च ते प्रेक्ष्य संपृच्छे त्रिदिवंगम ४ दास्य
मैश्वर्यवादेन ज्ञातीनां न करोम्यहं अर्धभोक्तास्मि भोगानां वाग्दुरुक्तानि च क्षमे ५ अरणी
मग्निकामो वा मथ्नाति हृदयं मम वाचादुरुक्तं देवर्षे तन्मे दहति नित्यदा ६ बलं संकर्षा
णे नित्यं सौकुमार्यं पुनर्गदे रूपेण मत्तः प्रद्युम्नः सोसहायोस्मि नारद ७ अन्ये हि सुमहा
भागा बलवंतो दुरुत्सहाः नित्योत्थानेन संपन्ना नारदांधकवृष्णयः ८ यस्य न स्युर्न च स
स्याद्यस्य स्युः कृत्स्नमेव तत् द्वाभ्यां निवारितो नित्यं वृणोम्येकतरं न च ९ स्यातां यस्याहु

कुर्वंतीति भावः ९ द्वाभ्यां आहुकाक्रूराभ्यां निवारितः निरस्तः सन् काक्रूरौ किं नु दुःखतरं ततः यस्य चापि न
एकतरं न वृणोमि इतरस्य कोपो मा भूदिति द्वयोर्महिषयोर्विवुध्यतोर्वा रणो मध्यस्थस्य मम महद्दुःखं तथा द्वयोः सुहृदोस्त्यागोपी

स्यातां किं नु दुःखतरं ततः ॥ ९ ॥

नारदस्यानामिति ॥ ८ ॥

श्री॰
शां॰ रा॰
टी॰
५८

द्वयोः कितवयोर्द्यूतकारिणोरेकामातेव ११२ अन्यतः बाह्याः आपदः स्वकृताः ज्ञातिकृताः अंतरा आपदः ३ एते संकर्षणादयः तदन्व
याः अक्रूरान्वयाः तत्र हेतुः अर्थेति तत्त्वैश्वर्यं प्रभवाद्ययं तव आपदिति शेषः ४ स्वकर्मजत्वमेव कृतद्विषणोति आत्मनेति सार्धेन अन्यत्र आऽ

सोऽहं कितवमातेव द्वयोरपि महामते एकस्य जयमाशंसे द्वितीयस्य पराजयं १ ममैवं क्लि
श्यमानस्य नारदोभयतः सदा वक्तुमर्हसि यच्छ्रेयो ज्ञातीनामात्मनस्तथा २ नारद उ॰ आ
पदो द्विविधाः कृष्ण बाह्याश्चाभ्यंतराश्च ह प्रादुर्भवंति वार्ष्णेय स्वकृता यदि वान्यतः ३ सेय
माभ्यंतरा तुभ्यमापत्कृच्छ्रा स्वकर्मजा अक्रूरभोजप्रभवा सर्वे ह्येते तदन्वया अर्थहेतोर्हि
कामाद्वा वाचा बीभत्सयापि वा ४ आत्मना प्राप्तमैश्वर्यमन्यत्र प्रतिपादितं कृतमूलमि
दानीं तु ज्ञातिशब्दसहायवन् ५ न शक्यं पुनरादातुं वान्तमन्नमिव त्वया बभ्रूग्रसेनयो रा
ज्यं नाप्तुं शक्यं कथंचन ज्ञातिभेदभयात्कृष्ण त्वया चापि विशेषतः ६ तच्च सिध्येत्प्र
यत्नेन कृत्वा कर्म सुदुष्करं महाक्षयं व्ययो वा स्याद्विनाशो वा पुनर्भवेत् ७ अनायसेन
शस्त्रेण मृदुना हृदयच्छिदा जिह्वामुद्धर सर्वेषां परिमृज्यानुमृज्य च ८ केनतत्पैश्वर्यं कृतमूलं य

तोज्ञातित्वादनुच्छेदनीयं हे सहायवन् ५ अतएव पुनरादातुं न शक्यमित्याह नेति तत्र हेतुः ज्ञातीति त्वयेति स्वदत्तं ददतापहारो नोचितः
विषवृक्षोपि संवर्ध्य स्वयं छेत्तुमसांप्रतमिति न्यायादित्यर्थः ६ तच्च राज्यस्य पुनरादानं च ७ जिह्वामुद्धर तेषां मूकीभावं संपादयेत्यर्थः क

॥ ८ ॥
५८

१९ परिमार्जनदोषापनयं तितिक्षार्जवमार्दवैः कार्यं अनुमार्जनं प्रीतिगुणाधानं यथार्हपूजनादित्यर्थः २० हृदयं कूरवनि
वासुदेव उ० अनायसेन शस्त्रेण मृदुना हृदयच्छिदा येनैषामुद्धरे जिह्वां परिमृज्यानुमृज्य
तमृज्य च १९ नारद उ० शक्त्यान्नदानं सततं तितिक्षार्जवमार्दवैः यथार्हप्रतिपूजा च शस्त्रमेत
दनायसं २० ज्ञातीनां वक्तुकामानां कटुकानि लघूनि च गिरा त्वं हृदयं वाचं शमयस्व मनांसि
च २१ नामहापुरुषः कश्चिन्नानात्मा नासहायवान् महतीं धुरमाधत्ते तामुद्यम्योरसा वह २२ स
र्व एव गुरुं भारमनड्वान्वहते समे दुर्गे प्रतीकः सुगवो भारं वहति दुर्वहं २३ भेदाद्विनाशः संघानां
संघमुख्योऽसि केशव यथा त्वां प्राप्य नोत्सीदेदयं संघस्तथा कुरु २४ नान्यत्र बुद्धिक्षान्तिभ्यां नान्य
त्रेन्द्रियनिग्रहात् नान्यत्र धनसंत्यागाद्गुणः प्राज्ञेऽवतिष्ठते २५ धन्यं यशस्यमायुष्यं स्वपक्षोद्भवनं
सदा ज्ञातीनामविनाशः स्याद्यथा कृष्ण तथा कुरु २६ आयत्यां च तदात्वे च न तेऽस्त्यविदितं प्रभो
षाड्गुण्यस्य विधानेन यात्रायानविधौ तथा २७ यादवाः कुकुरा भोजाः सर्वे चान्धकवृष्णयः त्वय्या
सक्ता महाबाहो लोका लोकेश्वराश्च ये २८ उपासते हि त्वद्बुद्धिमृषयश्चापि माधव त्वं गुरुः सर्व
भूतानां जानीषे त्वं गतागतं त्वामासाद्य यदुश्रेष्ठमेधन्ते यादवाः सुखं २९ इति श्रीमहाभारते शा
स्त्वयं मनांसि कुसंकल्पजालानि २१ अनात्मा अजितचित्तः उरसा श्रेष्ठीकृत्य न तमपावहस्वेत्यर्थः २२ २९ न्तिपर्वणि राजधर्मे वासुदे

वनारदसंवादः ॥ ८१ ॥

एकाशीतितमः ॥ ८१ ॥

श्री॰ एवममात्यान्मिष्टान्नदानतितिक्षार्जवमार्दवपूजाभिर्मानयेदित्युक्तं कोशवृद्धिकरं जनं ततोप्यधिकं तैर्मानयेद्वदेच्चेत्याह एषेति १
शां॰ रा॰ ६ प्रवृत्त्यर्थी अमात्यदोषदर्शने राजानं प्रवर्तयितुकामः ७ ८ परिपतन् राजयुक्तानां राज्ञा तेषु तेषु कार्येषु युक्तानां दुष्कृतं स्वामिद्रव्या
टी॰
५५

भीष्म उ॰ एषा प्रथमतो वृत्तिर्द्वितीयां शृणु भारत यः कश्चिज्जनयेदर्थं राज्ञा रक्ष्यः सदा नरः
१ ह्रियमाणममात्येन भृतो वाभृतः यो राजकोशं नश्यंतमाचक्षीत युधिष्ठिर २ श्रोतव्यम
स्य च रहो रक्ष्यश्चामात्यतो भवेत् अमात्या ह्युपहर्तारो भूयिष्ठं घ्नन्ति भारत राजकोशस्य गोप्तारं
राजकोशविलोपकाः समेत्य सर्वे बाधंते स विनश्यत्यरक्षितः ४ अत्राप्युदाहरंतीममितिहा
सम्पुरातनं मुनिः कालकवृक्षीयः कोशल्यं यदुवाच ह ५ कोशलानामाधिपत्यं संप्राप्ते क्षेम
दर्शिनि मुनिः कालकवृक्षीय आजगामेति नः श्रुतं ६ स काकं पंजरे बद्ध्वा विषये क्षेमदर्शिनः
सर्वं पर्यचरद्युक्तः प्रवृत्त्यर्थी पुनः पुनः ७ अधीध्वं वायसीं विद्यां शंसंति मम वायसाः अनागत
मतीतं च यच्च संप्रति वर्तते ८ इति राष्ट्रे परिपतन् बहुभिः पुरुषैः सह सर्वेषां राजयुक्तानां दु
ष्कृतं परिदृष्टवान् ९ स बुद्ध्वा तस्य राष्ट्रस्य व्यवसायं हि सर्वशः राजयुक्तापचारांश्च सर्वान्बु
द्ध्वा ततस्ततः १० ततः स काकमादाय राजानं द्रष्टुमागमत् सर्वज्ञोऽस्मीति वचनं ब्रुवाणः सं ५५
शितव्रतः ११ ॥

पहारकृतं पापं ९ राजयुक्तैर्यत्नस्यापहारान् १० ११ ॥

राजानमागम्यतत्समत्तमेवामात्यंप्राहअशुत्रस्थानेत्वयाऽदंयनचौर्यंकृतमिति १२ अनुगम्यतांआलोच्यतां १३ १४ असमस्तुनेः
तमनादृत्यैत्यर्थः १५ १६ आगतोऽहंत्वयाऽनुज्ञातःसन्तत्वद्धितंब्रूयामितिसार्द्धं १७ अर्थोक्रियइतियोब्रूयात्तस्यमित्रस्यतथाभू

समस्तकौशल्यमागम्यराजामात्यमलंकृतं प्राहकाकस्यवचनाद्अमुत्रेदंत्वयाहृतं १८ असौ
चासौचजानीतेराजकोशस्त्वयाहृतः एवमाख्यातिकाकोयंतच्छीघ्रमनुगम्यतां १९ तथा
न्यानयिसप्राहराजकोषहरोस्तदा नचास्यवचनंकिंचिदनृतंश्रूयतेक्वचित् १४ तेनविप्रक्ष
ताःसर्वेराजयुक्ताःकुतूहल तमस्यभिप्रहृष्टस्यानिशिकाकमवेधयन् १५ वायसन्तुविनिर्भि
न्नंदृष्ट्वाबाणेनपंजरे पूर्वोक्तोब्राह्मणोवाक्यंतेमदर्शिनमब्रवीत् १६ राजंस्त्वामभयंयाचे
प्रभुप्राणायनेश्वरं अनुज्ञातस्त्वयाब्रूयांवचनंभवतोहितं मित्रार्थमभिसंतप्तोभक्त्यासर्वात्म
नागतः १७ अयंतवार्थोक्रियतेयोब्रूयादतमान्वितः संबोधयितुमित्रंसद्श्वमिवसारथिः
१८ अतिमन्युप्रसक्तोहिप्रसह्यहितकारणात् तथाविधस्यसुहृदाततत्र्वसर्वविजानता पेश्य
यमिच्छतानित्यंप्रष्टव्योभूपता १९ तंराजाप्रत्युवाचेदंयत्किंचिन्मांभवान्वदेत् कस्माद
हंनक्षमेयमाकांक्षन्नात्मनोहितं २० ब्राह्मणप्रतिजानीतेप्रब्रूहियदिहेच्छसि करिष्यामिहितं

ततद्वचनंत्वयातत्तमितिद्वयोःसंबंधः नपुनःकाकवन्नादृशोमित्रमनवाहितत्पापैर्यातनीयमितिभावःसार्द्धश्लोकद्वयं १८ २१

॥ २८

पापान् अपापांश्च भृत्यान् ज्ञात्वा भृत्यान् एवमयं च ज्ञात्वा २२ अगतीकागतिः स्वहन्नित्वात् स्वहन्तिर्नीचसेवनं २३ २४ तेभ्यः राज
कीयमित्रेभ्यः ऽमित्रेभ्यो राजस्व भयमस्तीत्यर्थः २५ प्रमादात् भृत्यकृतनात् स्खलेत् पूर्वोपकारं विस्मृत्य द्विषन् २७ नाहमस्मी

मुनिरुवाच ज्ञातानज्ञातान् हि दोषांश्चापि भृत्यतस्ते भयानि च भवत्याहृतिं समाख्यातं भवतो
तिकमागामेस्रागोवोक्तस्व दोषा यमाचार्यैर्नृपसेविनां अगतीकागतिर्ह्येषा पापा राजोप
सेविनां २३ आशीविषैश्च तस्याहुः संगतं यस्य राजभिः बहुमित्राश्च राजानो बह्वमित्रास्त
थैव च २४ तेभ्यः सर्वेभ्य एवाहुर्भयं राजोपजीविनां नश्येषां राजतो राजन्मुहूर्तादेव भीर्भ
वेत् २५ नैकान्तेनाप्रमादो हि शक्यः कर्तुं महीपतौ न तु प्रमादः कर्तव्यः कथंचिद्भूतिमि
च्छता २६ प्रमादाद्धि स्खलितेनास्ति जीवितं अग्निं दीप्तमिवासीदेद्राजानमुपशिक्षितः
२७ आशीविषमिव क्रुद्धं प्रभुं प्राणधनेश्वरं यत्नेनोपचरेन्नित्यं नाहमस्मीति मानवः २८
दुर्व्याहृताच्छंकमानो दुःस्थितात् दुरधिष्ठितात् दुरासिताद्दुर्व्रजिताद्दिङ्गिताद्दुष्टचेष्टिता
त् २९ देवतेव हि सर्वार्थान् कुर्याद्राजा प्रसादितः वैश्वानर इव क्रुद्धः समूलमपि निर्दहेत् ३०
इति राजन्यमः प्राह वर्तते च तथैव तत् अथ भूयः समेवार्थं करिष्यामि पुनः पुनः ३१ ॥

तिमत्वा जीवनाशं त्यक्त्वेत्यर्थः २८ २९ ३० अहमिति पाठे भूयांसमेवैक्यमर्थं च तं करिष्यामि ३१ ॥

तत्र ह्यास्मादददातीति बुद्धिदानेपूनिष्टमाहवायसस्त्विति ननुइतिवितर्केतत्रशब्दोयथार्थे यथामेवायसः कार्याभिसंहितः का
र्यकारीतथाहमप्यस्मीतिशेषः तद्धेदवचमांत्वदमात्यामावयिष्यंतीतिवितर्कयेइतिभावः ३२ ३३ आदानपराः कोशलोभाः
भूतानांप्रजानांमेमयितादृशैः अभिसंहितंअभिसंधिर्वैरंकृतंतमदीयकाकहननादितिभावः ३४ आंतरैः सुहृदादिभिः अभिसंधाय

ददात्यस्मद्धियोमात्याबुद्धिसाहाय्यमापदि वायसस्त्वेषमेराजन्ननुकार्याभिसंहितः ३२
नचमेत्रभवान्राज्ञीनचैतेषांभवान्प्रियः हिताहितांस्तुबुद्ध्यामापरोत्तमतिर्भवेः ३३ यो
त्वादानपराएववसंतिभवतोगृहे अभूतिकामाभूतानांतादृशैर्मेभिसंहितं ३४ येवाभवद्वि
नाशेनराज्यमिच्छंत्यनंतरं आंतरैरभिसंधायराजन्सिध्यतिचान्यथा ३५ तेषामहंभयाद्रा
जन्नाश्रमिच्छाम्यन्यमाश्रमं तैर्हिमेसंधितोबाणः काकेनिपातितः प्रभो ३६ छद्मकामैरका
मस्यगमितोयमसादनं दृष्टंह्येतन्मयाराजंस्तपोदीर्घेणचक्षुषा ३७ बहुनक्रझषग्राहां
तिमिंगिलगणायुतां काकेनबालिशेनेमांयामतार्षमहंनदीं ३८ ॥

अन्नादीविषप्रतेभव्यमितिस्तेहंहत्वा तेषामभीप्सितोभवद्विनाशः सिध्यतिचअन्यथानसिध्यतिचआशुः शेषेसतीतिभावः ३५
तेषांत्वद्वैरिणांकाकमिवमामयिमारयिष्यंतीतिध्वनिः ३६ ३७ इमांराजनीतिनदींसजातीयविजातीयदुर्बलग्रासिभिः नक्रादिभि
स्थैरथिकारिशत्रुभिर्व्याप्तांकाकेनबालिशेनस्वमतंसंपादयतासहायेनाहमतार्षंतीर्णवानस्मिविकद्धलक्षणयातन्मरणान्मुक्तोस्मी

श्री॰
शां॰रा॰
टी॰
१६१

स्थाप्यितिनिष्पर्वनघापप्वोपमानं ३९ अभिनादीपेन ४ गहनंकपटं ग्रंथकारमिवतमोन्वितंथर्मायर्मदर्शनस्फुटं ४१ ४२ यथावक्रावर्त्तां
यांसीतायांप्लवोतारणोपायः निमज्जतितथातवराजनीतोप्लवोमादृशोपिनिमज्जति ४४ मधिप्तिसार्द्धः ४५ तीर्थंजलावतरणमार्गः क

स्थाणुविषमंकंटकवंतीसिंहव्याघ्रसमाकुलं दुरासदांडुस्प्रसद्दांगुहांहैमवतीमिव ३९ अग्नि
नातामसंदुर्गंनोभिरामंप्रचरगम्यते राजन्दुर्गावतरणेनोपायंपंडितविदुः ४० गहनंभवतोराज्य
मंधकारंतमोन्वितं नेहविश्वसितंशक्यंभवतापिकुतोमया ४१ अतोनायंप्रभावामसुखलेसम
दस्तीहद्व वयोहैवाप्रसुकृतेदुष्कृतेनचसंशयः ४२ न्यायतोदुष्कृतोघातःसुकृतेनकथंचन
नेहयुक्तंसुस्थिरंस्थातंजवेनैवाब्रुजंदुधः ४३ सीतानामनदीराजन्प्लवोयस्यांनिमज्जति तथो
पमामिमांमन्येवागुरांसर्वघातिनीं ४४ मधुप्रतापोह्यभवानभोजनेविषसंयुतं असतामिवते
भावावर्त्तेनसतामिव ४५ आशीविषैःपरिवृतःकूपस्त्वमसिपार्थिव ४५ दुर्गतीर्थांबृहत्कू
लाकारीरावेत्रसंयुता नदीमधुपानीयायथाराजंस्तथाभवान् ४६ श्वगृध्रगोमायुतोराजंहंस
समोह्यसि ४७ यथाश्रित्यमहावृक्षंकक्षःसंवर्धतेमहान् ततस्तंसहसावृत्यतमतीत्यप्रवर्द्ध
ते ४८ तेनैवोग्रेंधनेनैनंदावोदहतिदारुणः तथोपमाह्यमात्यास्तेराजंस्तान्परिशोधय ४९

रीरोनिष्पत्रकंठकिंडुमः ४७ यथेति तेनकक्षेणसहैवदावोदवाग्निर्दहतितद्वत् एवंत्वदाश्रयाद्वृद्धिंप्राप्तास्त्वामतिक्रांताःअमात्यास्तेःसह

५१ उषितं मयेति शेषः वीरपत्न्याः आलये जारेणेवेति शेषः भृत्यस्यानेन च्छीलजिज्ञासया स्थितमिति भावोऽभिप्रायः ५२ जिज्ञासासेवाहका-
श्चिदिति आन्तराः कामादयः षट्पक्षा अमात्यादीनां ५३ रोचते भवानिति शेषः ५४ अमात्येषु स्वचोदितमाह भवत इति दोषो मित्रधंसः ५५ न

त्वयैवैवं कृता राजन्भवता परिपालिताः भवन्तमभिसंधाय जिघांसन्ति भवत्प्रियं ५१ उषितं श-
कमानेन प्रमादं परिरक्षता अन्तःसर्पश्चागारे वीरपत्न्याश्चालये ५२ शीलं जिज्ञासमानेन राज-
न्सहजीविनः कश्चिज्जितेन्द्रियो राजा कश्चिदस्यान्तरा जिताः कश्चिद्देषोऽप्रियो राजा कश्चिद्भ्रान्तः प्रि-
याः प्रजाः ५३ विजिज्ञासुरिह प्राप्तस्तवाहं राजसत्तम न स्म मे रोचते राजन्नतृषितस्येव भोजनं ५४
अमात्यामितरो चैते वित्तं स्वस्य यथोदकं भवतोऽर्थकृदित्येवं मयि दोषो हितैः कृतः विद्यते कारणं
नान्यदिति मे नात्र संशयः ५५ न हि तेषामहं द्रुह्यंस्तेषां दोषदर्शने अतो हि दुर्हृदाद्भेयं भयमस्पृष्टादि
वैरगात् ५६ राजोवाच भूयसा परिहारेण सत्कारेण च भूयसा पूजितो ब्राह्मणश्रेष्ठ भूयो वस
गृहे मम ५७ यत्ना ब्राह्मणानेच्छतीति न वत्स्यति मे गृहे भवतैवोदितं ज्ञेयं यत्तदेषामनन्तरं ५८ य-
थास्थानं त्वयादिष्टो यथा च स्वकृतं कृतं यथा समीक्ष्य भगवन् श्रेयसे विनियुङ्क्ष्व मां ५९ ॥

द्रुह्यः न द्रोहकर्ता एवं सत्यपि तत्रायमसद्द्रोहीति तेषामपि दोषदर्शनमस्ति अतो मयात्र न स्थेयमित्यर्थः दुर्हृदात् दुष्टचित्तात् भेयं भे-
तव्यं भयमस्पृष्टात् स्पृष्टभंगेन कोपितात् ५६ ५९ ॥

श्री॰ शां॰रा॰ टी॰ १६२

इमंहितस्यकाकस्यवर्यदोषंप्रदर्शयनेकमेकममात्यंक्रमेणाडहपेश्वर्यातिव्याववय दुर्बलीकृतस्युकारणांवयदेतंदोषा
आज्ञायस्याकाल्येनत्तानापवैकमेवजहि ६० तेषामकस्मात्प्रापश्चवयेदोषमाह एकेति संहताः कंटकानपिस्टहीयुः कि

मुनिरुवाच प्रदर्शयन्निदंदोषमेकेकंडर्बलीकुरु ततःकारणमाज्ञायपृथक्पृथक्पृथङ्जहि
६० एकदोषाद्हिबद्धवोपृथ्कीयुरपिकंटकान् मंत्रभेदभयाद्राजंस्तस्मादेतद्ब्रवीमिते ६१ वयं
तब्राह्मणानामस्पृष्टदंडाःकृपालवः स्वस्तिचेच्छामभवतःपरेषांचयथात्मनः ६२ राजन्ना
त्मानमाचवेदेसंबधीभवतोद्य मुनिःकालकहृतीयइत्येवमभिसंज्ञितः ६३ पितुःसखावाचा
भवतःसमतःसत्यसंगरः व्यापन्नेभवतोराज्येराजन्पितरिसंस्थिते ६४ सर्वकामान्परित्यज्य
तपस्तप्तंतदामया स्नेहात्त्वांतुब्रवीम्येतन्माभूयाविभ्रमेदिति उभेदृष्ट्वाडःखेसुखेराज्यप्राप्य
इच्छया राज्यनामात्यसंस्थेनकथंराजन्प्रमाद्यसि ६६ ततोराजकुलेमंत्रीसज्जतेभूयसापुनः
पुरोहितकुलेचैवसंप्राप्तेब्राह्मणर्षभे ६७ एककण्ठ्यांमहीकृत्वाकौशल्यायमशस्विने मु
निःकालकहृतीयईजेक्रतुभिरुत्तमैः ६८ ॥ पितरित्वदीये संस्थिते

मृतमाहशान्ब्रहत्वित्यर्थः ६१ ६२ ६३
६४ विभ्रमेतस्यनामेषामवुद्धिभवान्माकार्षीदिति ६५ केवलंग्रमात्यसंस्थोमाभूरित्याशयेनाहउभेइति ६६ नांदीमंगलया
ढःततस्तस्मिन्नवित्रिणाहतेसति नदीतिपाठेहर्षः मंत्रीतिपाठेभूयसायत्नेनसंजतेजातः ६० कौशल्याय कौशल्यार्थः ६८ ॥ १६२

८१ द्व्यशीतितमः ८२ सभासदः व्यवहारनिर्णायकाः सहायाः युद्धादौ उपयोगिनः सुहृदः हितकर्तारः परिच्छदाः सेनान्यादयः अमा त्याः मंत्रिणः १ क्रमेणैषां लक्षणान्याह ह्रीति कथयितुं न्यायान्यायौ वक्तुं २ अमात्यान् नित्यं सन्निहितान् ३ शूराः पुरोहितादयश्च स

हितं तद्वचनं श्रुत्वा कौशल्यो न्वजयन्महीं तथा च कुरु तत्सर्वं राजा यथोक्तं तेन भारत ८१ इति श्रीमहाभारते शान्तौ राजधर्मे ऽमात्यपरीक्षायां कालकवृक्षीयोपाख्याने ८२ युधिष्ठिर उ० सभा सदः सहायाश्च सुहृदश्च विशांपते परिच्छदास्तथामात्याः कीदृशाः स्युः पितामह १ भीष्म उ० ह्रीनिषेधास्तथा दान्ताः सत्यार्जवसमन्विताः शक्ताः कथयितुं सम्यक् ते तव स्युः सभासदः २ अमा त्यांश्चातिशूरांश्च ब्राह्मणांश्चापरिक्लिष्टान् सुसंतुष्टांश्च कौन्तेय महोत्साहांश्च कर्मसु ३ एतान्स हायांल्लिप्सेथाः सर्वास्वापत्सु भारत कुलीनः पूजितो नित्यं न हि शक्तिं निगूहति ४ प्रसन्नमप्रस न्नं वा पीडितं हृतमेव वा आवर्तयति भूयिष्ठं तदेव ह्यनुपालितं ५ कुलीना देशजाः प्राज्ञा रूपवन्तो बहुश्रुताः प्रगल्भाश्चानुरक्ताश्च ते तव स्युः परिच्छदाः ६ दौष्कुलेयाश्च लुब्धाश्च नृशंसा निरप त्रपाः ते त्वां तात निषेवेयुर्यावदार्द्रकपाणयः ७ कुलीनान् शीलसंपन्नानिंगितज्ञान् निष्ठुरान् देशकालविधानज्ञान् भर्तृकार्यहितैषिणः ८ ॥

हायाश्च त्वर्थः सुहृदमाह सार्द्धेन कुलीन इति ५ ६ यावदार्द्रकपाणयः शुष्कहस्तास्तु सद्यो विक्रियन्ते इत्यर्थः ७ इंगितज्ञानेत्रवक्त्रादिचेष्टि

शान्ति ८ ॥

श्री॰
शां॰ रा॰
टी॰
१६३

अर्थः धनं मानः उच्चस्थाने निवेशादिः अर्घः दिग्यवस्त्रातं हस्त्वादि दानं सत्कारः आदरः यान्प्रियान्मन्येथाः ते ऽर्थभाजः सु
खभागिनश्च स्युः ४ तएव आपदि अभिन्नवृत्ताः स्वामिना सह अनर्थभाजोऽपि सुखभाजश्च स्युः नित्यं आपदि चार्थयंते इति नित्यार्थिनः

नित्यमर्थेषु सर्वेषु राजा कुर्वीत मंत्रिणः अर्थमानार्घ्यसत्कारैर्भोगैरुच्चावचैः प्रियैः यानर्थ
भाजो मन्येथास्ते ते स्युः सुखभागिनः ४ अभिन्नवृत्ता विद्वांसः सद्वृत्ताश्चरितव्रताः न त्वां नि
त्यार्थिनो जह्युः क्षुद्राः सत्यवादिनः ५ अनार्या ये न जानंति समयं मंदचेतसः तेभ्यः प्रतिजुगुप्से
था ये चापि समयच्युताः ६ नैकमिच्छेद्गणं हित्वा स्याच्चेदन्यतरग्रहः यस्त्वेको बहुभिः श्रेयान्
कामं तेन गणं त्यजेत् ७ श्रेयसो लक्षणं चैतत् विक्रमो यस्य दृश्यते कीर्तिप्रधानो यश्च स्यात्सम
ये यश्च तिष्ठति ८ समर्थान्पूजयेद्यश्च नास्पर्धैः स्पर्धते च यः न च कामाद्भयात्क्रोधाल्लोभाद्वा धर्म
मुत्सृजेत् ९ अमानी सत्यवान्दांतो जितात्मा मानसंयुतः स ते मंत्रसहायः स्यात्सर्वावस्थापरी
क्षितः १० कुलीनः कुलसंपन्नस्तितिक्षुर्दक्ष आत्मवान् शूरः कृतज्ञः सत्यश्च श्रेयसः पार्थ लक्षणं
तस्यैवं वर्तमानस्य पुरुषस्य विजानतः अमित्राः संप्रसीदंति ततो मित्रीभवंत्यपि १२ अत ऊर्ध्वम
मात्यानां परीक्षेत गुणागुणान् संयतात्मा कृतप्रज्ञो भूतिकामश्च

६ समयं धर्मार्थमर्यादां जुगुप्सेथाः रक्षस्व ६ अन्यतरः गणैकयोरेकतरस्य ग्रहणं अस्मिन्पक्षे श्रेष्ठगुणीन दाराणं त्यक्त्वा श्रेयवग्राह्यः अन्यथा गणएव ग्राह्य इति ७ श्रेयसः साधो ८ स

॥ ५ ॥ शां॰ ॥

शांतिपर्वणि राजधर्मे ८१ ॥ १६३

अभिजातैःकुलीनैः अहार्यैः लंचादिनावशीकर्तुमशक्यैः येषांसंबंधोस्तितादृशैः १९ यौनाःउत्तमयोनयः श्रौताःवेदपथगाः मौलाःप
रंपरागताः अनहंकृताअगर्वाःकर्तव्यामंत्रिणइतिशेषः २० प्रकृतिःपूर्वकर्मजःसंस्कारःशोभनासत्यार्जवादिमती तेजःपराभिभवसामर्थ्यं
धैर्यमहत्यामप्यापदिचित्तस्यानवसादः क्षमामहत्यप्यपकारेसहिष्णुत्वं शौचंबाह्यमांतरंचनिष्कापट्यं अनुरागःस्वाविता धृतिःधारणासा

संबंधिषुकुलेषुराजेन्द्राभिजातैःस्वदेशजैः अहार्यैरव्यभीचारैः सर्वशः सुपरीक्षितैः १९ यौनाःश्रौ
तास्तथामौलास्तथैवाप्यनहंकृताः कर्तव्याभूतिकामेनपुरुषेणबुभूषता २० येषांवैनयिकी
बुद्धिःप्रकृतिश्चैवशोभना तेजोधैर्यंक्षमाशौचमनुरागःस्थितिर्धृतिः २१ परीक्ष्यचगुणान्नित्यं
प्रौढभावान्धुरंधरान् पंचोपधाव्यतीतांश्चकुर्याद्राजार्थकारिणः २२ पर्याप्तवचनान्वीरान्प्र
तिपत्तिविशारदान् कुलीनान्सत्त्वसंपन्नानिंगितज्ञान्निष्ठुरान् २३ देशकालविधानज्ञान्भर्तृ
कार्यहितैषिणः नित्यमर्थेषुसर्वेषुराजन्कुर्वीतमंत्रिणः २४ नहीनतेजाभिसंस्पृष्टोवैनवजानाति
व्यवस्यति अवश्यंजनयत्येवसर्वकर्मसुसंशयं २५ ॥

स्वामिनिप्रीतिः स्थितिरव्यभिचारिता धृतिःधारणासामर्थ्यं २१ पंचमंत्रिणइतिन्तृतीयेनान्वयः उपधाच्छलंतदतीतान् २२ पर्याप्तंक्षा
न्तस्यविवक्षितस्यार्थस्यनिर्वाहकंवचनंयेषांतान् २३ २४ वर्ज्यानाहहीनेत्यादिना हीनतेजसामित्रेणाभिसंस्पृष्टःसंबंधः नव्यवस्यतिनकर्तं
व्याकर्तव्यंनिश्चिनोति २५ ॥

बहुगुणयुक्तोपि किंचिद्दोषयुक्तस्त्याज्य इत्याह एवमिति २६ अणुषु सूक्ष्मेषु २७ प्रापयितुं समापयितुं २८ केवलादिति आदे
भष्टोपि पूर्वैः कर्मकर्मणः फलविशेषानज्ञातुं न शक्नोतीत्यर्थः २९ ३१ अनुरक्तलक्षणमाह त्रिभिः संक्रुद्ध इति क्रुद्धः स्वामी क

एवमल्पश्रुतो मंत्री कल्याणाभिजनोप्युत धर्मार्थकामसंयुक्तो नालं मंत्रं परीक्षितुं २६ तथैवा
नभिजातोपि काममस्तु बहुश्रुतः अनायक इवाचक्षुर्मुह्यत्यणुषु कर्मसु २७ यो वाप्यस्थिर
संकल्पो बुद्धिमानागतागमः उपायज्ञोपि नालं स कर्म प्रापयितुं चिरं २८ केवलात्पुनरादाना
त्कर्मणो नोपपद्यते परामर्शो विशेषाणामश्रुतस्येह दुर्मतेः २९ मंत्रिण्यननुरक्ते तु विश्वासो नोप
पद्यते तस्मादननुरक्ताय नैव मंत्रं प्रकाशयेत् ३० व्यथयेद्धि स राजानं मंत्रिभिः सहितोनृजुः मा
रुतोपहितच्छिद्रैः प्रविश्याग्निरिव द्रुमं ३१ संक्रुद्ध्यत्येकदा स्वामी स्थानाच्चैवापकर्षति वाचा
क्षिपति संरब्धः पुनः पश्चात्प्रसीदति ३२ तानि तान्यनुरक्तेन शक्यानि तितिक्षितुं मंत्रिणां च भ
वेत्क्रोधो विस्फूर्जितमिवाशनेः ३३ यस्तु संहरते तानि भर्तुः प्रियचिकीर्षया समानसुखदुः
खं तं पृच्छेदर्थेषु मानवं ३४ अनृजुस्त्वनुरक्तोपि संपन्नश्चेतरैर्गुणैः राज्ञः प्रज्ञानयुक्तोपि न
मंत्रं श्रोतुमर्हति ३५

दाचिदाश्वासितमपि अधिकारच्युतं करोति कदाचित्परुषमुक्त्वा पुनरनुगृह्णाति न चानुरक्ते
नापि मंत्रिणां मोहमशक्यं मंत्रिकोपश्च वज्रपाततुल्यो तानि तानि राजहितार्थी यस्तानि सोढुं शक्नुयात्स एवानुरक्तस्तमेव राजा पृ

१९४

३६ ३७ आगंतुः नूतनः सोप्यविश्वास्य इत्यर्थः ३८ विधर्मतः अन्यायेन ३९ आक्षारितो धनग्रहणेन विक्षतः कृतः ४० उपादेयानाह सर्वेति जानपदः स्वदेशजः ४१ परस्य शत्रोः आत्मनः प्रकृतीः स्वाम्यमात्यादिकाः जानातीति प्रकृतिज्ञः ४२ गंभीरो मंत्रगोपनसमर्थः

योमित्रैः सहसंबद्धोनपौरान्बहुमन्यते असुहृत्तादृशोराज्ञेयोनमंत्रंश्रोतुमर्हति ३६ अविद्वानशुचिस्तब्धः शत्रुसेवीविकत्थनः असुहृत्क्रोधनोलुब्धोनमंत्रंश्रोतुमर्हति ३७ आगंतुश्चानुरक्तोपिकाममस्तुबहुश्रुतः सत्कृतः संविभक्तोवानमंत्रंश्रोतुमर्हति ३८ विधर्मतोविप्रकृतः पितायस्याभवत्पुरा सत्कृतः स्थापितः सोपिनमंत्रंश्रोतुमर्हति ३९ यः स्वल्पेनापिकार्येणसुहृदाक्षारितोभवेत् पुनरन्यैर्गुणैर्युक्तोनमंत्रंश्रोतुमर्हति ४० कृतप्रज्ञश्चमेधावीबुधोजानपदः शुचिः सर्वकर्मसुयः शुद्धः समंत्रंश्रोतुमर्हति ४१ ज्ञानविज्ञानसंपन्नः प्रकृतिज्ञः परात्मनोः सुहृदात्मसमोराज्ञः समंत्रंश्रोतुमर्हति ४२ सत्यवाक्शीलसंपन्नोगंभीरः सत्रपोमृदुः पितृपैतामहोयः स्यात्समंत्रंश्रोतुमर्हति ४३ संतुष्टः संमतः सत्यः शौंडीरोद्वेष्यपापकः मंत्रवित्कालविच्छूरः समंत्रंश्रोतुमर्हति ४४ सर्वलोकमिमंशक्तः सांत्वेनकुरुतेवशे तस्मैमंत्रः प्रयोक्तव्योदंडमाधित्सतानृप ४५ ॥

४३ शौंडीरः अनालसः द्वेष्याणि पापानि यस्य स द्वेष्यपापः ४४ आधित्सता आधातुमिच्छता ४५ ॥

श्री॰ ४६ पंचानाममभावे ऽवराः त्रिभ्यो न्यूनाः न कार्याः ४७ प्रकृतिषु स्वाम्यमात्यादिषु मंत्रिणां छिद्रं अयथोक्तकारित्वाभावेन परस्यावस
सां॰रा॰ रदानं ४८ रहेतद्गोपयेत् पिदध्यात् विवरं छिद्रं ४९ मंत्रः गूढो येषां ते मंत्रसंवृतेनो मंत्रकवचः इतरे भृत्यजनादयः ५० ५१ स्वामिनो
टी॰ मंत्रिणश्च मदादिरहिताः संतो यद्यन्योन्यमनुवर्त्तेते तर्हि निर्द्वन्द्वाः स्युरविनो भवंतीत्यर्थः ५२ नित्यमित्यर्द्धः उपधाश्छलानि तानि च पंच
१६५

पौरजानपदा यस्मिन्विश्वासं धर्मतो गताः । योद्धा नयविपश्चिच्च स मंत्रं श्रोतुमर्हति ४६ तस्मा
त्सर्वैर्गुणैरेतैरुपपन्नाः सुपूजिताः । मंत्रिणः प्रकृतिज्ञाः स्युस्त्र्यवरा महदीप्सवः ४७ स्वासु प्र
कृतिषु छिद्रं लक्षयेरन्परस्य च । मंत्रिणां मंत्रमूलं हि राज्ञो राष्ट्रं विवर्धते ४८ नास्य छिद्रं परः प
श्येत् छिद्रेषु परमन्वियात् । गूहेत्कूर्म इवांगानि रक्षेद्विवरमात्मनः ४९ मंत्रगूढा हि राज्यस्य
मंत्रिणो ये मनीषिणः । मंत्रसंहननो राजा मंत्रांगानीतरे जनाः ५० राज्यं प्रणिधिमूलं हि मंत्रसा
रं प्रचक्षते ५१ स्वामिनं त्वनुवर्त्तेत वृत्त्यर्थमिह मंत्रिणः । संविनीय मदक्रोधौ मानमीर्ष्यां च
निर्वृताः ५२ नित्यं पंचोपधातीतैर्मंत्रयेत्सह मंत्रिभिः ५३

तेषु केवलवाचिकी द्रोणवधे हतोऽश्वत्थामा कुंजर इत्युक्तिर्युधिष्ठिरस्य मनसि छलाभावात् भीमस्य तत्रैव कायिकी वाचिकी च ।
केवलमानसिकी पांडवेषु धृतराष्ट्रस्य तत्र वाचिकाद्यभावात् तत्रैव यथार्त्तराष्ट्राणां कायवाङ्मनोभवा जतुगृहे सोऽभिके ऽश्वत्थाम्नः का १६५
यिकीति पंचविधा उपधातीता इतीतः ५३ ॥

तेषामिति त्रयाणां त्रीणि मतानि स्वनिश्चयं चाव यथार्थनिश्चयं तेषु गुरुं प्रति तन्मनश्च तत्त्वं एवं वेदयेदिति द्वयोः संबंधः ५४ तेन गुरुणा
पि च त्रिभिः सह ऊहापोहपूर्वकं यदा निष्ठा सिद्धान्तः कृतो भवेत् सोऽपि यदा सहस्यात् सर्वेषामेकमत्यं न स्यात् तदा तं मंत्रं प्रणयेत् कार्यं तियो

तेषां त्रयाणां विविधं विमर्शं विबुध्य चित्तं विनिवेश्य तत्र स्वनिश्चयं तं परिनिश्चयं च निवेदयेदु
त्तरमंत्रकाले ५४ धर्मार्थकामज्ञमुपेत्य पृच्छेद्युक्तो गुरुं ब्राह्मणमुत्तरार्थं निष्ठा कृता तेन यदा
सहस्यात्तं मंत्रमार्गं प्रणयेदसक्तः ५५ एवं सदा मंत्रयितव्यमाहुर्ये मंत्रतत्त्वार्थविनिश्चयज्ञाः
तस्मात्तमेवं प्रणयेत्सदैव मंत्रं प्रजासंग्रहणे समर्थम् ५६ न वामनाः कुब्जकृशा न खंजा नांधा
जडः स्त्री च नपुंसकं च न चात्र तिर्यङ्न पुरो न पश्चान्नोर्ध्वं न चाधः प्रचरेत्कथंचित् ५७ आरु
ह्य वा वेश्म तथैव शून्यं स्थलं प्रकाशं कुशकाशहीनं वागंगदोषान्परिहृत्य सर्वान्संमंत्रयेत्का
र्यमहीनकालं ५८ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे ८३ भीष्म उ० अत्राप्युदाहरंती
ममितिहासं पुरातनं बृहस्पतेश्च संवादं शक्रस्य च युधिष्ठिर १ शक्र उ० किंस्विदेकपदं ब्र
ह्मन्पुरुषः सम्यगाचरन् प्रमाणं सर्वभूतानां यशश्चैवाप्नुयान्महत् २ ॥

जयेत् ५५ अत्र मंत्रस्थाने ५७ वाग्दोषश्चैर्भाषणादिः अंगदोषः नेत्रवक्त्रविकारादिः तेनान्यं नाधिक्षिपेदित्यर्थः ५८ त्र्यशीतितमः ८३
अत्र मंत्रमूलभूते प्रजासंग्रहणे विषये १ एकपदं यत्र सर्वगुणाः अंतर्भवंति देवकर्तव्यं वस्तु प्रमाणं संमतम् २ ॥

श्री० शां० रा० टी० १६६

सांत्वेति: एकपदं प्रियवचनं ३ ४ नाभाषते तूष्णीमास्ते नाचरन्नप्रनाचरन् ५ यः राजा पूर्वं स्वतः स्वतिविदनात्प्रागेवमागतोसी।

बृहस्पतिरुवाच सांत्वमेकपदंशक्रप्रत्यहंसमुपाचरन् प्रमाणंसर्वभूतानांयशश्चैवाप्नुयान्महत् ३ एतेनैकपदेनैवशक्रसर्वंलोकंसुखावहं आचरन्सर्वभूतेषुप्रियोभवतिसर्वदा ४ योहिनाभाषतेकिंचित्सर्वदाभ्रुकुटीमुखः द्वेष्योभवतिभूतानांससांत्वमिहनाचरन् ५ यस्तुसर्वमभिप्रेक्ष्यपूर्वमेवाभिभाषते स्मितपूर्वाभिभाषीचतस्यलोकःप्रसीदति ६ दानमेवहिसर्वत्रसांत्वेनानभिजल्पितं नप्रीणयतिभूतानिनिर्व्यंजनमिवाशनं ७ आदानादपिभूतानांमधुरामीरयन्गिरं सर्वलोकमिमंशक्रसांत्वेनकुरुतेवशे ८ तस्मात्सांत्वंप्रयोक्तव्यंदंडमाधित्सतापिहि फलंचजनयत्येवंनचास्योद्विजतेजनः ९ सुकृतस्यहिसांत्वस्यश्लक्ष्णस्यमधुरस्यच सम्यगासेव्यमानस्यतुल्यंजातुनविद्यते १० भीष्मउ० इत्युक्तःकृतवान्सर्वंयथाशक्रःपुरोधसा तथात्वमपिकौंतेयसम्यगेतत्समाचर ११ इतिश्रीमहाभारतेशांतौराजधर्मेषु ८४ युधिष्ठिरउ० कथंस्विदिहराजेंद्रपालयन्पार्थिवःप्रजाः प्रीतिंधर्मविशेषेणकीर्तिमाप्नोतिशाश्वतीम् १

त्याद्विभाषते ६ न मेवदानमपिसांत्वहीनंनप्रीणयतीत्यर्थः ७ सर्वस्वंगृहीत्वापिसांत्वंप्रयुंजतोवशेलोकेभवतीत्याह आदानादपीति ८ ११ चतुरशीतितमः

८

८४ कथंस्विदितिद्वौ

१६६

व्यवहारेण एकस्मिन्वस्तुन्यादौ विषये ममेदं ममेदमिति द्वयोर्विवदतोर्मध्ये ऽयं सत्यो ऽयमनृत इति विवेको व्यवहारः तेन शुद्धेन पक्षपातहीनेन।
२ कीदृशैः किंस्वरूपैः कैर्व्यवहारनिर्णायकैः व्यवहरेत निर्णयं कुर्यात् २ ३ ४ ५ ६ ७ पूर्वके नित्ये ८ अष्टाभिर्गुणैः शुश्रूषाश्रवणग्रहण

भीष्म उवाच व्यवहारेण शुद्धेन प्रजापालनतत्परः प्राप्य धर्मं च कीर्तिं च लोकानाप्नोत्युभौ शुचिः
युधिष्ठिर उ० कीदृशैर्व्यवहारैस्तु कैश्च व्यवहरेन्नृपः एतत्पृष्टो महाप्राज्ञ यथावद्वक्तुमर्हसि २ ये
चैव पूर्वकथिता गुणास्ते पुरुषं प्रति नैकस्मिन्पुरुषे ह्येते विद्यन्त इति मे मतिः ४ भीष्म उवाच ए
वमेतन्महाप्राज्ञ यथा वदसि बुद्धिमान् दुर्लभः पुरुषः कश्चिदेभिर्युक्तो गुणैः शुभैः ५ किंतु संक्षे
पतः शीलं प्रयत्नेनेह दुर्लभं वक्ष्यामि तु यथामात्यान्यादृशांश्च करिष्यसि ६ चतुरो ब्राह्म
णान्वैद्यान्प्रगल्भान्स्नातकान्शुचीन् क्षत्रियांश्च तथा चाष्टौ बलिनः शस्त्रपाणिनः ७ वैश्या
न्वित्तेन संपन्नानेकविंशति संख्यया त्रींश्च शूद्रान्विनीतांश्च शुचीन्कर्मणि पूर्वके ८ अष्टाभि
श्च गुणैर्युक्तं सूतं पौराणिकं तथा पंचाशद्वर्षवयसं प्रगल्भमनसूयकं ९ श्रुतिस्मृतिसमा
युक्तं विनीतं समदर्शिनं कार्ये विवदमानानां शक्तमर्थेष्वलोलुपं १० ॥

धारणामूहनमपोहनं विज्ञानं तत्त्वज्ञानं चेतितैः पंचाशद्वर्षवयसमित्यकैस्य विशेषणं ९ १० ॥

श्री· शां·रा· टी· १९० सप्तभिः स्त्रग्याया ऽन्नाः स्त्रियः पानमिति चतुर्भिः कामजैः दंडपातनं वाक्पारुष्यं अर्थदूषणमिति त्रिभिः क्रोधजैरिति सप्तभिः अष्टानां ब्रा-
ह्मणा चतुष्टयं शूद्रत्रयं सूतश्चेति तेषां १ नैतया द्रष्टव्याः २ शूद्रं कार्ये न्यासापहारादिते त्वया न ग्राह्यं अन्योन्यं विवदमानो द्वयोप

वर्जितं चैव व्यसनैः सुघोरैः सप्तभिर्भृशं अष्टानां मंत्रिणां मध्ये मंत्रं राजोपधारयेत् १ ततः संप्रे-
षयेद्राष्ट्रे राष्ट्रीयाय च दर्शयेत् अनेन व्यवहारेण द्रष्टव्यास्ते प्रजाः सदा २ न चापि गूढं द्रव्यं ते ग्राह्यं
कार्योपघातकं कार्ये खलु विपन्ने त्वां सोऽधर्मस्तांश्च पीडयेत् विद्रवेच्चैव राष्ट्रं ते श्येनात्पक्षिगणा इ-
व ३ परिस्रवेच्च सततं नौर्विशीर्णेव सागरे प्रजाः पालयतोऽसम्यगधर्मेणेह भूपतेः ४ हार्दं भ-
यं संभवति स्वर्गश्चास्य विरुध्यते अथ योऽधर्मतः पाति राजामात्योऽथवात्मजः धर्मासने सन्नियुक्तो
धर्ममूले नरर्षभ ५ कार्येष्वधिकृताः सम्यगकुर्वन्तो नृपानुगाः आत्मानं पुरतः कृत्वा यान्त्यधः
सहपार्थिवाः ६ बलात्कृतानां बलिभिः कृपणं बहु जल्पतां नाथो वै भूमिपो नित्यमनाथा-
नां नृणां भवेत् ७ ॥

रस्परं संबंधं दूषयन्तस्तथा च उभयोरसंबंधाद्राजकीयमिदमिति बुद्धिर्न कारयेदित्यर्थः ३ परिस्रवेत् मंदं मंदमन्यत्र गच्छेत् ४ १९०
अधर्मतः इतिच्छेदः धर्ममूले राज्ये ५ ६ ७ ॥

ततः साक्षिबलं साधु द्वैधवादकृतं भवेत् असाक्षिकमनाथं वा परीक्ष्यं तद्विशेषत इति अस्यार्थः यतोऽपरीक्षायां सामात्यस्य राज्ञोऽयोग तिस्तस्माद्धेतोः तत्तद्व्यवहारजातं परीक्ष्य तथाहि अर्थिना मम मायं शतं सुवर्णान्धारयतीति पदे तु प्रत्यर्थी यदि न धारयामीति वदेत्तदा न साक्ष्यादिप्रयोजनमस्ति यदि तु मौनं धारयामीति वदति तदा द्वैधवादकृतं अन्योन्यविरुद्धोभयोर्वादस्तत्कृतं साक्षिबलं साधु भवे त्निर्णायकमिति शेषः तत्र अर्थिना प्रत्यर्थिनि स्वार्थसाधनाय साक्षिपत्रं शपथो वा आश्रयणीयः क्षेत्रादिविषये विवादश्चेत्तद्भोगोपि प्रदर्शनीयः यदा तु प्रत्यर्थी वदति सत्यमस्य मया गृहीतं परं तत्प्रत्यर्पितमिति वा अस्मिन्नर्थे पूर्वमेवायं मया पराजितो किं पुनर्निर्लज्जतया ड्पा

ततः साक्षिबलं साधु द्वैधवादकृतं भवेत् असाक्षिकमनाथं वा परीक्ष्यं तद्विशेषतः १८
अपराधानुरूपं च दण्डं पापेषु धारयेत् वियोजनैर्धनैर्दण्डैर्दानधनानथबन्धनैः १९ विनयो
राज्ञो वध्या चापि दुर्हृत्ता महापापा अपि पार्थिवः सान्त्वनोपप्रदानेन शिष्टांश्च परिपालयेत् २० राज्ञो वध्या
विकीर्णघ्नस्तस्य चित्रो वध्यो भवेत् आदीपकस्य स्तेनस्य वर्णसंकरिकस्य च २१ ॥

गत इति वा वदति तदा प्रत्यर्पणकालीनाः अर्थिपराजयकालीना वा साक्ष्यादयः प्रदर्शनीयाः यद्यर्थिनः प्रत्यर्थिनो वा साक्ष्यादिकं नास्ति शपथं वा परेणानुमन्यते तदा तद्विवादस्य द्वैधमसाक्षिकत्वादनाथैतिः स्वामिकं भवति अर्थी च तत्र न्यून च तत्तदा विशेषतस्तमपरस्य ग्रहणा दिना तत्परीक्ष्यमिति १८ परीक्षोत्तरमपि किं कार्यमत आह अपराधेति १९ २० चित्रोऽनेकधा आदीपकस्य गृहादिदाहकस्य चित्र इति स वैत्राद्युपलक्ष्यते २१ ॥

श्री॰ शां॰ रा॰ टी॰ १९८

युक्तस्य यथाशास्त्रं प्रवृत्तस्य चित्रवधं कुर्वतोऽपि राज्ञो दोषो नास्ति प्रत्युत धर्म एवास्तीत्यर्थः २२ २३ नेति पितुरपराधे पुत्रो न दंड्यः अपि तु
आगमानुगमः कार्यः त्वत्पितरं पत्रादिद्वारा आनीयोपस्थापयेति तदुपरि पित्रागमनस्य पर्यंतं अनुयोगः कार्यः तावत्पर्यंतं पुत्रं बध्नीयात् य

सम्यक्प्रणयतो दंडं भूमिपस्य विशांपते युक्तस्य वा नास्त्यधर्मो धर्म एव हि शाश्वतः २२ कामा
कारेण दंडं तु यः कुर्यादविचक्षणः स इहाकीर्तिसंयुक्तो मृतो नरकमृच्छति २३ न परस्य प्रवादे
न परेषां दंडमर्पयेत् आगमानुगमं कृत्वा बध्नीयान्मोक्षयीत वा २४ न तु हन्यान्नृपो जातु दूतं क
स्यांचिदापदि दूतस्य हंता निरयमाविशेत्सचिवैः सह २५ यथोक्तवादिनं दूतं क्षत्रधर्मरतो नृपः
यो हन्यात्पितरस्तस्य भ्रूणहत्यामवाप्नुयुः २६ कुलीनः कुलसंपन्नो वाग्मी दक्षः प्रियंवदः यथा
थोक्तवादी स्मृतिमान्दूतः स्यात्सप्तभिर्गुणैः २७ एतैरेव गुणैर्युक्तः प्रतीहारोऽस्य रक्षिता शि
रोरक्षश्च भवति गुणैरेतैः समन्वितः २८ धर्मशास्त्रार्थतत्त्वज्ञः संधिविग्रहिको भवेत् मतिमा
न्धृतिमान्ह्रीमान्रहस्यविनिगूहिता २९ कुलीनः सत्त्वसंपन्नः शुक्लोऽमात्यः प्रशस्यते ए
तैरेव गुणैर्युक्तस्तथा सेनापतिर्भवेत् ३० ॥

दि तु स बद्धे पितुर्येनायाति तदा पुत्रमपि मोक्षयेत् पितुः राष्ट्रान्निर्वासनं नृपस्य दंडस्तेन स्वतपव संपादितत्वादिति भावः २४ २७ प्रतिहारो १९८
द्वारपालः शिरोरक्षः शिरांसीव शिरांसि दुर्गनगरादीनि स्थानस्थानानि तद्रक्षणकर्त्ता २८ २९ एतैर्धर्मज्ञत्वादिभिरमात्यगुणैः ३० ॥

सेनापतेर्विशेषगुणानाह व्यूहेति व्यूहः सेनायाः निवेशनप्रकारविशेषः यंत्राणि धनुरादीनि आयुधानि खड्गादीनि ३१ ३३ अ
मात्यविभागः पंचाशीतितमः ८५ कथं १ २ ३ अथ दुर्गाणामाश्रयेण पुराणि महान्तनगराणि निवेशयेत् धन्वा निर्जलदेशः

व्यूहयंत्रायुधानां च तत्त्वज्ञो विक्रमान्वितः वर्षशीतोष्णवातानां सहिष्णुः पररंध्रवित् ३१ वि
श्वासयेत्परांश्चैव विश्वसेच्च न कस्यचित् पुत्रेष्वपि हि राजेंद्र विश्वासो न प्रशस्यते ३२ एतच्छा
स्त्रार्थतत्त्वं तु मयाख्यातं तवानघ अविश्वासो नरेंद्राणां गुह्यं परममुच्यते ३३ इति श्रीमहाभारते
शांतिपर्वणि राजधर्मेषु ८५ युधिष्ठिर उ० कथंविधं पुरं राजा स्वयमावस्तुमर्हति कृतं वा कार
यित्वा वा तन्मे ब्रूहि पितामह १ भीष्म उ० वस्तव्यं यत्र कौंतेय सपुत्रज्ञातिबंधुना न्याय्यं तत्र परि
प्रश्नं गुप्तिं वृत्तिं च भारत २ तस्मात्ते वर्तयिष्यामि दुर्गकर्म विशेषतः श्रुत्वा तथा विधातव्यमनुष्ठेयं च यत्नतः
३ षड्विधं दुर्गमास्थाय पुराण्यथ निवेशयेत् सर्वसंपत्प्रधानं यद्बाहुल्यं चापि संभवेत् ४ ध
न्वदुर्गं महीदुर्गं गिरिदुर्गं तथैव च मनुष्यदुर्गं मृद्दुर्गं वनदुर्गं च तानि षट् ५ यत्पुरं दुर्गसंपन्नं धान्यायुधसमन्वि
तं दृढप्राकारपरिखं हस्त्यश्वरथसंकुलं ६ विद्वांसः शिल्पिनो यत्र निचयाश्च सुसंचिताः धार्मि
कश्च जनो यत्र दाक्ष्यमुत्तममास्थितः ७ ऊर्जस्विनरनागाश्वं चत्वरापणशोभितं प्रसिद्धव्यवहारं च
प्रशांतमकुतोभयं ८ ॥

तदेव परितस्सु दुर्गं यस्य धन्वदुर्गं महीदुर्गं कोटः ५ दुर्गैर्महीदुर्गैः संपन्नं अत एव दृढप्राकारपरिखं ६ ८

श्री० शां० रा० टी० १६४

सानुनादं गीतवादित्रध्वनिमत् ४ ११ निचयान् धान्यादिसंग्रहान् १२ १३ यन्त्रनानं ध्वनिमन्तो निःसारणादीन् पाठान्तरे स्पष्टोर्थः

सुप्रभं शान्तनादं च सुप्रशस्तनिवेशनं शूराढ्यजनसंपन्नं ब्रह्मघोषानुनादितं ४ समाजोत्स
वसंपन्नं सदा पूजितदैवतं वश्यामात्यबलो राजा तत्पुरं स्वयमाविशेत् १० तत्र कोषं बलं मित्रं
व्यवहारं च वर्धयेत् पुरे जनपदे चैव सर्वदोषान्निवर्तयेत् ११ भाण्डागारायुधागारं प्रयत्नेनाभिव
र्द्धयेत् निचयान् वर्धयेत्सर्वांस्तथा मन्त्रायुधालयान् १२ काष्ठलोहतुषाङ्गारदारुशृङ्गास्थि
वैणवान् मज्जास्नेहवसाक्षौद्रमौषधग्राममेव च १३ शणं सर्जरसं धान्यमायुधानि शरांस्त
था चर्मस्नायुतथा वेत्रं मुञ्जबल्वजबन्धनान् १४ आशयाश्चोदपानाश्च प्रभूतसलिलाकराः
निरोद्धव्याः सदा राज्ञा क्षीरिणश्च महीरुहाः १५ सत्कृताश्च प्रयत्नेन आचार्यर्त्विक्पुरोहिताः
महेष्वासाः स्थपतयः सांवत्सरचिकित्सकाः १६ प्राज्ञा मेधाविनो दान्तादक्षाः शूराः बहुश्रुताः
कुलीनाः सत्वसंपन्ना युक्ताः सर्वेषु कर्मसु १७ पूजयेद्धार्मिकान् राजा निगृह्णीयादधार्मिका
न् नियुञ्ज्याच्च प्रयत्नेन सर्ववर्णान्स्वकर्मसु १८ बाह्यमाभ्यन्तरं चैव पौरजानपदं तथा चारैः
सुविदितं कृत्वा ततः कर्म प्रयोजयेत् १९ चरान्मन्त्रं च कोशं च दण्डं चैव विशेषतः अनुतिष्ठेत्स्वयं

१४ आशयाः निपानानि उदपानाः कूपाः निरोद्धव्याः रक्षणीयाः १५ १६ प्रज्ञा ग्रन्थार्थग्रहणसामर्थ्यं मेधा ऊहापोहकौशलं ७ १९

१६ राजानं स्वर्क्षप्रविशेत ॥ ५ ॥

१६४ अनुलिखिता आलोचयेत ॥ ५ ॥

१२ विधातव्यं प्रतिकर्तव्यं २२ २५ तापसेन तपस्विजने २६ २८ निधीन् धनभाण्डानि अभीक्ष्णं न सेवेत दस्यूनां तस्कराणां तस्करचनेन तप

उदासीनारिमित्राणां सर्वमेव चिकीर्षितं पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा २१ ततस्तेषां वि
धातव्यं सर्वमेवाप्रमादतः भक्तान् संपूजयेत् तान् नित्यं द्विषतश्च निगृह्णता यष्टव्यं क्रतुभिर्नित्यं दात
व्यं चाप्यपीडया प्रजानां रक्षणं कार्यं न कार्यं धर्मबाधकं २३ कृपणानाथवृद्धानां विधवानां च
योषितां योगक्षेमं च वृत्तिं च नित्यमेव प्रकल्पयेत् २४ आश्रमेषु यथाकालं चैलभाजनभोजनं
सदैवोपहरेद्राजा सत्कृत्याभ्यर्च्य मान्य च २५ आत्मानं सर्वकार्याणि तापसे राष्ट्रमेव च निवेदये
त्प्रयत्नेन तिष्ठेत् प्रह्वश्च सर्वदा २६ सर्वार्थत्यागिनं राजा कुले जातं बहुश्रुतं पूजयेत्तादृशं दृ
ष्ट्वा शयनासनभोजनैः २७ तस्मिन् कुर्वीत विश्वासं राजा कस्यांचिदापदि तापसेषु हि विश्वासम
पि कुर्वन्ति दस्यवः २८ तस्मिन् निधीनादधीत प्रज्ञां पर्याददीत च न चाप्यभीक्ष्णं सेवेत भृशं वा प्रति
पूजयेत् २९ अन्यः कार्यः स्वराष्ट्रेषु परराष्ट्रेषु चापरः अटवीषु परः कार्यः सामन्तनगरेष्वपि ३० ते
षु सत्कारमानाभ्यां संविभागांश्च कारयेत् परराष्ट्राटवीस्थेषु यथा स्वविषये तथा ३१ ते कस्यां
चिदवस्थायां शरणं शरणार्थिने राज्ञे दद्युर्यथाकामं तापसाः संशितव्रताः ३२ ॥

स्विनाशापन्नैः न तिपूजयेच्च २९ अन्यस्तापसः कार्यः स विविन्वेन संपादनीयः ३० तेषु तत्तत्स्थानस्थेषु तापसेषु ३१ ३२

श्री· ३३ दुर्गपरीक्षाषड्शीतितमः ८६ राष्ट्रस्यगुप्तिःपरिपालनंकथंकर्त्तव्यमितिपृच्छतिनरारगुप्तिश्रवणानंतरंतस्याःवृद्धिस्थाना
भा·शां· तवाष्ट्रेति १ दशानांग्रामाणांसमाहारोदशग्रामीतस्याः दशग्राम्याः द्विगुणायाः विंशतिग्राम्याः शतस्यसहस्रस्याधिपतिंकार
टी·
८७

पष्टितेलक्षणोद्देशाः संपन्नेणाप्रकीर्तितः यादृशेनगरेराजा स्वयमावस्तुमर्हति ३३ इतिश्रीमहाभा
रतेशांतिपर्वणिराजधर्मेदुर्गपरीक्षाषडशीतितमः ८६ युधिष्ठिरउ· राष्ट्रगुप्तिंचमेराजन्राष्ट्रस्यैव
तुसंग्रहं सम्यग्जिज्ञासमानायप्रब्रूहिभरतर्षभ १ भीष्मउ· राष्ट्रगुप्तिंचतेसम्यग्राष्ट्रस्यैवतुसंग्रा
हं हंतसर्वंप्रवक्ष्यामितत्वमेकमनाःशृणु २ ग्रामस्याधिपतिःकार्योदशग्राम्यास्तथापरः द्विगुणा
याशतस्यैवंसहस्रस्यचकारयेत् ३ ग्रामेयान्ग्रामदोषांश्चग्रामिकःप्रतिभावयेत् तान्ब्रूयाद्दश
पायासौसतुविंशतिपायवै ४ सोपिविंशत्यधिपतिर्वृत्तंजानपदेजने ग्रामाणांशतपालायसर्वमे
वनिवेदयेत् ५ यानिग्राम्याणिभोज्यानिग्रामिकस्तान्युपाश्नियात् दशपस्तेनभर्तव्यस्तेनापिद्वि
गुणाधिपः ६ ग्रामंग्रामशताध्यक्षोभोक्तुमर्हतिसत्कृतः महांतंभरतश्रेष्ठसुस्फीतंजनसं
कुलं तत्रह्यनेकपायत्तंराज्ञोभवतिभारत ७ शाखानगरमर्हस्तुसहस्रपतिरुत्तमः ८ ॥

येत् २ ३ ४ ५ ६ तत्रराष्ट्रेशताधिपतिभोग्यंग्रामंअनेकपायत्तंभवति क्लीवत्वमार्षं सार्द्धः अन्यथातस्यतदायत्तत्वेयन॰ ८७
लोभात्सकृत्स्नंग्राममपीडयेदितिभावः ७ ॥

सहस्रपतिः शाखानगरं तत्रत्यथान्यद्देशाणां संबंधी योगी यथं तेन तेन स्वस्य वेतनेन भोक्तुं पालयितुमर्हः तत्रत्वेत्रिकाणामभावाद्देश्ये
भोग्रः करश्रायातित्तदेव तस्य वेतनमित्यर्थः ८ ९ १० ११ कारयेत् दापयेत् १३ १४ फलं धान्यपथनहृष्यादि हृष्यतुहूणःकरः का

यान्यहिराणि भोगेन भोक्तव्यानि राष्ट्रीय संगतः तेषां संग्रामकृत्यं स्याद्ग्रामकृत्यं च तेषु यत् ८ धर्मज्ञः स
चिवः कश्चित्तत्प्रपश्येदतन्द्रितः नगरे नगरे वा स्यादेकः सर्वार्थचिंतकः ९ उच्चैः स्थाने घोररूपो
नक्षत्राणामिव ग्रहः भवेत्स तान्परिक्रामेत्सर्वानेव सभासदः १० तेषां वृत्तिं परिणयेत्कश्चिद्राष्ट्रेषु तत्
चरः जिघांसवः पापकामाः परस्वादायिनः शठाः ११ रक्षाभ्यधिकृता नाम तेभ्यो रक्षेदिमाः प्रजाः
विक्रयं क्रयमध्वानं भक्तं च सपरिच्छदं १२ योगक्षेमं च संप्रेक्ष्य वणिजां कारयेत्करान् उत्पत्तिं दानवृ
त्तिं च शिल्पं संप्रेक्ष्य चासकृत् १३ शिल्पं प्रति करानेवं शिल्पिनः प्रतिकारयेत् उच्चावचकरा दाप्याः
महाराज युधिष्ठिर १४ यथा यथा न सीदेरंस्तथा कुर्यान्महीपतिः फलं कर्म च संप्रेक्ष्य ततः सर्वं
प्रकल्पयेत् १५ फलं कर्म च निर्हेतुं न कश्चित्संप्रवर्त्तते यथा राजा च कर्त्ता च स्यातां कर्मणि भागि
नौ १६ समवेक्ष्य तथा राज्ञा प्रणेयाः सततं कराः नोच्छिंद्यादात्मनो मूलं परेषां चापि तृष्णया १७
ईहाद्वाराणि संरुध्य राजा संप्रीतदर्शनः प्रद्विषंति परिख्यातं राजानमतिखादिनं १८ ॥

त्यहत्यर्थः १५ १६ आत्मनो मूलं राष्ट्रं परेषां मूलं कृष्यादि १७ ईहा लोभः अतिखादिनं बहुभक्ष्यं १८ ॥

१९ २१ निर्यातं दत्तं इह राष्ट्रे २२ संश्रिताः साक्षादाश्रिताः उपाश्रिताः व्यवहिताः २३ बाह्यमिति आटविकादस्युसंघो बाह्यजनः
तं भूयश्च निषेधमिति भेदयित्वा मध्यमो ग्रामीणजनो भोक्तव्यस्ततो बहुलधनमादद्यादित्यर्थः २४ तत्र प्रकारमाह प्रागिति चार

बहुदुग्धस्य कृतः श्रेयो नाप्रियो लभते फलं वत्सौपम्येन दोह्यं च राष्ट्रमक्षीणबुद्धिना १९ भृतो वत्सो
जातबलः पीडां सहति भारत न कर्म कुरुते वत्सो भृशं दुग्धो युधिष्ठिर २० राष्ट्रमप्यतिदुग्धं हि न कर्म
कुरुते महत् यो राष्ट्रमनुगृह्णाति परिरक्षन्स्वयं नृपः २१ संजातमुपजीवन्स लभते सुमहत्फलं आ
पदर्थं च निर्यातं राजा नः इह विंदते राष्ट्रं च कोशभूतं स्यात्कोशो वेश्मगतस्तथा पौरजानपदान्सर्वान्सं
श्रितोपाश्रितांस्तथा यथाशक्त्यनुकंपेत सर्वान्स्वल्पधनानपि २३ बाह्यं जनं भेदयित्वा भोक्तव्यो म
ध्यमः सुखं एवं नास्य प्रकुप्यंति जनाः सुखितदुःखिताः २४ प्रागेव तु धनादानमनुभाष्य ततः पु
नः सन्निपत्य स्वविषये भयं राष्ट्रे प्रदर्शयेत् २५ इयमापत्समुत्पन्ना परचक्रभयं महत् अपि चान्ता
य कल्पंते वेणोरिव फलागमः अरयो मे समुत्थाय बहुभिर्दस्युभिः सह २६ इदमात्मवधायैव
राष्ट्रमिच्छंति बाधितुं अस्यामापदि घोरायां संप्राप्ते दारुणे भये २७ ॥

निग्रहार्थं कटकं बंधः कर्तव्यस्तदर्थं
च धनमपेक्षितं इति पूर्वमेव ग्रामाध्यक्षस्तु वनं ज्ञात्वा ततः सन्निपत्य तेषु तेषु ग्रामेषु गत्वा भयं दर्शयेत् २५ २६ आत्मवधायेति प्रजानाशस्य सा १७१

२८ ३० पुंगवैर्बलीवर्दैः ३१ न प्रियमिति पर्ववाचालेष्वेन च हाशिहितान्युक्तांश्च रश्मीन्त्वस्य रश्मिभूतान पदातीन् अधिकारि
णः प्रजास्वयनमुक्त्वा हीतेऽप्यवसृजेत्प्रेरयेत्सार्द्धः योगायनग्रहणोपायं आयाय प्रजासु प्रयोज्य यतनं गृह्णीयादिति शेषः ३३ गो

परित्राणाय भवतः प्रार्थयिष्ये धनानि वः प्रतिदास्ये च भवतां सर्वं वाहं भयक्षये २८ नारयः श्रा
ति दास्यंति यद्वो ये पूर्व लादितः कलत्रमादितः कृत्वा सर्वं वो विनशेदिति २९ अपि चेत्पुत्रदारार्थ
मर्थसंचय इष्यते नंदामि वः प्रभावेण पुत्राणामिव चोदये ३० यथाशक्त्युपगृह्णामि राष्ट्रस्यापी
डया च वः आपत्स्वेव हि वोढव्यं भवद्भिः पुंगवैरिव ३१ न च प्रियतरं कार्यं धनं कस्यांचिदापदि इति
वाचा मधुरया श्लक्ष्णया सोपचारया ३२ स्वरश्मीनभ्यवसृजेद्योगमाधाय कालवित् प्राकारं
भृत्यभरणं व्ययं संग्रामतो भयं योगक्षेमं च संप्रेक्ष्य गोमिनः कारयेत्करान् उपेक्षिता ह्विनश्येयु
र्गोमिनो वनवासिनः ३४ तस्मात्तेषु विशेषेण मृदुपूर्वं समाचरेत् सांत्वनं रक्षणं दानमवस्था चा
प्यभीक्ष्णशः गोमिनां पार्थ कर्तव्यः संविभागः प्रियाणि च ३५ अजस्रमुपयोक्तव्यं फलं गोमिषु
भारत प्रभावयंति राष्ट्रं च व्यवहारं कृषिं तथा ३६ तस्माद्गोमिषु यत्नेन प्रीतिं कुर्याद्विचक्षणः दया
वानप्रमत्तश्च करान्संप्रणयेन्मृदून् ३७ ॥

मिनः वैश्यान् भाषायां चारणा इति प्रसिद्धान् प्राकारादीन् कर्तव्यान् प्रे
क्ष्य संदर्शयित्वा इदं कार्यमुपस्थितमत्यावश्यकमित्युक्त्वा करं कारयेत् ३४ ३५ ३६ ३७ ॥

श्री॰ ३८ सप्ताशीतितमः ८७ यदा १ २ ५ शल्यकवानतीक्ष्णेनाखुर्विशेषः स हि निद्रितस्य मनुष्यस्य पदतलस्थं मांसं अतीक्ष्णो
शां॰ रा॰ नैवोपायेन भक्षयति शयानस्तु ईषद्वेदनया पादं किंचित् धूनयते कंपयते न तु तीव्रवेदनया बुध्यते आखुं निवारयति तद्वद्राष्ट्रं समापिबे
टी॰ सर्वत्रदोषमचर्णाणांसल्लभंनामसगोभिषु नह्यतःसदृशंकिंचिद्दस्मस्तियुधिष्ठिर ३८ इतिश्रीमहा
१३२ भारतेशांतिपर्वणिराजधर्मे ८७ युधिष्ठिरउ॰ यदाराजासमर्थोपिकोशार्थीस्यान्महामते क
थंप्रवर्त्तेततदातन्मेब्रूहिपितामह १ भीष्मउ॰ यथादेशंयथाकालंयथाबुद्धियथाबलं अनुशि
ष्यात्प्रजाराजाधर्मार्थीतद्धितेरतः २ यथातासांचमन्येतश्रेयआत्मनएवच तथाकर्माणिसर्वा
णिराजाराष्ट्रेषुवर्त्तयेत् ३ मधुदोहंदुहेद्राष्ट्रंभ्रमराइवपादपं वत्सापेक्षीदुहेच्चैवस्तनांश्चनविकुट्टये
त् ४ जलौकावत्पिबेद्राष्ट्रंमृदुनैवनराधिप व्याघ्रीवचहरेत्पुत्रान्संदशेन्नचपीडयेत् ५ यथाशल्य
कवानाखुःपदंधूनयतेसदा अतीक्ष्णेनाभ्युपायेनतथाराष्ट्रंसमापिबेत् ६ अल्पेनाल्पेनदेये
नवर्द्धमानंप्रदापयेत् ततोभूयःक्रमवृद्धिंसमाचरेत् ७ दमयन्निवदम्यानिशश्वद्भारंविवर्द्धये
+यस्ततोभू ७ त् मृदुपूर्वंप्रयत्नेनपाशानभ्यवहारयेत् ८ ॥

त् ६ अल्पस्वंशात्तमेनाधिकेनवांशेनवर्द्धमानकरंप्रदापयन्ग्राममद्रव्यस्य वृद्धिं कुर्यादित्याह अल्पेनेति ७ दम्यानिवत्सतरवृकलानियथाक्र १३२
णेमैदमयेत्तद्वत्प्रजाअपीत्याह दमयन्निवेति अभ्यवहारयेत् ८ ॥

सक्तूत्सघः पाशावकीर्णाः संतः न भविष्यन्ति मरिष्यन्ति यतो दुर्दमाः अतउचितेन क्रमेणैते भोक्तव्याः दस्याः प्रजाश्च ९ पुरुषंप्रती
त्यसप्रति पुरुषमित्यर्थः १० ततो सुखोद्वारितान् उत्तरान् विवादितानवोद्भिमितान् ११ १२ मद्यशालाः संदेशहराः कुट्टिन्यः

सक्तूत्पाशावकीर्णास्तेन भविष्यन्ति दुर्दमाः उचितेनैव भोक्तव्या न भविष्यन्ति यत्नतः ९ तस्मा
त्सर्वसमारम्भो दुर्लभः पुरुषंप्रति यथासुखोन्मार्गयित्वा भोक्तव्यास्तु ते जनाः १० ततस्तान्भे
दयित्वा तु परस्परविवादितान् भुंजीत सान्त्वयैश्चैव यथासंभवमयत्नतः ११ न चास्थाने न चाका
ले करांस्तेभ्यो निपातयेत् आनुपूर्व्येण सान्त्वेन यथाकालं यथाविधि १२ उपायान्प्रब्रवीम्येतान्
मेमायाविवादिता अनुपायेन दमयन्प्रकोपयति वाजिनः १३ पानागारनिवेशाश्च वेश्याः प्रा
पणिकास्तथा कुशीलवाः सकितवा ये चान्ये केचिदीदृशाः १४ नियम्याः सर्वपवैते यराष्ट्रस्यो
पघातकाः पतेराष्ट्रभितिष्ठन्तो बाधन्ते भद्रिकाः प्रजाः १५ न केन चिद्याचितव्यः कश्चित्किंचिद्दना
पदि इति व्यवस्था भूतानां पुरस्तान्मनुनाकृता १६ सर्वे तथानुजीवेयुर्न कुर्युः कर्म चेदिह सर्वे
एव इमे लोका न भवेयुरसंशयं १७ प्रभुर्नियमने राजा यपत्तान्न नियच्छति भुंक्ते स तस्य पापस्य चतु
र्भागमिति श्रुतिः १८

कुत्सितेन शीलेन वान्ति गच्छन्ति धर्मं हिंसन्ति वा कुशीलवाः वीटाः कितवाः द्यूतकाराश्च नियाम्याः शास्त्रादृ
पानेति १४ भद्रिकाः कल्याणपः १५ याचितव्यः दत्तस्याणाकरं चेति शेषः १६ अनुजीवेयुरनुसरेयुः अन्यथा दोषमाहनेति १७ १८

श्री· शां·रा· टी· १२३ तथानियच्छन्निति शेषः १९ २० स्थानानि मद्यादीनां वक्ष्यमाणानां किमकार्यं विवर्जयेत् अपितु सर्वकार्यं कुर्यादेव २१
अकार्यमेवाहमेयेति शास्त्रमाज्ञां प्रदर्शयेत् २२ आपद्येव न तु शाश्वादनापद्यपि २३ दातारः आच्छेत्तारः २४ २५ येनेन

भोक्तातस्यात्तुपापस्य सुकृतस्य यथा तथा नियन्तव्याः महाराजा पापा पायेस्तु नराधिप १९ कृतपापा
स्त्वसौ राजा यपतान्न नियच्छति यथा सुकृतस्य धर्मस्य चतुर्भागमुपाश्नुते २० स्थानान्येतानि संयम्य प्रश्र
गो भूतिनाशनः कामश्च मक्तः शुद्धः किमकार्यं विवर्जयेत् २१ मद्यं मांसं परस्वानि तथा दाराधनानि च
आहरेद्रागवशगास्तथा शास्त्रं प्रवर्तयेत् २२ आपदर्थं तु याचेत येषां नास्ति परिग्रहः दातव्यं धर्मतस्तेभ्य
स्त्वनुक्रोशाद्भयात्त्रतु २३ मा ते राष्ट्रे याचनका भूवन्मा चापि दस्यवः एषां दातार एवैते नैते भूतस्य भावकाः
२४ ये भूतान्यनुगृह्णन्ति वर्धयन्ति च ये प्रजाः ते ते राष्ट्रेषु वर्तन्तां मा भूतानामभावकाः २५ दण्ड्यास्ते न महा
राज धनादानप्रयोजकाः प्रयोगं कारयेयुस्तान्यथा बलिकरांस्तथा २६ कृषिगोरक्ष्यवाणिज्यं यच्चान्य ॥
त् किंचिदीदृशं पुरुषैः कारयेत्कर्म बहुभिः सहकारिभिः २७ नरश्चेत्कृषिगोरक्ष्यवाणिज्यं चाप्यनुष्ठि
तः संशयं लभते किंचित्तेन राजा विगर्हितः २८ धनिनः पूजयेन्नित्यं पानाच्छादनभोजनैः वक्तव्याश्चा
अनुगृह्णीध्वं प्रजा सह मयेति १० १२३

धिकधनग्रहणप्रयोजकं तेऽधिकारिणो दण्ड्याः अन्ये वा अधिकारिणस्तान् यथावत् बलिक
रान् दिश्य प्रयोगं कारयेयुः २६ बहुभिः कारयेदन्यथा कर्मभेदतः कर्मणां भेदे नाशः स्यादित्यर्थः २७ संशयं चौरेभ्यो राजकीयेभ्यो वा भ

३० ३१ अष्टाशीतितमः ८८ वनस्पतीनिति मूलफलं ब्राह्मणानां स्वमिति धर्ममाहुरतोप्येतन्नछिंद्युः १ ब्राह्मणोपरोधेनतै
रपालनेन २ त्यागंराष्ट्रस्य ३ अहन्याराष्ट्रंत्यजतोराज्ञावृत्तिःकल्प्येतिमर्यादानतुराजस्थाद्यलाभात्तत्यजतस्तदपिदेयमि

अग्रामेतन्महद्राज्येधतितोनामभारत ककुदंसर्वभूतानांधनस्थोनात्रसंशयः ३० प्राज्ञःशू
रोधनस्थश्चस्वामीधार्मिकएवच तपस्वीसत्यवादीचबुद्धिमांश्चाभिरक्षति ३१ तस्मात्सर्वेषुभू
तेषुप्रीतिमान्भवपार्थिव सत्यमार्जवमक्रोधमानृशंस्यंचपालय ३२ एवंदंडंचकोशंचमित्रंभू
मिंचलप्स्यसि सत्यार्जवपरोराजन्मित्रकोशबलान्वितः ३३ इतिश्रीशांतिपर्वणिराजधर्मेअ
ष्टाशीतितमः ८८ भीष्मउ० नवनस्पतीन्भक्ष्यफलान्छिंद्युर्विषयेतव ब्राह्मणानांमूलफ
लंधर्ममाहुर्मनीषिणः १ ब्राह्मणेभ्योतिरिक्तंचभुंजीरन्नितरेजनाः नब्राह्मणोपरोधेनहरे
दन्यःकथंचन २ विप्रश्चेत्त्यागमातिष्ठेदात्मार्थेवृत्तिकर्शितः परिकल्प्यास्यवृत्तिःस्यात्स
दारस्यनराधिप ३ सचेन्नोपनिवर्तेतवाच्योब्राह्मणसंसदि कस्मिन्निदानींमर्यादामयंलोकः
करिष्यति ४ असंशयंनिवर्तेतनचेद्वक्ष्यत्यतःपरं पूर्वंपरोक्षंकर्तव्यमेतत्कौंतेयशाश्वतं ५

त्यक्ष्यतीतिकस्मिन्निति काकाक्षसूचयति ४ अतःपरंत्वद्वृत्तिंकल्पयसिनतुपूर्वमितिउपालंभेपूर्वंपरोक्षंकर्तव्यंदत्तव्यमितितंप्रा
र्थयेदित्यर्थः ५ ॥

हन्तिमात्रं कल्पयेदिति परमतं भोगार्थी चेद्राष्ट्रं त्यजति तदा भोगैरपि निमग्नः अहन्या चेन्न दा हन्यापि निमग्नः अहन्या हानिरिति ६ ७
९ लोकान्तं लोकहितार्थं योद्धव्यं वोद्धव्यमिति वा पाठे स्वपरचरित्रमिति शेषः उत्तरार्द्धे भुंजीतेत्यत्र युंजीतेति पाठः मनुष्यांश्चा

आड्रवेतज्जना ब्रह्मन्नन्तचैतच्छक्यद्दयाप्यहं निमज्जश्च भवेद्भोगैरहत्या चेन्नदा वरेत् ६ कृषिगोरक्ष्य
वाणिज्यं लोकानामिह जीवनं ऊर्ध्वं चैव त्रयी विद्या सा भूतान्भावयत्युत ७ तस्यां प्रपतमानायां ये
स्युः तत्परिपन्थिनः दस्यवस्तद्वधायेह ब्रह्मा क्षत्रमथासृजत् ८ शत्रूञ्जय प्रजा रक्ष यजस्व क्रतु
भिर्नृप युद्ध्यस्व समरे वीरो भूत्वा कौरवनन्दन ९ संरक्ष्यान्पालयेद्राजा स राजा राजसत्तम ये केचि
त्तान्न रक्षन्ति तैरर्थो नास्ति कश्चन १० सदैव राज्ञा बोद्धव्यं सर्वलोकाद्युधिष्ठिर तस्माद्धेतोर्हि भुञ्जी
त मनुष्यानेव मानवः ११ आन्तरेभ्यः परान्रक्षन्परेभ्यः पुनरान्तरान् परान्परेभ्यः स्वान्स्वेभ्यः सर्वा
न्पालय नित्यदा १२ आत्मानं सर्वतो रक्षन्राजा रक्षेत मेदिनीं आत्ममूलमिदं सर्वमाहुर्वै विदुषो
जनाः १३ किं छिद्रं कोऽनुषङ्गो मे किं वास्त्यविनिपातितं कुतो मामाश्रयेद्दोष इति नित्यं विचि
न्तयेत् १४ अतीतदिवसे वृत्तं प्रशंसन्ति न वा पुनः गुप्तैश्चारैरनुमतैः पृथिवीमनुसारयेत् १५ जा
नीयुर्यदि मे वृत्तं प्रशंसन्ति न वा पुनः कच्चिद्रोचेज्जनपदे कच्चिद्राष्ट्रे च मे यशः १६ ॥ गानिति चार्थः ११ स्वी १४

याः आन्तराः बाह्याश्च परस्माद्रक्ष्याः स्वीयाः बाह्यास्तु शत्रुभ्यो रक्ष्या इत्यर्थः १२ विदुषः विद्वांसः १४ संगो व्यसनसेति शेषः १४ १६

७ ८ सुपरिणीतान्सत्कृतान् ९ २० तुल्येषुकथमितरश्चेतरंभुंजीतेतिप्रश्नः बलवानेवदुर्बलंभुंजीनतुल्यान्तुआत्मानं
धर्मज्ञानांधृतिमतांसंग्रामेष्वपलायिनां राष्ट्रंत्वयेनजीवंतियेनराज्ञोनजीविनः अमात्यानां
चसर्वेषांमध्यस्थानांचसर्वशः येचत्वाभिप्रशंसेयुर्निंदेयुरथवापुनः ८ सर्वान्सुपरिणीतांस्ता
न्कारयेथायुधिष्ठिर एकांतेनहिसर्वेषांनशक्यंतातरोचितुं ९ मित्रामित्रमथोमध्यंसर्वभूते
षुभारत युधिष्ठिरउ॰ तुल्यबाहुबलानांचतुल्यानांचगुणैरपि २० कथंस्यादधिकःकश्चि
त्सचभुंजीतमानवान् भीष्मउ॰ यच्चराह्यचरानद्युरदंष्ट्रान्दंष्ट्रिणस्तथा २१ आशीविषाइवक्रु
द्धाभुजंगान्भुजगाइव एतेभ्यश्चाप्रमत्तःस्यात्सदाशत्रोर्युधिष्ठिर २२ भारुंडसदृशाह्येतेनिपतं
तिप्रमाद्यतः कच्चित्तेवणिजोराष्ट्रेनोद्विजंतिकरार्दिताः क्रीणंतोबहुनाल्पेनकांतारकृतवि
श्रमाः कच्चित्कृषिकराराष्ट्रंनजहत्यतिपीडिताः येवहंतिधुरंराज्ञांतेभरंतीतरानपि २५ इतोद
त्तेनजीवंतिदेवाःपितृगणास्तथा मानुषोरगरक्षांसिवयांसिपशवस्तथा २६ एषातेराष्ट्रवृ
त्तिश्चराज्ञांगुप्तिश्चभारत एतमेवार्थमाश्रित्यभूयोवक्ष्यामिपांडव २७ इतिश्रीमहाभारतेशां
रतेव्यालेनवत्तंभुंजीतेत्युत्तरमाहतुल्येतिविभिः २१ २२ भारुंडोगृध्रः २३ २७ राष्ट्रगुप्ति तिपर्वणिराजधर्मेषुराष्ट्रगुप्तिः ९

नवमीनिमः ८७ ॥

श्री॰
शां॰रा॰
टी॰
१७५

यान् एवं स्वाम्यादिप्रकृतिषट्कं निरूप्य प्रकीर्णकान् धर्मानुतथ्यमांधातृसंवादं वामदेवगीतां चारभते यानंगिरा इत्यादि

भीष्म उ॰ यानंगिराः क्षत्रधर्मानुतथ्यो ब्रह्मवित्तमः मांधात्रे यौवनाश्वाय प्रीतिमानभ्यभाषत १
स यथानुशशासैनमुतथ्यो ब्रह्मवित्तमः तत्ते सर्वं प्रवक्ष्यामि निखिलेन युधिष्ठिर २ उतथ्य उवाच
धर्माय राजा भवति न कामकरणाय तु मांधातरिति जानीहि राजा लोकस्य रक्षिता ३ राजा चरति
चेद्धर्मं देवत्वायैव कल्पते स चेदधर्मं चरति नरकायैव गच्छति ४ धर्मे तिष्ठंति भूतानि धर्मो राजनि
तिष्ठति तं राजा साधु यः शास्ति स राजा पृथिवीपतिः ५ राजा परमधर्मात्मा लक्ष्मीवान् धर्म उच्यते
देवाश्च गर्हां गच्छंति धर्मो नास्तीति चोच्यते ६ अधर्मे वर्त्तमानानामर्थसिद्धिः प्रदृश्यते तदेव मंग
लं लोकः सर्वः समनुवर्त्तते ७ उच्छिद्यते धर्मवृत्तमधर्मो वर्त्तते महान् भयमाहुर्दिवारात्रं यदा पा
पो न वार्यते ८ ममेदमिति नैवैतत्साधूनां तात धर्मतः न वै व्यवस्था भवति यदा पापो न वार्यते नै
व भार्या न पशवो न क्षेत्रं न निवेशनं संदृश्येत मनुष्याणां यदा पापबलं भवेत् देवाः पूजां न जानं
ति न स्वधां पितरस्तदा ९ न पूज्यंते ह्यतिथयो यदा पापो न वार्यते न वेदानधिगच्छंति व्रतवंतो द्विजा

नाध्यायपंचकेन अंगिराः आंगिरसः १ ५ देव इति यदा पापो न वार्यते तदा दैवतनिंदादयो दोषाः प्रवर्त्तंत इति सार्द्धत्रयम् ६ ७ ८

१२ वृद्धानां शत्रवो णाश्छिन्नदेहानां १३ धर्मो धर्मपालः १४ अर्लंबाराणां छेदनमिति यावत् तेन दृष्टं बलं नातिच्छिन्नत्री तिदृष्टबल
इतियोगोदर्शितः १५ १६ धर्मपदस्य हेयाश्रुत्पत्तिमाहेति धनवाचीनां तीयनशाह्नः अर्द्धेर्गीतपर्यातम कप्रत्ययेन मः नलो

नयन्तां तत्र वर्तन्ते विप्रा यदा पापो न वार्यते वध्यानामिव सत्त्वानां मनो भवति विक्लवं १२ म
नुष्याणां महाराज यदा पापो न वार्यते उभौ लोकावभिप्रेक्ष्य राजानमृषयः स्वयं १३ अ
सृजन्सुमहद्भूतमयं धर्मो भविष्यति यस्मिन्धर्मो विराजेत तं राजानं प्रचक्षते १४ यस्मिन्वि
लीयते धर्मस्तं देवा वृषलं विदुः वृषो हि भगवान्धर्मो यस्तस्य कुरुते ह्यलं १५ वृषलं तं विदुर्दे
वास्तस्माद्धर्मं विवर्द्धयेत् १५ धर्मे वर्द्धति वर्द्धन्ति सर्वभूतानि सर्वदा तस्मिन्ह्रसति हीयन्ते त
स्माद्धर्मं न लोपयेत् १६ धनात्स्रवति धर्मो हि धारणाद्वेति निश्चयः अकार्याणां मनुष्येन्द्र स
सीमांतकरः स्मृतः १७ प्रभवार्थं हि भूतानां धर्मः सृष्टः स्वयंभुवा तस्मात्प्रवर्त्तयेद्धर्मं प्रजानु
ग्रहकारणात् १८ तस्माद्धि राजशार्दूल धर्मः श्रेष्ठतरः स्मृतः स राजा यः प्रजाः शास्ति सा
धुकृत्पुरुषर्षभ १९ कामक्रोधावनादृत्य धर्ममेवानुपालय धर्मः श्रेयस्करतमो राज्ञां भरतसत्त ॥
म धर्मस्य ब्राह्मणो योनिस्तस्मात्तान्पूजयेत्सदा ब्राह्मणानां च मा धातः कुर्यात्कामानमत्सरी २९

पशुणो धनात्स्रवतीति धर्मः इत्यर्थः धनादिति पंचमी तु धनं प्रापयितुं स्रवति द्रवति क्रियायतइति अल्पबलोपेतेया धारणाद्धा

धर्मः ध्रुवो मतप्रत्ययः सीमांतकरः यावत्पापं तावद्या
तनाकरइत्यर्थः ७ २९ ॥

अमित्रीतिभवंतिवर्द्धते २२ असूयात्असूयातः लिंगमात्मप्रार्थः असूयया अततिमततंवर्जनंतइतिवा असूयात २३ २५ अथर्मा
दितिच्छेदः २६ तदर्थं २७ २८ योगंडात्बालकात् अन्नादित्यर्थः पाखंडादितिस्थ्यः पाडः मनादिभ्यउपावर्त्तपराङ्मुखत्वं भज

तेषांयःकामकरणाज्ञानतःसंजायतेभयं मित्राणिनचवर्द्धतेतथामित्रीभवंत्यपि २२ ब्राह्मणा
नांसदासूयाद्धात्याद्धैरोचनोबलिः अथास्माच्छ्रीरपाक्रामद्यास्मिन्नासीत्प्रतापिनी २३ ततस्त
स्मादपाक्रम्यसागच्छन्याकशासने अथसोन्वतपत्पश्चाच्छ्रियंदृष्ट्वापुरंदरे २३ एतत्फलमसू
यायाअभिमानस्यवाविभो तस्माद्बुध्यस्वमांयातमर्मानांत्वंजयात्प्रतापिनी २५ दर्पोनामश्रियःपु
त्रोजज्ञेऽधर्मादितिश्रुतिः तेनदेवासुरारा जनीताःसुबहवोवशं २६ राजर्षयश्चबहवस्तथाबु
ध्यस्वपार्थिव राजाभवतितंजित्वादासस्तेनपराजितः २७ सयथादर्पसहितमधर्मंनानुसेव
से तथावर्त्तस्वमांयातश्चिरंचेत्स्यातुमिच्छसि २८ मत्तात्प्रमत्तात्पाखंडाद्बालाच्चविशेषतः
तदभ्यासाडपावर्त्तसंहितानांचसेवनात् २९ निगृहीतादमात्याच्चस्त्रीभ्यश्चैवविशेषतः पर्व
ताद्विषमाद्दुर्गाद्धस्तिनोश्वात्सरीसृपात् ३० एतेभ्योनित्ययुक्तःस्यान्नक्तंचर्यांचवर्जयेत् अ
त्यागंचाभिमानंचदंभक्रोधंचवर्जयेत् ३१ ॥

तदभ्यासात्तैःसहपरिचयात्संहितानांमिलितानांचतेषांसेवनाच्चसततमुपावर्त्तेत्यर्थः २९ ३० अत्यागंबद्धमुष्टितां ३१ ॥

३२ अशुभांसः क्लीबाः स्थूलजिह्वाः मूकाः ३३ ३६ नक्षत्राणिघ्नमेकत्वादयः ३७ ३८ एकस्यधनंद्वौआददाते आच्छिद्यशक्ती

अविज्ञातास्तुचस्त्रीषुक्लीबावास्वैरिणीषुच परभार्यासुकन्यासुनाचरेन्मैथुनंनृप ३२ कुलेषु
पापरक्षांसिजायन्तेवर्णसंकरात् अशुभांसोऽङ्गहीनाश्चस्थूलजिह्वाविचेतसः ३३ एतेचान्येजा
यन्तेयदाराजाप्रमाद्यति तस्माद्राज्ञाविशेषेणवर्तितव्यंप्रजाहिते ३४ क्षत्रियस्यप्रमत्तस्यदोषः
संजायतेमहान् अधर्माःसंप्रवर्तन्तेप्रजासंकरकारकाः ३५ अशीतेविद्यतेशीतंशीतेशीतंनवि
द्यते अवृष्टिरतिवृष्टिश्चव्याधिश्चाप्याविशेत्प्रजाः ३६ नक्षत्राण्युपतिष्ठन्तिग्रहाघोरास्तथापरे उ
त्पाताश्चात्रदृश्यन्तेबहवोराजनाशनाः ३७ अरक्षितात्मायोराजाप्रजाश्चापिनरक्षति प्रजाश्चत
स्यक्षीयन्तेततःसोऽनुविनश्यति ३८ द्वावाददातेह्येकस्यद्वयोःस्वंबहवोऽपरे कुमार्यःसंप्रलुप्यन्तेत
दाहुर्नृपदूषणम् ३९ ममेदमितिनैकस्यमनुष्येष्ववतिष्ठति त्यक्त्वाधर्मंयदाराजाप्रमादमनुतिष्ठ
ति ४० इतिश्रीमहाभारतेशान्तिपर्वणिराजधर्मेउतथ्यगीतासु ९० उतथ्यउवाच कालव
र्षीचपर्जन्योधर्मचारीचपार्थिवः संपद्यदैषाभवतिसाबिभर्तिसुखंप्रजाः १ योनजानातिनि
र्हन्तुंवस्त्राणांरजकोमलं रक्तानांवाशोधयितुंयथानास्तितथैवसः २ ॥

तः ३९ ४० नवतितमः ९० काल १ वस्त्राणांशुक्लानां शोधयितुंरागमविचाल्यमलमात्रंहरीकर्तुं २ ॥

श्री·
शां·रा·
टी·
१३०

द्विजानांमध्येयःकश्चित्शूद्रोवानानाकर्मस्ववस्थितःस्वधर्मच्युतोशूद्रावनकातल्यश्त्यर्थः ३ ७ अग्निरेतागार्हपत्यदक्षिणाग्न्या
हवनीयाख्यंवह्नित्रयंत्रयीऋग्यजुःसामवेदाः ८ ९ अबलंतत्रबलस्यपालनान्महत्वपमपालनाच्चमहत्पापमित्यर्थः १२

१। एवमेतद्द्विजेन्द्राणांक्षत्रियाणांविशांतथा शूद्रस्यचतथैवर्णानांनानाकर्मस्ववस्थितः ३ कर्म
४ शूद्रेकृषिर्वैश्येदंडनीतिश्चराजनि ब्रह्मचर्यंतपोमंत्राःसत्यंचापिद्विजातिषु ४ तेषांयःक्षत्रियोवे
= दवस्त्राणामिवशोधकं शीलदोषान्विनिर्हंतिसपितासप्रजापतिः ५ कृतंत्रेताद्वापरंचकलिश्च
भरतर्षभ राजवृत्तानिसर्वाणिराजेवयुगमुच्यते ६ चातुर्वर्ण्यंतथावेदाश्चातुराश्रम्यमेवच सर्वं
प्रमुह्यतेह्येतद्यदाराजाप्रमाद्यति ७ अग्निस्त्रेतात्रयीविद्यायज्ञाश्चसहदक्षिणाः सर्वएवप्रमाद्यंति
यदाराजाप्रमाद्यति ८ राजैवकर्ताभूतानांराजैवचविनाशकः धर्मात्मायःसकर्तास्यादधर्मात्मा
विनाशकः ९ राज्ञोभार्याश्चपुत्राश्चबांधवाःसुहृदस्तथा समेत्यसर्वेशोचंतियदाराजाप्रमा
द्यति १० हस्तिनोश्वाश्चगावश्चाप्युष्ट्राश्वतरगर्दभाः अधर्मभूतेनृपतौसर्वेसीदंतिजंतवः ११ दु
र्बलार्थंबलंसृष्टंधात्रामांधातरुच्यते अबलंतन्महद्भूतंयस्मिन्सर्वंप्रतिष्ठितं १२ यच्चभूतंसंभज
तेयेचभूतास्तदन्वयाः अधर्मस्थेहिनृपतौसर्वेशोचंतिपार्थिव १३ दुर्बलस्यचयच्चक्षुर्मुनेराशीवि
षस्यच अविषह्यतमंमन्येमास्मदुर्बलमासदः १४ ॥ ॥
भूतंदुर्बलंसंभजतेश्रन्नादिनासेवते तदन्वयाःदात्रसंबंधिनः १३ अबलंतन्महद्भूतमित्येतद्विशृणोति दुर्बलस्येत्यादिना १४ ॥ ॥

१३०

१५ १६ बलेस्थित्वा प्रतिपक्षीभूय भुंजीथाः करादानेन १९ २० यदि आत्मनि फलं पापं न फलति तर्हि पुत्रादिषु फलति न तु सद्यः
दुर्बलान्नातबुद्ध्येथानित्यमेवाविमानितान् मात्वांदुर्बलचक्षूंषि प्रदहेयुः सबांधवं १५ नहिदु
र्बलदग्धस्यकुलेकिंचित्प्ररोहति आमूलंनिर्दहत्येवमास्मदुर्बलमासदः १६ अबलंवैबलाच्छ्रे
योयच्चातिबलवद्बलं बलस्याबलदग्धस्यनकिंचिदवशिष्यते १७ विमानितोहतःक्रुष्टस्त्रा
तारंचेन्नविंदति अमानुषकृतस्तत्रदंडोहंतिनराधिपं १८ मास्मतातबलेस्थित्वाभुंजीथादुर्बलं
जनं मात्वादुर्बलचक्षूंषिदहंत्वग्निरिवाश्रयं १९ यानिमिथ्याभिशस्तानांपतंत्यश्रूणिरोदतां ता
निपुत्रान्पशूंघ्नंतितेषांमिथ्याभिशंसनात् २० यदिनात्मनिपुत्रेषुनचेत्पौत्रेषुनप्तृषु नहि
पापंकृतंकर्मसद्यःफलतिगौरिव यत्राबलोवध्यमानस्त्रातारंनाधिगच्छति महान्दैवकृत
स्तत्रदंडःपततिदारुणः २२ युक्तायदाजानपदाभिक्षंतेब्राह्मणाइव अभीक्ष्णंभिक्षुरूपेण
राजानंघ्नंतितादृशाः २३ राज्ञोयदाजनपदेबहवोराजपूरुषाः अनयेनोपवर्तंतेतद्राज्ञः
किल्बिषंमहत् २४ यदायुक्त्यानयेदर्थान्कामादर्थवशेनवा कृपणंयाचमानानांतद्राज्ञो
वैशसंमहत् २५ महावृक्षोजायतेवर्धतेचतंचैवभूतानिसमाश्रयंति यदावृक्षश्छिद्यतेदह्यतेच
फलतीत्यर्थः २१ २४ नयेत् अपहरेत् २५ महानितिदृष्टांतमुक्त्वादार्ष्टांतिकमाह यदेति यदाधर्मंचरतितदाराजावर्धतेऽथ

॥ ५४ राजधर्मेषूतथ्यगीतासु

॥ ५४ राजधर्मेषूतथ्यगीतासु

श्री॰
शां॰रा॰
टी॰
७२८

२२ रात्तःत्यजान् २८ ३५ सारणिकानप्रसारिणिप्रधानानुवणिजः शारणिकानितिपाठेशरणागतान् ३६ ३७ ३८ ॥

यदाराष्ट्रेधर्ममग्र्यंचरतिसंस्कारंवाराजगुणंब्रुवाणः तैरेवाधर्मश्चरितोधर्ममोहात्तूर्णं
जह्यात्सुकृतंदुष्कृतंवा २७ यत्रपापाज्ञायमानाश्चरन्तिसतांकलिर्विन्दतेतत्रराज्ञः यदाराजाशा
स्तिनरानशिष्टांस्तदाराज्यंवर्द्धतेभूमिपस्य २८ यश्चामात्यान्मानयित्वायथार्हंमन्त्रेचयुद्धेचनृपो
नियुञ्ज्यात् विवर्द्धतेतस्यराष्ट्रंनृपस्यभुङ्क्तेमहींचाप्यखिलांचिराय २९ यश्चापिसुकृतंवाचैव
सुभाषितंसमीक्ष्यपूजयन्राजाधर्ममाप्नोत्यनुत्तमं ३० संविभज्ययथाभुङ्क्तेनामात्यानवमन्यते
निहन्तिबलिनंदृप्तंसराज्ञोधर्मउच्यते ३१ त्रायतेहियदासर्वंवाचाकायेनकर्मणा पुत्रस्यापि
नमृष्येच्चसराज्ञोधर्मउच्यते ३२ संविभज्ययदाभुङ्क्तेनृपतिर्दुर्बलान्नरान् तदाभवन्तिबलिनःस
राज्ञोधर्मउच्यते ३३ यदारक्षतिराष्ट्राणियदादस्यूनपोहति यदाजयतिसंग्रामेसराज्ञोधर्मउच्य
ते ३४ पापमाचरतोयत्रकर्मणाव्याहृतेनवा प्रियस्यापिनमृष्येतसराज्ञोधर्मउच्यते ३५ य
दाशारणिकान्राजापुत्रवत्परिरक्षति भिनत्तिनचमर्यादांसराज्ञोधर्मउच्यते ३६ यदाप्तदक्षि
णैर्यज्ञैर्यजतेश्रद्धयान्वितः कामद्वेषावनादृत्यसराज्ञोधर्मउच्यते ३७ कृपणानाथवृद्धानांय ७२८
दाश्रुपरिमार्जति हर्षंसंजनयन्नॄणांसराज्ञोधर्मउच्यते ३८ ॥

३९ ४० धार्मिकाणां परमेश्वरोऽनुग्राहकोस्ति अतः प्राणान् इंद्रियाणि नियच्छन् भवति ऐश्वर्यं प्राप्नोति अनियच्छंस्तु पातकः पत।

विवर्द्धयति मित्राणि तथारींश्चापकर्षति संपूजयति साधूंश्च स राजा धर्म उच्यते ३९ सत्यं पालय
ति प्रीत्या नित्यं भूमिं प्रयच्छति पूजयेदतिथीन्भृत्यान्स राजा धर्म उच्यते ४० निग्रहानुग्रहौ चोभौ य
त्र स्यातां प्रतिष्ठितौ अस्मिंल्लोके परे चैव राजा स प्राप्नुते फलं ४१ यमो राजा धार्मिकाणां मांधातः प
रमेश्वरः संयच्छन्भवति प्राणानसंयच्छंस्तु पातकः ४२ ऋत्विक्पुरोहिताचार्यान्सत्कृत्यान
वमन्य च यदा सम्यक्प्रगृह्णाति स राजा धर्म उच्यते ४३ यमो यच्छति भूतानि सर्वाण्येवाविशेषतः
तथा राज्ञानुकर्तव्यं यंतव्या विधिवत्प्रजाः ४४ सहस्राक्षेण राजा हि सर्व एवोपमीयते स पश्यपा
ति च यं धर्मं स धर्मः पुरुषर्षभ ४५ अप्रमादेन शिक्षेथाः क्षमां बुद्धिं धृतिं मतिं भूतानां चैव जिज्ञासा
साध्वसाधु च सर्वदा ४६ संग्रहः सर्वभूतानां दानं च मधुरं वचः पौरजानपदाश्चैव गोप्तव्यास्ते यथा
सुखं ४७ न जात्वदक्षो नृपतिः प्रजाः शक्नोति रक्षितुं भारो हि सुमहांस्तात राज्यं नाम सुदुष्करं
४८ तद्दंडविन्नृपः प्राज्ञः शूरः शक्नोति रक्षितुं न हि शक्यमदंडेन क्लीबेनाबुद्धिनापि वा ४९ अ
भिरूपैः कुले जातैर्दक्षैर्भक्तैर्बहुश्रुतैः सर्वा बुद्धीः परीक्षेथास्तापसाश्रमिणामपि ५० ॥

याल्भवति पावक इति पाठे स आश्रमदाही भवतीत्यर्थः ४२ ४९ अभिरूपैरमात्यैः सहेति शेषः ५० ॥

श्री॰
शां॰रा॰
टी॰
१२५

५१ धर्मअर्थाऽऽपद्यतइतितत्फलभूतत्वात्ततउत्तरः एवंकामादपिधर्मएवोत्तरस्तन्मूलत्वात् ५२ ५३ प्रमादिथाःप्रमाद्येथाः ५४ ५५

अतस्त्वंसर्वभूतानांधर्ममेवोत्स्यसिवैपरं स्वदेशेपरदेशेवाननतेधर्मोविनंक्ष्यति ५१ तस्मादर्थाच्चका
माच्चधर्मएवोत्तरोभवत् अस्मिंल्लोकेपरेचैवधर्मात्मासुखमेधते ५२ त्यजंतिदारान्प्राणांश्चमनु
ष्याःपरिपूजिताः संग्रहश्चैवभूतानांदानंचमधुराचवाक् ५३ अप्रमादश्चशौचश्चराजन्भूतिकरंम
हत् एतेभ्यश्चैवमांधातःसततंमाप्रमादिथाः ५४ अप्रमत्तोभवेद्राजाछिद्रदर्शीपरात्मनोः नास्य
छिद्रंपरःपश्येच्छिद्रेषुपरमन्वियात् ५५ एतद्वृत्तंवासवस्यवरुणस्यच राजर्षीणांचसर्वेषांतत्त्व धमस्य ५
मप्यनुपालय ५६ तत्कुरुष्वमहाराजवृत्तंराजर्षिसेवितं आतिष्ठदिव्यंपंथानमह्नायभरतर्षभ
५७ धर्मवृत्तंहिराजानंप्रेत्यचेहचभारत देवर्षिपितृगंधर्वाःकीर्त्तयंतिमहौजसः ५८ भीष्मउ॰
सएवमुक्तोमांधातातेनोतथ्येनभारत कृतवानविशंकस्त्वेकःप्रापचमेदिनीं ५९ भवानपि
तथासम्यक्मांधातेवमहीपते धर्मंकृत्वामहींरक्षस्वर्गेस्थानमवाप्स्यसि ६० इतिश्रीमहाभा
रतेशांतिपर्वणिराजधर्मेउतथ्यगीता ९० युधिष्ठिरउ॰ कथंधर्मेस्थातुमिच्छन्राजावर्तेत
धार्मिकः पृच्छामित्वांकुरुश्रेष्ठतन्मेब्रूहिपितामह १ ॥

९० एकनवतितमः ९१ कथं धर्मस्योत्कर्षंज्ञात्वाधर्मस्थितिप्रकारंपृच्छतिकथमिति १ ॥ १२५

२ ४ तपतांतपःकुर्वतां ५ अर्थोपेतंयाधर्मश्रेष्ठंमत्वाधर्मस्यहृद्धौबुद्धिंकुर्यादित्याहाऽर्थेति ६ ७ उभौधर्मार्थौ ८ असंतःदुष्टाःपापि

भीष्मउवाच अत्राप्युदाहरंतीममितिहासंपुरातनं गीतंदृष्टार्थतत्त्वेनवामदेवेनधीमता २ राजा
वसुमनानामज्ञानवान्धृतिमान्शुचिः महर्षिंपरिपप्रच्छवामदेवंतपस्विनं ३ धर्मार्थसहितंवा
क्यंभगवन्ननुशाधिमां येनवृत्तेनवैतिष्ठन्नच्यवेयंस्वधर्मतः तमब्रवीद्वामदेवस्तेजस्वीतपतांव
रः हेमवर्णंसुखासीनंययातिमिवनाहुषं ५ वामदेवउ॰ धर्ममेवानुवर्तस्वनधर्माद्विद्यतेपरं
धर्मेस्थिताहिराजानोजयंतिपृथिवीमिमां ६ अर्थसिद्धेःपरंधर्मंमन्यतेयोमहीपतिः ऋतांचकु
रुतेबुद्धिंसधर्मेणविराजते ७ अधर्मदर्शीयोराजाबलादेवप्रवर्तते क्षिप्रमेवापयातोस्मादुभौप्र =
थममध्यमौ ८ असत्पापसचिवोवध्योलोकस्यधर्महा सहैवपरिवारेणक्षिप्रमेवावसीदा मो
ति ९ अर्थानामननुष्ठाताकामचारीविकत्थनः अपिसर्वांमहींलब्ध्वाक्षिप्रमेवविनश्यति १०
अथाददानःकल्याणमनसूयुर्जितेंद्रियः वर्द्धतेमतिमान्राजास्रोतोभिरिवसागरः ११ नपू ९
र्णोस्मीतिमन्येतधर्मतःकामतोर्थतः बुद्धितोमित्रतश्चापिसततंवसुधाधिपः १२ एतेष्वेवहिसर्वे ५
षुलोकयात्राप्रतिष्ठिता एतानिशृण्वँल्लभतेयशःकीर्तिं ९

ष्टाश्चसचिवायस्यसः ९ १२ एतेषुधर्मादिषु १३

श्री० शां० रा० टी० ९०

१४ १५ पापकृतंपापकारिणं १६ दाम्नःदातुः १७ १९ द्विनवतितमः ९२ यत्रराष्ट्रे प्रणायतेआरोपयति बलवत्तरोराजा

एवंयोधर्मसंरंभीधर्मार्थपरिचिंतकः अर्थात्समीक्ष्यभजतेसध्रुवंमहदश्नुते १४ अदाताह्यनतिस्ने
होदंडेनावर्त्तयन्प्रजाः साहसप्रकृतीराजाक्षिप्रमेवविनश्यति १५ अथपापकृतंबुद्ध्यानचपश्यत्य
बुद्धिमान् अकीर्त्याभिसमायुक्तोभूयोनरकमश्नुते १६ अथमानयितुर्दातुःशुक्लस्यवशवर्त्तिनः व्य
सनंस्वमिवोत्पन्नंविजिघांसंतिमानवाः १७ यस्यनास्तिगुरुर्धर्मेनचान्याननुपृच्छति सुखतंत्रोर्थला
भेषुसचिरंसुखमश्नुते १८ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेवामदेवगीतासु ९२ वामदेवउ०
यत्राधर्मंप्रणयतेदुर्बलेबलवत्तरः तांवृत्तिमुपजीवंतियेभवंतितदन्वयाः १ राजानमनुवर्त्तंतेपापंपा
पप्रवर्त्तकं अविनीतमनुष्यंतत्क्षिप्रंराष्ट्रंविनश्यति २ यद्वृत्तमुपजीवंतिप्रकृतिस्थस्यमानवाः तदे
वविषमस्थस्यस्वजनोपिनमृष्यते ३ साहसप्रकृतिर्यत्रकिंचिदुल्बणमाचरेत् अशास्त्रलक्षणोराजा
क्षिप्रमेवविनश्यति ४ योत्यंताचरितांवृत्तिंक्षत्रियोनानुवर्त्तते जितानामजितानांचक्षत्रधर्मादपै
तिसः ५ ॥

तंराजानम् अनुवर्त्ततेऽन्ये १ २ प्रकृतिःस्वधर्मः विषमःकुमार्गः ३ ४ जितानांआपन्नानां अजितानांस्वस्थानां ५ ॥ ९०

कृतकल्याणंप्रागुपकारंकृतवंतं ६ शक्तोसत्वमनुभवेत्प्रापदितकरणं आपन्निवारणंकर्मकुर्यात् करणादेतत्कर्मणोरिति
मेदिनी ७ अप्रियमितिउपकृतःशत्रुवदग्रेप्युपकरिष्यत्येवेत्यर्थः ८ ९ नापत्रपेत न्यायतिष्ठंरज्जंरदद्यात् अविभाव्याअगंभीरा अ

द्विषंतंकृतकल्याणंगृहीत्वानृपतिरणे योनमानयतेद्वेषात्तत्रयमीदपैतिसः ६ शक्तःस्या
त्सर्वसत्वोराजाकुर्यात्करणमापदि प्रियोभवतिभूतानांनचविभ्रश्यतेश्रियः ७ अप्रियंयस्यकु
र्वीतभूयस्तस्यप्रियंचरेत् नचिरेणप्रियःसस्याद्योप्रियःप्रियमाचरेत् ८ मृषावादंपरिहरेत्कु
र्यात्प्रियमयाचितः नचकामान्नसंरंभान्नद्वेषाद्धर्ममुत्सृजेत् ९ नापत्रपेतप्रश्नेषुनाविभाव्यांगि
रंसृजेत् नत्वरेतनचासूयेत्तथासंगृह्यतेपरः १० प्रियेनातिभृशंहृष्येदप्रियेनचसंज्वरेत् नत
प्येदर्थकृच्छ्रेषुप्रजाहितमनुस्मरन् ११ यःप्रियंकुरुतेनित्यंगुणतोवसुधाधिपः तस्यकर्मा
णिसिद्ध्यन्तिनचसंत्यज्यतेश्रिया १२ निवृत्तंप्रतिकूलेषुवर्तमानमनुप्रिये भक्तंभजेतनृप
तिःसदैवसुसमाहितः १३ अप्रकीर्णेन्द्रियग्राममत्यंतानुगतंशुचिं शक्तंचैवानुरक्तंचयु
ञ्ज्यान्महतिकर्मणि १४ एवमेतैर्गुणैर्युक्तोयोनुरज्यतिभूमिपं भर्तुरर्थेष्वप्रमत्तंनियुंज्या
दर्थकर्मणि १५ ॥

मीतिपाठेहृषणाहीं १० ११ प्रियंभृत्यादीनां १२ १४ एतैःनिवृत्तमितिश्लोकद्वयोक्तैः योऽत्ररज्यतिअनुरंजयतितंनियुंज्यात्भूमिपः

श्री॰ १६ त्यक्तोदात्तं उदारकर्मत्यागिनं १७ महत्पदं सहाङ्गिस्वारैः अनभिख्यातैः स्वेषां परेषां चाविदितैः १८ २२ मरणान्तमपि इदंया
शां॰ रा॰
टी॰
१८९

मूढमैन्द्रियकं लब्धमनार्यचरितं शठं अनतीतोपधं हिंस्रं दुर्बुद्धिमबहुश्रुतं १६ त्यक्तोदात्तं मद्यरतं
द्यूतस्त्रीमृगयापरं कार्ये महति युञ्जानो हीयते नृपतिः श्रिया १७ रक्षितात्मा च यो राजा रक्ष्यान्य
श्चानुरक्षति प्रजाश्च तस्य वर्द्धन्ते ध्रुवं च महदश्नुते १८ ये केचिद्भूमिपतयः सर्वांस्तानन्ववेक्षयेत् सुहृ
द्भिरनभिख्यातैस्तेन राजा न रिष्यते १९ अपकृत्य बलस्थस्य दूरस्थोऽस्मीति नाश्वसेत् श्येनाभिपतनै
रेते निपतन्ति प्रमाद्यतः २० दृढमूलस्त्वदुष्टात्मा विदित्वा बलमात्मनः अबलानभियुञ्जीत न तु ये ब
लवत्तराः २१ विक्रमेण महीं लब्ध्वा प्रजा धर्मेण पालयेत् आहवे निधनं कुर्याद्राजा धर्मपरायणः
२२ मरणान्तमिदं सर्वं नेह किंचिदनामयं तस्माद्धर्मे स्थितो राजा प्रजा धर्मेण पालयेत् २३ रक्षा
धिकरणं युद्धं तथा धर्मानुशासनं मन्त्रचिन्ता सुखं काले पञ्चभिर्वर्द्धते मही २४ एतानि यस्य गुप्तानि
स राजा राजसत्तम सततं वर्तमानोऽत्र राजा यत्ते महीमिमां २५ नैतान्येकेन शक्यानि सातत्येनान्ववीक्षि
तुं तेषु सर्वं प्रतिष्ठाप्य राजा भुङ्क्ते चिरं महीं २६ दातारं संविभक्तारं मार्दवोपगतं शुचिं असंत्यक्तमनुष्यं

लनं अनामयं कुशलमेव स्वर्गहेतुत्वादित्यर्थः २३ रक्षाधिकरणं दुर्गादि स्वविषयस्वप्रदानं २४ गुप्तानि स्वरक्षितानि २५ एकेन राज्ञा तेषु दुर्गाद्य

त्यानंश्रंदममनिः श्रेयसमितियनज्ञानंनत २८ अर्थकामस्यसज्जेःप्रातिकूल्यान्द्वेषात्शृणोतितच्छ्रेत्तुभ्यःसकाशात् २९ अग्रा

यस्त्वतिःश्रेयसंश्रुतानात्मानंनतत्वतिपद्यते आत्मनोमनसुत्सृज्यतेलोकेऽत्रविधीयते २८ यो
ऽर्थकामस्यवचनंप्रातिकूल्यान्नमृष्यते शृणोतिप्रतिकूलानिसर्वदाविमनाश्च २९ अग्राम्यव
र्णिताहतिंयोनसेवेतनित्यदा जितानामजितानांचवतत्रयमारंपतिमः ३० निगृहीतादमात्याच्च
स्त्रीभ्यश्चैवविशेषतः पर्वताद्विषमाद्दुर्गाद्हस्तिनोश्वात्सरीसृपात् ३१ एतेभ्योनित्ययुक्तःसतत
देवात्मानमेवच अर्च्यानमात्यान्योहित्वानिहीनानकुरुतेप्रियान् ३२ सवैव्यसनमासाद्यगाध
मार्त्तौनविंदति ३२ यःकल्याणगुणान्ज्ञातीन्द्वेषान्नाभिभूषति अद्दढात्माद्दढक्रोधःस
स्त्वोर्वसंतेंतिके ३३ अथयोगुणसंपन्नान्हृदयस्याप्रियानपि प्रियेणकुरुतेवशंश्रियंयश
स्तितिष्ठति ३४ नाकालेप्रमणायेदर्थान्नाप्रियेजातसंज्वरेत् प्रियेनातिभृशंतिष्ठयुज्येत्तशुभा
कर्मणि केवात्वरक्ताराजानःकेभयात्समुपाश्रिताः मध्यस्थदोषाःकेचैषामितिनित्यंविचिंत
येत ३६ नजातुबलवान्भूत्वाडुर्बलेविश्वसेत्कचित् भारुंडसदृशाह्येतेनिपतंतिप्रमाद्यतः ३७ अ
पिसर्वगुणैर्युक्तंभर्त्तारंप्रियवादिनं अभिद्रुह्यतिपापात्मानतस्माद्विभ्येज्जनात् ३८ ॥

मैर्बुद्धिमद्भिःहर्त्तिलाभोपायं ३० ३१ गुणानिति गांयकार्यस्यांते ३२ ३८ ॥

श्री· शा·रा· टी· १८२

राजोपनिषदं वार्त्तां रहस्यविद्यां ३९ त्रिनवतितमः ९३ अयुद्धेन १ नातिदृढे अनतिदृढे २ दृढमूलत्वं सफलत्वाणामाद्यस्येति ३

एवं राजोपनिषदं ययातिः स्माह नाहुषः मनुष्यविषये युक्तो हंति शत्रूननुत्तमान् ३९ इति श्रीमहाभा
रते शांतिपर्वणि राजधर्मे वामदेवगीता ९३ वामदेव उवाच अयुद्धेनैव विजयं वर्द्धयेद्वसुधाधिपः ज
घन्यमाहुर्विजयं युद्धेन च नराधिप १ न चाप्यलब्धं लिप्सेत मूले नातिदृढे सति न हि दुर्बलमूलस्य रा
ज्ञो लाभो विधीयते २ यस्य स्फीतो जनपदः संपन्नः प्रियराजकः संतुष्टः पुष्टसचिवो दृढमूलः स पा
र्थिवः ३ यस्य योधाः सुसंतुष्टाः सांत्विताः सूपधास्थिताः अल्पेनापि स दंडेन महीं जयति पार्थिवः पौर
जानपदा यस्य भूतेषु च दयालवः सधना धान्यवंतश्च दृढमूलः पार्थिवः ५ प्रतापकालमधिकं यदा
मन्येत चात्मनः तदा लिप्सेत मेधावी परभूमिं धनान्युत ६ भोगेष्वदयमानस्य भूतेषु च दयावतः वर्द्ध
ते त्वरमाणस्य विषयो रक्षितात्मनः तक्षेदात्मानमेवं स स्ववनं परशुना यथा यः सम्यग्वर्त्तमानेषु स्वे
षु मिथ्या प्रवर्त्तते ८ नैव द्विषंतो हीयंते राज्ञो नित्यमनिघ्नतः क्रोधं निहंतुं यो वेद तस्य द्वेष्टा न विद्य
ते ९ यदार्यजनविद्विष्टं कर्म तन्नाचरेद्बुधः यत्कल्याणमभिध्यायेत्तत्रा
त्मानं नियोजयेत् १० ॥

सूपधाः परवंचनास्थितास्सुस्थिता निष्ठावंतः दंडेन सैन्येन ४ ५ लिप्सेत विजिगीषेत ६ ७ ८ ९ १० ॥ १८२

कृत्यशेषेणापरकृत्यं कार्त्स्न्येन न समापयेत समापिते तु परो वमन्यते स्वस्य च नायो भवतीत्यर्थः ११ १२ नृपः बहुमनाः १३ चतुर्नवति
तमः ९४ इति वामदेवगीता समाप्ता यस्य स्वाम्याद्याः सप्त प्रकृतयो दृढाः स परमहीं लिप्सेतेत्युक्तं तत्र यो जिगीषते जेतुमिच्छति तं

नैवमन्येव जानंति नात्मना परितप्यते कृत्यशेषेण यो राजा सुखान्यनुबुभूषति १ इंद्रहृतं म
नुष्येषु वर्त्तते यो महीपतिः उभौ लोकौ विनिर्जित्य विजये संप्रतिष्ठति २ भीष्म उ॰ इत्युक्तो वा
मदेवेन सर्वं तत्कृतवान्नृपः तथा कुर्वंस्त्वमप्येतौ लोकौ जेतासि न संशयः ३ इति शांतिपर्वणि
राजधर्मे वामदेवगीता युधिष्ठिर उ॰ अथ यो विजिगीषेत क्षत्रियः क्षत्रियं युधि कस्तस्य विज
येधर्मो ह्येतत्पृष्टो ब्रवीहि मे १ भीष्म उ॰ ससहायो सहायो वा राष्ट्रमागम्य भूमिपः ब्रूयादहं
वो राजेति रक्षिष्यामि च वः सदा २ मम धर्मबलिं दत्त किं वा मां प्रतिपत्स्यथ ते चेत्तमागतं त = प
त्र वृणुयुः कुशलं भवेत ३ ते चेदक्षत्रियाः संतो विरुध्येरन्कथंचन सर्वोपायैर्नियंतव्या ३
विकर्मस्था नराधिप ४ ॥ ८

स्य विजये विषये विजयनिमित्तं को नु दृष्टो याथ धर्म इति पृच्छति अथेति १ जिगीषुर्द्विविधः अनुपस्थितपरिपंथी उपस्थितपरिपंथी
च तत्राद्यस्य धर्ममाह ससहाय इति यो ऽकस्मात् राष्ट्रं परकीयं आगत्य अहं वः रक्षिष्यामीत्यादि ब्रूयात् स आद्यो विजिगीषमाणा इत्य शां

श्री॰
शां॰ रा॰
टी॰
५८३

जयेत् १६ ॥

अशस्त्रमिति न्यायेनाप्यसमर्थं परं बातीवमन्यमानं क्षत्रियं अशस्त्रं तेनात्मापरो हीनोपि शस्त्रं गृह्णाति अतः शस्त्रबलेनैव जिना

अशस्त्रं क्षत्रियं मत्वा शस्त्रं गृह्णात्यथापरः न्यायेनाप्यसमर्थं तं मन्यमानमतीव च ५ युधिष्ठि
र उ॰ अथ यः क्षत्रियो राजा क्षत्रियं प्रत्युपाव्रजेत् कथं तस्य प्रयोद्धव्यं तन्मे ब्रूहि पितामह ६ भीष्म उ॰
नैवासंनद्धकवचो योद्धव्यः क्षत्रियो रणे एक एकेन योध्यश्च विसृजेत्तं यथा ७ स चेत्संनद्ध आग
च्छेत्संनद्धव्यं ततो भवेत् स चेत्ससैन्य आगच्छेत्ससैन्यस्तमथाह्वयेत् ८ स चेन्निकृत्या युध्येत निकृ
त्या प्रतियोधयेत् अथ चेद्धर्मतो युध्येद्धर्मेणैव निवारयेत् ९ नाश्वेन रथिनं प्रायादुदियाद्रथिनं रथी
व्यसने न प्रहर्तव्यं न भीताय जिताय च १० इषुर्लिप्तो न कर्णी स्यादसतामेतदायुधं यथार्थमेव योद्धव्यं न
क्रुध्येत जिघांसतः ११ निःशस्त्रो नाभिहन्तव्यो नानपत्यः कथंचन भग्नशस्त्रो विपन्नश्च कृत्तज्यो हतवाह
नः चिकित्स्यः स्यात्स्वविषये प्राप्यो वा स्वगृहे भवेत् साधुं नीत्वा यदा भेदात्स्यायुश्चेत्तमसनी भवेत् १३
निर्व्रणश्च समोक्तव्य एष धर्मः सनातनः तस्माद्धर्मेण योद्धव्यमिति स्वायंभुवोऽब्रवीत् १४ सत्सु नित्यः स
तां धर्मस्तमास्थाय न नाशयेत् यो वै जयत्यधर्मेण क्षत्रियो धर्मसंगरः १५ आत्मानमात्मना हन्ति पापो नि

न्यायमादीनुल्लंघ्य तद्धि पतिस्तु विस्यातव्यं जितं च राष्ट्रं सामादिना वशीकर्तव्यमिति शेषः ५ १० लिप्तो विषदिग्धः इषुर्महानवाणः ११

५८३

७ २० महादृतिः महान्चर्मकोशः आध्मातो वायुना पूरित इवातिशुष्कः स्वकृतेनस्वकर्मणा २१ २२ विजिगीषमाणाध्याये पंचनवति
धर्मेणातिधनं श्रेयो न जयः पापकर्मणा नाधर्मश्चरितो राजन्सद्यः फलति गौरिव ७ मू-
लानि च प्रशाखाश्च दहन्समधिगच्छति पापेन कर्मणा वित्तं लब्ध्वा पापः प्रहृष्यति ८ स
वर्द्धमानः स्तेयेन पापः पापे प्रसज्जति न धर्मोस्तीति मन्वानः शुचीनवहसन्निव ९ अश्रद्दधान
श्च भवति विनाशमुपगच्छति स बद्धो वारुणैः पाशैरमर्त्य इव मन्यते १० महादृतिरिवाध्मातः स्व
कृतेनैव वर्द्धते ततः समूलो ह्रियते नदीकूलादिव द्रुमः ११ अथैनमभिनन्दन्ति भिन्नं कुम्भमिवा
श्मनि तस्माद्धर्मेण विजयं कोशं लिप्सेत भूमिपः १२ इति श्रीमहाभारते शान्तिपर्वणि वि
जिगीषमाणाध्याये ९५ भीष्म उ० नाधर्मेण महीं जेतुं लिप्सेत जगतीपतिः अधर्मविजयं ल
ब्ध्वा कोनुमन्येत भूमिपः १ अधर्मयुक्तो विजयो ह्यध्रुवोऽस्वर्ग्य एव च सादयत्येष राजानं म
हीं च भरतर्षभ २ विशीर्णकवचं चैव तवास्मीति च वादिनम् कृताञ्जलिं न्यस्तशस्त्रं गृही
त्वा न विहिंसयेत् ३ बलेन विजितो यश्च न तं युध्येत भूमिपः संवत्सरं विप्रणयेत्तस्माज्जातः
पुनर्भवेत् ४ ॥
तमः नाधर्मेण १ २ विप्रणयेत्तदासोस्मीति वदेति तं शिक्षयेत् ततः संवत्सरादूर्ध्वं स एव अब्रुवन्नपि ततो जातः पुत्र एव भ

वेदः तत्रशान्तिपर्वणि ४ ॥

श्री॰
शां॰ रा॰
टी॰
९४

विक्रमाहृताकन्यातमस्मान्नृणीवेड़तान्यं चेति प्रष्टव्याऽन्यार्थिनीनस्याद्येतिभावः सहसानिकृत्या आहृतं दासदास्यादिकं वस्तु
गंते प्रत्यर्पणीयं तदा स्वीयमेव तस्मै दत्तं भवति ५ बध्यस्त्रीवादयः तद्धनं नतिष्ठेद्पितव्यमेव बध्यायण्चोरश्चेत्तदादातव्यं एवंवत

नार्वाक्संवत्सरात्कन्याः प्रष्टव्या विक्रमाहृताः एवमेव धनं सर्वं यच्चान्यत्सहसाहृतं ५ नतद्धध
यनं तिष्ठेत्पिबेयुर्ब्राह्मणाः पयः भुंजीरन्वाप्यनडुहः क्षंतव्यं वा तदा भवेत् ६ राज्ञा राजैव योद्धव्यस्
थायर्ममाविधीयते नान्यो राजानमभ्यसेदराजन्यः कथंचन ७ अनीकयोः संहतयोर्यदीयाद्ब्राह्म
णोंतरा शांतिमिच्छन्नुभयतो नयोद्धव्यं तदा भवेत् ८ मर्यादां शाश्वतीं भिंद्याद्ब्राह्मणं योभिलंघये
त् अथचेल्लंघयेदेवमर्यादां क्षत्रियब्रुवः ९ असंख्येयस्तु हर्त्तव्य स्यादनादेयश्च संसदि यस्तु धर्म
विलोपेन मर्यादाभेदनेन च १० तां वृत्तिं नानुवर्त्तेत विजिगीषुर्महीपतिः धर्मलब्धाद्धि विजयाल्लाभः
कोभ्यधिको भवेत् सहसानार्यभूतानि क्षिप्रमेव प्रसादयेत् ११ सांत्वेन भोगदानेन स राज्ञां परमो
नयः भुज्यमाना ह्ययोगेन स्वराष्ट्रादभितापिताः १२ अमित्रास्तमुपासीरन्व्यसनौघप्रतीक्षि
णः अमित्रोपग्रहं चास्य ते कुर्युः क्षिप्रमापदि १३ ॥

इदं प्रतिप्रदेयमित्यर्थः ६ अभ्यसेत अभिमुखं बाणं प्रक्षिपेत् ७ ८ क्षत्रियब्रुवः क्षत्रियाधमः ९ असंख्येयः क्षत्रियेषु नगणनीयः
जातिबाह्यः कर्त्तव्य इत्यर्थः १० अनार्यभूतानीति कृत्वा प्रसादयेत् ११ अयोगेन अप्रमाणेन १२ अमित्रोपग्रहं तेषां वैरिणामनुकूल्यं तेन

९४

विनिकर्त्तव्यः निहापांवचयितव्यः १४ १८ भूमीतियान्यान्यपिशत्रोर्हर्त्तव्यानीतिकिमुस्वर्णादिकमितिभावः १९ अग्निवो
शायत्तोग्निभूतंहविः भोजनंसिद्धान्नंपत्तन्नहर्त्तव्यमित्यर्थः विप्रकृतः वंचितः २० २१ उच्चेति राज्ञासर्वंहर्त्तव्यमित्यर्थः २२

ईदृशाः सर्वतोराजन्राजव्यसनकोविदाः नमित्रोविनिकर्त्तव्योनातिच्छेद्यः कथंचन १४
जीवितंह्यप्यतिच्छिन्नः संत्यजेत्स्वंकदाचन अल्पेनापिचसंयुक्तस्तुष्यत्येवनराधिप शुद्धंजी
वितमेवापितादृशोबहुमन्यते १५ यस्यस्फीतोजनपदः संपन्नः प्रियराजकः संतुष्टभृत्यसचि
वोदृढमूलः सपार्थिवः १६ ऋत्विक्पुरोहिताचार्यायेचान्येश्रुतसत्तमाः पूजार्हाः पूजितायस्यस
वैलोकविदुच्यते १७ एतेनैवचवृत्तेनमहींप्रापसुरोत्तमः अनेनचैन्द्रविषयंविजिगीषन्तिपार्थिवाः
१८ भूमिवर्जंपुरंराजाजित्वाराजन्महाहवे अभिचार्न्नोषधीः शास्त्राद्राजहारप्रतर्दनः १९ अग्निहोत्रा
ग्निशेषंचहविर्भोजनमेवच आजहारदिवोदासस्ततोविप्रकृतोभवेत् २० सराजकानिराष्ट्राणि
नाभागोदक्षिणांददौ अन्यत्रश्रोत्रियस्वाच्चतापसार्थाच्चभारत २१ उच्चावचानिवित्तानिधर्मज्ञानां
युधिष्ठिर आसन्राज्ञांपुराणानांसर्वंतन्ममरोचते २२ सर्वविद्यातिरेकेणजयमिच्छन्महीपतिः
नमाययानदंभेनयइच्छेद्भूतिमात्मनः २३ इतिश्रीमहाभारतेशान्तिपर्वणिराजधर्मे ९६ युधिष्ठि
२३ षण्णवतितमः ९६ तत्र महाजनंकटकाग्निंतैवेश्यादिजनं १ ॥ २३० नात्रधर्मोहिविप्रापीयानधर्मोस्तिन

श्री॰
शां॰ रा॰
टी॰
१८५

केनतद्वयप्रायश्चित्तंकत्वापुण्यफलमाप्नोतीत्यर्थः २ उत्तरमाहनिग्रहेणेति ३ उपकंपयंतिपीडयंति ४ अपविध्यंतिहरी

अध्यस्वकर्मणाकेनलोकाञ्जयतिपार्थिवः विद्वन्जिज्ञासमानायप्रब्रूहिभरतर्षभ २ भीष्मउ॰

निग्रहेणचपापानांसाधूनांसंग्रहेणच यज्ञैर्दानैश्चराजानोभवंतिशुचयोमलाः ३ उपकंपयंतिरा

जानोभूतानिविजयार्थिनः तएवविजयंप्राप्यवर्द्धयंतिपुनःप्रजाः ४ अपविध्यंतिपापानिदानय

ज्ञतपोबलैः अनुग्रहायभूतानांपुण्यमेषांविवर्द्धते ५ यथैवक्षेत्रनिर्यातानिर्यातंक्षेत्रमेवच हिना

स्तियान्यकर्तंचनचधान्यंविनश्यति ६ एवंशस्त्राणिमुंचंतोघ्नंतिवध्याननेकधा तस्यैषानिष्कृतिः

कृत्वाभूतानांभावनंपुनः ७ योभूतानियनाक्रोशात्पावयातक्लेशाद्वरक्षति दस्युभ्यःप्राणदानात्स

धनदःसुखदोविराट् ८ ससर्वयज्ञैरीजानोराजाथाभयदक्षिणैः अनुभूयेहभद्राणिप्राप्नोतींद्रसलो

कतां ९ ब्राह्मणार्थेसमुत्पन्नेयोभिभिःसत्यमुच्यति आत्मानंयूपमुच्छ्रित्यसयज्ञोनंतदक्षिणः १०

अभीतोविकिरन्शत्रून्प्रतिगृह्यशरांस्तथा नतस्मात्त्रिदशाःश्रेयोभुविपश्यंतिकिंचन ११ त

स्यशस्त्राणियावंतित्वचंभिंदंतिसंयुगे तावतःसोश्नुतेलोकान्सर्वकामदुहोक्षयान् १२ यदस्य

रुधिरंगात्रादाहवेसंप्रवर्तते सहतेनैवपापेनसर्वपापैःप्रमुच्यते १३ ॥ कुर्वंति ५ निर्यातात्तृणाद्यपन

येनशोधकःनिंदीतेतिपाठेदोषशोधनेउत्पन्नस्पष्टंपं कंतकरणं ६ भावनंवर्द्धनं ७ ९ आत्मानंदेहंयूपंयज्ञस्तंभंउच्छ्रित्यऊर्द्धिकृत्य

[illegible]
१८५

१५ यदीति यदि त्वाप्रतिरूपं पुत्राभिगुप्तं विजनं चेन्न कुर्यात् किं न हि स्वयं गुप्तो भूत्वा तान् चेद्रक्षतः कुर्यात् तर्हि तन्न्याय्यं सर्ववर्णानां प्रवर्त्तते।
नान्यथेत्यर्थः १६ यदीति यदि ताः संतस्तं नमस्कुर्युः रथ्यश्च न्यायं युद्धं चपराः हत्यकुर्युस्तदापि तन्न्यायान १७ अनीकवेलायामनीका

यानि दुःखानि सहते तत्त्रियो पृथिवीपतिः तेन तेन तपो भूय इति धर्मविदो विदुः १४ एष तेऽभीरवः
संख्ये वर्त्तते धर्मपूरुषाः शूराच्छरणमिच्छन्तः पर्जन्यादिव जीवनं १५ यदि शूरस्तथा क्षेमे प्रतिर
क्षेद्यथा भये प्रतिरूपं जनं कुर्यान्न चेत्तद्वर्त्तते तथा १६ यदि तेहन्तमाज्ञाय नमस्कुर्युः सदैव तं शुश्रून्या
य्यं च कुर्युस्ते तेन तद्वर्त्तते तथा १७ पुरुषाणां समानानां दृश्यते महदन्तरं संग्रामेऽनीकवेलायामुत्कृष्टे
भिपतत्सु च १८ पतत्यभिमुखः शूरः परानभीरुः पालयेत् आश्रयायस्वर्ग्यमधानं सहायान्विषमेष
जेत् १९ मा स्म तांस्तादृशांस्तात जनिष्ठाः पुरुषाधमान् ये सहायान् रणे हित्वा स्वस्तिमन्तो गृहान्
ययुः २० अस्वस्ति तेभ्यः कुर्वन्ति देवा इन्द्रपुरोगमाः त्यागेन यः सहायानां स्वान्प्राणांस्त्रातुमिच्छति २१
तं हन्युः काष्ठलोष्टैर्वा दहेयुर्वा कटाग्निना पशुवन्मारयेयुर्वा क्षत्रिया ये स्युरीदृशाः २२ ॥

नां सद्यहकाले अभिपतत्स्वेके ऽन्ये अपि च नेत्यन्ये इत्यर्थात् १८ न देवा हपतन्तीति विषमे प्राणसंकटे त्यजेन्न देहमिति शेषः १९
२० तेभ्यः तस्मै २१ तस्य दंडमाह तं हन्युरिति रणमयेकटे बधाद्दहनं कटाग्निना दाहः २२ ॥

२३ २५ शौंडीराणांस्वत्वाभिमानवतां २६ निष्टनन्शब्दंकुर्वन् पूतिःदुर्गंधिः अमात्याननुज्ञान् २७ ३२ समन्तवा
अधर्मः क्षत्रियस्यैषयच्छय्यामरणंभवेत् विसृजन्श्लेष्ममूत्राणिकृपणंपरिदेवयन् ३३ अवि
क्षतेनदेहेनप्रलयंयोधिगच्छति क्षत्रियोनास्यतत्कर्मप्रशंसन्तिपुराविदः नगृहेमरणंतात
क्षत्रियाणांप्रशस्यते शौंडीराणामशौंडीर्यमधर्म्यंकृपणंचतत् ३५ इदंदुःखमहत्कष्टंपापीयइ
तिनिष्टनन् प्रतिध्वस्तमुखः पूतिरमात्याननुशोचयन् ३६ अरोगाणांस्पृहयतेमुहुर्मृत्युमपीच्छ
ति वीरोदृप्तोभिमानीचनेदृशंमृत्युमर्हति ३७ रणेषुकदनंकृत्वाज्ञातिभिःपरिवारितः तीक्ष्णैः
शस्त्रैरभिक्लिष्टः क्षत्रियोमृत्युमर्हति ३८ शूरोहिकाममन्युभ्यामाविष्टोयुध्यतेभृशं हन्यमा
नानिगात्राणिपरैर्नैवावबुध्यते ३९ ससंख्येनिधनंप्राप्यप्रशस्तंलोकपूजितं स्वधर्मविपुलंप्रा
प्यशक्रस्यैतिसलोकतां ४० सर्वोपायैरणमुखमातिष्ठंस्त्यक्तजीवितः प्राप्नोतीन्द्रस्यसालोक्यं
शूरःपृष्ठमदर्शयन् ४१ यत्रयत्रहतःशूरःशत्रुभिःपरिवारितः अक्षयाँल्लभतेलोकान्य
दिदैन्यंनसेवते ४२ इतिश्रीमहाभारतेशान्तौराजधर्मे ९९ युधिष्ठिरउ० केलोकायुध्यमाना
नांशूराणामनिवर्तिनां भवन्तिनिधनंप्राप्यतन्मेब्रूहिपितामह १ ॥

तितमः ९९ केअक्षय्यँल्लभतेलोकानित्युक्तंतत्प्रश्नपूर्वकंविवृणोति केइति १ ॥

२ नाभागिः नाभागपुत्रः शक्रेणसहस्थितंसचिवं ३ ४ यश्चान्योऽक्षत्रियोपियुध्यतेनरस्तस्याप्ययंयज्ञोस्ति यश्चान्यो

भीष्मउ॰ अत्राप्युदाहरंतीममितिहासंपुरातनं अंबरीषस्यसंवादमिंद्रस्यचयुधिष्ठिर २ अंबरीषो
हिनाभागिःस्वर्गंगत्वासुदुर्लभं ददर्शसुरलोकस्थंशक्रेणसचिवंसह ३ सर्वतेजोमयंदिव्यंविमा
नवरमास्थितं उपर्युपरिगच्छंतंस्वंवैसेनापतिंप्रभुं ४ सदृष्ट्वोपरिगच्छंतंसेनापतिमुदारधीः ऋ
द्धिंदृष्ट्वासुदेवस्यविस्मितःप्राहवासवं ५ अंबरीषउ॰ सागरांतांमहींकृत्स्नामनुशास्ययथाविधि
चातुर्वर्ण्येयथाशास्त्रंप्रवृत्तोधर्मकाम्यया ६ ब्रह्मचर्येणघोरेणगुर्वाचारेणसेवया वेदानधीत्यध
र्मेणराजशास्त्रंचकेवलं ७ अतिथीनन्नपानेनपितॄंश्चस्वधयातथा ऋषीन्स्वाध्यायदीक्षाभिर्देवा
न्यज्ञैरनुत्तमैः ८ क्षत्रधर्मेस्थितोभूत्वायथाशास्त्रंयथाविधि उदीक्षमाणःपृतनांजयामियुधिवासव
९ देवराजसुदेवोयंममसेनापतिःपुरा आसीद्योधःप्रशांतात्मासोयंकस्मादतीवमां १० अनेनक्रतु
भिर्मुख्यैर्नेष्टंनापिद्विजातयः तर्पिताविधिवच्छक्रसोयंकस्मादतीवमां ११ इंद्रउवाच एतस्यवि
ततस्तातसुदेवस्यबभूवह संग्रामयज्ञःसुमहान्यश्चान्योयुध्यतेनरः १२ सन्नद्धोदीक्षितःसर्वोयो
धःप्राप्यचमूमुखं युद्धयज्ञाधिकारस्थोभवतीतिविनिश्चयः १३ ॥

विघ्नतेनवश्तीपाठेयः यस्मातअन्योयज्ञोवः युष्माकंक्षत्रियाणांविघ्नतेस्पर्थः ११ १२ ॥

श्री·
शां· रा·
टी·
१८०

१३ १५ निशिताः शाणहृष्टाः पीताः तारपानीयेन संभाविताः १६ १७ शैक्यायसमयैः सर्वलोहमयैः वस्तयत्किं।
अंबरीष उवाच कानि येते हवींषि स्मिन्किमाज्यं का च दक्षिणा ऋत्विजश्चात्र के प्रोक्तास्तन्मे ब्रू
हि शतक्रतो १२ इन्द्र· ऋत्विजः कुंजरास्तत्र वाजिनोऽध्वर्यवस्तथा हवींषि परमांसानि रुधिरं
त्वाज्यमुच्यते १४ शृगालगृध्रकाकोलाः सदस्यास्तत्र पत्रिणः आज्यशेषं पिबंत्यन्ते हविः प्राश्नंति
वाध्वरे १५ प्रासतोमरसंघाताः खड्गशक्तिपरश्वधाः ज्वलंतो निशिताः पीताः स्रुचस्तस्याथ सत्रि
णः १६ चापवेगायतस्तीक्ष्णः परकायावभेदनः ऋजुः सुनिशितः पीतः सायकश्च स्रुवो महान्
१७ द्वीपिचर्मावनद्धश्च नागदंतकृतत्सरुः हस्तिहस्तगतः खड्गः स्फ्यो भवेत्तस्य संयुगे १८ ज्वा
लितैर्निशितैः प्रासशक्त्यृष्टिपरश्वधैः शैक्यायसमयैस्तीक्ष्णैरभिघातो भवेद्वसु १९ संग्रामस
यविस्तीर्णमभिजातोद्भवं बहु आवेगाद्यच्च रुधिरं संग्रामे स्रवते भुवि २० सास्य पूर्णाहुतिर्होमस्य
महाः सर्वकामधुक् छिंधि भिंधीत्ययं शब्दः श्रूयते वाहिनीमुखे २१ सामानि सामगास्तस्य गायं
ति यमसादने हविर्धानं तु तस्याजः परेषां वाहिनीमुखे २२ कुंजराणां हयानां च वर्मिणां च समु
च्चयः अग्निः श्येनचितो नाम स चयज्ञे विधीयते २३ उत्तिष्ठते कबंधोऽत्र सहस्राणि निहते त्वयः स यू
पस्तस्य शूरस्य वा दिरोष्टास्त्रिरुच्यते २४ ॥ विधत्रियं दक्षं १९ २१ हविर्धानं हविषः स्थापनस्थलं २२.२४ १८०

२५ २७ ममरुंडस्य २८ २९ शोणितसंघातनाशोणितौघमयी ३० ३१ ३२ ३३ ३४ ३५ ३६ ॥

रुद्रोपहूताः क्रोशंतिकुंजरास्त्वंकुशेरिताः व्याघुष्टतलनादेनवषट्कारेणपार्थिव २५ उद्गाता
तत्रसंग्रामेत्रिसामाडुंडुभिःस्मृताः ब्रह्मस्वेक्रियमाणेतत्पश्चाद्युद्धेप्रियातत्र २६ आत्मानंयूपमुत्सृ
ज्यसयज्ञोनंतदक्षिणः भर्तुरर्थेचयःशूरोविक्रमेद्वाहिनीमुखे २७ नभयाद्विनिवर्तेतस्या
लोकाययथामम नीलचर्मावृतैःखड्गैर्बाहुभिःपरिघोपमैः २८ यस्यवेदिरुपस्तीर्णातस्यलोका
यथामम यस्तुनापेक्षतेकंचित्सहायंविजयेस्थितः २९ विगाह्यवाहिनीमध्यंतस्यलोकाययथाम
म यस्यशोणितसंघाताभेरीमंडूककच्छपा ३० वीरास्थिशर्कराडुर्गामांसशोणितकर्दमा अ
सिचर्मप्लवाघोराकेशशैवलशाद्वला ३१ अश्वनागरथैश्चैवसंछिन्नैःकृतसंक्रमाः पताकाध्व
जवानीराहतवारणवाहिनी ३२ शोणितोदासुसंपूर्णादुस्तरापारगैर्नरैः हतनागमहानक्रा
परलोकवहाशिवा ३३ ऋष्टिखड्गमहानौकागृध्रकंकबलप्लवा पुरुषादानुचरिताभीरूणां
कश्मलावहा ३४ नदीयोधस्यसंग्रामेतदस्यावभृथंस्मृतं वेदीयस्यत्वमित्राणांशिरोभिश्चप्रकी
र्यते ३५ अश्वस्कंधैर्गजस्कंधैस्तस्यलोकाययथामम पत्नीशालाकृतायस्यपैरवाणांवाहिनीमुखं ३६

श्री· शां·रा· टी· ९८

हविर्द्धानंस्रवाहिन्यास्तदस्याऽकर्मनीषिणः सदस्यादक्षिणायोधाआग्नीध्रश्चोत्तरांदिशं ३७ शत्रुसेना
कलत्रस्यसर्वलोकानदूरतः यदात्मभयतोव्यूहेभवत्याकाशमग्रतः ३८ सास्यवेदीतदायज्ञैर्नित्यंवे
दास्त्वयोग्नयः यस्तुयोधःपराङ्गुत्तःसंत्रस्तोहन्यतेपरैः ३९ अप्रतिष्ठःसनरकंयातिनास्त्यत्रसंशा
यः यस्यशोणितवेगेनवेदिस्यात्संपरिप्लुता केशमांसास्थिसंपूर्णासगच्छेत्परमांगतिं यस्तुसे
नापतिंहत्वातद्यानमधिरोहति ४१ सविष्णुविक्रमक्रामीबृहस्पतिसमःप्रभुः नायकंतत्कुमारंवा
योवास्यात्तत्रपूजितः ४२ जीवग्राहंप्रगृह्णातितस्यलोकायथामम आहवेतुहतंशूरंनशोचेतकथंचा
न ४३ अशोच्योहिहतःशूरःस्वर्गलोकेमहीयते नह्यन्नंनोदकंतस्यनस्नानंनाप्यशौचकं ४४ हतस्य
कर्तुमिच्छन्तितस्यलोकान्शृणुष्वमे वराप्सरःसहस्राणिशूरमायोधनेहतं ४५ त्वरमाणाभिधावं
तिममभर्ताभवेदिति एतत्तपश्चपुण्यंचधर्मश्चैवसनातनः ४६ चत्वारश्चाश्रमास्तस्ययो
युद्धमनुपालयेत् वृद्धबालौनहन्तव्यौनचस्त्रीनैवपृष्ठतः ४७ तृणा
पूर्णमुखश्चैवतवास्मीतिचयोवदेत् जंभंवृत्रंबलंपा
कंशतमायंविरोचनं ४८ ॥

४९ ५० अष्टनवतितमः अत्राप्यु अत्रशूरप्रोत्साहनेविषये मैथिलःजनकः १ यज्ञोपवीतीत्यनेनसंग्रामस्ययज्ञत्वात्तत्रा
दुर्वीर्यंचैवनमुचिंनैकमायंचशांबरं विप्रचित्तिंचदैतेयंदनाःपुत्रांश्चसर्वशः ४९ प्रह्लादंचनिह
त्याजौततोदेवाधिपोभवं भीष्मउ० इत्येतच्छक्रवचनंनिशम्यप्रतिगृह्यच योधानामात्मनःसि
द्धिमंबरीषोभिपन्नवान् ५० इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मे ९८ भीष्मउ० अत्राप्यु
दाहरंतीममितिहासंपुरातनं प्रतर्दनोमैथिलश्चसंग्रामंयत्रचक्रतुः १ यज्ञोपवीतीसंग्रामेजन
कोमैथिलोयथा योधानुद्धर्षयामासतन्निबोधयुधिष्ठिर २ जनकोमैथिलोराजामहात्मासर्वत
त्ववित् योधान्स्वान्दर्शयामासस्वर्गंनरकमेवच ३ अभीतानामिमेलोकाभास्वंतोहंतपश्यत
पूर्णागंधर्वकन्याभिःसर्वकामदुहोक्षयाः ४ इमेपलायमानानांनरकाःप्रत्युपस्थिताः अकीर्तिः
शाश्वतीचैवपतितव्यमनंतरं ५ तान्दृष्ट्वारीन्विजयतभूत्वासंत्यागबुद्धयः नरकस्याप्रतिष्ठस्या ॥
माभूतवशवर्तिनः ६ त्यागमूलंहिशूराणांस्वर्गद्वारमनुत्तमं इत्युक्तास्तेनृपतिनायोधाःप ५
रपुरंजय ७ अजयंतरणेशत्रून्हर्षयंतोनरेश्वरं तस्मादात्मवतानित्यंस्थातव्यंरणमूर्द्धनि ८ गा शां
जानांरथिनोमध्येरथानामनुसादिनः सादिनामंतरेस्थाप्यंपादातमपिदंशितं
प्रायेणपनभाव्यमितिदर्शितं २ दर्शयामासयोगबलेन ३ ८ राजानांमध्येरथिनःरथिनांमध्येसादिनःसादिनांमध्येपा

१० ११ नात्युत्सारयेन्नातिद्रावयेत्पराहन्तिभयात् १२ तदेवाह पुनरिति १३ १० नवनवतितमः ९९ यथानयंतिभीता
यपवंव्यूहते राजासनित्यंजयतिद्विषः तस्मादेवंविधातव्यंनित्यमेवयुधिष्ठिर १० सर्वेस्वर्गतिमि
च्छंतिस्वयुद्धेनातिमन्यवः लोभयेयुरनीकानिसागरंमकरायथा ११ हर्षयेयुर्विषण्णांश्चव्य
वस्थाप्यपरस्परं जिताचभूमिरेतत्तभग्नान्नात्युत्सारयेत् १२ पुनरावर्तमानानांनिराशानां
वजीविते वेगःसुदुःसहोराजंस्तस्मान्नात्युत्सारयेत् १३ नहिप्रहर्तुमिच्छंतिशूराःप्रद्रवतांभृ
शं तस्मात्पलायमानानांकुर्यान्नात्युत्सारणं १४ चराणामचराश्चन्नमदंष्ट्रादंष्ट्रिणामपि अ
पःपिपासतामन्नमन्नंशूरस्यकातरः १५ समानपृष्ठोदरपाणिपादाःपराभवंभीरवोवैव्रजं
ति अतोभयार्ताःप्रणिपत्यभूयःकृत्वांजलीनुपतिष्ठंतिशूरान् १६ शूरबाहुषुलोकोयंलंवतेपु
त्रवत्सदा तस्मात्सर्वास्ववस्थासुशूरःसंमानमर्हति १७ नहिशौर्यात्परंकिंचित्त्रिषुलोकेषुवि
द्यते शूरःसर्वंपालयतिसर्वंशूरेप्रतिष्ठितं १८ इतिश्रीमहाभारतेशांतौराजधर्मेविजीगीषमाणा
वृत्ते ९९ युधिष्ठिरउ० यथाजयार्थिनःसेनांनयंतिभरतर्षभ ईषद्धर्मंप्रपीडापितन्मेब्रूहिपिताम
ह १ भीष्मउ० सत्येनहिस्थितोधर्मउपपत्यातथापरे साध्वाचारतयाकेचित्तथैवौपयिकादपि २
न पिराजभयप्रदर्शनेनपुनरस्तंर्वति १ सत्यंतत्रधर्मःउपपत्तिर्मरणानिश्चयः साध्वाचारःशिष्टाचारः औपयिकउक्तभयदर्शन

सिद्धार्थानस्मद्यः फलानतेषांचयेऽर्थधर्मयोर्निर्मर्यादास्तेपरिपंथिनोनाशकाभवंति ३ तेषांदस्यूनांनैगमंवेदोक्तमुपाय
४ प्रतीति वक्रांवक्रयैवनाशयेत् ५ अमित्रानिवर्तांतिहृतिप्रबाधनेबाधेत ६ गजानांचर्माणिबाणघातत्राणानि

उपाययमीन्वक्ष्यामिसिद्धार्थानर्थधर्मयोः निर्मर्यादादस्यवस्तुभवंतिपरिपंथिनः ३ तेषांप्रति
विघातार्थंप्रवक्ष्याम्यथवैदिकं कार्याणांसर्वसिद्धार्थंतानुपायान्निबोधमे ४ उभेप्रज्ञेवेदितव्या
ऋज्वीवक्राचभारत जानन्वक्रांनसेवेतप्रतिबाधेतचागतान् ५ अमित्राएवराजानंभेदेनोपचरंत्यु
ततोराजानिहंतिजानन्यथामित्रान्प्रबाधते ६ गजानांपार्श्वचर्माणिगोवृषाजगराणिच शल्य
कंटकलोहानितनुत्रचमराणिच ७ शितपीतानिशस्त्राणिसन्नाहाःपीतलोमहिताः नानारंजनर
क्ताःस्युपताकाःकेतवश्चह ८ ऋष्टयस्तोमराःखङ्गानिशितास्त्रपरश्वधाः फलकान्यथचर्मा
णिप्रतिकल्प्यान्यनेकशः ९ अभिनीतानिशस्त्राणियोधाश्चकृतनिश्चयाः चैत्र्यांवामार्गशीर्ष्यां
वासेनायोगाःप्रशस्यते १० पक्वसस्याहिपृथिवीभवत्यंबुमतीतदा नैवातिशीतोनात्युष्णःका
लोभवतिभारत ११ तस्मात्तदायोजयेतपरेषांव्यसनेथवा एतेहियोगाःसेनायाःप्रशस्ताःपर
बाधने १२ जलवान्तृणवान्मार्गःसमोगम्यःप्रशस्यते चारैःसुविदिताभ्यासःकुशलैर्वनगोचरैः
१३ नह्यवाप्येतशक्येतगंतुमस्त्रगणोणिव तस्मात्सेनास्ततानवयोजयंतिजयार्थिनः १४ ॥

गवादीनांशल्यादीनि ७ १० १२ १४ ॥

श्री॰ शां॰ रा॰ टी॰ १६

१५ १७ उपन्यासं न्यासस्यवननिक्षेपस्यसमीपे अवतरणां पदातीनां गहनं च न्यासस्यैव कार्यं उपास्याः सावतरणामिति पाठे
सदानं यथास्यात्तथा जना उपास्या इति पूर्वान्वयि पदातीनां गूहनं पदार्थं वचनार्थं अथ निलीय आगतशत्रुप्रतिघातं कुर्यात् १८

उग्रतः पृष्ठतो नीकं शत्रोश्चापि कुलोद्गतं आवासस्तोयवान् दुर्गः पक्षमार्गः प्रशस्यते १५ परेषा
मुपसर्पाणां प्रतिषेधस्तथा भवेत् आकाशं तु वनाभ्यासं मन्यन्ते गुणवत्तरं १६ बहुभिर्गुणजातै
श्च ये युद्धकुशला जनाः उपन्यासो भवेत्तत्र बलानां नातिदूरतः १५ उपन्यासावतरणां पदातीनां
च गूहनं अथ शत्रुप्रतीघातमापदर्थं परायणं १६ सप्तर्षीन् पृष्ठतः कृत्वा युध्येयुरचला इव अनेन ॥
विधिना शत्रून् जिगीषेतापि दुर्जयात् १७ यतो वायुर्यतः सूर्यो यतः शुक्रस्ततो जयः पूर्वं पूर्वं ज्यायः
यथा सन्निपाते युधिष्ठिर १८ अकर्दमामनुदकाममर्यादामलोष्टकां अश्वभूमिं प्रशंसन्ति ये युद्ध
कुशला जनाः १९ अपंकागर्तरहिता रथभूमिः प्रशस्यते नीचद्रुमा महाकक्षा सोदका हस्तियो
धिनां २२ बहुदुर्गा महाकक्षा वेणुवेत्रसमाकुला पदातीनां क्षमा भूमिः पर्वतोपवनानि च २३
पदातिबहुला सेना दृढा भवति भारत रथाश्वबहुला सेना सुदिनेषु प्रशस्यते २४ पदातिनागब
हुला प्रावृट्काले प्रशस्यते गुणानेतान् प्रसंख्याय देशकालौ प्रयोजयेत् एवं संचिन्त्य यो याति ति

२० अमर्यादी सेतुप्राकारादीनां २१ २२ सुदिनेषु वृष्टिवर्जितदिनेषु २४ प्रसंख्याय सम्यग्विचार्य तिथिना नक्षत्रेण च पूजितः आशीः।

॥ ५४ ॥ १५

२६ २७ उपन्यासात् सङ्केतादित्युपायात् बहिस्त्यागार्थं चरतो बहिश्चरान् अल्पान् उपन्यासात् त्यागार्हान्
न् २८ राजद्वारेऽमात्यद्वारे वा ये वर्गिणः समुदायाधिपतयस्तानभिघातयेदिति प्रपूर्वेण संबंधः २९ अनीकं परकीयं

विजयं लभते नित्यं सेनां सम्यक् प्रयोजयन् प्रहृष्टान् लब्धचित्तान् श्रान्तान् प्रकीर्णानभिघातयेत्
मोहे प्रयाणे चलने पानभोजनकालयोः अतिक्षिप्तान् व्यतिक्षिप्तान् निहतान् प्रतनूकृतान्
२७ अविश्रब्धान् कृतारम्भानुपन्यासात् प्रतापितान् बहिश्चरानुपन्यासान् कृतवेषमानुसारिणः
२८ पारम्पर्यागते द्वारे ये केचिद्दिद्गुवर्तिनः परिचर्यावतो द्वारे ये च केचन वर्गिणः २९ अनीकं
ये विभिन्दन्ति भिन्नं संस्थापयन्ति च समानाशनपानास्ते कार्या द्विगुणवेतनाः ३० दशाधिप
तयः कार्याः शताधिपतयस्तदा ततः सहस्राधिपतिं कुर्याच्छूरमतन्द्रितं ३१ यथामुख्यान्सन्नि
पात्य वक्तव्याः संशपामहे विजयार्थं हि संग्रामे न त्यक्ष्यामः परस्परं ३२ इहैव ते निवर्तन्तां ये च के
चन भीरवः ये घातयेयुः प्रवरं कुर्वाणास्तुमुलं प्रति ३३ न सन्निपाते प्रदरं वधं वा कुर्युरीदृशाः
आत्मानं च स्व पलायनन्हन्ति संयुगे ३४ अर्थनाशो वधोऽकीर्तिरयशश्च पलायने अमनो
ज्ञास्तथा वाचः पुरुषस्य पलायने ३५ ॥

३० ३१ सन्निपात्य एकीकृत्य ३२ ३३ प्रदरं भङ्गं प्रदरः शरभङ्गयोरिति विश्वः प्रदरं पलायनमित्येके वधं वा स्वीयानां ३४ ३५

नः अस्मात्संबंधिनां द्विषतां पुरुषस्य द्रव्यनाशादिकमस्मिन्निति द्वयोः संबंधः ३६ राशिः योधसंघः शरीरं वा तस्य वर्द्धनाद्दृष्ट्या ज
न्मानश्यन्त्यर्थः ३७ पलायिनं जयिनः प्रत्युद्याति यत्तत्तदसत्यतममित्यपकृष्यते ३८ ३९ परावग्लानिः मृत्युः प्रहारो वा ४० च

प्रतिध्वस्तोऽहं तस्य न्यस्त सर्वाङ्गस्य च अमित्रेऽवरुद्धस्य द्विषतामस्तु नः सदा ३६ मनुष्यापसदा ये
ते ये भवंति पराङ्मुखाः राशिवर्द्धनमात्रास्ते नैव ते प्रेत्य नो इह ३७ अमित्रा हृष्टमनसः प्रत्युद्यांति पा
लायिनं जयिनस्तु नरास्तात वंदनैर्मंगलेन च ३८ यस्य स्म संग्रामगता यशो विघ्नंति शत्रवः तदसह्य
तमं दुःखमहं मन्ये वधादपि ३९ जयं जानीत धर्मस्य मूलं सर्वसुखस्य च या भीरूणां परा ग्लानिः
शूरस्तामधिगच्छति ४० ते वयं स्वर्गमिच्छंतः संग्रामे त्यक्तजीविताः जयंतो वध्यमाना वा प्राप्नु
याम सद्गतिं ४१ एवं संशप्तशपथाः समभित्यक्तजीविताः अमित्रवाहिनीं वीराः प्रतिगाहंत्यभीर
वः ४२ अग्रतः पुरुषानीकमसिचर्मवतां भवेत् पृष्ठतः शकटानीकं कलत्रं मध्यतस्तथा ४३
परेषां प्रतिघातार्थं पदातीनां च गूहनं अपि ह्यस्मिन् रिपौ ये स्युर्वृद्धा भवेयुर्ये पुरोगमाः ४४ ये पुरस्तादभिम
ताः सत्ववंतो मनस्विनः ते पूर्वमभिवर्त्तेरंस्त्वेतानेव तवेजना ४५ अपि चोद्धर्षणं कार्यं भीरूणामपि यत्न
लतः स्कंधदर्शनमात्रात्तु तिष्ठेयुर्वा समीपतः ४६ ॥

मिवतां पुरुषाणामनीकं विभक्ति लोपः आर्षः ४३ ये पुरो भवे १९१
युस्ते पदातीनां हंहणां कुर्युः ४४ ४५ स्कंधं स्यात् नृपतावंसे सांपराये समूह्योरिति मेदिनी समूहमात्रार्थं वा तिष्ठेयुः ४६ ॥

संहतान्अन्योन्यंश्लिष्टान्स्वान्परैःसहयोधयेत्सेनापतिः तद्देवास्सूचीति ४७ ५० सेनानीतिःशततमः १०० किं १ आ

संहतान्योधयेदल्पान्कामंविस्तारयेद्बहून् सूचीमुखमनीकंस्यादल्पानांबहुभिःसह ४७
संप्रयुक्तेनिकृष्टेवासत्यंवायदिवानृतं प्रगृह्यबाहून्क्रोशेतभग्नाभग्नाःपरेइति ४८ आगतंमे
मित्रबलंप्रहरध्वमभीतवत् सत्ववंतोभिधावेयुःकुर्वंतोभैरवान्रवान् ४९ क्ष्वेडाःकिलकि
लाशब्दाःक्रकचागोविषाणिकाः भेरीमृदंगपणवान्नादयेयुःकुंजरान् ५० इतिश्रीमहा
भारतेशांतिपर्वणिराजधर्मे १०० युधिष्ठिरउ० किंशीलाःकिंसमाचाराःकथंरूपाश्चभारत
किंसंनाहाःकथंशस्त्राजनाःस्युःसंगरेक्षमाः १ भीष्मउ० यथाचरितमेवात्रशस्त्रपत्रंवि
धीयते आचारादेववीरपुरुषस्तथाकर्मसुवर्तते २ गांधाराःसिंधुसौवीरानखरप्रासयोधिनः
आभीरवःसुबलिनस्तद्बलंसर्वपारगं ३ सर्वशस्त्रेषुकुशलाःसत्ववंतोह्युशीनराः प्राच्या
मातंगयुद्धेषुकुशलाःकूटयोधिनः ४ तथायवनकांबोजामथुरामभितश्चये एतेनि
युद्धकुशलाःदाक्षिणात्याऽसिपाणयः ५ सर्वत्रशूराजायंतेमहासत्वामहाबलाः प्रायएव
समुद्दिष्टालक्षणानितुमेशृणु ५ ॥ चरितंकुलदेशाचारागतंपत्रंवाहनं २ ४ नियुद्धंबाहुयुद्धं दाक्षि
णात्याअसिपाणयइतिच्छेदःसंधिरार्षः ५ सर्वत्रसर्वदेशेसमुद्दिष्टाःप्रख्याताः ६ ॥

श्री॰
शा॰ रा॰
टी॰
१९२

पारावतकुलिंगाभाः कुलिंगो भूमिकूष्मांडे मतंगजभुजंगयोरिति मेदिनी सर्पाभतंवघ्नरलतणा कुलिंदाभा इति पाठेऽपि कुलिंदः पक्षिविशेषः ७ ८ करभउष्ट्रः ९ १२ जिह्माक्षाः कुटिलदृशः प्रललाटाः उन्नतकपालाः १४ १५ दीप्तः पिंगलः पिंडिकाजा

सिंहशार्दूलवाक्त्राः सिंहशार्दूलगामिनः पारावतकुलिंगाभाः सर्वे शूराः प्रमाथिनः ७ स्रगास्व राद्दीपितेत्राश्चऋषभाभास्तरस्विनः प्रमादिनश्च मंदाश्च क्रोधनाः किंकिणीस्वनाः ८ मेघस्वनाः क्रोधमुखाः केचित्करभसंनिभाः जिह्मनासाग्रजिह्वाश्च हरगाहरपातिनः ९ विडालकज्जतन वक्त्रकेशास्तनुत्वचः शीघ्राश्चपलहृन्नाश्च तेभवंतिडरासदाः १० गोयानिमीलिताः केचित्कडा प्रकृतयस्तथा तरंगगातिनिर्घोषास्ते नराः पारयिष्णवः ११ ह्रस्वंहता स्तनवोऽव्यूढोरस्काः ह्रस्वे स्थिताः प्रवादितेषु कुप्यंति हृष्यंति कलदेषु च १२ गंभीरानाभिनिस्सृताक्षाः पिंगाक्षा भ्रुकुटीमुखाः नकुलाभास्तथा चैव सर्वे शूरास्तनूत्पजः १३ जिह्माक्षाः प्रललाटाश्च निर्मांसहनवोऽपि च वज्रबाहुं गुलीचक्राः कृशायमनिसंततताः १४ प्रविशंति च वेगेन संपरायेषु पस्थिते वारणा इव संमत्तास्ते भवं तिडरासदाः १५ दीप्तस्फुटितकेशांताः स्थूलपार्श्वहनूमुखाः उन्नतांसाः पृथुग्रीवा विकटाः स्थूलपिं डिकाः १६ उद्धता इव सुग्रीवा विनता विहगा इव पिंडशीर्षा लिवक्त्राश्च वृषदंशमुखास्तथा १७ ॥ तुनोयः

पश्चाद्भागः १६ सुग्रीवा वासुदेवा इव उद्धता विनता विहगाः गरुडाः नहतउद्धताः उत्पतंतः पिंडशीर्षाः हृतशिरसः अतिवक्राः विस्ती

पिंगलाः संहितार्थसमाश्रिता बहुसंख्यागमानैः ॥ १

८ अंत्यजाः प्रांतदेशोद्भवाः कैवर्तभिल्लादयः ९९ २० पक्वोन्नरथाततमः ९१ जयिष्णा १ २ दैवतंसंपतिः पुरोहित
उग्रसूत्रामन्त्रमंतोयुद्धेष्वाराव सारिणः अथर्म्मतावलिमाश्रद्धोरारौद्रप्रदर्शनाः ८ त्यक्ता
त्मानः सर्वपते कुलत्राजातिवर्तिनः पुरस्कार्यास्तदासेन्ये हन्यंतेऽन्नेतिचाप्रिये ९ अथार्मि
काभिन्नहृताः सांत्वेनेषांपराभवः एवमेवप्रकुप्यंतिरात्रोप्येतेह्यभीन्नाशः २० इतिश्रीमहा
भारतेशांतिपर्वणिराजधर्मेविजिगीषमाणाह्वने ९९ युधिष्ठिरउ॰ जयिन्याः कानिरूपाणि
भवंतिभरतर्षभ पृतनायाः प्रशस्तानितानिवेच्छामिवेदितुं १ भीष्मउ॰ जयिन्यायानिरू
पाणिभवंतिभरतर्षभ पृतनायाः प्रशस्तानितानिवक्ष्यामिसर्वशः २ दैवंपूर्वंप्रकुपितेमानु
षेकालचोदिते तद्विद्वांसोनुपश्यंतिज्ञानदिव्येनचक्षुषा ३ प्रायश्चित्तविधिंचात्रजपहोमा
श्चतद्विदः मंगलानिचकुर्वंतिशमयंत्यहितानिच ४ उदीर्णमनसोयोधावाहनानिचभारा
त यस्यांभवंतिसेनायांध्रुवंतस्यांपरोजयः ५ अन्वेनंवायवोयांतितथैवेंद्रधनूंषिच अ
नुप्लवंतेमेघाश्चतथादित्यस्यरश्मयः ६ गोमायवश्चानुकूलाबलगृध्राश्चसर्वशः अर्हयेयु
र्यदासेनांतदासिद्धिरनुत्तमा ७ प्रसन्नभाः पावकश्चोर्ध्वरश्मिः प्रदक्षिणावर्तशिखोविधूमः पु
संपत्तिश्चजयलक्षणमित्याहद्वाभ्यांदैवेति ३ ४ ५ अनुयांतीतिसंबंधः ६ ७ ८ ॥

श्री. अप्रतीयाः अनुकूलाः १ ११ १४ उष्ट्रः काक इति शेषः १५ १६ १७ १८ १९ ॥

ग्रं. रा. गंभीरशब्दाश्च महास्वनाश्च शंखाश्च भेर्यश्च नदंति यत्र युयुत्सवः संप्रतिमा भवंति जयस्यैतद्भाविनो

टी. रूपमाहुः इष्टा मृगाः पृष्ठतो वामतश्च संप्रस्थितानां च गमिष्यतां च जिघांसतां दक्षिणाः सिद्धिमाहु

१९३ र्ये त्वग्रतस्ते प्रतिषेधयंति १० मांगल्यशब्दाञ्छकुना वदंति हंसाः क्रौंचाः शतपत्राश्च चाषाः हृष्टा यो

धाः सत्त्ववंतो भवंति जयस्यैतद्भाविनो रूपमाहुः ११ शस्त्रैर्यंत्रैः कवचैः केतुभिश्च सुभानुभिर्मुखवर्णैश्च

यूनां भ्राजिष्मती दुःप्रतिवीक्षणीया येषां चमूस्तेभिभवंति शत्रून् १२ शुश्रूषवश्चानभिमानिनश्च

परस्परं सौहृदमास्थिताश्च येषां योधाः शौचमनुष्ठिताश्च जयस्यैतद्भाविनो रूपमाहुः शब्दाः स्पर्शास्त

था गंधा विचरंति मनःप्रियाः धैर्यं चाविशते योधान् विजयस्य मुखं च तत् १४ इष्टा वामाः प्रवि

ष्टस्य दक्षिणाः प्रविविक्षतः पश्चात्संसाधयंत्यर्थं पुरस्ताच्च निषेधयति १५ संभृत्य महतीं सेनां चतु

रंगां युधिष्ठिर साम्नैव वर्तयेः पूर्वं प्रयतेथास्ततो युधि १६ जघन्य एष विजयो यद्युद्धं नाम भारत

याहच्छिको युधि जयो दैवो वेति विचारणा १७ अपामिव महावेगास्त्रस्ता इव महामृगाः दुर्निवा

र्यतमा चैव प्रभग्ना महती चमूः १८ भग्ना इत्येव भज्यंते विद्वांसोपि न कारणं उदारसारा महती रुरु १९३

संघोपमा चमूः १९ ॥

पंचाशतंपंचाशत् २० २१ सन्निपातोयुद्धं २२ बाधतेभीरुत् २३ समितिंसंग्रामं स्यंदतिक्षिपति विजयस्यविजिगीषमाणस्यवशा
त्राणिक्षिपति २४ विषयोदेशः २५ योगंसंधिं २६ अंतराणिशत्रोःपरःश्रेष्ठस्तेनसंधिंचकुर्यात्भयेनसंधिनाशत्रूतेजनेनचयुग

पत्स्यरक्ताः संग्रहास्तपक्षप्राणाः सुनिश्चिताः अपिपंचाशतंशूरान्मर्द्दतिपरवाहिनी २० अपि
वापंचषट्सप्तसंहताः कृतनिश्चयाः कुलीनाःसुजिताः सम्यग्विजयंतीहशात्रवान् २१ सन्निपातोन
मंतव्यःशक्येसतिकथंचन सामभेदप्रदानानांयुद्धमुत्तरमुच्यते २२ संदर्शनैवसेनायाभयंतीव्रप्रबा
धते वज्राद्विवप्रज्वलितादियंकातरपतिष्यति २३ अभिप्रयातांसमितिंज्ञात्वायेप्रतियांत्यथा तेषां
स्यंदतिगात्राणियोधानांविजयस्यच २४ विषयोव्यथतेराजन्सर्वःसस्थाणुजंगमः अस्त्रप्रता
पतप्तानांमज्जासीदतिदेहिनां २५ तेषांसांत्वंक्रूरमिश्रंप्रणेतव्यंपुनःपुनः संपीड्यमानाहिपरैर्यो
गमायांतिसर्वतः २६ अंतराणिचभेदार्थंचरानभ्यवचारयेत् यश्चतस्मात्परोराजातेनसंधिः
प्रशस्यते २७ नहितस्यान्यथापीडाशक्याकर्तुंतथाविधा यथासार्द्धममित्रेणसर्वतःप्रतिबाध
नं २८ क्षमावैसाधुमायातिनह्यसाधुंक्षमासदा क्षमायाश्चाक्षमायाश्चपार्थविद्धिप्रयोजनं २९

पत्स्युक्तेनन्ययेणपरंजयेदितिसमुदायार्थः २० २९ ननुएवंपरंक्षमापयेदेवकिंकपटेनेत्याह क्षमेति २९ ॥

अस्मिन्नमावति ३॰ असंताप्यक्रजह्णतंवंशादिषुनर्वक्रीभवत्यतः शांतुसंतापत्तमांकुर्यादितिशंबरस्यदैत्यस्यमतं ३१ स्व

विजित्यत्वममाणस्ययशोराज्ञोविवर्द्धते महापराधेह्यप्यस्मिन्विश्वसंत्यपिशत्रवः ३॰ मन्यते
कर्षयित्वातत्त्मामाधीतिशंबरः असंतमंतयद्दाहयत्यपतिप्रहतितुनः ३१ नैतत्प्रशंसंत्याचा
र्यानत्तस्माधुनिदर्शनं अक्रोधनाविनाशेननियंतव्याः स्वपुत्रवत् द्वेष्योभवतिभूतानामुग्रोराजा
युधिष्ठिर मृदुमप्यवमन्यतेतस्मादुभयमाचरेत् ३३ प्रहरिष्यन्प्रियंब्रूयात्प्रहरन्नपिभारत प्रहृ
त्यचकृपायीतशोचन्निवरुदन्निव ३४ नमेप्रियंयन्निहताः संग्रामेमामकैर्नरैः नचकुर्वंतिमेवा
क्यमुच्यमानाः पुनः पुनः ३५ अहोजीवितमाकांक्षन्नेदृशोवधमर्हति सुदुर्लभाः सुपुरुषाः
संग्रामेष्वपलायिनः ३६ कृतंममाप्रियंतेनयेनायंनिहतोमृधे इतिवाचावदन्हंतृन्पूजयेतर
होगतः ३७ हंतृणामाहतानांचयत्कुर्युरपराधिनः क्रोशेद्वाहुंप्रगृह्यापिचिकीर्षञ्जनसंग्रहं ३८ ॥
एवंसर्वास्ववस्थासुसांत्वपूर्वंसमाचरेत् प्रियोभवतिभूतानांधर्मज्ञोवीतभीर्नृपः ३९ विश्वासंचात्र
गच्छंतिसर्वभूतानिभारत विश्वस्तः शक्यतेभोक्तुंयथाकाममुपस्थितः ४॰ तस्माद्विश्वासयेद्राजा
सर्वभूतान्यमायया सर्वतः परिरक्षेच्चयोमहींभोक्तुमिच्छति ४१ इतिभारतेशांतौराज॰ सेनानीतिः

मतमाहनैतदिति ३२ ३६ स्वीयानहतान्बहूनिवलोकप्रीत्यर्थंशोचेदित्याह हंतृणामिति ३७ ३८ विश्वस्तोजनः ३९ ४॰ द्विषा

॥ ९२ ॥ ततः सैन्यनीतिः प्रमाण १९४

कथं १ ४ व्यतिषंगेणामिश्रणेन युद्धेनेत्यर्थः साधारणः अनियतः ५ प्रत्युवाचगुरुः ६ ७ निहतः सावधानः सार्द्धश्लोकः

युधिष्ठिरउ॰ कथंमृदौकथंतीक्ष्णेमहापक्षेचपार्थिव आदौवर्त्तेतनृपतिस्तन्मेब्रूहिपितामह १ भी
ष्मउ॰ अत्राप्युदाहरंतीममितिहासंपुरातनं बृहस्पतेश्चसंवादमिंद्रस्यचयुधिष्ठिर २ बृहस्पतिंदेवपति
रभिवाद्यकृतांजलिः उपसंगम्यपप्रच्छवासवःपरवीरहा ३ इंद्रउवाच अहितेषुकथंब्रह्मन्प्रवर्त्ते
यमतंद्रितः असमुच्छिद्यचैवैतान्नियच्छेयमुपायतः ४ सेनयोर्व्यतिषंगेणजयःसाधारणोभवेत्
किंकुर्वाणंनमांजह्याज्ज्वलिताश्रीःप्रतापिनी ५ ततोधर्मार्थकामानांकुशलःप्रतिभानवान् राजध
र्मविधानज्ञःप्रत्युवाचपुरंदरं ६ बृहस्पतिरुवाच नजातुकलहेनेच्छेन्नियंतुमपकारिणः बा
लैरासेवितंह्येतद्यदमर्षोयदक्षमा ७ नशत्रुर्विवृतःकार्योवधमस्याभिकांक्षता क्रोधंभयंचहर्षंच
नियम्यस्वयमात्मनि ८ अमित्रमुपसेवेतविश्वस्तवदविश्वसन् प्रियमेववदेन्नित्यंनाप्रियंकिंचिदा
चरेत् ९ विरमेच्छुष्कवैरेभ्यःकंठायासंचवर्जयेत् यथावैतंसिकोयुक्तोद्विजानांसदृशस्वनः तान्द्वि
जान्कुरुतेवश्यांस्तथायुक्तोमहीपतिः वशंचोपनयेच्छत्रून्निहन्याच्चपुरंदर १० ननित्यंपरिभूयारी
न्सुखंस्वपितिवासव जागर्त्त्येवहिदुष्टात्मासंकरेग्निरिवोत्थितः ११ ॥

८ ९ कंठायासानुरावरवं
वितंसःपक्षिबंधनोपायस्तदुपजीवीवैतंसिकः ९ १० स्वपितिमहीपतिरित्यनुकर्षः संकरोग्निचटत्कारइतिमेदिनी ११ ॥

सामान्येप्रतिष्ठिते रिपुःवशीकृत्वाउपशमनार्थो लंभितार्थः ज्ञातश्चेत्सम्यक्कालेप्रहरेदितिद्वयोःसंबंधः १४ १५ किंचास्यदंडसेनां
चभेदेनदूषयेत्सः १६ प्रच्छन्नंयथास्यात्तथाविचारयेत् मनसिविवसंधारयेत् १७ उपधैर्विषादिभिः फलितमाह नत्विति

नसन्निपातःकर्तव्यःसामान्येविजयेसति विश्वासैर्वोपशमनार्थोवशीकृत्वाप्रियःप्रभो १५
मंत्रयार्थ्यमहामात्यैर्मंत्रविद्भिर्महात्मभिः उपेत्यमानोवृत्तान्तोहृदयेनापराजितः १६ अथवा
स्यप्रहरेत्कालेकिंचिद्धिचलितेपदे दंडंचदूषयेदस्यपुरुषैरागमकोविभिः १६ आदिमध्यावसा
नेषुःप्रच्छन्नंचविचारयेत् बलानिदूषयेदस्यजानन्नेवप्रमाणतः १७ भेदेनोपप्रदानेनसंस
र्जेदौषधैस्तथा नत्वेवाल्पसंसर्गंरोचयेद्रिपुभिःसह १८ दीर्घकालमपीक्षेतनिहन्यादेव
शात्रवान् कालाकांक्षीहितंयद्यथाविश्रंभमाप्नुयुः नसद्यान्निविनिहन्याच्चद्रष्टव्योविजया
र्थवः १९ नशल्यंवाघट्टयतिनवाचाकृत्तेव्रणं प्राप्तेचप्रहरेत्कालेनचसंवर्त्ततेपुनः हं
तुकामस्यदेवेंद्रपुरुषस्यरिपुंप्रति २० योहिकालोव्यतिक्रामेत्पुरुषंकालकांक्षिणं
दुर्लभःसपुनस्तेनकालःकर्मचिकीर्षुणा २१ ॥

१८ यथाविश्रंभंविश्वासंप्राप्नुयुस्तथाकुर्यात् द्रष्टव्यःप्रदर्शनीयः १९ नेतिसार्द्धः रिपुंहंतुकामस्यपुनःकालोनसंवर्त्त
तेनोपसंपद्यते नप्राप्तेकालेप्रहरेदेवनतुकालांतरंप्रतीक्षेतेत्यर्थः २० २१ ॥

ओजः सामर्थ्यं शत्रोरकाले प्राप्ते सति स्वकार्येण साधयेत् तापितं प्रपीडयेत् काले च नातिक्रामेतेत्यर्थः २२ २४ चत्वारि मार्दवादीनि २५ मंत्रविप्लवभयाद् एकेनैव कर्त्तुं शक्यं तत्तेन प्रतिवक्तव्यं न बहून्प्रतीत्याह यदिति यच्छक्नोति निगूहितुं तत्कार्यं तेन प्रयच्छतीत्यर्थः २६

ओजश्च विनयेदेवं संगृह्णन्साधुसंमतं अकाले साधयेन्मित्रं च प्राप्ते प्रपीडयेत् २२ विहाय कामं क्रोधं च तथाहंकारमेव च युक्तो विवरमन्विच्छेदहितानां पुनः पुनः २३ मार्दवं दंड आलस्यं प्रमादश्च सुरोत्तम मायाः सुविहिताः शक्र सादयन्त्यविचक्षणं २४ निहत्यैतानि चत्वारि मायाः प्रतिविहाय च ततः शक्नोति शत्रूणां प्रहर्त्तुमविचारयन् २५ यदेवैकेन शक्येत गुह्यं कर्त्तुं तदाचरेत् यच्छन्ति सचिवा गुह्यं मिथो विश्रावयन्त्यपि २६ अशक्यमिति कृत्वा वा ततोऽन्यैः संविदं चरेत् ब्रह्मदंडमदृष्टेषु दृष्टेषु च चतुरंगिणीं २७ भेदं च प्रथमं युंज्यात्तूष्णीमपि तथैव च काले प्रयोजयेद्राजा तस्मिंस्तस्मिंस्तदा तदा २८ प्रणिपातं च गच्छेत काले शत्रोर्बलीयसः युक्तोऽस्य वधमन्विच्छेदप्रमत्तः प्रमाद्यतः २९ प्रणिपातेन दानेन वाचा मधुरया ब्रुवन् अमित्रमपि सेवेत न च जातु विशंकयेत् ३० ॥

अन्यैः सह संविदं संमतिं चरेत् यदि पूर्वोक्तं मंत्रं विभ्रयेदित्यर्थः ततश्चादृष्टेषु रहस्येषु ब्रह्मदंडं पुरोहितद्वारमभिचारं प्रयुंज्यात् दृष्टे प्रत्यक्षशत्रौ चतुरंगिणीमपि प्रयुंज्यादित्याह ब्रह्मेति २७ २९ न विशंकयेत् शंकापन्नं कुर्यात् ३० ॥

श्री॰
शां॰रा॰
टी॰
१९६

तदेवाह स्थानानीति निराकृताः स्वशत्रुभिः सहप्रीतिं कुर्वाणान्अन्यानश्शत्रुत्वेनपश्यति तदीयमित्रत्वेचनविश्वसेदितीत्य
र्थः २९ विविधवृत्तानां अस्थिराणां स्थिरचित्तएवभवेदित्यर्थः ३२ ३४ वेगवति प्रवृत्ते सति वप्रेनदे विवरणाद्बाधइतियोजना

स्थानानि शंकितानां च नित्यमेव विवर्जयेत् न च तेषां प्रविशेद्राजा राज्ञायस्तीह निराकृताः ३१
नह्यस्तो ऽदुष्करं कर्म किंचिदस्तिह राजन्नम यथा विविधवृत्तानामैश्वर्यममराधिप ३२ तथा वि
विधनाशानामपि संभव उच्यते यतते योगमास्थाय मित्रामित्रविचारयेत् ३३ मृदुमप्यव
मन्यन्ते तीक्ष्णादुद्विजते जनः मा तीक्ष्णो मा मृदुर्भूस्त्वं तीक्ष्णो भव मृदुर्भव ३४ यथा वप्रे वे
गवति सर्वतः संप्लुतोदके नित्यं विवरणाद्बाधस्तथा राज्यं प्रमाद्यतः ३५ न बहूनभियुञ्जीत
यौगपद्येन शात्रवान् साम्ना दानेन भेदेन दण्डेन च पुरंदर ३६ एकैकमेषां निष्पिंष्याच्छिष्टेषु नि
पुणं चरेत् न तु शक्नोति मेधावी सर्वानेवारभेत्तदा ३७ यदा स्यान्महती सेना ह्यनागरथाकु
ला पदातियन्त्रबहुला अनुरक्ता षडंगिनी ३८ यदा बहुविधां वृद्धिं मन्येत प्रतिलोमतः तदा
विवृत्य प्रहरेद्दस्यूनामविचारयन् ३९

३५ ३६ निपुणं कुशलं आरभेत पेष्टुमिति शेषः ३७ षडंगिनी रथतुर
गमातंगपदातिकोशवणिक्पथवती ३८ प्रतिलोमतः शत्रोः परतया विवृत्य प्रकटीभूय दस्यूनां दस्यून् ३९ ॥

१९६

उक्तमेवार्थं संगृह्णाति नसामेति बलवतिशत्रौसामनप्रशस्यते किंतर्हिदंडोपनिषत्रहस्यंदंडः नशत्रुर्विहृतःकार्यइत्यादि
नाप्राशुक्तमीत्याच्छलेनैवसमनाशनीयइत्यर्थः यतएवशत्रुषुमार्दवंयार्यंतिकिंनकार्यं नापियात्रिकंसदाकार्यं जयस्यानियत
त्वात् यात्रायांहिसस्यानांघातःसंकरक्रियाविषादिनाजलादीनांनाशनंभूयःपुनःपुनः प्रकृतेःसप्तवियायाः विचारणा
कथंकोशःकथममात्याइत्यादिसंदेहश्चापततितत्त्रयमपिनकार्यंहिंसामूलत्वात्चिंताहृद्विकरत्वाच्च तस्मात्कपटपूर्वकोदं

नसामदंडोपनिषत्प्रशस्यतेनमार्दवंशत्रुषुयात्रिकंसदा नसस्यघातोनचसंकरक्रियान
चापिभूयःप्रकृतेर्विचारणा ४१ मायाविभेदानुपसर्जनानितथैवपापंनयशास्त्रयोगात्
श्रोभिर्मनुष्यैरुपचारयेतपुरेषुराष्ट्रेषुचसंप्रयुक्तान् पुराणिचैषामनुसृत्यभूमिपाःपुरेषु
भोगानखिलानजयंति पुरेषुनीतिंविहितांयथाविधिप्रयोजयंतोबलवृत्रसूदन ४२

उपवक्ष्यानित्यर्थः ४१ एतदेवविवृणोति मायेति मायाविभेदानानाविधाःमायाःप्रयुंजीत ततउपसर्जनानिपरस्परमित्र
भेदाःशत्रूणामुत्थापनादीनि तत्तथैवशत्रुषुपापंकापटंचप्रयुंज्यात् कथंयशासःप्रयोगात् प्रयोगेहियशोनतनाशनीयंप्राकृफ
लोदयादयमनेनास्मास्वपकारश्चिंतितआसीदित्यकीर्तिमूढ्मंत्रतयानकुर्यात् किंतर्हिकुर्यादतआहश्रोभिरिति ४२ एषांप
नानशत्रूनपुरेषुतत्तत्स्थानेषुअनुसृत्यभोगांस्तदीयानजयंति नीतिंपुरेषुस्वीयेषु ४२ ॥

श्री॰ शां॰ रा॰ टी॰ १९७

अनुसरणमेवाऽस्य प्रदायेति एतेन मम ममामात्याः दुष्टाः सांत्वकारा जातं प्रति गता इति लोकसंवात्कीर्तयित्वा परेषां पुरे
षु राष्ट्रेषु च तान्योजयंति ४३ कृत्यामिव कृत्यां मृत्युकारिणीं विदित्वा ४४ ४७ संसृष्टं संसर्गमसंसृष्टश्च परश्च भाषते अ
प्रदाय गूढानि वसूनि राजन् प्रच्छाद्य भोगानवधाय च स्वान् दुष्टान्स्वदोषैरिति कीर्तयित्वा पुरे
षु राष्ट्रेषु च योजयंति ४३ तथैव चान्यैरपि शास्त्रवेदिभिः स्वलंकृतैः शास्त्रविधानदृष्टिभिः सु
शिक्षितैर्भाष्यकथाविशारदैः परेषु कृत्यामुपधारयेच्च ४४ इन्द्र उवाच कानि लिंगानि दुष्टस्य
भवंति द्विजसत्तम कथं दुष्टं विजानीयामेतत्पृष्टो ब्रवीहि मे ४५ बृहस्पतिरुवाच परोक्षमगुणा
नाह सद्गुणानभ्यसूयते परैर्वा कीर्त्यमानेषु तूष्णीमास्ते पराङ्मुखः ४६ तूष्णींभावेऽपि विज्ञे
यं न चेद्भवति कारणं निश्वासं चोष्ठसंदंशं शिरसश्च प्रकंपनं ४७ करोत्यभीक्ष्णं संसृष्टमसंसृ
ष्टश्च भाषते अदृष्टितो विकुरुते दृष्ट्वा वा नाभिभाषते ४८ पृथग्गत्वा समश्नाति नेदमद्य यथावि
धि आसने शयने याने भावा लक्ष्या विशेषतः ४९ आर्तिरार्ते प्रिये प्रीतिरेतावन्मित्रलक्षणं
विपरीतं तु बोद्धव्यमरिलक्षणमेव तत् ५० एतान्येव यथोक्तानि बुध्येथास्त्रिदशाधिप पुरुषा
णां प्रदुष्टानां स्वभावो बलवत्तरः ५१ इति दुष्टस्य विज्ञानमुक्तं ते सुरसत्तम निशाम्य शास्त्रतत्त्वा
र्थं यथावदमरेश्वर ५२॥
दृष्टितः परोक्षे प्रतिकूलमपि कार्यं न करोते ४८ ४९ ५० ५१ ५२ ॥

ति

१९७

५३ अुत्तरशततमः ९३ धार्मिको अधार्मिकस्य च्छलादिकं विधेयमित्युक्तस्य कर्त्तव्यं एच्छति धार्मिक इति धार्मिका

भीष्म उ० स तद्वचः शत्रुनिबर्हणो रतस्तथा च कारावितथं बृहस्पतेः चचार काले विजयाय चा
रिहावशांश्च शत्रूनतयत्पुरंदरः ५३ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे इन्द्रबृहस्पतिसंवादे
९३ युधिष्ठिर उ० धार्मिकोर्थानसंप्राप्य राजामात्यैः प्रबाधितः च्युतः कोशाच्च दंडाच्च सुखमिच्छ
न्कथं चरेत् १ भीष्म उ० अत्रायं क्षेमदर्शीय इतिहासोनुगीयते तं तेहं संप्रवक्ष्यामि तन्निबोध युधि
ष्ठिर २ क्षेमदर्शी नृपसुतः क्षीणबलः पुरा मुनिं कालकवृक्षीयमाजगामेति नः श्रुतं तं पप्र
च्छोपसंगृह्य कृच्छ्रामापदमास्थितः ३ राजोवाच अर्थेषु भागी पुरुष ईहमानः पुनः पुनः अ
लब्ध्वा मद्विधो राज्यं ब्रह्मन्किं कर्तुमर्हति ४ अन्यत्र मरणाद्दैन्यादन्यत्र परसंश्रयात् क्षुद्रादन्यत्र
चाचारात्तन्ममाचक्ष्व सत्तम ५ व्याधिना चाभिपन्नस्य मानसेनेतरेण वा धर्मज्ञश्च कृतज्ञश्च त्व
द्विधः शरणं भवेत् निर्विद्यति नरः कामान्निर्विद्य सुखमेधते त्यक्त्वा प्रीतिं च शोकं च लब्ध्वा बु
द्धिमयं सुखं ७ सुखमर्थाश्रयं येषामनुशोचामि तानहं मम ह्यर्थाः सुबहवो नष्टाः स्वप्न इवा
गताः ८ दुष्करं बत कुर्वंति महतः
स्यहीनसंपदो विजिगीषमाणस्य ९३ भागी भागार्हः ईहमानः यतमानः ४ ५
इतरेण शारीरेण ६ निर्विद्यति विरज्यते कामात् विषयभोगात् बुद्धिमयं वस्तुज्ञानजं पथ्यं १ ८ ९ ॥

११ १२ इयं निर्विघतीति श्लोकेन त्वया प्रोक्ता अहं च यच्च मम अस्ति तत्सर्वं अनित्यमिति जानता १२ नास्ति तत्त्वज्ञानात् १३ स
र्वं तन्नाभून्न भविष्यति इति सममस्ममयैव स्थितिरिति भावः १४ यतः पूर्वं प्राचीनसमाहारे राज्ञा समुदाये यान्यादिकं यच्च पूर्वं परे

इमामवस्थां संप्राप्तं दीनमार्तं श्रिया च्युतं यदन्यत्स्त्वमशोहत्तद्ब्रूसन्नतुशाधिमां ९ कौशल्येनै
वमुक्तस्तु राजपुत्रेण धीमता मुनिः कालकवृक्षीयः प्रत्युवाच महाद्युतिः १० मुनिरुवाच पुरा
त्तादेवते बुद्धिरियं कार्या विजानता अनित्यं सर्वमेवेतद्देहश्च मम चास्ति यत् ११ यत्किंचिन्मन्यसेऽ
स्मीति सर्वं तन्नास्ति विद्धि तत् एवं न व्यथते प्राज्ञः कृच्छ्रामप्यापदं गतः १२ यद्धि भूतं भविष्यच्च सर्वं
तन्न भविष्यति एवं विदितवेद्यस्त्वमधर्मेभ्यः प्रमोदये १४ यच्च पूर्वे समाहारे यच्च पूर्वे परे परे
सर्वं तन्नास्ति चैव तज्ज्ञात्वा कोऽनुसंज्वरेत् १५ भूत्वा च न भवत्येतदभूत्वा च भविष्यति शोकेन ह्य
स्ति सामर्थ्यं शोकं कुर्यात्कथं च न १६ क्व नु तेऽद्य पिता राजन्क्व नु तेऽद्य पितामहः न त्वं पश्यसि ता
नद्य न त्वा पश्यन्ति तेऽपि च १७ आत्मनो ध्रुवतां पश्य तांस्तान्किमनुशोचसि बुद्ध्या चैवानुबुध्य
स्व ध्रुवं हि न भविष्यसि १८ अहं च त्वं च नृपते सुहृदः शत्रवश्च ते अवश्यं न भविष्यामः सर्वं च न
भविष्यति १९

परे पूर्वस्मिन् पूर्वस्मिन् यावितं तत्सर्वं तेन च नास्त्येवेति तत्तज्ज्ञात्वा सर्वत्र ममतां त्यक्तेति भावः १५ सा
मर्थ्यं धनार्जनवीर्यं कथं च कथमपि न कुर्यात् शोकं १६ १७ आत्मनः देहस्य अध्रुवतामिति च्छेदः न भविष्यसि न भविष्यसि १९८

२॰ नचमुच्येतचात्मनेणात्यागोनसंभवतिचेन्ममत्वंबाधवादोत्याज्यमित्याहापीति २१ विद्यात्विदुः ततनिर्ममत्वं २२ २४
याटच्छिकंअयत्नादागतं २५ एततशोकाख्यफलं यथालब्धेनवर्त्तयनजीवन्नपिपश्यामियाटच्छिकस्यनाशेनजीवना
येत्रविंशतिवर्षावैत्रिंशद्वर्षाश्चमानवाः अर्वागेवहितेसर्वेमरिष्यंतिशरच्छतात् २॰ अपिचे
न्महतोविज्ञानप्रमुच्येतपूरुषः नैतन्ममेतितन्मत्वाकुर्वीतप्रियमात्मनः २१ अनागतंयन्नममे
तिविद्यादतिक्रांतंयन्नममेतिविद्यात् दिष्टंबलीयइतिमन्यमानास्तेपंडितास्तत्सतांस्थानमाहुः
अनाढ्याश्चापिजीवंतिराज्यंचाप्यनशासति बुद्धिपौरुषसंपन्नास्त्वयातुल्याधिकाजनाः २३ नच
त्वमिवशोचंतितस्मात्वमपिमाशुचः किन्नत्वंतेनैनरःश्रेयास्तुल्योवाबुद्धिपौरुषैः २४ राजावा
च याटच्छिकंसर्वमासीनद्राज्यमितिचिंतये क्रियतेसर्वमेवेदंकालेनमहताद्विज २५ तस्यैवा
क्रियमाणस्यस्रोतसेवतपोधन फलमेतत्प्रपश्यामियथालब्धेनवर्त्तयत् २६ मुनिरुवाच अ
नागतमतीतंचयथातथ्यविनिश्चयात् नात्रशोचेतकौशल्यात्सर्वार्थेषुतथाभव २७ अवाप्यान्काम
मयत्नार्थान्नानवाप्यान्कदाचन प्रत्युत्पन्नाननुभवन्माशुचस्त्वमनागतान् २८ यथालब्धोपप
न्नार्थैस्तथाकौशल्यरस्यसे कच्चिच्छुद्धस्वभावेनश्रियाहीनोनशोचसि प्रत्युत्पन्नार्थैरसादीनभा
लोपेपिशोकोननश्यतीत्यर्थः २६ २९ नस्पृश्यतेनैनंसंतप्यति ३॰ ॥ ग्योहिदुर्मतिः धातारंगर्हतेनित्यंलब्धा

श्री·
यो·वा·
टी·
५५९

अनर्हान्स्नेहादीन्नीचान् ३१ ३२ सहस्वेति सार्धं अन्यत्र शत्रौ कुशलाः निर्मत्सराः जनं द्विषतः सकाशात् अभि-
निष्यन्दते प्रस्रवति ३३ विधित्सा क्रियाणामनुपरमः तेन साधनेन च सकुक्षकं अस्थिरं नित्यं नवनवमारंभं कुर्वाणं दृष्ट्वा

अनर्हानपि चैवान्यान्मन्यते श्रीमतो जनान् एतस्मात्कारणादेतद्दुःखं भूयोऽनुवर्तते ३१ ईर्ष्याभि-
मानसंपन्ना राजन्नकृषमानिनः कश्चिन्न तत्तथा राजन्मत्सरी कोशलाधिप ३२ सहस्व श्रियमन्ये-
षां यद्यपि त्वयि नास्ति सा अन्यत्रापि सतीं लक्ष्मीं कुशला भुञ्जते सदा अभिनिष्यन्दते श्रीर्हि सत्यपि द्वि-
षतो जने ३३ श्रियं च पुत्रपौत्रं च मनुष्या धर्मचारिणः ये धर्मविदो धीराः स्वयमेव त्यजन्त्युत ३४ ब-
ज्रं सकुक्षकं दृष्ट्वा विविधित्साधनमेव च त्यक्त्वान्ये संत्यजन्त्येव मत्वा परमदुर्लभं ३४ त्वं पुनः प्राज्ञरूपः स-
न्नकृपणोऽपरितप्यसे अकाम्यान्कामयानोऽर्थान्पराधीनाननुपद्रवान् ३५ तां बुद्धिमुपजित्वाशु त्वमेव
तान्परित्यज अनर्थाश्चार्थरूपेण ह्यर्थाश्चानर्थरूपिणः ३६ अर्था ह्येव हि केषांचिद्धननाशो भव-
न्त्युत आनन्त्यं तत्त्वमेव मत्वा श्रियमन्यः परीप्सति ३७ रममाणाः श्रिया कश्चिन्नान्यच्छ्रेयोऽभिम-
न्यते तथा तस्येहमानस्य समारंभो विनश्यति ३८ कृच्छ्राल्लब्धमभिप्रेतं यदि कौशल्य नश्यति

दृष्ट्वान्ये प्राकृता अस्तं संत्यजन्त्येव ३४ उपद्रवान् अस्थिरान् ३५ अ- तदा निर्विद्यते सोऽर्थात्परिभग्नक्रमो नरः ३९ ५५९
र्थरूपेणाभासमानाः ३६ आद्यस्योदाहरणं अर्थायेति ३७ द्वितीयस्योदाहरणं रममाणा इति ३८ परिभग्नक्रमः नष्टारंभः ३९ ॥

५० ५१ विश्राणयेन्न दद्यात् ५२ ५४ बुद्ध्याकल्पितामापदं पश्य कथमत आह नियच्छेति यथाक्रमेणान्वयः इंद्रियादीनां
निरोधे हि जगन्नत्वं सम्यक्स्फुरति तेनापदां कल्पितत्वं स्फुटीभवतीति भावः अन्येषामपीति सार्द्धः श्लोकः ५५ प्रतीति भावे

धर्ममेकेऽभिपद्यन्ते कल्याणाभिजना नराः परत्र सुखमिच्छन्तो निर्विघ्नेषु च लौकिकात् ५०
जीवितं संत्यजन्त्येके धनलोभपरा जनाः न जीवितार्थं मन्यन्ते पुरुषा हि धनादृते ५१ पश्य तेषां
कृपणतां पश्य तेषामबुद्धितां अध्रुवे जीविते मोहादर्थदृष्टिमुपाश्रिताः ५२ संचये च विना
शान्ते मरणान्ते च जीविते संयोगे च वियोगान्ते को नु विश्राणयेन्मनः ५३ धनं वा पुरुषो राजन्
पुरुषं वा पुनर्धनं अवश्यं प्रजहात्येवं तद्विद्वान्को नु संज्वरेत् ५४ अन्येषामपि नश्यन्ति सुहृ
दश्च धनानि च पश्य बुद्ध्या मनुष्याणां राजन्नापदमात्मनः ५५ नियच्छ यच्छ संयच्छ इंद्रिया
णि मनो गिरं ५५ प्रतिषिद्धानि चाप्येषु दुर्बलेष्वहितेष्वपि प्राप्तिस्पृहेषु व्यपकृष्टेषु असंभवे प्रज्ञा
नतृप्तो विक्रान्तस्त्वद्विधो नानुशोचति ५६ अल्पमिच्छन्नचपलो मृदुर्दान्तः सुनिश्चितः ब्रा
ह्मणवर्योपपन्नश्च त्वद्विधो नैव शोचति ५७ ॥ =

षु प्राप्तिस्पृहेषु दर्शनमात्रोत्पन्नेषु प्रतिषिद्धानि विघ्नेत अप्रत्याख्येयदर्शनाः सर्वे वर्तमानपदार्था इत्यर्थः व्यपकृष्टेषु देशतः का ९
लतश्च व्यवहितेष्वतीतानागतेषु स्पृहेषु दर्शनस्यासंभवे च ज्ञानतृप्ततिष्ठत्वद्विधो नानुशोचति इष्टानिष्टसंयोगायोगयोरिति सार्द्धोऽर्थः ५६

श्री॰
शां॰ रा॰
टी॰
२०

४८ ५२ चतुरधिकशततमः १०४ एवंबुद्धिबलहीनस्य संपदः परैर्निर्जितस्य निर्हृतिधर्मस्य श्रेयानित्युक्तं प्रबलस्य त्वता
नत्वेवजाल्मींकापालींवृत्तिमेषितुमर्हसि नृशंसमहापापिष्ठांत्वद्विधानांत्वदुःखोचितां ४८ अपि
मूलफलाजीवोरमस्वैकोमहावने वाग्यतःसंगृहीतात्मासर्वभूतदयान्वितः ४९ सदृशंपांडि
तस्यैतद्दीषादंतेनदंतिना यदेकोरमतेऽरण्येयच्चारण्येनैवतुष्यति ५० महाह्रदःसंक्षुभितःआ
त्मनैवप्रसीदति एतदेवंगतस्याहंसुखंविपश्यामिजीविते ५१ असंभवेश्रियोराजन्हीनस्यसचि
वादिभिः दैवेप्रतिनिविष्टेचकिंश्रेयोमन्यतेभवान् ५२ इतिश्रीमहाभारतेशांतिपर्वणिराज
धर्मेकालकवृक्षीये १०४ मुनिरुवाच अथचेत्पौरुषंकिंचित्क्षत्रियात्मनिपश्यसि ब्रवी
मितांतुतेनीतिंराज्यस्यप्रतिपत्तये १ तांचेच्छक्नोषिनिर्मातुंकर्मचैवकरिष्यसि शृणुस
र्वमशेषेणयत्त्वांवक्ष्यामितत्त्वतः २ आचरिष्यसिचेत्कर्ममहतोर्थानवाप्स्यसि राज्यंराज्य
स्यमंत्रंवामहतींवापुनःश्रियं अथैतद्रोचतेराजन्पुनर्ब्रूहिब्रवीमिते ३ राजोवाच ब्रवीतु
भगवान्नीतिमुपपन्नोस्म्यहंविभो अमोघोयंभवत्वद्यत्वयासहसमागमः ४ मुनिरु॰ हित्वादं
भंचकामंचक्रोधंहर्षंभयंतथा अप्यमित्राणिसेवस्वप्रणिपत्यकृतांजलिः ५ २०

दृष्टास्यनिकृत्याभिजयोपायंवक्तुंअध्यायमारभते अथचेदिति १३ उपपन्नोस्मिपौरुषेणेतिशेषः ४ ५

विन्नवेतनारूपं ६ प्रमाणां विश्वासं प्रग्रहमिव प्रग्रहं धुर्जं तस्य बाजस्थानीयो भविष्यसीत्यर्थः प्रग्रहस्तत्तला सूत्रेवंधानियमनेषु।
जेइतिमेदिनी ७ ८ स्वशास्त्राणानीति शास्त्राणा प्रग्रहणां आदरं ग्रहणां स्वीकाराः दरकरोपरागोपलब्धिवंदी षितिमेदिनी ९ बि
ल्वबिल्वेनेति अन्यपराजयेयापीडुःइतिमत्वाजनकेनान्यविपरीतंवाघातय अस्यवैदेहस्य ९ ११ प्रतिषेधस्थानेतत्करणोऽया

तमुन्नमेनशौचेनकर्मणाचाभिरायय सातमर्हतितेविन्नवैदेहः सत्यसंगरः ६ प्रमाणांसर्वभूतेषुप्र
ग्रहंत्वभविष्यसि ततः सहायान्सोत्साहाल्लघ्यसेव्यसनानुष्ठीत् ७ वर्तमानः स्वशास्त्राणांसंयता
त्माजितेन्द्रियः अभ्युद्धरतिचात्मानंप्रसादयतिचप्रजाः ८ तेनैवंत्वधृतिमताश्रीमताचाभिसत्कृतः
प्रमाणांसर्वभूतेषुगातंप्रग्रहणामदत् ततः स्वसुहृद्वलमामंत्रयित्वाहमंत्रिभिः आंतरैर्भेदयित्वारी
न्बिल्वंबिल्वेनभेदय परैर्वासंविदत्कृत्वाबलमप्यस्यघातयः ९ अलभ्यायेशुभाभावाः स्त्रियश्चाच्छा
दनानिच १० शय्यासनानियानानिमहार्हाणिगृहाणिच दतिणाम्रगजातानिरसमराधाः फलानिच
तेष्ववसज्जयेथास्वयथानश्येपत्वयंपरः ११ यद्येवंप्रतिषेढव्योयधुपेतणामर्हेति नजातविहृतः का
र्यः शत्रुः स्वनयमिच्छता १२ रमस्वपरमामित्रेविषयेप्रान्तसंमतः भजस्वश्वेतकाकीयैर्मित्रधर्ममन
र्थकैः १३ ॥

मांतप्रतिषिद्धवानितिममशत्रुरितिविहृतत्वंभवतितन्नइत्यमित्यर्थः १२ हेपरमअमित्रे शत्रुसमीपे श्वेतका
कीयैः श्वाचपतश्चकाकश्चतेषामिमेयधर्माः क्रमेणानित्यजागरूकत्वभयचकितत्वपरेंगितज्ञत्वानितैः उपायैः मित्रधर्मंभजस्व
श्वेतश्वत्वत्रामाङेश्वतिपंरूपं पत्तोस्सगः १३ ॥

श्री॰ शां॰ रा॰ टी॰ २१

आरंभान्विरोधांश्च महानदीवत्तडस्तरान् १६ प्रतिकरिष्यति प्रत्युपकारेण स्वकृत्यसाधनादिना उपकरिष्यति ७ १८ धर्माय
मीमांसाकोशान्तये मति १९ फलस्य स्वर्गादेः अर्थस्य जयादेः मूलं कारणं कोशः अत्युच्छिद्येत विशेषतः उच्छेदं गच्छेत् दैवं जया।

आरंभांश्चारभस्व महतो दुष्प्रयोजय नदीवच्च विरोधांश्च बलवद्भिर्निराकृतान् १५ अध्यानानि महार्हा-
णि शयनान्यासनानि च प्रतिभोगसुखानि वैव कोशमस्य विरेचय १६ यज्ञदानेषु शास्त्रेषु ब्राह्मणान्
तुर्पयस्व तान् ते त्वां प्रतिकरिष्यन्ति ते मोक्ष्यन्ति हकाश्च ७ अमृतशायं पुण्यशीलः प्राप्नोति परमां गति-
स्त्रिविष्टपं पुण्यतमं स्थानं प्राप्नोति मानवः १८ कोशान्तये त्वमित्राणां वैश्रकोशान्लभाच्छति उभयत्र
सक्तस्य धर्मे चाधर्मे एव च १९ फलार्थं मूलमुच्छिद्येतेन नंदति शात्रवः न चास्मै मानुषं कर्म दैवमस्या-
पवर्णय २० अमृतशायं दैवपरः क्षिप्रमेव विनश्यति याजयैनं विश्वजिता सर्वस्वेन वियुज्यतां २१ ततो
गच्छत्यसिद्धार्थः पीड्यमानो महावनं योगधर्मविदं पुण्यं किंचिदस्योपवर्णये २२ अपि त्यागं बु-
भूषेत कच्चित्स्वच्छेदनामयं सिद्धेनौषधियोगेन सर्वशत्रुविनाशिना नागानश्वान्मनुष्यांश्च कृतकै-
रुपघातयेः २३ एते चान्ये च बहवो दंभयोगाः सुचिंतिताः शक्या विषहता कर्तुं पुरुषेण कृतात्मना २४

देवं २० २१ गच्छति अवगच्छति असिद्धार्थः कृतयत्नादि प्रयोजनः म इति श्रीशान्तिपर्वणि कालकवृक्षीये ९५ ॥
हाजनपीडां तस्मै निवेदयेत् तत्प्रविहारार्थं च वर्णयेत् २२ तत द्वारा राज्यं त्याजयेदित्याहापीति उौषधाद्यैरस्य नागादीन्घातयेदि

[illegible] २१ [illegible] ९५ ॥

निकृतिंकपटंचकृत्वातमनिच्छोर्थभिन्नस्यतीर्णस्यमामात्यंजयोपायमाह ननिकृत्येत्यादिना १ ४ वाग्युवयोः तस्यविदेहस्य

राजोवाच ननिकृत्यपरंनेमेनब्रह्मन्निच्छामिजीवितं नाधर्मयुक्तानिच्छेयमर्थान्सुमहतोप्यहं १
पुरस्तादेवभगवन्मयैतदपवर्जितं येनमांनाभिशंकेतयेनकृत्स्नंहितंभवेत् २ आनृशंस्येनध
र्मेणलोकेह्यस्मिञ्जिजीविषुः नाहमेतदलंकर्तुंनैतत्त्वय्युपपद्यते ३ मुनिरुवाच उपपन्नस्त्वमेते
नयथात्थप्रियभाषसे प्रकृत्याह्युपपन्नोसिबुद्ध्याचाद्भुतदर्शनः ४ उभयोरेववामर्थेयतिष्यामितवत
स्यच संश्लेषंवाकरिष्यामिशाश्वतंह्यनपायिनं ५ त्वादृशंहिकुलेजातमनृशंसंबहुश्रुतं अमात्य
कोनकुर्वीतराज्यप्रणायकोविदम् ६ यस्त्वंप्रव्राजितोराज्याद्व्यसनंचोत्तमंगतः आनृशंस्येनवृत्तेन
क्षत्रियेच्छसिजीवितुं ७ आगंतामद्गृहंतातवैदेहःसत्यसंगरः अथाहंतंनियोक्ष्यामितत्करिष्यत्य
संशयं ततआहूयवैदेहंमुनिर्वचनमब्रवीत् अयंराजकुलेजातोविदिताभ्यंतरोमम ९ आदर्शइ
वशुद्धात्माशारदश्चन्द्रमायथा नास्मिन्पश्यामिवृजिनंसर्वतोमेपरीक्षितः १० तेनतेसंधिरेवास्तुवि
श्वसास्मिन्यथामयि नराज्यमनमात्येनशक्यंशास्तुमपित्र्यहं ११ अमात्यःशूरएवस्याद्बुद्धिसंपन्न
एववा ताभ्यांचैवोभयंराजन्पश्यराज्यप्रयोजनं १२ ॥ ५ त्वादृशंराजानंलब्ध्वाअमात्यकर्मकोनकुर्वी।

तत्रापितुसर्वोपिमादृशःकुर्वीतैवेत्यर्थः ६ उत्तमंमहत् ७ १० ताभ्यांशौर्यबुद्धिभ्यांउभयंलोकद्वयं १२ ॥

श्री॰
शां॰ रा॰
टी॰
२२

१३ गणान्शत्रुसंघान् १४ १५ असांप्रतं अनुचितं १७ परोजनः शत्रुजनः भोजनादिना संधेयः दंडोपेक्षया मामेव श्रेयः

धर्मात्मनां क्वचिल्लोके नान्यास्ति गतिरीदृशी महात्मा राजपुत्रोयं सतां मार्गमनुष्ठितः १३ स्वयं
गृहीतस्त्वेवैषत्वया धर्मपुरोगमः सेव्यमानः शत्रुभिस्ते हन्यात्स्वहतो गणान् १४ यद्ययं प्रति
युद्धेत्तां स्वकर्मैतत्त्रियस्यतत् जिगीषमाणस्त्वां युद्धे पितृपैतामहे पदे १५ त्वं चापि प्रतियुद्ध्येथा वि
जिगीषुव्रते स्थितः अयुद्धैव नियोगान्मे वशे कुरु हिते स्थितः १६ स त्वं धर्ममवेक्षस्व हित्वा लो
भमसांप्रतं नच कामान्नचक्रोधाद्धर्मं हातुमर्हसि १७ नैवनित्यं जयस्तात नैव नित्यं पराजयः त
स्माद्भोजयितव्यश्च भोक्तव्यश्च परोजनः १८ आत्मन्यपि च संदृश्यावुभौ जयपराजयौ निःशेष
कारिणां तात निःशेषकरणाद्भयं १९ इत्युक्तः प्रत्युवाचेदं वचनं ब्राह्मणर्षभं प्रतिपूज्याभिसत्कृ
त्य पूजार्हमनुमान्य च २० यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयान्महाश्रुतः श्रेयः कामो यथा ब्रूयादुभ
योरेव तत्त्वं मे २१ यद्यद्वचनमुक्तोस्मि करिष्यामि च तत्तथा एतद्धि परमं श्रेयो न मेत्रास्ति विचारणा
२२ ततः कौशल्यमाहूय मैथिलो वाक्यमब्रवीत् धर्मतो नीतितश्चैव लोकश्च विजितो मया २३
अहं त्वया चात्मगुणैर्जितः पार्थिवसत्तम आत्मानमनवज्ञाय जितवद्वर्ततां भवान् २४ ॥

त्वर्थः १८ २३ अहमिति जितवत् आत्मजयवत् २४ ॥

२५ २८ पुनःकालवृक्षीयेषड्शततमः १०५ गणवृत्तंबुभुत्सुःपूर्वोक्तमनुवदतिब्राह्मणेति १४ क्षीणस्यसंग्रहणंवृत्तिर्जीवि

नावमन्यामितेबुद्धिंनावमन्येचपौरुषं नावमन्येजयामीतिजितवद्वर्ततांभवान् २५ यथावत्पू
जितोराजन्गृहंगंतासिमेभृशं ततःसंपूज्यतौविप्रंविश्वस्तौजग्मतुर्गृहान् २६ वैदेहस्त्वथकौश
ल्यंप्रवेश्यगृहमंजसा पाद्यार्घ्यमधुपर्कैस्तंपूजार्हंप्रत्यपूजयत् २७ ददौदुहितरंचास्मैरत्नानिवि
विधानिच एषराज्ञांपरोधर्मोनित्यौजयपराजयौ २८ इतिशांतिपर्वणिराजधर्मेकालकवृ
क्षीये १०५ युधिष्ठिरउ० ब्राह्मणक्षत्रियविशांशूद्राणांचपरंतप धर्मवृत्तंचवित्तंचवृत्त्युपायाः
फलानिच १ राज्ञांवृत्तंचकोशंचकोशसंजननंजयः अमात्यगुणवृत्तिश्चप्रकृतीनांचवर्द्धन
२ षाड्गुण्यगुणकल्पश्चसेनावृत्तिस्तथैवच परिज्ञानंचदुष्टस्यलक्षणंचसतामपि ३ समही
नाधिकानांचयथावल्लक्षणंचयत् मध्यमस्यचतुष्ट्यर्थंयथास्थेयंविवर्द्धता ४ क्षीणसंग्रह
णवृत्तिश्चयथाधर्मप्रकीर्तितं लघुनादेशरूपेणग्रंथयोगेनभारत ५ विजिगीषोस्तथावृत्त
मुक्तंचैवतथैवतथैवते गणानांवृत्तिमिच्छामिश्रोतुंमतिमतांवर ६ यथागणाःप्रवर्द्धंतेनभिद्यं
तेचभारत अरींश्चविजिगीषंतेसुहृदःप्राप्नुवंतिच ७ ॥

काच लघुनागमेन आदेशरूपेणउपदेशात्मकेन ५ गणानांशूरजनस्तोमानां ६ ७ ॥

श्री॰
शां॰ रा॰
टी॰
२३

८ ९ एकोराजालोभंहृएउते गणास्तदाऽमर्षमनंतरंदोतीत्यमर्षंहृएउते १० इतरेतरंगणाराजानश्चप्रकर्षंति १२
भेदमूलो विनाशो हि गणानामुपलक्षये मंत्रसंवरणं दुःखं बहूनामिति मे मतिः ८ एतदिच्छा
म्यहं श्रोतुं निखिलेन परंतप यथा चैते न भिद्येरंस्तच्च मे वद पार्थिव ९ भीष्मउ॰ गणानां च कुला
नां च राज्ञां भरतसत्तम वैरसंदीपनावेतौ लोभामर्षौ नराधिप १० लोभमेको हि हृएउते ततो मर्ष
मनंतरं तौ क्षयव्ययसंयुक्तावन्योन्यच विनाशनौ ११ चारमंत्रबलादानैः सामदानविभेदनैः क्ष
यव्ययभयोपायैः कर्षयंतीतरेतरं १२ तत्रादानेन भिद्यंते गणाः संघातवृत्तयः भिन्ना विमनसः
सर्वे गच्छंत्यरिवशं भयात् १३ भेदे गणा विनश्युर्हि भिन्नास्तु सुजयाः परैः तस्मात्संघातयोगेन
प्रयतेरन्गणाः सदा १४ अर्थाश्चैवाधिगम्यंते संघातबलपौरुषैः बाह्याश्च मैत्रीं कुर्वंति तेषु सं
घातवृत्तिषु १५ ज्ञानवृद्धाः प्रशंसंति शुश्रूषंतः परस्परं विनिवृत्ताभिसंधानाः सुखमेधंति सर्वशः
१६ धर्मिष्ठान्व्यवहारांश्च स्थापयंतश्च शास्त्रतः यथावत्प्रतिपश्यंतो विवर्द्धंते गणोत्तमाः १७
पुत्रान्भ्रातॄन्निगृह्णंतो विनयंतश्च तान्सदा विनीतांश्च प्रगृह्णंतो विवर्द्धंते गणोत्तमाः १८ चारमं
त्रविधानेषु कोशसंनिचयेषु च नित्ययुक्ता महाबाहो वर्द्धंते सर्वतो गणाः १९ ॥ २३

१३ संघातयोगेन एकमत्यप्रयोगेण १४ १५ निवृत्ताभिसंधानाः विघटितसंधाः १६ १७ १८ १९ ॥

२० २१ २२ २३ २४ २५ २६ २७ २८ २९ ३० ३१ ३२ गणाद्वंतसमशततमः ९७ ॥

प्राज्ञान्शूरान्महोत्साहान्कर्मसुस्थिरपौरुषान् मानयंतःसदायुक्ताविवर्द्धंतेगणान्रृप
२० द्रव्यवंतश्चशूराश्चशास्त्रज्ञाःशास्त्रपारगाः कृच्छ्रास्वापत्सुसंमूढान्गणाःसंतारयंतिते
२१ क्रोधोभेदोभयंदंडःकर्षणंनिग्रहोवधः नयत्यरिवशंसद्योगणान्भरतसत्तम २२ त
स्मान्मानयितव्यास्तेगणमुख्याःप्रधानतः लोकयात्रासमायत्ताभूयसीतेषुपार्थिव २३ मंत्र
गुप्तिःप्रधानेषुचारश्चामित्रकर्शन नगणाःकृत्स्नशोमंत्रंश्रोतुमर्हंतिभारत २४ गणमुख्यैस्तु
संभूयकार्यंगणहितंमिथः पृथग्गणस्यभिन्नस्यविततस्यततोन्यथा २५ अर्थाःप्रत्यवसीदं
तितथानर्थाभवंतिच तेषामन्योन्यभिन्नानांस्वशक्तिमनुतिष्ठतां २६ निग्रहःपंडितैःकार्यःक्षि
प्रमेवप्रधानतः कुलेषुकलहाजाताःकुलवृद्धैरुपेक्षिताः २७ गोत्रस्यनाशंकुर्वंतिगणभेद
स्यकारकं आभ्यंतरंरक्ष्यमसारंबाह्यतोभयं २८ आभ्यंतरंभयंराजन्सद्योमूलानिकृंतति अका
स्मात्क्रोधमोहाभ्यांलोभाद्वापिस्वभावजात् २९ अन्योन्यंनाभिभाषंतेतत्पराभवलक्षणं जात्याच
सदृशाःसर्वेकुलेनसदृशास्तथा ३० नचोद्योगेनबुद्ध्यावारूपद्रव्येणवापुनः भेदाच्चैवप्रदानाच्च
भिद्यंतेरिपुभिर्गणाः ३१ तस्मात्संघातमेवाहुर्गणानांशरणंमहत् ३२ इतिशांतिपर्वणिराजध

श्री॰ नीतिप्रधानानराजधर्मानुक्त्वातदनुग्राहकानुक्तद्धर्मानाह महानित्यादिना १ २ ७ हत्वाष्टजया ८ ९ अतिशा

शां॰रा॰ युधिष्ठिर उ॰ महानयं धर्मपथो बहुशाखश्च भारत किंस्विदेवेह धर्माणामनुष्ठेयतमं मतं १

टी॰ किं कार्यं सर्वधर्माणां गरीयो भवतो मतं यथाहं परमं धर्ममिह च प्रेत्य चाप्नुयां २ भीष्म उ॰ माता

२०५ पित्रोर्गुरूणां च पूजा बहुमता मम इह युक्तो नरो लोकान्यशश्च महदश्नुते ३ यच्च तेभ्यनुजानीयुः

कर्म तात सुपूजिताः धर्म्यं धर्मविरुद्धं वा तत्कर्तव्यं युधिष्ठिर ४ न च तैरभ्यनुज्ञातो धर्ममन्यं समा

चरेत् यं च तेभ्यनुजानीयुः स धर्म इति निश्चयः ५ एत एव त्रयो लोका एत एवाश्रमास्त्रयः एत ए

व त्रयो वेदा एत एव त्रयोग्नयः ६ पिता वै गार्हपत्योग्निर्माताग्निर्दक्षिणः स्मृतः गुरुराहवनीय

स्तु साग्नित्रेता गरीयसी ७ त्रिष्वप्रमाद्यन्नेतेषु त्रींल्लोकानवजेष्यसि पितृवृत्त्या त्विमं लोकं मातृ

वृत्त्या तथापरं ब्रह्मलोकं गुरोर्वृत्त्या नियमेन तरिष्यसि सम्यगेतेषु वर्तस्व त्रिषु लोकेषु भारत ८

यशः प्राप्स्यसि भद्रं ते धर्मं च सुमहत्फलं नैतानतिशयेज्जातु नात्यश्नीयान्न दूषयेत् ९ नित्यं प

रिचरेच्चैव तद्वै सुकृतमुत्तमं कीर्तिं पुण्यं यशो लोकान्प्राप्स्यसे राजसत्तम १० सर्वे तस्यादृता लो

का यस्यैते त्रय आदृताः अनादृतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः ११ ॥ २०५

येत् भोगेषु क्रियासु वा स्वस्याधिक्यं न दर्शयेत् १० ११ १२ ॥

१३ १८ जातिर्जन्म १९ अवध्येति सार्द्धः चानुकृतः तत्त्वव्यानामपि तेषां अवधं कृत्वा ते अपराधिनो पि पितृमातृगुरवः अव
येन राजानमिवैनेन दूषयन्ति राजादि वध्यानामवधे दुष्यति तद्वदित्यर्थः धर्माय दुष्टानामपि पित्रादीनां पालनाय यतमा

न चायं न परो लोकस्तस्य चैव परंतप अमानिता नित्यमेव यस्यैते गुरवस्त्रयः १३ न चास्मिन्न परे लो
के यशस्तस्य प्रकाशते न चान्यदपि कल्याणं पारत्रं समुदाहृतं १४ तेभ्य एव हि यत्सर्वं कृत्वा च वि
सृजाम्यहं तदासीन्मे शतगुणं सहस्रगुणमेव च १५ तस्मान्मे संप्रकाशन्ते त्रयो लोका युधिष्ठिर द
शैव तु सदाचार्यः श्रोत्रियानतिरिच्यते १६ दशाचार्यानुपाध्याय उपाध्यायान्पिता दश पितृन्दा
श तु माता का सर्वां वा पृथिवीमपि १७ गुरुत्वेनातिभवति नास्ति मातृसमो गुरुः गुरुर्गरीयान्पितृ
तो मातृतश्चेति मे मतिः १८ उभौ हि मातापितरौ जन्मन्येवोपयुज्यतः शरीरमेव सृजतः पिता माता
च भारत आचार्यशिष्टा या जातिः सा दिव्या साजरामरा १९ अवध्या हि सदा माता पिता चाप्यपका
रिणौ न संदुष्यति तत्कृत्वा न च ते दूषयन्ति तं धर्माय यतमानानां विदुर्देवा महर्षिभिः २० यश्चावृ
णोत्यवितथेन कर्मणा ऋतं ब्रुवन्नमृतं संप्रयच्छन् तं वै मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कृतम
स्य जानन् २१

नानां देवा अप्यनुग्राह्यत्वेन विदुः २० आवृणोति अनुगृह्णाति कर्मणा प्रवचनेन ऋतं वेदं २१ ॥

नाद्रियंते ये ते प्रत्यासन्ना विपर्ययेण विशीर्णा नष्टा भवंति २२ २३ अनिर्देशेन विस्तरेण न तु निर्देशमात्ररूपेण अनुसृत्य

विद्यां श्रुत्वा ये गुरुं नाद्रियंते प्रत्यासन्ना मनसा कर्मणा वा तेषां पापं भ्रूणहत्याविशिष्टं नान्यस्तेभ्यः पा
पकृदस्ति लोके २२ यथैव ते गुरुभिर्भावनीयास्तथा तेषां गुरवोप्यर्चनीया २३ तस्मात्पूजयितव्या
श्च संविभज्याश्च यत्नतः गुरवोर्चयितव्याश्च पुराणं धर्ममिच्छता २४ येन प्रीणाति पितरं तेन प्रीतः
प्रजापतिः प्रीणाति मातरं येन पृथिवी तेन पूजिता २५ येन प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितं मा
तृतः पितृतश्चैव तस्मात्पूज्यतमो गुरुः २६ ऋषयश्च हि देवाश्च प्रीयंते पितृभिः सह पूज्यमानेषु गुरुषु
तस्मात्पूज्यतमो गुरुः २७ केनचिन्न च वृत्तेन ह्यवज्ञेयो गुरुर्भवेत् न च माता न च पिता मन्यते यादृशो गुरुः
२८ न ते वमानमर्हंति न तेषां दूषयेत्कृतं गुरूणामेव सत्कारं विदुर्देवा महर्षिभिः २९ उपाध्यायं पितरं
मातरं च ये भिद्रुह्यंते मनसा कर्मणा वा तेषां पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पापकृदस्ति लोके ३०
भृतो ह्यद्यो यो न बिभर्ति पुत्रः स्वयोनिजः पितरं मातरं च तद्वै पापं भ्रूणहत्याविशिष्टं तस्मान्नान्यः पाप
कृदस्ति लोके ३१ मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य गुरुघातिनः चतुर्णां वयमेतेषां निष्कृतिं नानुशुश्रुमः
३२ एतत्सर्वमनिर्देशेनैवमुक्तं यत्कर्तव्यं पुरुषेणेह लो

पकीकृत्य एतत्सारभूतं २४ ३३ अष्टोत्तरशततमः १०८ ॥

कथं सत्यानृतयोर्धर्माधर्मरूपत्वे हिंसाऽहिंसायुक्तयोस्तयोर्वैपरीत्यदर्शनात्संशय इत्यर्थः १ उभयोस्त्यागस्त्वत्रा
तिदुष्कर इत्याह सत्यमिति लोकान्संसारिणः २५ तादृशः सत्यानृतयोस्तत्त्वमजानन्बालत्वाद्बध्यते यत्रविषयेऽत्रा
हिंसापकारादौ सत्यं प्रतिष्ठितं तन्निष्ठा इत्युक्तं तेसत्यानृतेबहूपकारप्रधानेनिश्चिन्वन्धर्मवित्भवति ६ अथस्त्र्याणां

युधिष्ठिर उ० कथं धर्मे स्थातुमिच्छन्नरो वर्तेत भारत विद्वञ्जिज्ञासमानाय प्रब्रूहि भरतर्षभ १ स
त्यं चैवानृतं चोभे लोकानावृत्य तिष्ठतः तयोः किमाचरेद्राजन्पुरुषो धर्मनिश्चितः २ किंस्वित्स
त्यं किमनृतं किंस्विद्धर्म्यं सनातनं कस्मिन्काले वदेत्सत्यं कस्मिन्कालेऽनृतं वदेत् ३ भीष्म उ० सत्य
स्य वचनं साधु न सत्याद्विद्यते परं यत्तु लोके सुदुर्ज्ञानं तत्ते वक्ष्यामि भारत ४ भवेत्सत्यं न वक्तव्यं
वक्तव्यमनृतं भवेत् यत्रानृतं भवेत्सत्यं सत्यं चाप्यनृतं भवेत् ५ तादृशो बध्यते बालो यत्र सत्यम
निष्ठितं सत्यानृते विनिश्चित्य ततो भवति धर्मवित् ६ अप्यनार्योऽकृतप्रज्ञः पुरुषोऽपि सुदारुणः
सुमहत्प्राप्नुयात्पुण्यं बलाकोऽन्धवधादिव ७ किमाश्चर्यं च यन्मूढो धर्मकामोऽप्यधर्मवित् सुम

चक्षुषः सर्वप्राणिवधाय योद्यतस्तद्वधात्बलाकः व्याधः हिंस्रश्च हत्प्राप्नुयात्पापं गंगायामिव कौशिकः ८
भावोऽपि स्वर्गं जगामेति कर्णपर्वकथा उन्नेया ७ मूढः कर्णपर्वोक्तः सत्यवादी चोरेभ्यः सत्यवचनाभिमानित्वान्मार्गमुप
दिश्य कार्पटिकान्घातितवान् अतोऽधर्मवित्इत्यर्थः कौशिक उलूकः गंगातीरे सहस्रशः सर्पिण्यामुत्पादितानण्डानिभि

श्री॰ शां॰ रा॰ टी॰ २९

सुदुर्लभो दुर्विवेकः अत्र धर्मलक्षणे व्यवस्यति निश्चिनोति ९ प्रभवोऽभ्युदयः अहिंसा अपीडनं धारणं संरक्षणं
पतनात्त्राणं येन सत्येनानृतेन वा स्वस्येतरेषां वा यत्नो भवति स धर्म इत्यादि त्रिभिः प्रभवेति १० ११ श्रुतीति श्रुतत्वेनार्थः सर्वो धर्म
इत्यपि न श्येनादेर्धर्मत्वाभावात् फलतोपि च यत्कर्म नानर्थेनानुबध्यते केवलं प्रीतिहेतुत्वान्न स धर्म इति कथ्यत इति वचना

तादृशोयमनुप्रश्नो यत्र धर्मः सुदुर्लभः दुष्करः प्रतिसंख्यातुं तत्केनात्र व्यवस्यति ९ प्रभवार्थाय
भूतानां धर्मप्रवचनं कृतं यः स्यात्प्रभवसंयुक्तः स धर्म इति निश्चयः १० धारणाद्धर्ममित्याहुर्
धर्मेण विधृताः प्रजाः यस्माद्धारणसंयुक्तः स धर्म इति निश्चयः ११ अहिंसार्थाय भूतानां धर्मप्रव
चनं कृतं यः स्यादहिंसासंयुक्तः स धर्म इति निश्चयः १२ श्रुतिर्धर्म इति ह्येके नेत्याहुरपरे जनाः न
च तत्प्रत्यसूयामो न हि सर्वं विधीयते १३ ये न्यायेन जिहीर्षन्तो धनमिच्छन्ति कस्यचित् तेभ्यस्तन्न त
दाख्येयं स धर्म इति निश्चयः १४ अकूजनेन चेन्मोक्षो नावकूजेत्कथंचन अवश्यं कूजितव्ये वा
शङ्केरन्वाप्यकूजनात् १५ श्रेयस्तत्रानृतं वक्तुं सत्यादिति विचारितं यः पापैः सह संबंधान्मु
च्यते शपथादपि १६

त् श्येनादिफलस्य शत्रुवधादेरनर्थत्वादुक्तलक्षणापन्नधर्म इत्यर्थः सर्वं श्येनाद्यपि विधीयते धर्म
त्वेन चोद्यते १३ य इति अन्यायेनेति च्छेदः जिहीर्षन्तो हर्तुमिच्छन्तः तेभ्यश्चोरेभ्यो यन्निकं न ज्ञापयेत् भिद्व्यस्तु ज्ञापयेदेवेत्यर्थः १४ अकूजनेने
ति चौरेषु यन्निकं पृच्छत्सु न वदेत् अवदतो मोक्षाभावेन वेश्मीति शपथपूर्वकमपि वदेन्नाहं दृशास्थले ऽनृतदोषो नास्तीति श्लोकद्वयार्थः

भ ३ २९

नेति तेभ्यः स्तेनेभ्यः अपि ईर्ष्यत्वर्थे ७ स्वेतिसार्द्धः यदायं नत्वदीयं अमो मदीयः लाभस्तूभाभ्यां विभज्य ग्राह्य इति नियमपूर्वकं प्र
वृत्ते ऽर्थमार्गे चोरादिना धननाशः स्यात् तदा उत्तमार्गः अधमार्गस्य शरीरोपरोधेन दासीकरणेन धनमादातुमिच्छति चेत् तस्य वाक्ये
सत्यसंप्रतिपत्त्यर्थं संवादार्थमाह तत्रः साक्षिणो वाच्यं वक्तृयोगं यवचोनुक्त्वा शान्तं तूष्णीं धारयतीत्येव निश्चयवादिनात् ९ यदा तथ
मार्गो धनवान् उत्तमार्गस्त्वेतीणस्तदा तदस्य कृतं न दोषायेत्याह प्राणोति ९९ ईदृशस्थलेवेषां तेणापि परकीयमर्थं ददेदित्याह

न तेभ्योपि धनं देयं शक्ते सति कथंचन पापेभ्यो ह्रियनं दत्तं दातारमपि पीडयेत् २७ स्वशरीरोपरो
धेन धनमादातुमिच्छतः सत्यसंप्रतिपत्त्यर्थं यद्ब्रूयुः साक्षिणः क्वचित् २८ अनुक्त्वा तत्र तद्वाक्ये स
र्वे ते नृतवादिनः ९ प्राणात्यये विवाहे च वक्तव्यमनृतं भवेत् १९ अर्थस्य रक्षणार्थाय परेषां धर्म
कारणात् परेषां सिद्धिमाकाङ्क्षन् नीचः स्याद्धर्मभिक्षुकः २१ प्रतिश्रुत्य प्रदातव्यः स्वकार्यस्तु बला
त्कृतः यः कश्चिद्धर्मसमयात् प्रच्युतो धर्मसाधनः दंडेनैव समं हंतव्यं स्तं पन्थानं समाश्रिताः २१ च्यु
तः सदैव धर्मेभ्यो मानवं धर्ममास्थितः शठः स्वधर्ममुत्सृज्य तमिच्छेदुपजीवितुं २२ ॥

र्थस्येति २९ यदि त्वउक्त विषये एव लाभालाभौ समौ उभाभ्यां विभज्य ग्राह्यमिति प्रतिश्रुतं तदा नाशितोऽर्थोऽधमार्गेन यथाभा
गं प्रदातव्यः अथवा स्वकारीयनार्जनकारी अधमर्णो बलात्कृतउक्त रीत्या दासीकृतो यस्तु स चेत्कपटं करोति निष्टमपि धनं
न नष्टमिति चेत्तत्राह यदिति २१ अमानवं आसुरं शठः वंचकः तं अमानवं २२ ॥

धनमेव श्रेयो न धर्म इत्यर्थः २३ २४ मा स्म गमः संगं मा कार्षीः तत्र हेतुर्धननेति विप्रयोजनं वियोगः एतदपि पापाः कुर्वन्तीत्यर्थः २५
अयमिति पापानां पापिनां मध्ये वाच्य उपदेश्यार्हः कश्चिदपि नास्ति किंतु सर्वे धर्म इत्येव तेषां निश्चयः अधर्मको विस्फुरणाभावा

सर्वोपायैर्निहन्तव्यः पापो निकृतिजीवनः धनमित्येव पापानां सर्वेषामिह निश्चयः २३ अविष
ह्याश्च संभोज्या निकृत्या पतनं गताः च्युता देवमनुष्येभ्यो यथा प्रेतास्तथैव ते २४ निर्यज्ञास्तपसा
हीना मा स्म तैः सह संवसः धननाशाद्दुःखतरं जीविताद्विप्रयोजनं २५ अयं ते रोचतां धर्म इति वा
च्यः प्रयत्नतः न कश्चिदस्ति पापानां धर्म इत्येष निश्चयः २६ तथागतं च यो हन्यान्नासौ पापेन लिप्य
ते स्वकर्मणा हतं हन्ति हत एव स हन्यते तेषु यः समयं कश्चित्कुर्वीत हतबुद्धिषु २७ यथा काकाश्च
गृध्राश्च तथैवोपधिजीवनः ऊर्ध्वं देहविमोक्षान्ते भवन्त्येतासु योनिषु २८ यस्मिन्यथा वर्तते यो मनु
ष्यस्तस्मिंस्तथा वर्तितव्यं स धर्मः मायाचारो मायया बाधितव्यः साध्वाचारः साधुना प्रत्युपेयः २९
इति शांतौ राजधर्मे सप्ताशतके ९७ युधिष्ठिर उ॰ क्लिश्यमानेषु भूतेषु तैस्तैर्भावैस्ततस्ततः दुर्गाण्य
तितरेद्येन तन्मे ब्रूहि पितामह १ भीष्म उ॰ आश्रमेषु यथोक्तेषु यथोक्तं ये द्विजातयः वर्तन्ते संयतात्मानो दु
र्गाण्यतितरन्ति ते २ ॥

द्धित्वाशयः २६ तथेति सार्धः समयं एतान् हनिष्यामीति ब्रुवन् यश्चिकीर्षेत् स कुर्वीत नादृश्या
णां च येषु पापमस्तीति भावः २८ २९ नवशततमः ९७ क्लिश्य भूतेषु प्राणिषु दुर्गाणि दुस्तराणि १ २ ॥

विषयान्विषयार्थानिंद्रियाणि ३ उच्यमानाः निंद्यमानाः ४ ७ रजसान्विताः संतोर्थान्नयंतिन हरंति ९ ११ अकुहकार्थानि
येदंभान्नाचरंतिस्मयेषांवृत्तिश्चसंयता विषयांश्चनिगृह्णंतिदुर्गाण्यतितरंतिते ३ प्रत्याहुर्नो
च्यमानायेनहिंसंतिचहिंसिताः प्रयच्छंतिनयाचंतेदुर्गाण्यतितरंतिते ४ वासयंत्यतिथीन्नि
त्यंनित्यंवायेनसूयकाः नित्यंस्वाध्यायशीलाश्चदुर्गाण्यतितरंतिते ५ मातापित्रोश्चयेवृत्तिंवर्त
तेधर्मकोविदाः वर्जयंतिदिवास्वप्नंदुर्गाण्यतितरंतिते ६ येवापापंनकुर्वंतिकर्मणामनसागि
रा निक्षिप्तदंडाभूतेषुदुर्गाण्यतितरंतिते ७ येनलोभान्नयंत्यर्थान्राजानोरजसान्विताः वि
षयान्परिरक्षंतिदुर्गाण्यतितरंतिते ८ स्वेषुदारेषुवर्त्तंतेन्यायवृत्तिष्वृतावृतौ अग्निहोत्रपराःसंतोदु
र्गाण्यतितरंतिते ९ आहवेषुचयेशूरास्त्यक्त्वामरणजंभयं धर्मेणजयमिच्छंतिदुर्गाण्यतितरं
तिते १० यवदंतीहसत्यानिप्राणत्यागेप्युपस्थिते प्रमाणभूताभूतानांदुर्गाण्यतितरंतिते ११ क
र्माण्यकुहकार्थानियेषांवाचश्चसूनृताः येषामर्थाश्चसंबद्धादुर्गाण्यतितरंतिते १२ अनध्यायेषु
येविप्राःस्वाध्यायंनेहकुर्वते तपोनिष्ठाःसुतपसोदुर्गाण्यतितरंतिते १३ येतपश्चतपस्यंतिकौ
मारब्रह्मचारिणः विद्यावेदव्रतस्नातादुर्गाण्यतितरंतिते १४ येचसंशांतरजसः संशांततमसा
अदंभार्थानि १२ ४ १५ ॥ सत्ये संस्थितामहात्मानोदुर्गाण्यतितरंतिते १५ ॥

श्री॰
शां॰ रा॰
टी॰
२८

१६ १७ १८ १९ २० २१ २२ यात्रार्थं जीवनार्थं २३ २४ २५ २६ तव च हिते स्थितः २७ ॥

येषां न कश्चित्त्रसति न त्रसंति हि कस्यचित् येषामात्मसमो लोको दुर्गाण्यतितरंति ते १६ परिग्र-
हान्न तप्यंति ये संतः पुरुषर्षभाः ग्राम्यादर्थान्निवृत्ताश्च दुर्गाण्यतितरंति ते १७ सर्वान्देवान्नमस्यंति ।
सर्वधर्मांश्च शृण्वते ये श्रद्दधानाः शांताश्च दुर्गाण्यतितरंति ते १८ ये न मानित्वमिच्छंति मानयंति च
ये परान् मान्यमानान्नमस्यंति दुर्गाण्यतितरंति ते १९ ये च श्राद्धानि कुर्वंति तिथ्यां तिथ्यां प्रजार्थिनः
सुविशुद्धेन मनसा दुर्गाण्यतितरंति ते २० ये क्रोधं संनियच्छंति क्रुद्धान्संशमयंति च । न च कुप्यंति भृत्या-
नां दुर्गाण्यतितरंति ते २१ मधुमांसं च ये नित्यं वर्जयंतीह मानवाः जन्मप्रभृति मद्यं च दुर्गाण्यतितरं-
ति ते २२ यात्रार्थं भोजनं येषां संतानार्थं च मैथुनं वाक्सत्यवचनार्थाय दुर्गाण्यतितरंति ते २३ ई-
श्वरं सर्वभूतानां जगतः प्रभवाप्ययं भक्ता नारायणं देवं दुर्गाण्यतितरंति ते २४ य एष पद्मरक्ताक्षः
पीतवासा महाभुजः सुहृद्भ्राता च मित्रं च संबंधी च तथाच्युतः २५ य इमान्सकलाँल्लोकान्चर्म-
वत्परिवेष्टयेत् इच्छन्प्रभुरचिंत्यात्मा गोविंदः पुरुषोत्तमः २६ स्थितः प्रियहिते जिष्णोः स एष पुरु-
षोत्तमः राजंस्तव च दुर्द्धर्षो वैकुंठः पुरुषर्षभः २७ ॥

२८ २९ कल्पसमुद्देशः कर्त्तव्यलेशः ३० दशशततमः ९९ असौम्याः १ २ ३ ४ ५ ६ ७ ८ ॥

यपनं ये स्मरिष्यन्तीह भक्त्या नारायणं हरिं ते तरन्तीह दुर्गाणि न चात्रास्ति विचारणा २८ दुर्गा
तितरणं ये च पठन्ति श्रावयन्ति च कथयन्ति च विप्रेभ्यो दुर्गाण्यतितरन्ति ते २९ इति कल्पस
मुद्देशः कीर्तितस्ते मयानघ तरन्ति येन दुर्गाणि परत्रेह च मानवाः ३० इति शान्तिपर्वणि राजध
र्मे दुर्गातितरणं ९९ युधिष्ठिर उ० असौम्याः सौम्यरूपेण सौम्याश्चासौम्यदर्शनाः ईदृशान्पुरुषां
स्तात कथं विद्यामहे वयं १ भीष्म उवाच अत्राप्युदाहरन्तीममितिहासं पुरातनं व्याघ्रगोमा
युसंवादं तन्निबोध युधिष्ठिर २ पुरिकायां पुरि पुरा श्रीमत्यां पौरिको नृपः परहिंसारुचिः क्रूरो
बभूव पुरुषाधमः ३ स त्वायुषि परिक्षीणे जगामानीप्सितां गतिं गोमायुत्वं च संप्राप्तो दूषितः पू
र्वकर्मणा ४ संस्मृत्य पूर्वं भूतिं च निर्वेदं परमं गतः न भक्षयति मांसानि परैरुपहृतान्यपि ५
अहिंस्रः सर्वभूतेषु सत्यवाक् सुदृढव्रतः स चकार यथाकालमाहारं पतितैः फलैः ६ श्मशा
ने तस्य वासो गोमायोः संमतो भवत् जन्मभूम्यनुरोधाच्च नान्यवासमरोचयत् ७ तस्य शौ
चमसृष्यन्तस्ते सर्वे सहजातयः चालयन्ति स्म तां बुद्धिं वचनैः प्रश्रयोत्तरैः ८ ॥

श्री॰
शां॰ रा
टी॰
२॰४

विप्रतिपत्तिर्विपरीताबुद्धिः ४ ५ प्रसृतैः विसृतैः ९ १४ अनुबंधेपरिणामे १५ अप्रत्ययः असंतोषः तेनकृतो अर्थापनयः

[illegible]

वसन्पितृवनेरौद्रेशौचेवर्तितुमिच्छसि इयंविप्रतिपत्तिस्तेयदात्वंपिशिताशनः ४ तत्समानो
भवास्माभिर्भोज्यदास्यामहेवयं भक्ष्यशौचंपरित्यज्ययद्विभुक्तंतदास्तुते ९ इतितेषांवचःश्रुत्वाश
त्रुवाचसमाहितः मधुरैःप्रसृतैर्वाक्यैर्हेतुमद्भिरनिष्ठुरैः ९ अश्रमाणाप्रसृतिर्मेशीलतःक्रियते
कुले प्रार्थयामिचतत्कर्मयेनविस्तीर्यतेयशः १० श्मशानेयद्धिमेवासोसमाधिर्मेनिशाम्यतां
आत्माफलतिकर्माणिनाश्रमोधर्मकारणं १२ आश्रमेयोद्विजंहन्याद्गांवाद्दद्यादनाश्रमे किंतु
तत्पातकंनस्यातद्वादत्तंवृथाभवेत् १४ भवंतःस्वार्थलोभेनकेवलंभक्षणेरताः अनुबंधेनयेदो
षास्तान्नपश्यंतिमोहिताः १५ अप्रत्ययकृतांगर्हामर्थापनयदूषितां इहचामुत्रचानिष्टांतस्मा
द्वृत्तिंनरोचये १६ तंशुचिंपंडितंमत्वाशार्दूलःख्यातविक्रमः कृत्वात्मसदृशींपूजांसाचिव्येवरयत्स्व
यं ७ शार्दूलउ॰ सौम्यविज्ञातरूपस्त्वंगच्छयात्रांमयासह व्रियंतामीप्सिताभोगाःपरिहार्याश्च
पुष्कलाः ९ तीक्ष्णाइतिवयंख्याताभवंतंज्ञापयामहे मृदुपूर्वंहितंचैवश्रेयश्चाधिगमिष्यसि

[illegible]

धर्महानिः १६ ७ यात्रांराजकार्यं गच्छश्रानुहि परिहार्याश्चानीप्सिताःपरिहार्याःपरिच्छेद्याइत्यन्ये ९ ज्ञापयामहेसूचयामहे

॥
४
५
२॰४

मदंतरे मन्निमित्तं २१ २४ योत्स्यति योगं प्राप्स्यति मदंतरे मन्निमित्तं दुःशीला भवेष्यंति २५ अत्र हेतुमाह नेति पश्चामंदस्ता

गोमायुरुवाच सदृशं मृगराजैतत्तव वाक्यं मदंतरे यत्सहायान्मृगयसे धर्मार्थकुशला
न्शुचीन् २१ न शक्यं ह्यनमात्येन महत्त्वमनुशासितुं दुष्टामात्येन वा वीर शरीरपरिपंथिना
२२ सहायाननुरक्तांश्च नयज्ञानुपसंहितान् परस्परमसंदृष्टान्विजिगीषूनलोलुपान् २३
अनतीतोपधान्प्राज्ञान्हिते युक्तान्मनस्विनः पूजयेथा महाभाग यथाचार्यान्यथा पितॄन् २४
न त्वेवं मम संतोषाद्रोचतेन्यन्मृगाधिप न कामये सुखान्भोगानैश्वर्यं च त्वदाश्रयं २५ न योक्ष्य
ति हि मे शीलं तव भृत्यैः पुरातनैः ते त्वां विभेदयिष्यंति दुःशीला मदंतरे २६ न संश्रयः श्लाघ
नीयो ह्यन्येषामपि भास्वतां २६ कृतात्मा सुमहाभागः पापकेष्वप्यदारुणः दीर्घदर्शी महोत्सा
हः स्थूललक्षो महाबलः २७ कृती चामोघकर्तासि भाव्यैश्च समलंकृतः न स्वल्पेनास्मि संतु
ष्टो दुःखा वृत्तिरनुष्ठिता २८ सेवायां चापि नाभिज्ञः स्वच्छंदेन वनेचरः राजोपक्रोशदोषाश्च सर्वे
संश्रयवासिनां वनचर्या च निःसंगा निर्भया वनवासिनाम् २९ नृपेणाहूयमानस्य यत्तिष्ठति भ
यं हृदि ३० न तत्तिष्ठति तुष्टानां वने मूलफलाशिनां पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरं ३१

वनीयो नास्मीति द्वयोः संबंधः २६ स्थूललक्षो बहुप्रदः २७ दुःखावृत्तिः सेवावृत्तिरनुष्ठिता २८ राजसमीपे उपक्रोशो निंदा न

शां॰ मो॰ ... ५५ ॥

श्री॰
शां॰रा॰
टी॰
२९

निर्हृतिः स्वर्वे ३१ शिष्टाः कृतदंडाः ३२ ३३ ३४ ३५ ३७ व्याघ्रयोनितः व्याघ्रयोनेः व्याघ्रस्येत्यर्थः ३८ ३९ ४० ४१ ४२ ॥

विचार्य स्वल्पं पश्यामि तत्त्वं विषयत्र निर्वृतिः ३१ अपराधैर्न तावंतो भृत्याः शिष्टा नराधिपैः उपघा
तैर्यथा भृत्या दूषिता नियतं गताः ३२ यदि त्वेतन्मया कार्यं मृगेंद्र यदि मन्यसे समयं कृतमिच्छामि
वर्तितव्यं यथा मयि ३३ मदीया माननीयास्ते श्रोतव्यं च हितं वचः कल्पिता या च मे वृत्तिः सा भवेत्त्वयि
स्थिरा ३४ न मंत्रयेयमन्यैस्ते सचिवैः सह कर्हिचित् नीतिमंतः परीप्संतो वृथा ब्रूयुः परे मयि ३५
एकमेकेन संगम्य रहो ब्रूयां हितं वचः न च ते ज्ञातिकार्येषु प्रष्टव्योऽहं हिताहिते ३६ मया संमंत्र्य पश्चा
च्च न हिंस्याः सचिवास्त्वया मदीयानां च कुपितो मा त्वं दंडं निपातयेः ३७ एवमस्त्विति तेनासौ मृगेंद्रे
णाभिपूजितः प्राप्तवान्मतिसाचिव्यं गोमायुर्व्याघ्रयोनितः ३८ तं तथा सत्कृतं दृष्ट्वा पूज्यमानं स्वक
र्मसु प्राद्विषन्कृतसंघाताः पूर्वभृत्या मुहुर्मुहुः ३९ मित्रबुद्ध्या च गोमायुं सांत्वयित्वा प्रसाद्य च दो
षेष्वसमतां नेतुमैच्छन्नशुभबुद्धयः ४० अन्यथा ह्युषिताः पूर्वं परद्रव्याभिहारिणः अशक्ताः किं
चिदादातुं द्रव्यं गोमायुयंत्रिताः ४१ व्युत्थानं च विकांक्षद्भिः कथाभिः प्रतिलोभ्यते येन न महता चैव
बुद्धिरस्य विलोभ्यते ४२ न चापि स महाप्राज्ञस्तस्माद्धैर्याच्चचाल ह अथास्य समयं कृत्वा विनाशाय

२९

तस्यगोमायोर्वेश्मनि ४४ तस्यगोमायोस्तद्विदितं तेनचतन्मर्षितंकारणार्थंस्वस्यबंधविच्छेदोभवतितिहेतोरित्यर्थः ४५ ५० वर्णि

ईप्सितंतत्रमृगेंद्रस्यमांसंयत्तत्रसंस्कृतं अपनीयस्वयंतद्धितैर्न्यस्तंतस्यवेश्मनि ४४ यदर्थंचाप्यपहृ
तंयेनतच्चैवमंत्रितं तस्यतद्विदितंसर्वंकारणार्थंचमर्षितं ४५ समयोयंकृतस्तेनसाविनमुपगच्छ
ता नोपघातस्त्वयाकार्योराजन्मैत्रीमिहेच्छता ४६ भोक्तुमु· पस्थितस्यमृगेंद्रस्यभोक्तुमभ्युत्थित
स्यच भोजनार्थायापहृतंवै तन्मांसंनोपदृश्यते ४७ मृगराजेनचाज्ञप्तंदृश्यतांचौरःसत्वरं कृतकोपा
पितन्मांसंमृगेंद्रायोपवर्णितं ४८ सचिवेनापनीतंतद्विदुषाप्राज्ञमानिना सरोषस्त्वथशार्दूलः
श्रुत्वागोमायुचापलं ४९ बभूवामर्षितोराजावधंतस्यव्यरोचयत् छिद्रंतेतस्यतदृष्ट्वाप्रोचुस्ते
सर्वमंत्रिणः ५० सर्वेषामेवसोस्माकंहन्तिभंगेप्रवर्तते निश्चित्यैवंपुनस्तस्यतैस्तत्कर्माणिवर्णयन्
५१ इदंतस्यहृदयंकर्मकिंतेननकृतंभवेत् श्रुतंस्वामिनापूर्वंयादृशोनैवतादृशः ५२ वाङ्मात्रे
णैवधर्मिष्ठःस्वभावेनतुदारुणः धर्मच्छद्मास्ययंपापोवृथाचारपरिग्रहः ५३ कार्यार्थंभोजना
र्थेषुव्रतेषुकृतवान्श्रमं यदिविप्रत्ययोस्यात्तदिदंदर्शयामते ५४ तन्मांसंचैवगोमायोस्तैःक्ष
णाद्गृहेढौकितं मांसापनयनंज्ञात्वाव्याघ्रःश्रुत्वाचतद्वचः ५५ ॥

यन्नुवर्णयन् ५१ ५३ विप्रत्ययःअविश्वासः ५४ गोमायोर्गृहेढौकितंप्रवेशितंमांसंप्रदर्शयामासुरित्यर्थः ५५ ॥

श्री·
शां·रा·
टी·
३११

५५ ५६ कर्मनग्राह्यंसंवर्षजैः स्पर्द्धास्थैः ५७ प्रक्रियाप्रक्रान्तंकर्म ५८ ६३ तलवत्प्रवाम्भ्रावकटाहगर्भवत् ६४ ६५ प्रभव

आज्ञापयामासततदागोमायुर्वध्यतामिति शार्दूलस्यवचः श्रुत्वाशार्दूलजननीततः ५५ मृगराजंहि
तैर्वाक्यैःसंबोधयितुमागमत् पुत्रनैतत्त्वयाग्राह्यंकपटारंभसंयुतं ५६ कर्मसंघर्षजैर्दोषैर्दुष्टेनाशु
चिभिःशुचिः नोच्छ्रितंसहतेकश्चित्प्रक्रियावैरकारिका ५७ शुचेरपिहियुक्तस्यदोषएवनिपात्यते
मुनेरपिवनस्थस्यस्वानिकर्माणिकुर्वतः ५८ उत्पद्यन्तेत्रयः पक्षामित्रोदासीनशत्रवः लुब्धानांशुचा
योद्वेष्याःकातराणांतरस्विनः ५९ मूर्खाणांपंडिताद्वेष्यादरिद्राणांमहाधनाः अधार्मिकाणांधर्मि
ष्ठाविरूपाणांसुरूपिणः ६० बहवःपंडितामूर्खालुब्धामायोपजीविनः कुर्युर्दोषमदोषस्यबृहस्पतेर्म
तेरपि ६१ शून्यात्तत्र्चगृहान्मांसंयद्यप्यपहृतंतव नेच्छन्तिदीयमानंचसाधुतावद्विमृश्यतां ६२ असभ्याः
सभ्यसंकाशाःसभ्याश्चासभ्यदर्शनाः दृश्यन्तेविविधाभावास्तेषुयुक्तंपरीक्षणं ६३ तलवद्दृश्यतेव्योमा
खद्योतोहव्यवाडिव नचैवास्तितलंव्योम्निनखद्योतेहुताशनः ६४ तस्मात्प्रत्यक्षदृष्टोपियुक्तोह्यर्थः
परीक्षितुं परीक्ष्यज्ञापयन्नर्थान्नपश्चात्परितप्यते ६५ नदुष्करमिदंपुत्रयत्प्रभुर्घातयेत्परं श्लाघनीयाय ३११
शस्याचलोकेप्रभवतांक्षमा ६६ ॥

तांप्रभूणां ६६ ॥

६७ ६८ गोमायोश्चारः ६९ ७० प्रायं मरणार्थमुपवेशनं आसितं आवर्जितं ७१ ७४ उपहिताः वञ्चिताः ७५ प्रतारिताः च्याविताः

स्थापितोयं त्वया पुत्र सामंतेष्वपि विश्रुतः ६६ खिन्नामाध्यते पात्रं यार्यतामेषते स्वहस्त ६७ दूषितं पर
दोषैर्हि यद्भक्त्या नित्यमन्यथा शुचि स्वयं संदूषितामात्यः क्षिप्रमेव विनश्यति ६८ तस्माद्दुष्यति संधाना
गोमायोः कश्चिदागतः धर्मात्मा तेन वाक्यानि यथैतत्कपटं कृतं ६९ ततो वित्तानवादित्रैः सत्कार्य
सविमोक्षितः परिषत्कश्च सस्नेहं स्पर्शेर्देवेण पुनः पुनः ७० अनुज्ञाप्य मृगेंद्रेण गोमायुर्नीतिशास्त्र
वित् तेनामर्षेणासंततमः प्रायमासितमैच्छत ७१ शार्दूलस्तंतु गोमायुं स्नेहात्प्रोत्फुल्ललोचनः अ
वारयत्स धर्मिष्ठः पूजया प्रतिपूजयन् ७२ तं सगोमायुरालोक्य स्नेहादागतसंभ्रमं उवाच प्रणतो
वाक्यं बाष्पगद्गदया गिरा ७३ पूजितोहं त्वया पूर्वं पश्चाच्चैव विमानितः परेषामास्पदं नीतो वस्तुं
नार्हाम्यहं त्वयि ७४ असंतुष्टाश्च्युताः स्थानान्मानात्प्रत्यवरोपिताः स्वयं चापहृता भृत्या ये वाप्यु
पहिताः परैः ७५ परिक्षीणाश्च लुब्धाश्च क्रुद्धा भीताः प्रतारिताः हृतस्वा मानिनो ये च त्यक्ता दा
नात्महेप्सवः ७६ संतापिताश्च ये केचिद्व्यसनौघप्रतीक्षिणः अंतर्हिताः सोपहितास्ते सर्वे परसा
धनाः ७७ अवमानेन युक्तस्य स्थानभ्रष्टस्य वा पुनः कथं यास्यसि विश्वासमहं तिष्ठामि वा कथं ७८ ॥

७६ अपरसाधनाश्च अयनाश्चेति अपरसाधनाः प्रीतिशून्या निर्धनाश्चेत्यर्थः ७७ ७८ ॥

७९ ८३ कश्चिदेव कश्चिदपि भर्तुर्हितो न दृश्यते किंतु वाणिज्यवद्भयार्थः स्नेहो न केवलं भर्तुः कार्यार्थः ॥ ८४ पुरुषज्ञा
नं सुदुःखं दुःखेन लभ्यं यतः एषां नृपाणां चित्तं चलाचलं समर्थो गम्यते ज्ञायते सुपुरुषज्ञानं दुर्घटमित्यर्थः ॥ ८५ प्रक्रिया महती

समर्थ इति संगृह्य स्थापयित्वा परीक्षितः । कृतं च समयं भित्त्वा नयाद्दम वमानितः ॥ ७९ प्रथमं यः स
माख्यातः शीलवानिति संसदि । न वाच्यं तस्य वैगुण्यं प्रतिज्ञापरिरक्षता ॥ ८० एवं चावमतस्येह विश्वा
सं मे न यास्यति । त्वयि चापेतविश्वासे मम मोहो भविष्यति ॥ ८१ शंकितस्त्वमहं भीतः परच्छिद्रानुदर्शिनः ।
अस्निग्धाश्चैव दुस्तोषाः कर्म चैतद्बहुच्छलम् ॥ ८२ दुःखेन श्लिष्यते भिन्नं श्लिष्टं दुःखेन भिद्यते । भिन्नश्लि
ष्टा तु या प्रीतिर्न सा स्नेहेन वर्तते ॥ ८३ कश्चिदेव हितो भर्तुर्दृश्यते न परात्मनोः । कार्यापेक्षा हि वर्तन्ते भावाः
स्निग्धास्तु दुर्लभाः ॥ ८४ सुदुःखं पुरुषज्ञानं चित्तं ह्येषां चलाचलम् । समर्थो वाप्यशक्तो वा शतेष्वेकोऽधि
गम्यते ॥ ८५ अकस्मात्प्रक्रिया नृणामकस्माच्चापकर्षणम् । शुभाशुभे महत्त्वं च प्रकर्तुं बुद्धिलाघवम् ॥ ८६
एवं विधं सांत्वमुक्त्वा धर्मकामार्थहेतुमत् । प्रसादयित्वा राजानं गोमायुर्वनमभ्यगात् ॥ ८७ अगृह्यानुन
यं तस्य मृगेन्द्रस्य च बुद्धिमान् । गोमायुः प्रायमास्थाय त्यक्त्वा देहं दिवं ययौ ॥ ८८ इति श्रीमहाभारते ।
शान्तिपर्वणि राजधर्मे व्याघ्रगोमायुसंवादः ॥ १११ ॥

करणम् अकस्मात्कर्तुं बुद्धेर्लाघवं तुच्छत्वमेव हेतुः ॥ ८६ प्रसादयित्वा प्रसाद्य ॥ ८७ अगृह्य अगृहीत्वा ॥ ८८ एकादशशततमः ॥ १११

किंपार्थिवेनेत्यध्यायेनीचोमहत्वंप्राप्यापिमोक्षादालस्याच्चनश्यतीतिदर्शयति १ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ ॥
युधिष्ठिर उ॰ किंपार्थिवेनकर्तव्यंकिंचकृत्वासुखीभवेत् एतदाचक्ष्वतत्त्वेनसर्वधर्मभृतांवर १
भीष्म उ॰ हंततेहंप्रवक्ष्यामिशृणुकार्यैकनिश्चयं यथाराज्ञेहकर्तव्यंयच्चकृत्वासुखीभवेत् २ न
चैववर्तितव्यंस्मयथेदमनुशुश्रुम उष्ट्रस्यतुमहद्वृत्तंतन्निबोधयुधिष्ठिर ३ जातिस्मरोमहानुष्ट्रःप्रा
जापत्ययुगेभवत् तपःसुमहदातिष्ठदरण्येसंशितव्रतः ४ तपसस्तस्यचान्तेथप्रीतिमानभवा
द्विभुः वरेणच्छन्दयामासततश्चैनंपितामहः ५ उष्ट्र उवाच भगवंस्त्वत्प्रसादान्मेदीर्घाग्रीवाभवे
दियं योजनानांशतंसाग्रंगच्छामिचरितुंविभो ६ एवमस्त्वितिचोक्तःसवरदेनमहात्मना प्रति
लभ्यवरंश्रेष्ठंययावुष्ट्रःस्वकंवनं ७ सचकारतदालस्यंवरदानात्सदुर्मतिः नचैच्छच्चरितुंगं
तुंदुरात्माकालमोहितः ८ सकदाचित्प्रसार्यैवतांग्रीवांशतयोजनां चचारश्रान्तहृदयोवातश्चा
गात्ततोमहान् ९ सगुहायांशिरोग्रीवांनिधायपशुरात्मनः आस्तेतुवर्षमभ्यागात्सुमहा
त्प्लावयज्जगत् १० अथशीतपरीताङ्गोजंबुकःक्षुच्छ्रमान्वितः सदारस्तांगुहामाशुप्रविवेशज
लार्दितः ११ सदृष्ट्वामांसजीवीतुसुभृशंक्षुच्छ्रमान्वितः अभक्षयत्ततोग्रीवामुष्ट्रस्यभरतर्षभ १२

श्री· १३ १६ योगेनउपायेनएवंविधंआलस्यं ७ बाहुमतिबाहूपलक्षितंशौर्यं जंघोपलक्षितंपादविहरणं भारोभारवहनं १६ आ
शां·रा· यदात्वबुध्यतात्मानंबध्यमाणंसवैपशुः तदासंकोचनेयत्नमकरोद्दुःखशङ्कितः १३ यावदूर्ध्वमधश्चै
टी· वग्रीवांसंक्षिपतेपशुः तावत्तेनमहाराजजंबुकेनसभक्षितः १४ सहत्वाभक्षयित्वाचतमुष्ट्रंजंबुकस्तदा
२१३ विगतेवातवर्षेतुनिश्चक्रामगुहामुखात् १५ एवंदुर्बुद्धिनाप्राप्तमुष्ट्रेणनिधनंतदा आलस्यस्यक्रमात्पा
श्यमहान्तंदोषमागतं १६ त्वमप्येवंविधंहित्वायोगेननियतेन्द्रियः वर्तस्वबुद्धिमूलंतुविजयंमनुरब्रवीत्
१७ बुद्धिश्रेष्ठानिकर्माणिबाहुमध्यानिभारत तानिजंघाजघन्यानिभारप्रत्यवराणिच १८ राज्यंति
ष्ठतिदक्षस्यसंगृहीतेन्द्रियस्यच आत्मस्यबुद्धिमूलंहिविजयंमनुरब्रवीत् गुह्यमंत्रश्रुतवतः सस
हायस्यचानघ १९ परीक्ष्यकारिणोह्यर्थास्तिष्ठन्तीहयुधिष्ठिर सहाययुक्तेनमहीकृत्स्नाशक्याप्र
शासितुं २० इदंहिसद्भिःकथितंविधिज्ञैःपुरामहेन्द्रप्रतिमप्रभाव मयापिचोक्तंतवशास्त्रदृष्ट्यायथै
वबुद्ध्याप्रचरस्वराजन् २१ इतिश्रीमहाभारतेशान्तिपर्वणिराजधर्मेउष्ट्रग्रीवोपाख्यानं ११२ युधि
ष्ठिरउ· राजाराज्यमनुप्राप्यदुर्लभंभरतर्षभ अमित्रस्यातिवृद्धस्यकथंतिष्ठेदसाधनः १ भीष्मउ·
अत्राप्युदाहरन्तीममितिहासंपुरातनं सरितांचैवसंवादंसागरस्यचभारत २ ॥
नैस्यप्रतिलिप्सावतः १९ २१ अध्यायः ११२ राजाराज्यमिति अध्यायोबलवतिरिपौविनयएवश्रेयानितिपर्यर्थः १ २ ॥ २१३

३ निहतान् उन्मूलितान् कायिनः महाशरीरान् अन्यान् इतान् आनीतानिति शेषः ४ अकायः अल्पकायः ५ ७ पकनि

सर्वासिनिलयः शश्वत्सागरः सरितां पतिः पप्रच्छ सरितः सर्वाः संशयं जातमात्मनः ३
सागर उवाच समूलशाखान्पश्यामि निहतान्कायिनो द्रुमान् युष्माभिरिह पूर्णाभिर्न
घस्तत्र न वेतसम् ४ अकायश्चाल्पसारश्च वेतसः कूलजश्च वः अवज्ञया वा नानीतः किंच वा ते
न वः कृतं ५ तदहं श्रोतुमिच्छामि सर्वासामेव वो मतं यथा चेमानि कूलानि भित्त्वा नानीयते वेत
सः ६ ततः प्राह नदी गंगा वाक्यमुत्तममर्थवत् हेतुमद्ग्राहकं चैव सागरं सरितां पतिं ७ गंगोवा
च तिष्ठन्त्येते यथास्थानं नगा ह्येकनिकेतनाः ते त्यजन्ति ततः स्थानं प्रातिलोम्यान्न वेतसः ८
वेतसो वेगमायान्तं दृष्ट्वा नमति नापरे सरिद्वेगे ऽभ्यतिक्रान्ते स्थानमासाद्य तिष्ठति ९ कालज्ञः स
मयज्ञश्च सदा वश्यश्च नोद्धतः अनुलोमस्तथास्तब्धस्तेन नाभ्येति वेतसः १० मारुतोदकवेगे
न ये नमन्त्युन्नमन्ति च ओषध्यः पादपा गुल्मा न ते यान्ति पराभवं ११ भीष्म उ० यो हि शत्रोर्वि
वृद्धस्य प्रभोर्वधविनाशने पूर्वं न सहते वेगं क्षिप्रमेव विनश्यति १२ सारासारं बलं वीर्यमात्मनो
द्विषतश्च यः जानन्विचरति प्राज्ञो न स याति पराभवं एवमेव यदा विद्वान्मन्येतातिबलं रि

केनाः तत्रास्तत्वर्थः प्रातिलोम्यात् अस्माकं प्रातिकूल्यात् ८ १२ वैतसीं वृत्तिं आ संश्रयेद्वेतसीं वृत्तिमेतत्प्रज्ञानलक्षणम्

श्री॰ विद्वान् मूर्ख्यश्चासौ प्रगल्भश्चतेन १ सदृते उक्तं २ कृष्यमाणस्याक्रोशतः सर्षीतितिदृक्षः कृष्यतिक्रोधवति ३ टिटिभे

शां॰ रा॰ टिट्टिभवत् ड:अवं वाशमानंरटंतं ४ ६ ८ यदीतिपापकर्मणः प्रयोगेअनेनेदंक्तुकर्मकृतमितिशब्दोच्चारणेकृतेसति

टी॰ २४

युधिष्ठिरउ॰ विद्वान्मूर्खप्रगल्भेनमृदुतीक्ष्णेनभारत आक्रुष्यमाणःसदसिकथंकुर्यादरिंदम १

भीष्मउवाच श्रूयतांपृथिवीपालयथैषोर्थोनुगीयते सदासुचेताःसहतेनरस्येहाल्पमेधसः २

अरुष्यन्क्रुष्यमाणस्यसुकृतंनामविंदति दुष्कृतंचात्मनोमर्षीरुष्यत्येवापमार्ष्टिवै ३ टिट्टिभतमु

पेक्षेतवाशमानमिवातुरं लोकेविद्वेषमापन्नोनिष्फलंप्रतिपद्यते ४ इतिसश्लाघतेनित्यंतेनपापे

नकर्मणा इदमुक्तोमयाकश्चित्सम्मतोजनसंसदि ५ सतत्रव्रीडितःशुष्कोमृतकल्पोवतिष्ठते

श्लाघन्श्लाघनीयेनकर्मणानिरपत्रपः ६ उपेक्षितव्योयत्नेनतादृशःपुरुषाधमः यद्यद्ब्रूयादल्प

मतिस्तत्तदस्यसहेद्बुधः ७ प्राकृतोहिप्रशंसन्वाकिंकरिष्यति वनेकाकइवाबुद्धिर्वाशमानोनिरर्थ

कं यदिवाग्भिःप्रयोगःस्यात्प्रयोगेपापकर्मणः वागेवार्थोभवेत्तस्यनह्येवार्थोजिघांसतः ९

वाग्भिर्वाक्शात्रेणप्रयोगः परत्रदोषसिद्धिःस्यात्तर्हिवागेवार्थःप्रयोजनंस्यात्तवपुत्रोम्रियतामितिशब्देनैवपुत्रमृत्युःस्यात्

जिघांसतस्तुअर्थोव्यापारोनहिस्यात् यथावाचाहतोनहन्यतेएवंचवाचाहर्षितोनउ

च्छतीत्यर्थः ९ ॥

निषेकमिति सपर्वं वदन् हन्तेन क्रियया चेष्टया वा वागादिव्यापारेण च लिंगेन निषेकं स्वमातरि रेतः सेकं पितरं त्वेन कृतमिति।
आचेष्टमुक्तं कथयति कौपीनं गुह्यप्रदेशं संदर्शयन्निव नृत्यं कुर्वन् मयूरो यथा आह्वयते समयं करिष्यामीति मन्यते तेन तत्र मम गुरुं क्लो
काः पश्यन्तीति त्रपते एवं त्वलोपि मया समहानम्रमुकस्सभायां उक्तं तं सुक्तं इति श्लाघते तेन तत्र मेनेन मम मातरि दोषः स्पष्टीक्रियते

निषेकं विपरीतं स आचेष्टन्तं चेष्टया मयूर इव कौपीनं नृत्यं संदर्शयन्निव १० यस्या वाच्यं न लोके
स्ति नाकार्यं चापि किंचन वाचेतेन न संदध्यात् क्लिचिः संश्लिष्टकर्मणा ११ प्रत्यन्तं शणावादीयः परो
दे चापि निंदकः समानवशः स्वलोके नष्टलोकपरावरः १२ तादृक् जनशतस्यापि यद्ददाति ब्रवीति
च परोक्षेणापवादी यस्तं नाशयति तत्क्षणात् १३ तस्मात्त्यक्तो नरः सद्यस्तादृशं पापचेतसं वर्जयेत्।
त्साधुभिर्वर्ज्यं सारमेयामिषं यथा १४ परिवादं ब्रुवाणो हि दुरात्मा वै महाजने प्रकाशयति दोषांस्तु
सर्पः फणामिवोच्छ्रितं १५ न स्वकर्माणि कुर्वाणः प्रतिकर्तुं य इच्छति भस्मकूट इवाबुद्धिः खरो रा
जस्सि मज्जति १६ मनुष्यशालाहकमप्रशान्तं जनापवादे सततं निविष्टं मातंगमुन्मत्तमिवोन्नदन्तं त्य
जेत तं श्वानमिवातिरौद्रं १७

मयैवेति न त्रपते इत्यर्थः १० ११ नष्टो लोकः परं ज्ञानं अवरो यमं स्त्रयस्मस्मः नष्टलोकपरावरः १२
तादृक्स्यमान् १३ सारमेयामिषं शुनो मांसं १४ निषेकमित्युक्तमाचेष्टपरिवादमिति दोषान्जारजत्वादीन् भस्मकूटे भस्मराशौ खर
इवाबुद्धिः रजसि खः विनिमज्जति १६ शालाहकस्थानमेव मनुष्यत्वेन लोके गृहीतमित्यर्थः १७ ॥

श्री॰
शां॰ रा॰
टी॰
२५

१८ प्रत्युच्यमानः आतिथ्यमाणाप भिरसद्भिः निशाम्य अभिभूयः अस्मि प्रत्युत्तरं मा देहीति निवारणीयः तदेवाह माभूरिति १९ द
शार्द्देन संहतांगुलिपंचकेन पाणिना २२ सर्वे कृपिते मूढे सिद्धमेव २० २१ चतुरशाशांतमः ११४ पितामह १ अयं निंदारूपः २

अधीरजन्मेषपथि वर्त्तमानं दमादपेतं विनयाच्च पापं अरिव्रतं नित्यमभूतिकामं धिगस्तु तं पापमतिं
मनुष्यं १८ प्रत्युच्यमानस्तु भिभूय पभिर्निशाम्य माभूस्त्वमथार्त्तरूपः उच्चस्य नीचेन हि संप्रयोगं विग
र्हयंति स्थिरबुद्धयो ये १९ क्रुद्धो दयार्द्देन हिताद्येह्यासपांसुभिर्वा विकिरेत्तुषेर्वा विहस्य दंतांश्च वि
भीषयेद्वा सिद्धं हि मूढे कृपिणे नृशंसे २० विगर्ह्यणां परमदुरात्मना कृतां सहेत वः संसदि दुर्जनान्नरः
पठेदिदं वापि निदर्शनं सदा नवाङ्मयं यल्लभतीति किंचिदप्रियं २१ इति शांतौ राजधर्मे द्विहिमकं नाम ११४
युधिष्ठिरः पितामह महाप्राज्ञ संशयो मे महानयं संछेत्तव्यस्त्वया राजन् भवान्कुलकरो हितः १
पुरुषाणामयं तात दुर्वृत्तानां दुरात्मनां कथितो वाक्यसंचारस्ततो विज्ञापयामि ते २ यद्धितं राज्य
तंत्रस्य कुलस्य च सुखोदयं आयत्यां च तदात्वे च तेम यद्धितं करं च यत् ३ पुत्रपौत्राभिरामं च राष्ट्रवृद्धि
करं च यत् अन्नपाने शरीरे च हितं यत्तद्ब्रवीहि मे ४ अभिषिक्तो हि यो राजा राष्ट्रस्थो मित्रसंवृतः

हितं प्रतिविधं आयत्यां उत्तरकाले ३ ४ मित्रसुहृदो प्रत्युपकारमपेक्षानपेक्ष्य चोपकर्त्तारौ तद्वान्सत्त्वोपेतः शौर्यादिति तिशोषः ५

[illegible]

२५

तथापिजितेंद्रियत्वात्‌विगुणितभृत्यस्सनराज्येस्थिरंबलंभतेनवेतिप्रश्नार्थः सत्यपिसाधनांतरेभृत्यानामानुकूल्याभावेराज्यो-
नश्यतितत्सद्भावेचसर्वान्कामान्फलंतीत्युत्तरंचाहयोहीत्यादिना असत्प्रग्रहवृत्तिः इंद्रियाणामनिग्रहशीलः भृत्यफलैः भृत्य

योऽत्यसत्प्रग्रहवृत्तिः स्नेहरागबलात्मनः इंद्रियाणामनीशत्वादसज्जनबुभूषकः ६ तस्यभृ-
त्याविगुणतांयांतिसर्वेकुलोद्गताः नचभृत्यफलैरर्थैः सराजासंप्रयुज्यते ७ एतन्मेसंशयस्या-
स्यराजधर्मान्त्वंहिविद्वान् बृहस्पतिसमोबुद्ध्याभवान्शंसितुमर्हति ८ शंसितापुरुषव्याघ्रत्वन्नः
कुलहितेरत तत्राप्येकोमहाप्राज्ञोयोनःशंसतिसर्वदा ८ त्वत्तःकुलहितंवाक्यंश्रुत्वाराज्यहितो-
दयं अमृतस्याव्ययस्येवतृप्तःस्वप्स्याम्यहंसुखं ९ कीदृशाःसन्निकृष्टस्थाःभृत्याःसर्वगुणान्वि-
ताः कीदृशैःकिंकुलीनैर्वासहयात्राविधीयते १० नह्येकोभृत्यरहितोराजाभवतिरक्षिता राज्यंचे-
दंजनःसर्वस्तत्कुलीनोभिकांक्षति ११ भीष्मउ॰ नचप्रशास्तुंराज्यंहिशक्यमेकेनभारत असहाय-
वतातातनैवार्थाःकेचिदप्युत १२ लब्धुंलब्ध्वापिसततंरक्षितुंभरतर्षभ यस्यभृत्यजनःसर्वोज्ञान-
विज्ञानकोविदः १३ हितैषीकुलजःस्निग्धःसराज्यफलमश्नुते १४ मंत्रिणोयस्यकुलजाअसंहार्याःस-

बलप्राप्यैःअर्थैःधनादिभिः ६ ७ तत्राविदुरः ८ १२ लब्धुंलब्ध्वाप्यरक्षितुंशक्याइति १३ १४ असंहार्याःउत्कोचादिनाअभेद्याः १५

श्री॰ शां॰ रा॰ टी॰ २१६

१६ १८ परंलंसमूहं १९ कोष्ठागारंधान्यादिसामग्रीगृहं गुणीभवेत्तबहुगुणीभावंगच्छेत् २० व्यवहारःअर्थिप्रत्यर्थिनोर्विवादेनिर्णयः फलोदयःअर्थिन्यनृतेअर्थ्यमानंद्विगुणोदंडोराज्ञःआयः प्रत्यर्थिन्यनृतेयावदर्थ्यमानंअर्थिनेदाप्यंतावानेवराजदंडश्चफलपर्यंतः तत्रदृष्टांतः शंखलिखितइति यथाफलमात्रस्तेयेशंखेनलिखितस्यहस्तच्छेदोराज्ञाप्रतिपादित

अनागतविधातारःकालज्ञानविशारदाः अतिक्रांतमशोचंतःसराज्यफलमश्नुते १६ समदुःखसुखायस्यसहायाःप्रियकारिणः अर्थचिंतापराःसत्याःसराज्यफलमश्नुते १७ यस्यनार्तोजनपदःसन्निकर्षगतःसदा अक्षुद्रःसत्पथालंबीसराजाराज्यभाग्भवेत् १८ कोशाक्षपटलंयस्यकोशवृद्धिकरैर्नरैः आप्तैस्तुष्टैश्चसततंचीयतेसनृपोत्तमः १९ कोष्ठागारमसंहार्यैर्धान्यैःसंचयतत्परैः पात्रभूतैरलुब्धैश्चपाल्यमानंगुणीभवेत् २० व्यवहारश्चनगरेयस्यकर्मफलोदयः दृश्यतेशंखलिखितःसधर्मफलभाङ्नृपः २१ संगृहीतमनुष्यश्चयोराजाराजधर्मवित् षड्वर्गंप्रतिगृह्णातिसधर्मफलमश्नुते २२ इतिशान्तिपर्वणिराजधर्मे ५५ भीष्मउ॰ अत्राप्युदाहरंतीममितिहासंपुरातनं निदर्शनेपरंलोकेसज्जनाचरितेसदा ८ ॥

त्वाकारितस्तद्वदित्यर्थः २१ षड्वर्गंसंधिविग्रहादिकं २२ पंचदशाधिकततमः ५५ अत्रवत्समानोप्युक्ततमायममध्यमस्थानेषुक्रमादुत्तमायममध्यमापवयोज्याः तत्रउत्तमस्थानेनीचोनियोज्यश्चेत्यस्मिन्नर्थेनिदर्शनेषदृष्टांतत्वेनेतिहासमुदाहरंति ८ ॥

अस्यैव वक्ष्यमाणस्य २ ४ सत्त्वाः प्राणिनः ५ ६ स्वविप्रश्नदाः स्वाविनः स्युः इति प्रश्नस्योत्तरं स्वाविनः स्युः इति तत्प्रदा इत्यर्थः न्य

अस्यैवार्थस्य सदृशं यच्छ्रुतं मे तपोवने जामदग्न्यस्य रामस्य यदुक्तं महर्षिसत्तमैः २ वने महति कस्मिं
श्चिदमनुष्यनिषेविते ऋषिर्मूलफलाहारो नियतो नियतेन्द्रियः ३ दीक्षादमपरः शान्तः स्वाध्या
यपरमः शुचिः उपवासविशुद्धात्मा सततं सत्पथमास्थितः ४ तस्य संदृश्य सद्भावमुपविष्टस्य धीम
तः सर्वे सत्त्वाः समीपस्था भवन्ति वनचारिणः ५ सिंहव्याघ्रगणाः क्रूरा मत्ताश्चैव महागजाः द्वी
पिनः खड्गभल्लूका ये चान्ये भीमदर्शनाः ६ ते सुखप्रश्नदाः सर्वे भवन्ति क्षतजाशनाः तस्यर्षेः
शिष्यवच्चैव न्यग्भूताः प्रियकारिणः ७ दत्त्वा च ते सुखप्रश्नं सर्वे यान्ति यथागतं ग्राम्यस्त्वेकः पा
शुस्तत्र नाजहात् स महामुनिं ८ भक्तोऽनुरक्तः सततमुपवासकृशोऽबलः फलमूलोदकाहारः
शान्तः शिष्टाकृतिर्यथा ९ तस्यर्षेरुपविष्टस्य पादमूले महामतेः मनुष्यवद्गतो भावः स्नेहबद्धो भृ
शं १० ततोऽभ्ययान्महावीर्यो द्वीपी क्षतजभोजनः स्वार्थमत्यन्तसंतुष्टः क्रूरः काल इवान्त
कः ११ लेलिह्यमानस्तृषितः पुच्छास्फोटनतत्परः व्यादितास्यः क्षुधाभुग्नः प्रार्थयानस्तदा
मिष १२ दृष्ट्वा तं क्रूरमायान्तं जीवितार्थी नराधिप प्रोवाच श्वा मुनिं तत्र यत्तच्छृणु विशांपते १३

न्यग्भूताः दासभूता ७ ८ ९ भावं चित्तं १० द्वीपी तरक्षुर्व्याघ्रः ११ १२ १३ ॥

श्री० शां० रा० टी०
२९७

१४ १५ द्वीपिनः द्वीपित्वप्राप्तस्य तुः रूपरहितः स्वरूपहीनः १६ १९ तथाभूतंमपीडितं २० घोरश्शातनमः ११६ व्याघ्रस्याग्रेसरः १

स्वशत्रुर्भगवन्नेष द्वीपी मां हन्तुमिच्छति त्वत्प्रसादाद्भयं न स्यात्तस्मान्मम महामुने १४ तथा कुरु म
हाबाहो सर्वज्ञस्त्वं न संशयः स मुनिस्तस्य विज्ञाय भावज्ञो भयकारणं कृततः सर्वसत्त्वानां तमैश्वर्य
समन्वितः १५ मुनिरुवाच न भयं द्वीपिनः कार्यं मृत्युतस्ते कथंचन एष श्वरूपरहितो द्वीपी भवसि
पुत्रकः १६ ततः श्वा द्वीपितां नीतो जाम्बूनदनिभाकृतिः चित्राङ्गो विस्फारदंष्ट्रो वने वसति निर्भयः १७
तं दृष्ट्वा संमुखे द्वीपी आत्मनः सदृशं पशुं अविरुद्धस्ततस्तस्य क्षणेन समपद्यत १८ ततोऽभ्ययान्महा
रौद्रो व्यादितास्यः क्षुधान्वितः द्वीपिनं लेलिहद्वक्त्रो व्याघ्रो रुधिरलालसः १९ व्याघ्रं दृष्ट्वा क्षुधावि
ष्टं दंष्ट्रिणं वनगोचरं द्वीपी जीवितरक्षार्थमृषिं शरणमेयिवान् २० संवासजं परं स्नेहमृषिणा कुर्वता
तदा स द्वीपी व्याघ्रतां नीतो रिपूणां बलवत्तरः २१ ततो दृष्ट्वा स शार्दूलो नाहनत्तं विशांपते स तु श्वा
व्याघ्रतां प्राप्य बलवान्पिशिताशनः न मूलफलभोगेषु स्पृहामप्यकरोत्तदा २२ यथा मृगपति
र्नित्यं प्रकांक्षति वनौकसः तथैव स महाराज व्याघ्रः समभवत्तदा २४ इति शान्तौ राजधर्मे श्वर्षिसं
वादे ११६ भीष्म उ० व्याघ्रो गोटजमूलस्थः तृप्तः सुप्तो हतैर्मृगैः गजस्त्वागात्तमुद्देशं मत्तो मेघ इवोत्थि

२ ३ ४ कमलखंडानिकमलसमूहान् ५ निशानिशंबहुरात्रं ६ ७ ८ समन्वयात्संबंधात् ९ १० ११ १२ १४ १५ ॥

प्रभिन्नकरटः प्रांशुः पद्मी विततकुंभकः सुविषाणोमहाकायोमेघगंभीरनिस्वनः २ तं दृष्ट्वा
कुंजरं मत्तमायांतं बलगर्वितं व्याघ्रोहस्तिभयात्त्रस्तस्तत्पृष्ठिशरणाययौ ३ ततोनयत्कुंजरस्तं
व्याघ्रं तत्पृष्ठिसंगमः महामेघनिभं दृष्ट्वा सभीतोऽभवत्कुंजरः ४ ततः कमलखंडानिशालकीगहना
नि च व्यचरत्ससुदायुक्तः पद्मरेणुविभूषितः ५ कदाचिद्भ्रममाणस्य हस्तिनः संगतस्तदा ऋष
रम्याटजस्यस्य कालो गच्छन्निशानिशं ६ अथाजगाम तं देशं केसरीकेसराहणः गिरिकंदर
जो भीमः सिंहो नागकुलांतकः ७ तं दृष्ट्वा सिंहमायांतं नागः सिंहभयार्दितः ऋषिं शरणमा
पेदे वेपमानो भयातुरः ८ स ततः सिंहतां नीतो नागो हि मुनिना तदा वन्यं नागगणाय सिंहत्वलंजा
तिसमन्वयात् ९ दृष्ट्वा च सोऽभवत्सिंहो वन्यो भयसमन्वितः स चाश्रममेव सत्सिंहस्तस्मिन्नेव महावने
१० तद्भयात्पशवो नान्ये तपोवनसमीपतः व्यदृश्यत तदा त्रस्ता जीविताकांक्षिणस्तथा ११ कदाचि
त्कालयोगेन सर्वप्राणिविहिंसकः बलवांस्तत्र जाहारो नानासत्त्वभयंकरः १२ अष्टपाद्दंष्ट्रनय
नः शरभो वनगोचरः तं सिंहत्वमागच्छन्मुनेस्तस्य निवेशनं १३ तं मुनिः शरभं चक्रे वलोत्कटमा
विक्रम ततः सशरभो वन्यो मुनेः शरभमग्रतः १४

१५ १६ अकृतात्मत्वे हेतुः स्वयोनिजइति १९ २० मदपटुः प्रवृद्धमदः २१ विरूपो विविधेन रूपेण त्वं रूपः नत्वं कुलान्वयः तेन
दृष्ट्वा बलिनमत्युग्रं द्वीपिनं संप्राद्रवद्वनात् स पूर्वं श्वा भक्ष्यो नेमन्य तत्तो मुनिना तदा १५ मुनेः पार्श्वमा
गतो नित्यं शरभः स्वभावमाप्तवान् ततः शरभसंत्रस्ताः सर्वे मृगगणास्तदा दिशः संप्राद्रवन् राज
न्भयाज्जीवितकांक्षिणः शरभोप्यतिसंहृष्टो नित्यं प्राणिवधे रतः १७ फलमूलाशनं कर्तुं नै
च्छत्स पिशिताशनः ततो रुधिरतर्षेण बलिना शरभोन्वितः १८ इयेष तं मुनिं हंतुमकृतज्ञः स्व
योनिजः ततस्तेन तपःशक्त्या विदितो ज्ञानचक्षुषा १९ विज्ञाय च महाप्राज्ञो मुनिः श्वानं तमु
क्तवान् श्वा त्वं द्वीपित्वमापन्नो द्वीपी व्याघ्रत्वमागतः २० व्याघ्रान्नागो मदपटुर्नागः सिंहत्वमा
गतः सिंहः स्वंबलमापन्नो भूयः शरभतां गतः २१ मयान्वेहपरीतेन विस्रष्टो न कुलान्वयः
यस्मादेवमपापं मां पापहिंसितुमिच्छसि २२ तस्मात्स्वयोनिमापन्नः श्वैव त्वं हि भविष्यसि
ततो मुनिजनद्वेष्टा दुष्टात्मा प्राकृतोबुधः २३ ऋषिणा शरभः शप्तस्तद्रूपं पुनराप्तवान्
२४ इति श्रीमहाभारते शांतौ राजधर्मे श्वर्षिसंवादः ११७ भीष्मउः स श्वा प्रकृतिमापन्नः प
रं दैन्यमुपागतः ऋषिणा हुंकृतः पापस्तपोवनबहिःकृतः १ ॥
तेन कुलेन अन्वयः संबंधो यस्य स कुलान्वयः तादृशस्त्वं न भवसि २२ २४ स्वतरक्षशाततमः ११७ स श्वा १ ॥

दृष्टांतमुपपाद्यदार्ष्टांतिकमाहैवमित्यादिना २ ४ राजाअनागसिभिद्यमानोपिकुलीनःपापेबुद्धिंनकुरुतइत्यन्वयः ५
अकुलीनस्तुनिंदामात्रेणशत्रुतांव्रजेत् ६ ७ स्वामिनोमित्राणांवुभूषकंपैश्वर्यलिप्सुं ८ सत्वसंग्रहणोप्राणिनामात्ररंज

एवंराज्ञामतिमतांविदित्वासत्यशौचवतां आर्जवप्रकृतिंसत्यश्रुतंदृढंकुलदमं २ अनुक्रोशं
बलंवीर्यंप्रभावंप्रश्रयंतमां भृत्यायेयत्रयोग्याःस्युस्तत्रस्थाप्याःस्वरक्षिताः ३ नापरीक्ष्यमही
पालःसचिवंकर्तुमर्हति अकुलीननराकीर्णोनराजासुखमेधते ४ कुलजःप्रकृतोराजासत्कु
लीनतयासदा नपापेकुरुतेबुद्धिंभिद्यमानोप्यनागसि ५ अकुलीनस्तुपुरुषःप्राकृतःसाधुसं
श्रयात् दुर्लभैश्वर्यतांप्राप्तोनिंदितःशत्रुतांव्रजेत् ६ कुलीनंशिक्षितंप्राज्ञंज्ञानविज्ञानपारगं स
र्वशास्त्रार्थतत्त्वज्ञंसहिष्णुंदेशजंतथा ७ कृतज्ञंबलवंतंचक्षांतंदांतंजितेन्द्रियं अलुब्धंलब्धसंतुष्टं
स्वामिमित्रबुभूषकं ८ सचिवंदेशकालज्ञंसत्वसंग्रहणेरतं सततंयुक्तमनसंहितैषिणमतंद्रितं
९ युक्ताचारंस्वविषयेसंधिविग्रहकोविदं राज्ञस्त्रिवर्गवेत्तारंपौरजानपदप्रियं १० खातकव्यूहतत्व
ज्ञंबलहर्षणकोविदं इंगिताकारतत्त्वज्ञंयात्राज्ञानविशारदं ११ हस्तिशिक्षासुतत्त्वज्ञमहंकारविवर्जि=
तं प्रगल्भंदक्षिणंदांतंबलिनंयुक्तकारिणं

ने ९ १० खातकाःपरसैन्यावरोधकाःयेव्यूहादयस्तेषांतत्वज्ञं ११ १२ ॥

श्री·
शां·रा·
टी·
२१५

चोतंशुद्धं १३ प्रसन्नं सन्मार्गगामिनं १४ १५ १६ मधीतमी १७ विपर्ययेऽप्रतिमावति अपकारिणि क्षमावान् १८ दानस्य अ
च्छेदेऽप्रनवच्छेदे विषयेस्वयं अविच्छेदकर्त्ता १९ नानिर्दिष्टानि निष्पत्तिग्रहः कर्त्ताऽपकर्त्ता २० २१ गुणशतं तद्गुणलीनत्वादयप्रकरण
चोतं चोतजनाकीर्णं सद्गुणं स्वभावदर्शनं नायकं नीतिकुशलं गुणैर्वेष्टां समन्वितं ४ अत्रत्वं प्रशि
तं सत्त्वां मृदुवादिनमेव च धीरं शूरं महर्द्धिं च देशकालोपपादकं ५४ सविवेयः प्रकृतेनैवेतमवम
न्यते तस्य विस्तीर्यते राज्यं ज्योत्स्नाग्रहपतेरिव ५५ एतैरेव गुणैर्युक्तो राजा शास्त्रविशारदः पद्धेव्याय
मी परमः प्रजापालनतत्परः १६ धीरो मधीश्च विस्तीर्णाः कालेशु कृषकारवित् शुश्रूषुः श्रुतवान् श्रो
ताऊहापोहविशारदः १७ मेधी वीयाराणां युक्तो यथा न्यायोपपादकः दान्तः सदा प्रियाभाषी क्षमावा
श्च विपर्यये १८ दानाच्छेदं स्वयंकारी अदालुः स्वभावदर्शनः आर्तहस्तप्रदो नित्यमसात्याहिहितरतः
१९ नाहं वादी न निर्दिष्टो न यत्किंचनकारकः हन्तेकर्मण्यमात्यानां कर्त्ता भक्तजनप्रियः २० संगृहीतजना
नोऽस्तब्धः प्रसन्नवदनः सदा सदाभृत्यजनापेक्षो नक्रोधी सुमहामनाः २१ युक्तदण्डो न निर्दण्डो धर्मकार्या
नुशासकः चारनेत्रः प्रजावेदी यमीर्थ्यकुशलः सदा २२ राजा गुणशताकीर्ण एष्टव्यस्तादृशो भवेत् यो
धाश्चैव मनुष्येन्द्र सर्वे गुणगणोद्दिष्टाः २३ ॥
वाशदमात्यगुणास्तत्सहितः धर्मपरमत्वादयपञ्चचत्वारिंशादे
वं अष्टोत्तरगुणशतं एतेषां सन्धिविग्रहको विदमित्यादिरीत्याऽन्यतगुणाष्टकं ऊहयित्वा पूर्णशतं ज्ञेयं २३ ॥

२१५

२४ २५ २८ अष्टादशशततमः ११८ एवं १ नीचान्नीचैनैवयोजयेत् १ विपरीतेदोषमाहनश्वेति स्वस्थानंप्रमाणंचोत्क्रम्य

अन्वेष्टव्याःसुपुरुषाःसहायाराज्यधारणे नविमानयितव्यास्तेराज्ञावृद्धिमभीप्सता २४ यो
धाःसमरशौण्डीराःकृतज्ञाःशास्त्रकोविदाः धर्मशास्त्रसमायुक्ताःपदातिजनसंवृताः २५ अभ
यागजपृष्ठस्थारथचर्याविशारदाः इष्वस्त्रकुशलायस्यतस्येयंनृपतेर्मही २६ सर्वसंग्रहणेयु
क्तोनृपोभवतियःसदा उत्थानशीलोमित्राढ्यःसराजाराजसत्तमः २७ शक्याचाश्वसहस्रेण
वीरारोहेणभारत संगृहीतमनुष्येणकृत्स्नाजेतुंवसुंधरा २८ इतिश्रीमहाभारतेशान्तिपर्व
णिराजधर्मेषुऋषिसंवादः ११८ भीष्मउ॰ एवंशुनासमानभृत्यान्स्वेस्वस्थानेनराधिपः नियोज
यतिकृत्येषुसराज्यफलमश्नुते १ नश्वास्वस्थानमुत्क्रम्यप्रमाणमभिसत्कृतः आरोप्यःश्वा
स्वकात्स्थानादुत्क्रम्यान्यत्प्रपद्यते २ स्वजातिगुणसंपन्नाःस्वेषुकर्मसुसंस्थिताः प्रकर्तव्या
ह्यमात्यास्तुनास्थानेप्रक्रियाक्षमा ३ अनुरूपाणिकर्माणिभृत्येभ्योयःप्रयच्छति सभृत्य
गुणसंपन्नोराजाफलमुपाश्नुते ४ शरभःशरभस्थानेसिंहःसिंहइवोर्जितः व्याघ्रोव्याघ्र
इवस्थाप्योद्वीपीद्वीपीयथातथा ५ कर्मस्विहानुरूपेषुन्यस्याभृत्यायथाविधि प्रतिलोमंनभृ

उच्चस्थानेचआरोप्यःआरोपितश्चप्रमाद्यतीतियोजनाअबुद्धिरितिच्छेदः ६ ॥

श्री॰
शां॰ रा॰
टी॰
२२॰

१ ८ ९ वहिश्चराः प्राणाश्चेति शेषः ११ १२ १३ १४ विसृताः अपरावर्त्तिनः १५ १६ १७ १८ १९ ॥

यः प्रमाणमतिक्रम्य प्रवर्तते लोभेन नराधिपः भृत्यान्स्थापयते बुद्धिर्नन्दसरं जयते प्रजाः ७ न बालि-
शान वृद्धान्नाशक्तान्नाजितेन्द्रियाः नाकुलीनान्नराः सर्वस्थापयेद्गुणवर्जितान् ८ साधवः कु- =
लजाः शूरा ज्ञानवन्तोऽनसूयकाः अक्षुद्राः शुचयो दक्षाः स्युर्नराः पारिपार्श्वकाः ९ न्यायभूतास्तत्र ७
गाः शान्ताश्च श्रोताः प्रकृतिभिः शुभाः स्वस्थानान्नापकम्पन्ते ये ते स्यू राज्ञो बहिश्चराः १० सिद्धस्य सततं नो
पार्श्वे सिद्ध एवानुगो भवेत् असिद्धः सिद्धसहितः सिद्धवल्लभते फलं ११ यस्तु सिद्धः स्वभिः कार्णैः ।
सिद्धकर्मफले रतः न स सिद्धफलं भोक्तुं शक्तः स्वभिन्नपाश्रितः १२ एवमेतन्मनुष्येन्द्र स्थूलैः प्रा-
गैर्विजानीहि कुलीनैः सदृशैश्चैव तत्त्वान्जेतुं वसुंधरा १३ नाविद्यो नानृजुः पार्श्वे नाप्रज्ञो नाति-
महाधनः संग्राह्यो वसुधापालैर्भृत्यो भृत्यवतां वर १४ बाणवद्विसृता यान्ति स्वामिकार्यपरा
नराः ये भृत्याः पार्थिवहितास्तेषां सान्त्वं प्रयोजयेत् १५ कोशश्च सततं रक्ष्यो यत्नमास्थाय राज-
भिः कोशमूला हि राजानः कोशो वृद्धिकरो भवेत् १६ कोष्ठागारं च ते नित्यं स्फीतं धान्यैः सुसंवृ-
तं सदास्तु सत्सु संन्यस्तं धनधान्यपरो भव १७ नित्ययुक्ताश्च ते भृत्या भवन्तु रणकोविदाः वाजि-

२२॰

१९ २० नवदशशततमः ११९ राजवृत्तानीत्यध्यायः पूर्वोक्तानां राजधर्माणां सर्वेषामुपसंहारार्थः १ राजधर्माणां राजधर्मविदां
मतं यत् विस्तरेणोक्तं तदेव प्रणयं प्रकर्षेणानेतुं वोढुं शक्यं संक्षिप्तमित्यर्थः प्रब्रूहि २ सर्वभूतरक्षणो कृत्स्नो राजधर्मः परिसमा
प्त इत्याह रक्षणमिति ३ एतदेव मयूरदृष्टान्तेनोपपादयति यथेति बर्हाणि पक्षान् भुजगाशनो मयूरः ४ तैक्ष्ण्यं क्रूरत्वं

ज्ञातिं वधुजनाबेदी मित्रसंबधिसंवृतः पौरकार्यहितान्वेषी भव कौरवनंदन १९ एषा ते नैष्ठिकी
बुद्धिः प्रज्ञा स्वभिहिता मया श्वो नानिदर्शनं तात किं भूयः श्रोतुमिच्छसि २० इति शांतिपर्वणि राज
धर्मे ऋषिसंवादः ११९ युधिष्ठिर उ॰ राजवृत्तान्यनेकानि त्वया प्रोक्तानि भारत पूर्वैः पूर्वनियुक्तानि रा
जधर्मार्थवेदिभिः १ तदेव विस्तरेणोक्तं पूर्वदृष्टं सतां मतं प्रणयं राजधर्माणां प्रब्रूहि भरतर्ष
भ २ भीष्म उ॰ रक्षणं सर्वभूतानामिति क्षात्रं परं मतं तद्यथा रक्षणं कुर्यात्तथा शृणु महीपते ३ य
था बर्हाणि बिभर्ति भुजगाशनः तथा बहुविधं राजा रूपं कुर्वीत धर्मवित् ४ तैक्ष्ण्यं जिह्मत्वमादांतं
सत्यमार्जवमेव च मध्यस्थः सत्वमातिष्ठंस्तथा वै सुखमृच्छति ५ यस्मिन्नर्थे हितं यत्स्यात्तद्वर्णं रू
पमाविशत् बहुरूपस्य राज्ञो हि सूक्ष्मोप्यर्थो न सीदति ६ नित्यं रक्षितमंत्रः स्याद्यथा मूकः शर

जिह्मत्वं कौटिल्यं आदान्त्यं दंभो भयं तदभावोऽदंभः अभयं न विद्यते भी रक्षणात्तत्वतः श्रीमान् भवेत्सुखविशालः
स्वभाव आदन्त्यं अभयप्रदत्वमित्यर्थः रक्षयोः सावर्ण्यात् दंभो भयेत्यस्य रूपं पाठांतरे अल्पस्याप्यर्थः ५ यस्मिन् देशे अनुग्रहे वा हितं रू

॥ ७ ५ शांतिपर्वराजधर्मटीका

श्री॰
शां॰ रा॰
टी॰
२२१

आपदां द्वारेषु मंत्रभेदादिषु युक्तो वहितः स्यात् शैलवर्षोदकानि पर्वतप्रदेशेषु प्रसूतानि नितानि महानदीजलानि शिवां योगपलिं
गंकुरत्वादिकं प्रकाशयेत् ८ नित्यमिति आचरेत् यथायोगं दंड नवरंध्राणि तः हृदिति हृदतो हृताः यत्र तत हृदहृतं तालवृन्त
आस्रवत् रसप्रस्रवयथा रसग्राही प्रदेशविशेष एव प्रसूत्य रसं पृक्त्वा तिन तत्कालं कृत्वा तच्छेदेन दंडकांडादि वन्नतो रसं जिह्वति

आपद्द्वारेषु युक्तः स्याज्जलप्रस्रवणेष्विव शैलवर्षोदकानीव द्विजानन्सिद्धान्समाश्रयेत् अर्थ
कामः शिवां राजा कुर्याद्धर्मध्वजोपमाम् नित्यमुद्यतदण्डः स्यादाचरेदप्रमादतः लोकेचायव्या
योहृद्यहृद्दहृतमिव स्रवत् ९ स्रजावान्स्यात्स्वरूपेण भौमानि चरणैः क्षिपेत् जातपत्त्रः परि
स्पन्देत्प्रतेहैकल्पमात्मनः १० दोषान्विवृणुयाच्छत्रोः परपक्षान्विधूनयेत् काननेष्विव पुष्पा
णि बहिरर्थान्समाचरन् ११ उच्छ्रितान्नाशयेत्स्फीतान्नरेन्द्रानचलोपमान् श्रयेच्छायामवि
ज्ञातां गुप्तं रणमुपाश्रयेत् १२ प्रावृषीवासितग्रीवो मज्जन्निशि निर्जने मायूरेण गुणेनैव स्त्री
भिश्चावेक्षितश्चरेत् १३ ॥

एवं प्रजानामायव्ययोर्ज्ञाता तत्ताः जीवयन् ताभ्यः पनरक्षमादद्यादित्यर्थः ९ स्रजाशुद्धिमत्त्वान् भौमानि परेषां सस्यानि चरणैः आ
स्रादिगमनैः क्षिपेन्नाशयेत् १० अर्थान् स्वराष्ट्रादिव्याजात्परराष्ट्रं समाचरन् परपक्षान्विधूनयेत् ११ छत्रं परराष्ट्राधिपतिनामसंयुक्त
त्वादिव तादर्शनादिव्याजेनाकस्मात्परराष्ट्रं गत्वा प्रविश्य तत्नाशयेदित्याह उच्छ्रितानिति १२ असितग्रीवो मयूरो निशीव प्रावृषि मं

ज्ञेतमरणेनतः शरवदेवस्यात् ॥ ६ ॥

तत्रापि चारैर्दर्शितास्वभूमिषु यात्रीसौविदल्लसूपकारादिषु परैर्भेदितेषु अभिगतान् विषादीन् पाशान् परिवर्जयेत् आत्मानं रक्षे
द्वेत्याहृनेति ४ ननु कृतस्तत्रापि पाशप्रसक्तिरत आह प्रणाययेदिति गहनेऽदृश्ये पाशस्त्राने सति तत्कापटभूमिं प्रतिपद्यात्मानं
प्रणाययेत् प्रापयेन्नदानश्येदेव बाधाहृपवार्य प्रयोजयन्तीति द्विराजानो विषमयीकन्यां कृत्वा द्वीपान्तरं प्राप्नेयं पद्मिनी अस्याः
स्पर्शमात्राद्वशी तिवार्षिको पि षोडशवर्षो भवतीति सेयमतिश्रेष्ठा ततया श्रीमता मया कल्पिता ऽनुग्राह्याचेयं वचेति श्रुत्वा
णास्तत्रचारसुवात्क पटं ज्ञात्वा तान् प्रणाययेत् ऊहितान् केन चिन्निमित्तेन तर्कितांस्तान् प्रति विषान् कन्यादीन् स्पर्शमात्रेण
उच्छ्वासमात्रेण वा संगतमदिकामशकादिमरणलिंगेन ज्ञातान् हन्यादेव ५ नाशयेदिति साहः बलवद्गणास्थलान् प

तज्ज्ञाश्चततस्त्राणं रक्षेदात्मानमात्मना चारभूमिष्वभिगतान्पाशांश्च परिवर्जयेत् ४ प्रणाय
ह्मापितां भूमिं प्रणश्येद्गहनेषु नः हन्यात्कृष्णानतिविषान्येजिह्मगतयाहितान् ५ नाशयेद्ब
लवद्गणान्सन्निवासान्निवासयेत् सदा बर्हिनिभः कामं प्रशस्तकृतमाचरेत् सर्वतश्चाददेतप्रज्ञां
पतंगगहनेष्विव ६ ॥

ल्लानसैन्यस्य पदस्थानीयान् महाशिविरवारवनितानटनर्तकादींश्च नाशयेत् मयूर इव
दूरीकुर्यात् बलं गयरसेद्रूपस्थामानिस्थोल्पसैन्ययोरिति मेदिनी सन्निवासान् हृद्यमूलान् पत्नान् अमात्यादीन् सूरांश्च वासयेत्
बर्हिनिभः मयूरतुल्यः कामं यथेष्टं प्रशस्तं कृतं प्रशस्ता क्रिया पक्षाणां विस्फारणं आचरेत् अनेनैव क्रमेण सर्वतः प्रज्ञातिमा
त्रां तप्रज्ञां आददीत यथोक्तं बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेदित्यादि पतंगं शलभसमूहो यथा गहनेषु पतति गहनं च
तिष्ठते करोति एवं संभूय शत्रुराष्ट्रे पतितव्यमित्यर्थः पन्नगगहनेष्विवेति पाठे पन्नगग्राही पन्नगमिव आकस्मात्कृत्त्रैरुत्क्षिपेद्या॥

= ५ मं दि ८

श्री·
शा·रा·
टी·
२२२

७ बुद्ध्या आत्मनः संयमनं इत्थमेव कर्तव्यमुक्तं नियमं कुर्यात् परबुद्ध्या च तत्रैवार्थसंवादितया तस्यार्थस्यावधारणोद्यतः दक्षत तोनि।
श्चयः कार्यः बुद्ध्या शास्त्रोत्थया धिया आत्मगुणस्य पूर्वोक्तनिश्चयहेतोः प्राप्तिर्भवति यत्तदेव शास्त्रस्य निदर्शनं यत्कार्यहेतोः दक्षम
तां बुद्धेरित्यर्थः ८ आत्मनः स्वस्य परिमर्षणा सर्वतो तीतानागतविचारेण बुद्धिकार्यनिश्चयं बुद्ध्या ऊहापोहकौशलरूपया

एवं मयूरवद्राजा स्वराज्यं परिपालयेत् आत्मवृद्धिकरीं नीतिं विदधीत विचक्षणः ७ आत्म
संयमनं बुद्ध्या परबुद्ध्यावधारणं बुद्ध्या चात्मगुणप्राप्तिरेतच्छास्त्रनिदर्शनं ८ परं विश्वासयेत्
सान्त्वा स्वशक्तिं चोपलक्षयेत् आत्मनः परिमर्षणा बुद्धिं बुद्ध्या विचारयेत् ९ सान्त्वयोगमतिः
प्राज्ञः कार्याकार्यप्रयोजकः निगूढबुद्धेर्धीरस्य वक्तव्ये वाक्कृतं तथा २० सन्निकृष्टां कथां प्रा
ज्ञो यदि बुद्ध्या बृहस्पतिः स्वभावमेष्यते तप्तं कृष्णायसमिवोदके २१ अनुयुञ्जीत कृत्यानि सर्वा
ण्येव महीपतिः आगमैरुपदिष्टानि स्वस्य चैव परस्य च २२ मृदुशीलं तथा प्राज्ञं शूरं चार्थविधा
नवित् स्वकर्मणि नियुञ्जीत ये चान्ये च बलाधिकाः २३

मथ्यया विचारयेत् साधकबाधकभूमौ संचारयेत् ९ तमे
वाह सान्त्वेति वक्तव्ये उपदेशे कर्तव्ये कृतं अलं तस्योपदेशापेक्षा नास्तीत्यर्थः २० सः अनन्तरश्लोकोक्तः प्राज्ञो बुद्ध्या बृहस्पतिसमो।
पि सन् यदि निकृष्टां कथां निर्बुद्धित्ववादं प्राप्नुयात्तर्हि सद्य एव युक्त्या स्वभावं स्वास्थ्यं प्राप्स्यते उदके प्रक्षिप्तं तप्तमायसं शीतमिव २१ २३ २२२

२४ ३१ गोभिः रश्मिभिः चरान्चारानस्वनुचरानसमाचारान् ३२ अर्थंप्रसूवयेतअर्थंवर्तानन्तापयेत् ३३ ३४ संचया

अथदृष्टानियुक्तानिस्वान्नुरूपेषुकर्मसु सर्वांस्ताननुवर्तेतस्वयंसंत्रीविवायता २४ धर्माणामवि
रोधेनसर्वेषांप्रियमाचरेत् ममायमितिराजायःसपर्वतइवाचलः २५ व्यवसायंसमाधायसूर्यो
रश्मीनिवायतान् धर्ममेवाभिरक्षेतकृत्वातुल्येप्रियाप्रिये २६ कुलप्रकृतिदेशानांधर्मज्ञान्मृ
दुभाषिणः मध्येवयसिनिर्दोषान्हितेयुक्तानविक्लवान् २७ अलुब्धान्शिक्षितान्दान्तान्धर्मे
षुपरिनिष्ठितान् स्थापयेत्सर्वकार्येषुराजाधर्माधिकारिणः २८ एतेनचप्रकारेणकृत्यानामागा
तिंगतिं युक्तःसमनुतिष्ठेततद्गुप्तश्चैवरूपतः २९ अमोघक्रोधहर्षश्चस्वयंकृत्यान्ववेक्षिता
आत्मप्रत्ययकोशश्चवसुदेववसुंधरा ३० व्यक्तश्चानुग्रहोयस्ययथार्थश्चापिनिग्रहः गुप्तात्मागुप्त
राष्ट्रश्चसराजाराजधर्मवित् ३१ नित्यंराष्ट्रमवेक्षेतगोभिःसूर्यइवोदितः चारान्स्वनुचरान्विद्यात्तथा
बुद्ध्यास्वयंचरेत् ३२ कालप्राप्तमुपादद्यान्नार्थंराजाप्रसूचयेत् अहन्यहनिसंदुह्यान्महींगामिव
बुद्धिमान् ३३ यथाक्रमेणपुष्पेभ्यश्चिनोतिमधुषट्पदः तथाद्रव्यमुपादायराजाकुर्वीतसंचयं ३४
यद्धिगुप्तावशिष्टंस्यात्तद्वित्तंधर्मकामयोः संचयान्नविसर्गीस्याद्राजाशास्त्रविदात्मवान् ३५ ॥

नविसर्गीस्यात्कोषाद्वित्तंनदद्यात्अपितुउपर्याहृतमेवेत्यर्थः ३५ ॥

३६ आत्मादेहः देशोकालेवाप्रमादइत्येकं ३० ३८ अवालः अहीनः अन्यः संपन्नः ३९ शत्रोःशत्रुंप्राप्यनैवहीयेतनैवप्रमादी
स्यात् ४० क्षयंपेश्वर्यंसर्वपेश्वर्यादिकामः विजिगीषादिः तौसर्वकामौवृद्धावासेदधीतसंधिंवाकुर्यात् विग्रहादिकंकुर्यात् ४१

नार्थमल्पंपरिभवेन्नावमन्येतशात्रवान् बुध्यातबुध्येदात्मानंनचाबुद्धिषुविश्वसेत् ३६ धृतिर्द
क्षंसंयमोबुद्धिरात्माधैर्यंशौर्यंदेशकालाप्रमादः अल्पस्यवाबहुनोवाविवृद्धौधनस्यैतान्यष्टसमि
धनानि ३७ अग्निःस्तोकोवर्द्धतेह्याज्यसिक्तोवीजंचैकंरोहसहस्रमेति आयव्ययौविपुलौसन्निशाम्य
तस्मादल्पंनावमन्येतवित्तं ३८ बालोप्यबालःस्थविरोरिपुर्यःसदाप्रमत्तंपुरुषंनिहन्यात् कालेना
न्यस्तस्यमूलंहरेतकालज्ञातापार्थिवानांवरिष्ठः ३९ हरेत्कीर्तिंधर्ममस्योपरुन्ध्यादर्थेदीर्घंवीर्य
मस्योपहन्यात् रिपुर्द्वेष्टादुर्बलोवाबलीवातस्माच्छत्रौनैवहीयेद्यतात्मा ४० क्षयंवृद्धिपालनंसं
चयंवाबुद्ध्वापुभौसंहतौसर्वकामौ ततश्चान्यन्मतिमान्संदधीततस्माद्राजाबुद्धिमन्तंश्रयेत ४१
बुद्धिर्दीप्ताबलवन्तंहिनस्तिबलंबुद्ध्यापाल्यतेवर्द्धमानं शत्रुर्बुद्ध्यासीदतेवर्द्धमानोबुद्धेःपश्चात्कर्म
यत्तत्प्रशस्तं ४२ सर्वान्कामान्कामयानोहिधीरःसत्वेनाल्पेनाप्यतेहीनदोषः यश्चात्मानंप्रार्थय
तेर्थ्यमानैःश्रेयःपात्रंपूरयतेच

वर्द्धमानंदीयमानंबुद्धेःपश्चात्बुद्ध्याअनुसारि ४२ अल्पेनापिसत्वेनबलेन अर्थ्यमा
नैर्युक्तैःआत्मानंप्रार्थयतेलब्धोदमश्चभवतीत्यर्थः श्रेयःपात्रंपूरयेततत्तःश्रेयोऽपसर्पतीत्यर्थः ४३ ॥

प्रगृहीतः स्त्रियः लक्ष्म्याः मूलं अर्थं सर्वशः सर्वाभ्यः संपीड्यमानः संपीडयन् प्रजाः विद्युत्संपातं सम्यक् पतित्वापि
न ऊर्जितः स्यात् अत्र हृद्द्हृद्दनरूपांतः प्रायोवोक्तः ४४ व्यवसायेन उद्योगेन विघ्नात् लभेत् ४५ अनुद्योगेन जन्मननाशये
दित्याह यत्रेति ४६ कर्मयत्नादिगुणोऽग्र्यं यस्य तत्फलं हि त्वं तदुपभोगे सर्वोपि लब्धः सर्वेदर्थैर्हीनस्तर्हि स्त्रीवलोभाद्धर्म

तस्माद्राजा प्रगृहीतः प्रजास्तु मूलं लक्ष्म्याः सर्वशो ह्याददीत दीर्घकालं ह्यपि संपीड्यमानो वि
द्युत्संपातमपि वा नोर्जितः स्यात् ४४ विघातयेद्वा विपुलं लयं नैवा सर्वं हीनं न व्यवसायेन शक्यं बु
ध्यायंतं तं निवसेदेहवांस्तु तस्माद्धि धीरो व्यवसायं प्रभूत ४५ यत्रास्ते मतिमान्धीमान्मनस्विनः शक्रो वि
ष्णुर्यत्र सरस्वती च वसंति भूतानि च यत्र नित्यं तस्माद्विद्वान्नावमन्येत देहं ४६ लब्धं हन्यात्संप्र
दानेन नित्यं लुब्धस्त्वमिपर विन्नस्यैनेति सर्वो लब्धः कर्मगुणोपभोगो योऽर्थैर्हीनोऽयं धर्मकामौ ज
हाति ४७ यत्र भोगाः पुत्रदाराः समस्तं सर्वं लब्धः प्रार्थयते परेषां लब्धे दोषाः संभवंतीह सर्वे त
स्माद्राजा न प्रगृह्णीत लब्धं ४८ संदर्शनेन पुरुषं जघन्यमपि चोदयेत् आरंभान् द्विषतां प्रा
प्तः सार्वीर्थी स्वयशेऽभ्युदयेत् ४९ धर्मान्वितेषु विज्ञाता मन्त्रीगुप्तश्च पाडव आभिराजाकुलीनश्च =
पर्याप्तो राजसंग्रहे ॥

कामं द्रव्यादि विषयं च जहाति ४७ समृद्धिं च प्राप्यापीति शेषः धनं उत्कोचरूपं न प्रगृह्णी
त ४८ ४९ धर्मान्वितेषु ब्राह्मणमंडलेषु विज्ञाता नाज्ञानतत्त्वः राजसंग्रहे सामंतवशीकरणे ५० ॥

श्री॰
शां॰रा॰
टी॰
२२४

निबोधबुध्यस्व मतिस्तत्यगुरुमनुसृत्य विदध्यात्स्वदिकुर्यात् ५२ विधानजंदैवप्रासं राजधर्मात्तानेप्राप्तोप्यर्थः स्वयोन
श्यतीत्यर्थः ५३ गुणोपपन्नान्शौर्यादियुक्तान् गुणाश्चसंधिविग्रहादिषु आत्मवान् अप्रमत्तः यतः उत्थानेकुर्वाणान्शास्त्रा
वान् अभिसंधायलत्तीकृत्यनिहंति ५३ दोषदर्शीनिर्दोषेष्वपीतिशेषः ५४ स्वहस्तस्वविज्ञायज्ञानपूर्वकंप्रीतेः प्रवृत्तोसन्यायो

विविधप्रयुक्तान्नरदेवधर्मात्नुक्तान्समासेननिबोधबुद्ध्या इमान्विदध्याद्यतिसृत्ययोवैराजामहीं [illegible]
पालयितुंसशक्तः ५१ अनीतिजंयस्यविधानजंस्यात्सुखंहठप्राप्तमितिविधिवत्प्रदृश्यते नविद्यते
तस्यगतिर्महीपतेर्नविद्यतेराज्यसुखंह्यनुत्तमम् ५२ धनैर्विशिष्टान्मतिशीलपूजितान्गुणोप
पन्नान्युधिदृष्टविक्रमान् गुणेषुदृष्टानचिरादिवात्मवान्यतोभिसंधायनिहंतिशास्त्रवान्
५३ पश्येदुपायान्विविधैः क्रियापथैर्नचानुपायेनमतिंनिवेशयेत् श्रियंविशिष्टांविपुलंय
शोधनंनदोषदर्शीपुरुषः समश्नुते ५४ प्रीतिप्रवृत्तौविनिवर्तितौयथास्वहस्तस्वविज्ञायनिह
त्यचोभयोः यद्देवमित्रंगुरुभारमावहेत्सदेवसाहित्यमुदाहरेद्बुधः ५५ एतान्मयोक्तांश्चरा
जधर्मान्नृणांचगुप्तौमतिमादधत्स्व अवाप्स्यसेपुण्यफलंसुखेनसर्वोहिलोकोन्नृपधर्ममूलः ५६ इतिश्रीम

सुहृदोमित्रस्यनितरांहृत्वापकस्मिन्कार्येविनिवर्तितौअभिमुखीकृतौतयोर्मध्येयदेवगुरुभारमावहेत्सदेवउदाहरेत्प्रशंसेत् ५५ चरस्य अनु
तिष्ठ आदधस्व आधत्स्वदयधारणेइत्यस्यरूपं ५६ इतिश्रीमहाभारतेशांतिपर्वणिविंशतितमः १२८

अयंपितामहेनेत्यध्यायद्वयेनदंडस्वरूपादिकमुच्यते १८ कोदंडइत्यादयएकादशप्रश्नाः तत्रकोदंडइत्यस्योत्तरमाहध
र्मेति धर्मस्यसंख्यासम्यक्ख्यानेदंडापरपर्यायव्यवहारशब्दवाच्यं व्यवहारपदंनिर्वक्ति तस्येतिसार्धेन अवहितात्म
युधिष्ठिरउ॰ अयंपितामहेनोक्तोराजधर्मःसनातनः ईश्वरश्चमहादंडोदंडेसर्वंप्रतिष्ठितं १ दे
वतानामृषीणांचपितॄणांचमहात्मनां यक्षरक्षःपिशाचानांसाध्यानांचविशेषतः २
सर्वेषांप्राणिनांलोकेतिर्यग्योनिनिवासिनां सर्वव्यापीमहातेजादंडःश्रेयानितिप्रभो ३ इ
त्येवमुक्तंभवतादंडेवैसचराचरं पश्यतालोकमासक्तंससुरासुरमानुषं ४ एतदिच्छाम्यहं
ज्ञातुंतत्त्वेनभरतर्षभ कोदंडःकीदृशोदंडःकिंपरायणः ५ किमात्मकःकथंमूर्तिःकथं
प्रभो जागर्तिचकथंदंडःप्रजास्ववहितात्मकः ६ कश्चपूर्वापरमिदंजागर्तिप्रतिपालयन्
कश्चविज्ञायतेपूर्वंकोवरोदंडसंज्ञितः किंसंस्थश्चभवेद्दंडःकावास्यगतिरुच्यते ७ भीष्मउ॰
शृणुकौरव्ययोदंडोव्यवहारोयथाचसः यस्मिन्हिसर्वमायत्तंसदंडइहकेवलः ८ धर्मसंख्याम
हाराजव्यवहारइतीष्यते तस्यलोपःकथंनस्याल्लोकेष्ववहितात्मनः ९ इत्येवंव्यवहारस्यव्यवहा
नोरात्तःतस्यधर्मस्यलोपःकथंकेनप्रकारेणनस्यात्तत्प्रका रत्वमिष्यते अपिचेतत्पुराराजन्मनुनाप्रोक्तमा
दौव्यवहारःविगतःअवहारोनीचमार्गेणापरस्वादिहरणंयस्मात्सइतिव्युत्पत्त्यासिद्धः ९ अपिचेति एतत्एतस्यव्यवहारस्य

श्री· शं·रा· टी· २२५

प्रजारक्षकत्वाद्व्यवहारप्रवर्तकधर्मप्रदवाच्योपीत्याह स्वप्रणीतेनेति १ यथेति स्वप्रणीतेनेतिश्लोकेन यन्मनुवचनमुक्तं तद्ब्रह्मणाप्र
वचवचनं मनुमुखोनस्रुतमित्यर्थः २ प्राणीति दंडप्रवउक्तवचनाद्धर्मशब्देन वाच्यत इत्यर्थः प्रागवचनं धर्मवचनं ३ रूपतोग्नि
रिवोत्थित इति तस्याऽऽतं रूपं दुष्टसंतापकत्वात्क्रूरमग्नितुल्यमित्युक्तं ४ बाह्यरूपं वर्णयति नीलेति दंष्ट्रायिष्टाभ्यां देव
तायाऽरक्ष्यानादिकं प्रज्ञानादंदंडोऽपंदंडजं दोषं निराकर्तुं दंडकर्तृभिरमात्यादिभिर्ध्येयमित्येवमर्थमुक्तं यदि तु लौकिकानि दं

स्वप्रणीतेन दंडेन प्रियाप्रियसमात्मना प्रजारक्षति यः सम्यक् धर्म एव स केवलः १ यथोक्तमेत
द्वचनं प्रागेव मनुना पुरा यन्मयोक्तं मनुष्येंद्र ब्रह्मणो वचनं महत् २ प्राग्विदं वचनं प्रोक्तमतः प्रा
ग्वचनं विदुः व्यवहारस्य चाख्यानाद्व्यवहार इहोच्यते ३ दंडे त्रिवर्गः सततं सुप्रणीते प्रवर्तते
दैवं हि परमो दंडो रूपतोग्निरिवोत्थितः ४ नीलोत्पलदलश्यामश्चतुर्दंष्ट्रश्चतुर्भुजः अष्टपा
न्नैकनयनः शंकुकर्णोर्ध्वरोमवान् ५ ॥

उपधर्मव्यवहारांगात्तत्रोत्पद्यंते तर्हि एवं व्या ख्येयं तत्र दंडः संहर्तेत्वा
द्रौद्रा रुद्रश्च नीललोहित इति तस्याग्निरिवोत्थित इति लोहितं रूपमुक्तं नीलं च नीलोत्पलेति निरुक्तं तत्र नाशो दंडो हि घातेन चला
भावत्राणाय मुख्यं दंडस्य मालिन्यरागोत्पन्नता नीललोहितं दंडस्य रूपं चतस्रो दंष्ट्रा अवस्थाप्राणानां वयसामयनानि यत्रमः तथा हि २२५
केचिन्मानभंगेन केचिद्धनहरणेन केचिद्ग्रामवैकल्प्येन केचित्प्राणव्यापादनेन च वध्यंते ऽतः तस्मा ॥

नैवतद्दंष्ट्राः चत्वारो भुजाः अर्थादानकर्त्तारो यस्य सः तथा हि प्रजाभ्यः सामंतेभ्यश्च करादानं अप्रदत्तादर्थिनोऽर्थमात्रद्रा
व्यात् द्विगुणधनादानं अप्रदत्तात्प्रत्यर्थिनस्तत्समं द्रव्यादानं धनवतः कदर्यात् द्विप्रात्सर्वस्वादानं चेति अथ तस्यैव व्यव
हाररूपिणो रूपं वर्णयति अष्टपान्नैकनयनः शङ्कुकर्णोर्ध्वरोमवान् जटी द्विजिह्व इति आवेदनं भाषा संप्रतिपत्तिर्मि
थ्योत्तरं कारणोत्तरं प्राङ्न्यायं प्रतिभूः क्रियाफलसिद्धिश्चेत्यष्टौ पादाः एतैर्हि निमित्तैर्दण्डश्चरति नान्यथेत्येतेषां पादत्वं तत्रा
वेदनं अर्थिना सभ्यान्प्रति गत्वा देवदत्तो मदीयं शतं सुवर्णानां अमुकस्मिन्देशे काले साक्षिणा च गृहीत्वा न ददातीति तत्र हस्ते
न लेखनं पुनरपि प्रत्यर्थिनमाहूय तत्समक्षं तथैव लेखनं भाषा तत्र प्रत्यर्थिना अहमेतस्य धारयामीत्वं केन कस्यापि दण्ड
इति तदिदं संप्रतिपत्तिरूपमुत्तरं न दण्डपादत्वेन गण्यते नाहमेतस्य धारयामीति मिथ्योत्तरं मया गृहीतमासीत्पुनः पराह
त्यदत्तमिति कारणोत्तरं अस्मिन्नर्थेऽनेन पूर्वमहमभियुक्तस्तत्र पराजितो मयेति प्राङ्न्यायम् विविधेष्वस्मिन्नुत्तरे अर्थि
भ्यां प्रतिभूर्देयः अहमेतस्मिन्पराजिते द्रव्यं दास्यामीति क्रियास्वमतसाधकानां साक्षिपत्रभोगशपथादीनां प्रदर्शि
नं ततो व्यवहारेनैतस्य जय इति अष्टभ्यः पादेभ्यः अनंतरं अपराधीं दण्डयति इत्येते दण्डस्य पादाः यदाह याज्ञवल्क्यः निह्नवे भावि
तो दद्यात् धनं राज्ञे च तत्समं मिथ्याभियोगी द्विगुणमभियोगाद्धनं ददेदिति नैकनयनः नैकानि बहूनि नयनानि यस्यानी
यानि राजामात्यपुरोहितपर्षदाख्यानि दर्शनसाधनानि यस्मिन् शंकुकर्णः कीलाकर्णः अवश्यंश्रा
व्यः ऊर्ध्वरोमवान् अत्यंतमुत्फल्लः शंकुकर्णश्चासौ ऊर्ध्वरोमवांश्चेति समासः ५ ॥

जटी अनेकसन्देहजटिलः द्विजिह्वः अर्थिप्रत्यर्थिनोर्वाक्यवैमत्यात्तद्द्वैजिह्व्यमस्य तथा एवं व्यवहाररूपिणो दण्डस्य रूपा
मुक्त्वा धर्माख्यदण्डरूपमाह ताम्रास्यो मृगराजतनुच्छद इति ताम्रो वह्निरेवाहवनीयादिरास्यमस्य तथा मृगराजः कृ

जटी द्विजिह्वस्ताम्रास्यो मृगराजतनुच्छदः एतद्रूपं बिभर्त्युग्रं दण्डो नित्यं दुराधरः १६ असि
र्धनुर्गदा शक्तिस्त्रिशूलं मुद्गरः शराः मुशलं परशुश्चक्रं पाशो दण्डर्ष्टितोमराः १७ सर्वप्रहरणी
यानि सन्ति यानीह कानिचित् दण्ड एव स सर्वात्मा लोके चरति मूर्तिमान् १८ भिन्दंश्छिन्दन्रु
जन्कृन्तन्दारयन्पाटयंस्तथा घातयन्नभिधावंश्च दण्ड एव चरत्युत १९ असिर्विशसनो धर्म
स्तीक्ष्णवर्मा दुराधरः श्रीगर्भो विजयः शास्ता व्यवहारः सनातनः २० शास्त्रं ब्राह्मणमन्त्रा
श्च शास्ता प्राग्वदतां वरः धर्मपालोऽक्षरो देवः सत्यगो नित्यगोऽग्रजः २१ असङ्गो रुद्रतनयो मनुर्ज्येष्ठः
शिवंकरः नामान्येतानि दण्डस्य कीर्तितानि युधिष्ठिर २२ दण्डो हि भगवान्विष्णुर्दण्डो नारायणः
प्रभुः शश्वद्रूपं महद्बिभ्रन्महापुरुष उच्यते २३ तथोक्ता ब्रह्मकन्येति लक्ष्मीर्वृत्तिः सरस्वती
दण्डनीतिर्जगद्धात्री दण्डो हि बहुविग्रहः २४ ॥

ष्णसाराः तत्सम्बन्धिचर्म तनुच्छदं शरीराच्छादकं प्रावरणमस्य ५
तेन दीक्षाप्रधानो यज्ञ उक्तः एतच्च सर्वं दानोपवासहोमादीनामुपलक्षणम् १६ १९ २२ शुद्धं दण्डस्वरूपमाह दण्डो हीति २३

किंपरायणाइत्यस्योत्तरं अर्थानर्थादिविवेकएवतस्यपरायणमित्याह अर्थानर्थावित्यादिना तस्माद्दण्डःपरायणमित्यन्वयेन
अर्थानर्थौसुखंदुःखंधर्माधर्मौबलाबले दौर्भाग्यंभागधेयंचपुण्यापुण्येगुणागुणौ २५
कामाकामावृतुर्मासःशर्वरीदिवसःक्षणाः अप्रमादःप्रमादश्चहर्षक्रोधौशमोदमः २६ दै
वंपुरुषकारश्चमोक्षामोक्षौभयाभये हिंसाहिंसेतपोयज्ञःसंयमोथविषाविषे २७ अंतश्चा
दिश्चमध्यंचकृत्यानांचप्रपंचनं मदःप्रमादोदर्पश्चदंभोधैर्यंनयानयौ २८ अशक्तिःशा
क्तिरित्येवंमानस्तंभौव्ययाव्ययौ विनयश्चविसर्गश्चकालाकालौचभारत २९ अनृतंज्ञानि
तासत्यंश्रद्धाश्रद्धेतथैवच क्लीबताव्यवसायश्चलाभालाभौजयाजयौ तीक्ष्णतामृदुतामृत्यु
रागमानागमौतथा विरोधश्चाविरोधश्चकार्याकार्येबलाबले ३० असूयाचानसूयाचधा
र्माधर्मौतथैवच अपत्रपानपत्रपेह्रीश्चसंपद्विपत्पदं ३१ तेजःकर्माणिपाण्डित्यंवाक्शक्ति
स्तत्त्वबुद्धिता एवंदण्डस्यकौरव्यलोकेस्मिन्बहुरूपता नस्याद्यदीहदण्डोवैप्रमथेयुःपरस्परं
भयाद्दण्डस्यनान्योन्यंघ्नंतिचैवयुधिष्ठिर ३४ दण्डेनरक्ष्यमाणाहिराजन्नहरहःप्रजाः राजानंव
र्धयंतीहतस्माद्दण्डःपरायणं ३५ ॥

३४ ३५ ॥

श्री॰ किमात्मकः कथंभूतः कथंमूर्त्तिरितिप्रश्नत्रयस्योत्तरमाह व्यवस्थापयतीति लोकपालनात्मकः सत्यपत्तपातीब्राह्म
शां॰ रा॰ णमूर्त्तिस्वरूपइत्यर्थः ३६ दंडस्यब्राह्मणमूर्त्तित्वंविशदयन्कथंजागर्त्तीत्यस्योत्तरमाहधर्मयुक्ताइत्यादिना ब्राह्मणमूर्त्ति
टी॰ र्दंडोयज्ञादिद्वाराऽन्नसृष्टिहेतुतयाभूतानिपालयन्जागर्त्तीतिश्लोकत्रयार्थः ३७ ३९ कश्चपूर्वापरमिदंजागर्त्तिप्रतिपा
२२२ लयन्नित्यस्योत्तरमाह एवंप्रयोजनइत्यादिनाज्ञेयोनः सनातनस्योदंडः प्रत्ययपवचेत्येतेन ४० ४१ अददन्नीश्वरइतिश्लो

व्यवस्थापयतिन्दिग्रमिमंलोकंनरेश्वर सत्येव्यवस्थितोधर्मोब्राह्मणोघ्ववतिष्ठते ३६ धर्म
युक्ताद्विजश्रेष्ठादेवयुक्ताभवंतिच बभूवयज्ञोवेदेभ्योयज्ञःप्रीणातिदेवताः ३७ प्रीताश्चदेवता
नित्यमिंद्रेपरिविदंत्यपि अन्नंददातिशक्रश्चाप्यनुगृह्णन्निमाःप्रजाः ३८ प्राणाश्चसर्वभूतानांनि
त्यमन्नेप्रतिष्ठिताः तस्मात्प्रजाःप्रतिष्ठंतेदंडोजागर्त्तितासुच ३९ एवंप्रयोजनश्चैवदंडःक्षत्रियतां
गतः रक्षन्प्रजाःसजागर्त्तिनित्यंसुविहितोत्तरः ४० ईश्वरःपुरुषःप्राणःसत्वंचित्तंप्रजापतिः भू
तात्माजीवइत्येवंनामभिःप्रोच्यतेष्टभिः ४१ अददद्दंडमेवास्मैऐश्वर्यमेवच बलेनयश्चसं
युक्तःसदापंचविधात्मकः ४२ कुलंबहुधनामात्याःप्रज्ञाप्रोक्ताबलानितु आहार्यमष्टकैर्द्रव्यै

षः अस्मैराज्ञे दंडंददातीति अतएवायंबलेनसंयुक्तःपंचविधआत्मायस्यसतथाधर्मव्यवहारधर्मेश्वरजीवरूपेणपंचप्रकारात्मकोराजा
४२ बहुधनामात्याः बहुधनाः अमात्याः बलानिबलंतेजओजः सहआख्यातिदेहेन्द्रियबुद्धिसामर्थ्यानितु अष्टकैरष्टसंख्याकैः अनंतरश्लोको २२७
+नसहि वक्ष्यमाणैर्हस्त्यादिभिराहार्यं अर्जनीयंअन्यत्तबलंकोशइहद्विरूपं ४३ ॥
२

४४ अंगास्येन्यस्य राज्यस्य दंडमेवांगमिति वाक्यशेषात् युक्तस्य सन्नद्धस्य रथादिकं शरीरं विदुरिति तृतीयेनान्वयः रथदावेषाः
४५ प्राड्विवाकाः पृच्छतीति प्राड् स चासौ विवाकश्च विवदमानयोर्द्वयोः प्रवृत्तिनिमित्तं वेत्ता ४६ दंडसैन्य दंडः प्रसिद्धः ४७ दंडा
दंडाधीनं ४८ प्रदर्शितो दाराः स्थापनाय च प्रदर्शिता ब्राह्मणाः ४९ भर्तृप्रत्ययः भर्तारौ द्वौ विवदमानौ प्रत्ययकारणाय

हस्तिनोश्वा रथाः पत्तिर्नावो विष्टिस्तथैव च देशिकाश्चाविकाश्चैव तदष्टांगं बलं स्मृतं ४४
अष्टवांगस्य युक्तस्य रथिनो हस्तियायिनः अश्वारोहाः पदातांश्च मंत्रिणो रथदाश्च ये ४५
भिक्षुकाः प्राड्विवाकाश्च मोहूर्ती दैवचिंतकाः कोशो मित्राणि धान्यं च सर्वोपकरणानि च
४६ सप्तप्रकृति चाष्टांगं शरीरमिह यद्विदुः राज्यस्य दंडमेवांगं दंडः प्रभव एव च ४७ ईश्व
रेण प्रयत्नेन कारणात् क्षत्रियस्य च दंडो दत्तः समानात्मा दंडो हीदं सनातनं ४८ राज्ञां पूज्य
तमो नान्यो यथा धर्मः प्रदर्शितः ब्रह्मणा लोकरक्षार्थं स्वधर्मस्थापनाय च ४९ भर्तृप्र
त्यय उत्पन्नो व्यवहारस्तथापरः तस्माद्यः सहितो दृष्टो भर्तृप्रत्ययलक्षणः ५०

स्य सतथा वादिप्रतिवादिभ्यां प्रवर्तितो व्यवहारः तयोरन्यतरस्य प्रत्ययोऽभ्युपगमः लक्षणं यस्य स भर्तृप्रत्ययलक्षणः
अन्यतरपराजयात् रक्षत्यर्थः सहितो हितं रक्षत्येतेन युक्तः सहितः अन्यतरजयावह इत्यर्थः ५० ॥

श्री. वेदात्मावेदोक्तः दोषः पारदार्यादिः तन्निहन्ता धर्मपर्षद्प्रतिगतश्च तत्र प्रायश्चित्तात्मको वेददृष्टलक्षपः दंडः मौलः कुलाचारप्र
शां.रा. युक्तोव्यवहारस्तत्रापि शास्त्रोक्तो दंडः यथा शूद्रस्य सुरापाने प्रायश्चित्तं नास्ति अथापि कस्मिंश्चिच्छूद्रकुले एवं नियमः यो
टी. स्माकं मध्ये सुरां पिबति स राज्ञा ज्ञातिबाह्य इति तस्योल्लंघने शूद्रस्यापि सुरापानोक्तं प्रायश्चित्तं भवति तथा च शास्त्रविदाम
२२८ नुक्रमणाद्धर्मज्ञसमयः प्रमाणं वेदाश्चेति ५१ एतेषां त्रयाणां दंडानां मध्ये आद्यः तत्त्रियाधीन इत्याह उक्त इति नः।

व्यवहारस्तु वेदात्मा वेदप्रत्यय उच्यते मौलश्च नरशार्दूल शास्त्रोक्तश्च तथापरः ५१ उ
क्तो यश्चापि दंडो मौ भर्तृप्रत्ययलक्षणः ज्ञेयो नः सनरेंद्रस्थो दंडप्रत्ययलक्षणः ५२ दंडः
प्रत्ययदृष्टोपि व्यवहारात्मकः स्मृतः व्यवहारः स्मृतो यश्च स वेदविषयात्मकः ५३ यश्च
वेदप्रभूतात्मा स धर्मो गुणदर्शनः धर्मप्रत्यय उद्दिष्टो यथाधर्मः कृतात्मभिः ५४ ॥

अस्माभिः तत्त्रियैर्दंडोपि ज्ञेयः तत्र प्रत्ययोपि ज्ञेयः ५२ अस्यापि वेदमूलत्वमाह दंडेति विविधो व्यवहारः अन्योन्यपरपत्तत्तेप
णात्वयत्नसाधनं व्यवहारः तदात्मकोन्यायः सयः सयद्यपि दंडप्रत्ययदृष्टस्तथापि स व्यवहारपदार्थो मन्वादिभिः स्मृतोस्ति अ
तः सोपि वैदिकश्रेणीतत्वात् वेदविषयात्मको वेदार्थगोचरोस्तीत्यर्थः ५३ इत्थं त्रैधो व्यवहारो वेदमूलत्वाद्धर्मरूपोवित्याह यश्चेति २२८
द्वाभ्यां यथाधर्म उद्दिष्टः सम्यक्पारदार्यजेनाधर्मेणाधर्मलोपो माभूदिति प्रत्याम्नायवत्ता उद्दिष्टः प्रायश्चित्तरूपो दंडो धर्म एवेत्यर्थः ५४

प्रजागोप्ताप्रजारक्षकस्तस्यनियमस्यवर्तिता शूद्रस्यापिसुरापानप्रायश्चित्तादिरूपः सोपिधर्मएवेत्यर्थः ५५ दंडव्यवहारधर्मवेदसत्पथ
प्रजापतीनामैकात्म्यमाहद्वाभ्यां यश्चेति ५६ यतः सप्रजापतिर्भूतकृत्ततनोहेतोः अयमस्मदीयोभर्तृप्रत्ययलक्षणोव्यवहारः प्रवृत्तःत
व्यवहारः प्रजागोप्ताब्रह्मदिष्टोयुधिष्ठिर त्रीन्धारयतिलोकान्वैसत्यात्माभूतिवर्द्धनः ५५ यश्चदं
डः सदृष्टोनोव्यवहारः सनातनः व्यवहारश्चदृष्टोयः सवेदइतिनिश्चितं ५६ यश्चवेदः सवैधर्मो
यश्चधर्मः ससत्पथः ब्रह्मापितामहः पूर्वंबभूवाथप्रजापतिः ५७ लोकानांसहिसर्वेषांससुरासुररा
क्षसां समनुष्योरगवतांकर्ताचैवसभूतकृत् ५८ ततोनोव्यवहारोयंभर्तृप्रत्ययलक्षणः ता
स्मादिदमवोचामव्यवहारनिदर्शनं ५९ मातापिताचभ्राताचभार्याचैवपुरोहितः नादंड्योवि
द्यतेराज्ञोयः स्वधर्मेनतिष्ठति ६० इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मे १२१ भीष्मउ॰ अत्रा
प्युदाहरंतीममितिहासंपुरातनं अंगेषुराजाद्युतिमान्वसुहोमइतिश्रुतः १ सराजाधर्मविन्नि
त्यंसहपत्न्यामहातपाः मुंजपृष्ठंजगामाथपितृदेवर्षिपूजितं २ तत्रशृंगेहिमवतोमेरौकन
कपर्वते यत्रमुंजावटेरामोजटाहरणमादिशत् ३ तदाप्रभृतिराजेंद्रऋषिभिः संशितव्रतैः
स्यात् अस्मिन्विषयेसदंडनिदर्शनंवाक्यंउवाच ५९ तदेववाक्यं मुंजपृष्ठइतिप्रोक्तः सदेशोरुद्रसेवितः ४ ॥
दंडितोनेति योराजास्वधर्मात्प्रतिष्ठतितस्यराजत्वमितिसंबंधः ६० एकविंशतिशततमः १२१ अत्रदंडोत्पत्तौविषयौ १ २ ३ ४

श्री· ५ ६ ११ १२ आचार्यवेतनं गुरुदक्षिणां १३ १४ यियक्षुः यष्टुमिच्छुः १५ क्षुवतः क्षुतवतः १६ ॥
शां·रा· तत्र बहुभिर्यज्ञैस्तदा क्रतुमयैर्गुणैः ब्राह्मणानामनुमतो देवर्षिसदृशोऽभवत् ५ तं कदा
टी· चिद्दीनात्मा मान्धाता शत्रुकर्शनः अभ्यगच्छन्महीपालो मान्धाता शत्रुकर्शनः ६ सोपसृ
२२५ त्य तु मान्धाता वसुहोमं नराधिपं दृष्ट्वा प्रकृष्टतपसं विनतोऽभ्यतिष्ठत ७ वसुहोमोपि राज्ञो वै पा
द्यमर्घ्यं न्यवेदयत् सप्ताङ्गस्य तु राज्यस्य पप्रच्छ कुशलाव्यये ८ सद्भिराचरितं पूर्वं यथावदनु
यायिनं अपृच्छद्वसुहोमस्तं राजन् किं करवाणि ते ९ सोऽब्रवीत्परमप्रीतो मान्धाता राजसत्तमः
वसुहोमं महाप्राज्ञमासीनं कुरुनन्दन १० मान्धातोवाच बृहस्पतेर्मतं राजन्नधीतं सकलं
त्वया तथैवौशनसं शास्त्रं विज्ञातं ते नरोत्तम ११ तदहं ज्ञातुमिच्छामि दण्ड उत्पद्यते कथं
किं वास्य पूर्वं जागर्ति किं वा परममुच्यते १२ कथं क्षत्रियसंस्थश्च दण्डः संप्रत्यवस्थितः ब्रूहि मे
तन्महाप्राज्ञ ददाम्याचार्यवेतनं १३ वसुहोम उ· शृणु राजन् यथा दण्डः संभूतो लोकसंग्रहः प्र
जाविनयरक्षार्थं धर्मस्यात्मा सनातनः १४ ब्रह्मा यियक्षुर्भगवान् सर्वलोकपितामहः ऋत्विजं
नात्मनस्तुल्यं ददर्शेति हि नः श्रुतं १५ स गर्भं शिरसा देवो बहुवर्षाण्यधारयत् पूर्णे वर्षसा
हस्रे तु स गर्भः क्षुवतोऽपतत् १६ ॥ २२५

दण्डरूपप्रधानत्वात् दण्डरूपं दीनापरिग्रहः प्रजानियन्तादीनां प्रविष्ट इति नियमनरूपो दण्डोऽन्तर्हितोऽभवदित्यर्थः ७ ८ १५ ॥
मन्युर्नाम संभूतः प्रजापतिररिंदम स्वविगासीन्महाराज यत्नेन तस्य महात्मनः ७ तस्मिन्नन्तर्हिते
सर्वे तु ब्रह्मणः पार्थिवर्षभ दण्डरूपप्रधानत्वाद्दण्डः सोंतर्हितोभवत् ८ तस्मिन्नंतर्हिते चापि हिते वा
वि प्रजानां संकरोभवत् नैव कार्यं न वाकार्यं भोज्याभोज्यं न विद्यते ९ पेयापेये कुतः सिद्धिर्हिते वा
पि च परस्परं गम्यागम्यं तदा नासीत्स्वं परस्वं चैव सम्मम १० परस्परं विलुंपति सारमेया यथामिषं अ
बलान्बलिनो घ्नंति निर्मर्याद मवर्तत ११ ततः पितामहो विष्णुं भगवंतं सनातनं संपूज्य वरदं देवम
हादेवमथाब्रवीत् १२ अत्र त्वमनुकंपां वै कर्तुमर्हसि केशव संकरो न भवेदत्र यथा तद्वै विधीयतां =
१३ ततः स भगवान्ध्यात्वा चिरं शूलवरायुधः आत्मानमात्मना दण्डं ससृजे देवसत्तमः १४ तस्माच्च
धर्मचरणान्नीतिर्देवी सरस्वती ससृजे दण्डनीतिं सा त्रिषु लोकेषु विश्रुता १५ भूयः स भगवान्ध्या
त्वा चिरं शूलवरायुधः तस्य तस्य निकायस्य चकारैकैकमीश्वरं १६ देवानामीश्वरं चक्रे देवं दश
शतेक्षणं यमं वैवस्वतं चापि पितॄणामकरोत्प्रभुं १७ धनानां राक्षसानां च कुबेरमपि चेश्वरं
पर्वतानां पतिं मेरुं च महोदधिं १८ अपां राज्ये वरुणं च विदधे च महाप्रभुं मृत्युं प्राणेश्वरमथो तेजसां

श्री॰
शां॰रा॰
टी॰
२३॰

३१ ३२ मृत्योरिविनयो विहृहिम्सनारो विभागाः यस्य तस्य यावंस्त्रतुर्यमः कर्मच रोगो ऽपथ्याशनप्रयोजको रोगः यमः
कर्मचेतिवा ३३ ५१ विभज्यन्यायेन्यायाभासंचविविच्य डष्टनिग्रहरूपदंडस्य तु प्रयोजनं हिरण्यादिग्रहणं तल्लोकानां

रुद्राणामपिचेशानं गोप्तारं विदधे प्रभुं महात्मानं महादेवं विशालाक्षं सनातनं ३० वसिष्ठमीशं
विप्राणां वसूनां जातवेदसं तेजसां भास्करं चक्रे नक्षत्राणां निशाकरं ३१ वीरुधामंशुमन्तं च भूतानां
च प्रभुं वरं कुमारं द्वादशभुजं स्कन्दं राजानमादिशत् ३२ कालं सर्वेशमकरोत्संहारविनयात्मकं
मृत्योश्चतुर्विभागस्य दुःखस्य च सुखस्य च ३३ ईश्वरः सर्वदेवस्तु राजराजो नराधिप सर्वेषामेव
रुद्राणां शूलपाणिरिति श्रुतिः ३४ तमेतं ब्रह्मणः पुत्रमनुजातं क्षुपं ददौ प्रजानामधिपं श्रेष्ठं सर्व
धर्मभृतामपि ३५ महादेवस्ततस्तस्मिन्वृत्ते यज्ञे यथाविधि दंडं धर्मस्य गोप्तारं विष्णवे सत्कृतं ददौ
३६ विष्णुरंगिरसे प्रादादंगिरा मुनिसत्तमः प्रादादिंद्रमरीचिभ्यां मरीचिर्भृगवे ददौ ३७ भृगुर्ददौ
ऋषिभ्यस्तु दंडं धर्मसमाहितं ऋषयो लोकपालेभ्यो लोकपालाः क्षुपाय च ३८ क्षुपस्तु मनवे
प्रादादादित्यतनयाय च पुत्रेभ्यः श्राद्धदेवस्तु सूक्ष्मधर्मार्थकारणात् ३९ विभज्य दंडः कर्त्तव्यो २३॰
विभीषिकार्थंनतुकोशवृद्ध्यर्थमित्यर्थः ५॰ धर्मेणानयहस्वेच्छया डष्टानांनिग्रहो दंडो हिरण्यबाह्यतः क्रिया ५॰

देहत्यागः प्रयागादौ विवासनंस्वदेशाद्दूरीकरणं ४१ ४२ ४३ ४५ ४६, ४७ ४८ ४९ ५० ५१ ५२ ५३ ५४ ५५ ॥

नैतानेनधर्मवित् ४६ ॥

व्यंगतंचशरीरस्यवयोनाल्पस्यकारणात् शरीरपीडासन्तापाश्चदेहत्यागविवासनं ४१ तद
दौसूर्यपुत्रस्तुमनुर्वैवस्वतार्थकं आनुपूर्व्याचदंडोयंप्रजागर्तिपालयन् ४२ इंद्रोजागर्तिभगवा
निंद्रादग्निर्विभावसुः अग्नेर्जागर्तिवरुणाश्चप्रजापतिः ४३ प्रजापतेस्ततोधर्मोजागर्तिविनया
त्मकः धर्माच्चब्रह्मणःपुत्रोव्यवसायःसनातनः ४४ व्यवसायात्ततस्तेजोजागर्तिपरिपालयन् औ
षध्यस्तेजसस्तस्मादोषधीभ्यश्चपर्वताः ४५ पर्वतेभ्यश्चजागर्तिरसोरसगुणात्तथा जागर्तिनिर्ऋ
तिर्देवीज्योतींषिनिर्ऋतेरपि ४६ वेदाःप्रतिष्ठाज्योतिर्भ्यस्ततोहयशिराःप्रभुः ब्रह्मापितामहस्त
स्माज्जागर्तिप्रभुरव्ययः ४७ पितामहान्महादेवोजागर्तिभगवान्शिवः विश्वेदेवाःशिवाच्चापिवि
श्वेभ्यश्चतथार्षयः ४८ ऋषिभ्योभगवान्सोमःसोमाद्देवाःसनातनाः देवेभ्योब्राह्मणालोकेजाग्र
तीत्युपधारय ४९ ब्राह्मणेभ्यश्चराजन्यालोकान्रक्षंतिधर्मतः स्थावरंजंगमंचैवक्षत्रियेभ्यःस
नातनं ५० प्रजाजाग्रतिलोकेस्मिन्दंडोजागर्तितासुच सर्वसंक्षिपतेदंडःपितामहसमप्रभः ५१
जागर्तिकालःपूर्वंचमध्येचांतेचभारत ईश्वरःसर्वलोकस्यमहादेवःप्रजापतिः ५२ देवदेवःशि
वःशिवःशर्वोजागर्तिसततंप्रभुः कपर्दीशंकरोरुद्रःशिवःस्थाणुरुमापतिः ५३ इत्येषदंडोवि

ख्यातआदौमध्येतथावरे भूमिपालोयथान्यायव

श्री॰
शां॰ रा
टी॰
२३।

५५ ५६ द्वाविंशाधिकशततमः १२२ तातेति १ किंमूलाः किंहेतुकाः किमुद्दिश्य क्रियंत इत्यर्थः प्रभवत्यस्मादिति किमेषामुत्पत्तिस्थानं
तेषां साहित्यं कथं पृथक्त्वं च कथमिति चत्वारः प्रश्नाः २ सूचीकटाहन्यायेन साहित्यमाह यदेति स्वमनसः शोभनचित्ताः शुं
भास्तः यदा स्युः तदा लोके भूमौ धर्मपूर्वके ऽर्थनिश्चये ऽहं गार्भाधानोक्तविधिना ऋतौ भार्यां गत्वा सुपुत्रं लप्स्यामि एवं तेष्वेवं रूपप्र

भीष्म उवाच ॥ इतीदं वसुहोमस्य शृणुयाद्यो मतं नरः ॥ श्रुत्वा चैव सम्यग्वर्तेत सर्वान्कामानवा
प्नुयात् ५५ इतिहासमिमं श्रुत्वा यो वै वर्तेत भारत ॥ पूजितः सर्वलोकस्य धर्मात्मा स भवेन्नरः
५६ इति श्रीमहाभारते शांतिपर्वणि राजधर्मे वसुहोमोपाख्याने द्वाविंशत्यधिकशततमो ऽध्यायः १२२ युधिष्ठिर उवाच ॥ तात धर्मार्थकामानां श्रो
तुमिच्छामि निश्चयं ॥ लोकयात्रा हि कात्स्न्येन त्रिष्वेतेषु प्रतिष्ठिता १ धर्मार्थकामाः किंमू
लास्त्रयाणां प्रभवश्च कः ॥ अन्योन्यं चानुषज्जंते वर्तंते च पृथक्पृथक् २ भीष्म उवाच ॥ यदा
ते स्युः स्वमनसो लोके धर्मार्थनिश्चये ॥ कालप्रभवसंस्थासु सज्जंते च त्रयस्तदा ३ ॥

वृत्तेः सतिते धर्मार्थकामास्त्रयो ऽपि कालः ऋतुवेला प्रभवः जाया संस्थासम्यक्कर्मनिष्पत्तिः तासु सतीषु सज्जंते युगपद्वर्तंते ॥ ४१ ॥
ते योनिसंस्कारवृद्ध्यायधर्मः पुत्ररूपो ऽर्थः स्त्रीसंग्रहरूपः कामश्च भवतीत्यर्थः ३ ॥

आद्यस्य प्रश्नद्वयस्योत्तरमाह धर्मेति दिव्यदेवतादिशरीरप्राप्तिमर्थोश्वमेधादीनुद्दिश्य धर्मः क्रियते ऽतो दैवेन सहितो ऽर्थो धर्मा
स्यमूलं अर्थस्य भोगार्थत्वं प्रसिद्धमिति काममूलो ऽर्थ इति चोक्तं कामो ऽर्थफलं कामस्य मूलं इन्द्रियप्रीतिरित्यर्थः संकल्पमू
लाः संकल्पप्रभवास्ते सर्वे ऽपीति द्वितीयस्योत्तरं पतद्दैवोपपादयति संकल्प इति रूपादिविषयः संकल्पो रूपाद्याश्च भोगार्थी
इति सर्वे ऽप्येते संकल्पमूलाः मोक्षस्तु तद्विलक्षणो निःसंकल्परूप इत्यर्थः ४ ५ किमेवं त्रिवर्गः सर्वेणापि न सेव्य इत्याश
क्य रजस्वलो रजःप्रधानः सत्त्वैसेव्यः सत्त्वप्रधानैः सेव्य एवेत्याह धर्मादिति आरोग्यार्थं धर्मः कामाय धर्मार्थमर्थः इन्द्रियप्री

धर्ममूलः सदैवार्थः कामो ऽर्थफलमुच्यते संकल्पमूलास्ते सर्वे संकल्पो विषयात्मकः ४
विषयाश्चैव कार्त्स्न्येन सर्व आहारसिद्धये मूलमेतत् त्रिवर्गस्य निवृत्तिर्मोक्ष उच्यते ५ धर्मा
च्छरीरसंगुप्तिर्धर्मार्थं चार्थ उच्यते कामो रतिफलश्चात्र सर्वे ते रजस्वलाः ६ सन्निकृष्टां
श्चरेदेतान्न चैतान्मनसा त्यजेत् विमुक्तस्तपसा सर्वान्धर्मादीन् कामनैष्ठिकान् ७ ॥

त्यर्थं च काम इत्येते हेया इत्यर्थः ६ स्वर्गादिकं बाह्यं फलं विप्रकृष्टं तदर्थाः एते विप्रकृष्टाः आत्मज्ञानरूपं तु फलं सन्निकृष्टं तद
र्थाः एते सन्निकृष्टास्तान् चरेत् सेवेत धर्मश्चित्तशुद्ध्यर्थः अर्थो निष्कामकर्मार्थः कामो देहधारणमात्रार्थ इत्येवमेते सेव्या इत्य
र्थः धर्मादीन् कामनैष्ठिकान् कामान्तान् धर्मार्थकामान् सर्वान् अपि मनसापि न त्यजेत् किन्तु स्वरूपेण न त्यजेदित्यर्थः कथं त
र्हि नात्यजेदित्याह तपसा विमुक्त इति विचारेणैव तेभ्यो विमुक्तो भवेत् संगफलत्यागपूर्वकं धर्मादीननुतिष्ठेदिति भावः ७

श्री॰ ततश्चकिमत आह श्रेष्ठेत्यर्द्धेन त्रिवर्गस्य बुद्धिर्लिप्सा श्रेष्ठमोक्षेपवाप्ति यत् यदिश्रयं कर्त्ता नश्रेष्ठं प्राप्नुयादितस्तु तिक्का
शां॰ रा॰ मस्यतस्यदौर्लभ्यमेवेतिभावः इहार्थे अस्मिन् धर्मादर्थोर्थेनोधर्मइति विषये अज्ञानं निकृष्टया बुद्ध्या उपलक्षितः अबुद्धि
टी॰ विमूढः ततउक्तात् द्वयं धर्मार्थयोः फलं न प्राप्नुयात् उभयत्रापि व्यभिचारस्यान्यथासिद्धेः प्रदर्शितत्वात् तस्मात् श्रेष्ठमेव
२३२ तयोः फलमव्यभिचारीतितेयं ८ धर्मादीनां स्वलत्वमुक्तं तदेवरजोदर्शयति अपेति अपध्यानं फलाभिसंधिः निग्र

श्रेष्ठबुद्धिस्त्रिवर्गस्य यदयं प्राप्नुयान्नरः बुद्ध्या बुद्धिमिहार्थेन तद्ज्ञाननिकृष्टया ८ अपध्या
नमलोधर्मोमलोर्थस्य निगूहनं संप्रमोदमलः कामो भूयः स्वगुणवर्जितः ९ अत्राप्युदाह
रंतीममितिहासं पुरातनं कामंदकस्य संवादमांगरिष्टस्य चोभयोः १० कामंदमृषिमासी
नमभिवाद्य नराधिपः आंगरिष्ठोथपप्रच्छ कृत्वा समयपर्ययं ११ यः पापं कुरुते राजा का
मपोहवलात्कृतः प्रत्यासन्नस्य तस्यर्षे किं स्यात्पापप्रणाशनं १२ अधर्मं धर्म इति च योज्ञा =
नादाचरेन्नरः तं चापि प्रथितं लोके कथं राजा निवर्त्तयेत् १३ ॥ शां

हृतेदानभोगयोरप्रतिपादनं संप्रमोदः प्रीतिविशेषः सएवत्रिवर्गः स्वगुणवर्जितः स्वतं त्रगुणाः सत्याना दिस्तेनवर्जितः स ८
नभूयः बहुतरं फलं चित्तशुद्धिद्वारा ब्रह्मानंदरूपं प्रयच्छतीति शेषः ९ एवं पूर्वोक्तस्य प्रश्नत्रयस्योत्तरमुक्त्वा वर्त्तते च पा २३२
यकल्पयगितिचतुर्थप्रश्नस्योत्तरं इतिहासमुखेनाह अत्रापीति १० समयपर्ययं मर्यादाभंगं ११ प्रत्यासन्नस्य पश्चात्तप्तस्य

अत्र आपस्तंबाश्च निदर्शनात् तद्यथाम्रे फलार्थे निमित्ते छायागंधावनूत्पद्येते एवं धर्मं चर्यमाणमर्था अनूत्पद्यन्त इत्येवं द्र
पात् धर्मोऽर्थकामाभ्यामविनाभूतोऽर्थश्च कामेनाविनाभूतः सर्वत्रास्ति परिशेषात् काम एव धर्मार्थावतिक्रम्यास्ति न
कामं दद्युः यो धर्मार्थौ परित्यज्य काममेवानुवर्तते स धर्मार्थपरित्यागात्प्रज्ञानाशमिहार्छति ।
१४ प्रज्ञानाशात्मको मोहस्तथा धर्मार्थनाशकः तस्मान्नास्तिकता चैव दुराचारश्च जायते १५
दुराचारान्यदा राजा प्रदुष्टान्न नियच्छति तस्मादुद्विजते लोकः सर्पाद्वेश्मगतादिव १६ तं प्रजा
नानुवर्तन्ते ब्राह्मणा न च साधवः ततः संशयमाप्नोति तथा वध्यत्वमेति च १७ अपध्वस्तस्त्ववमतो
दुःखं जीवितमृच्छति जीवेच्च यदपध्वस्तस्तच्छुद्धं मरणं भवेत् १८ अत्रैतदाहुराचार्याः पापस्य
परिगर्हणं सेवितव्या त्रयी विद्या सत्कारो ब्राह्मणेषु च १९ महामना भवेद्धर्मे विवहेच्च महाकु
ले ब्राह्मणांश्चापि सेवेत क्षमायुक्तान्मनस्विनः २० जपेदुदकशीलः स्यात्सततं हृस्वमास्थितः
धर्मान्वितान्संप्रविशेद्बहिः कृत्वेह दुष्कृतीन् २१ प्रसादयेन्मधुरया वाचाप्यथ च कर्मणा तवा
स्मीति वदेन्नित्यं परेषां कीर्तयन्गुणान् २२ अपापो ह्येवमाचारः क्षिप्रं बहुमतो भवेत् पापान्य
पि हि कृच्छ्राणि शमयेन्नात्र संशयः २३ गुरवो हि परं धर्मं यं ब्रूयुस्तत्तथा कुरु गुरूणां हि प्रसादाद्धि
त्वं निंदति यश्ति १४ १५ एवं निंदितस्य कर्तव्यमाह अत्रेति १९ २४ त्रयोविंशतितमः २३ ॥ श्रेयः परमवाप्स्य

श्री·
शां·रा·
टी·
२३३

युधिष्ठिरउ· इमेजनानरश्रेष्ठप्रशंसंतिसदाभुवि धर्मस्यशीलमेवादौततोमेसंशयोमहत्
१ यदितच्छक्यमस्माभिर्ज्ञातुंधर्मभृतांवर श्रोतुमिच्छामितत्सर्वंयथैतदुपलभ्यते २ कथं
तत्प्राप्यतेशीलंश्रोतुमिच्छामिभारत किंलक्षणंचतत्प्रोक्तंब्रूहिमेवदतांवर ३ भीष्मउ·
पुरादुर्योधनेनेहधृतराष्ट्रायमानद आख्यातंतप्यमानेनश्रियंदृष्ट्वातथागतां ४ इंद्रप्रस्थेम
हाराजतवसभ्रातृकस्यह सभायांचावहसनंतत्सर्वंशृणुभारत ५ भवतस्तांसभांदृष्ट्वास
मृद्धिंचाप्यनुत्तमां दुर्योधनस्तदासीनःसर्वंपित्रेन्यवेदयत् ६ श्रुत्वाहिधृतराष्ट्रश्चदुर्योधन
वचस्तदा अब्रवीत्कर्णसहितंदुर्योधनमिदंवचः ७ धृतराष्ट्रउ· किमर्थंतप्यसेपुत्रश्रोतुमि
च्छामितत्त्वतः श्रुत्वात्वामनुनेष्यामियदिसम्यग्भविष्यति ८ यथाचमहदैश्वर्यंप्राप्तंपरपुरं
जय किंकराभ्रातरःसर्वेमित्रसंबंधिनःसदा ९ आच्छादयसिप्रावारानश्नासिपिशितौद
नं आजानेयावहंतित्वांकेनासिहरिणःकृशः १० दुर्योधनउ· दशतानिसहस्राणिस्नात
कानांमहात्मनां भुंजतेरुक्मपात्रीभिर्युधिष्ठिरनिवेशने ११ दृष्ट्वाचतांसभांदिव्यांदिव्यपु
ष्पफलान्वितां अश्वांस्तित्तिरकल्माषान्वस्त्राणिविविधानिच १२ ॥

१३ १५ गुणक्रीतेति पाठे गुणाग्रामा १६ २० नैःश्रेयसं मोक्षोपयोगि २१ को विशेषः नैःश्रेयसादपि किं श्रेय इत्यर्थः २२ २३ ॥

दृष्ट्वा तां पांडवेयानां ऋद्धिं वैश्रवणीमिव भां अमित्राणां सुमहतीमन्वशोचापि भारत १३ धृतरा
ष्ट्र उ० यदीच्छसि श्रियं तात याहृशीं मा युधिष्ठिरे विशिष्टं वा नरव्याघ्र शीलवान्भव पुत्रक १४ शी
लेन हि त्रयो लोकाः शक्या जेतुं न संशयः नहि किंचिदसाध्यं वै लोके शीलवतां भवेत् १५ एकरा
त्रेण मांधाता त्र्यहेण जनमेजयः सप्तरात्रेण नाभागः पृथिवीं प्रतिपेदिरे १६ एते हि पार्थिवाः सर्वे शी
लवंतो दयान्विताः अतस्तेषां गुणक्रीता वसुधा स्वयमागता १६ दुर्योधन उ० कथं तत्प्राप्यते शी
लं श्रोतुमिच्छामि भारत येन शीलेन ते प्राप्ताः क्षिप्रमेव वसुंधरा १७ धृतराष्ट्र उ० अत्राप्युदाहरं
तीममितिहासं पुरातनं नारदेन पुरा प्रोक्तं शीलमाश्रित्य भारत १८ प्रह्लादेन हृतं राज्यं महेंद्रस्य
महात्मनः शीलमाश्रित्य दैत्येन त्रैलोक्यं च वशीकृतं १९ ततो बृहस्पतिं शक्रः प्रांजलिः समुपस्थि
तः तमुवाच महाप्राज्ञः श्रेय इच्छामि वेदितुं २० ततो बृहस्पतिस्तस्मै ज्ञानं नैःश्रेयसं परं कथ
यामास भगवान्देवेंद्राय कुरूद्वह २१ एतावच्छ्रेय इत्येव बृहस्पतिरभाषत इंद्रस्तु भूयः पप्रच्छ
को विशेषो भवेदिति २२ बृहस्पतिरुवाच विशेषोऽस्ति महांस्तात भार्गवस्य महात्मनः अत्रा
गमय भद्रं ते भूय एव सुरर्षभ २३ ॥

श्री·
शां·रा·
टी·
२३४

२४ २८ आचर्यंआचरणीयं २५ ३२ काव्यानिशुक्रप्रोक्तानिनीतिशास्त्राणिसर्वशस्त्वाभिमानेननासूयामि ३३ तेश्रुत

आत्मनस्तुततःश्रेयोभार्गवात्सुमहातपाः ज्ञानमागम्यप्रीत्यापुनःसपरमद्युतिः २४ तेना
पिसमनुज्ञातोभार्गवेणमहात्मना श्रेयोऽस्तीतिपुनर्भूयःशुक्रमाहशतक्रतुः २५ भार्गवस्त्वाह
सर्वज्ञःप्रह्लादस्यमहात्मनः ज्ञानमस्तिविशेषेणतस्मात्हृष्टश्चसोऽभवत् २६ सततोब्राह्मणो
भूत्वाप्रह्लादंपाकशासनः गत्वाप्रोवाचमेधावीश्रेयइच्छामिवेदितुं २७ प्रह्लादस्त्वब्रवीद्विप्रं
क्षणोनास्तिद्विजर्षभ त्रैलोक्यराज्यसक्तस्यततोनोपदिशामिते २८ ब्राह्मणस्त्वब्रवीद्राजन्यस्मि
न्कालेक्षणोभवेत् तदोपादेष्टुमिच्छामियदाचर्यमनन्तरम् २९ ततःप्रीतोभवद्राजाप्रह्लादोब्रह्म
वादिनः तथेत्युक्त्वाशुभेकालेज्ञानतत्त्वंददौतदा ३० ब्राह्मणोपियथान्यायंगुरुवृत्तिमनुत्तमां च
कारसर्वभावेनयदस्यमनसेप्सितं ३१ पृष्टश्चतेनबहुशःप्राप्तंकथमिदंत्वया त्रैलोक्यराज्यंधर्मज्ञ
कारणंतद्ब्रवीहिमे ३२ प्रह्लादोपिमहाराजब्राह्मणंवाक्यमब्रवीत् प्रह्लाद उ० नासूयामिद्वि
जान्विप्रराजास्मीतिकदाचन काव्यानिवदतांतेषांसंयच्छामिवहामिच ३३ तेविश्रब्धाःप्रभाषं
तेसंयच्छन्तिचमांसदा तेमांकाव्यपथेयुक्तंशुश्रूषमनसूयकं ३४ धर्मात्मानंजितक्रोधंनियतात्मं [illegible] ॥
यः तेतांसंयच्छन्तितिनियमयामीतिमांप्रभाषंते ३५ तद्वाभिर्मधुमत्तिकाभिर्निर्मितंतोऽहंमधु तत्रमत्तिकामध्येवर्मांतेशास्त्रेणासिंचन्ति

३४
२३४

वागग्रेप्पवनतस्तकेविप्रायेषांतेषां ३६ ३७ ४१ तेजायमितिमंथिरार्थः ४२ ४४ तेजोविग्रहवत्तेजोमयशरीरं
सोहंवागग्रविप्राणां रमनामबलेहिता स्वजात्यानथितिष्ठामिन त्वत्ताणिवचंद्रमाः ३६
एतत्पृथिव्यामस्तमेतच्चत्वरत्नमुत्तमम् यद्ब्राह्मणाः शुभेकाव्यमेतच्छ्रुत्वा प्रवर्तते ३७ एतावच्छ्रेय
इत्याह प्रह्लादो ब्रह्मवादिनं शुश्रूषितस्तेन ततो दैत्येंद्रो वाक्यमब्रवीत् ३८ यथावद्गुरुवृत्त्या ते
प्रीतोस्मि द्विजसत्तम वरं वृणीष्व भद्रं ते प्रदातास्मि न संशयः ३९ कृतमित्येव दैत्येंद्रमुवाच स च वै
द्विजः प्रह्लादस्त्वब्रवीत्प्रीतो गृह्यतां वर इत्युत ४० ब्राह्मण उ० यदि राजन् प्रसन्नस्त्वं मम चेच्छसि
प्रियं भवतः शीलमिच्छामि प्राप्तुमेष वरो मम ४१ ततः प्रीतस्तु दैत्येंद्रो भयमस्याभवन्महत् वरे प्र
दिष्टे विप्रेण नाल्पतेजायमित्युत ४२ एवमस्त्विति तं प्राह प्रह्लादो विस्मितस्तदा उपाकृत्य तु वि
प्राय वरं दुःखान्वितोऽभवत् ४३ दत्ते वरे गते विप्रे चिंतासीन्महती तदा प्रह्लादस्य महाराज निश्चयं
न च जग्मिवान् ४४ तस्य चिंतयतस्तावच्छायाभूतं महाद्युति तेजो विग्रहवद्भूत्वा शरीरमजहात्त
दा ४५ तमपृच्छन्महाकायं प्रह्लादः को भवानिति प्रत्याह तं तु शीलोस्मि त्यक्तो गच्छाम्य
हं त्वया ४६ तस्मिन्द्विजोत्तमे राजन्वत्स्याम्यहमनिंदिते योसौ शिष्यत्वमागम्य त्वयि नित्यं समा
हितः ४७ इत्युक्त्वांतर्हितं तद्धि शक्रं चान्वाविशत्प्रभो तस्मिंस्तेजसि याते तु तादृग्रूपस्ततोऽपरः ४८
शीलं ४५ ४६ ४७ ४८ ॥

श्री॰
शां॰ रा॰
टी॰
२३५

शरीरान्निःसृतस्तस्यकोभवानितिचाब्रवीत् धर्मंप्रह्लादमांविद्धियत्रासौद्विजसत्तमः ४९ तत्रया
स्यामिदैत्येन्द्रयतःशीलंततोह्यहं ततोपरोमहाराजप्रज्वलन्निवतेजसा ५० शरीरान्निःसृतस्तस्यप्र
ह्लादस्यमहात्मनः कोभवानितिपृष्टश्चतमाहसमहाद्युतिः ५१ सत्यंविद्ध्यसुरेन्द्राद्यप्रयास्येधर्ममन
न्वहं तस्मिन्ननुगतेधर्मेमहान्वैपुरुषोपरः ५२ निश्चक्रामततस्तस्मात्पृष्टश्चाहमहाबलः वृत्तंप्रा
ह्लादमांविद्धियतःसत्यंततोह्यहं ५३ तस्मिन्गतेमहाशब्दःशरीरात्तस्यनिर्ययौ पृष्टश्चाहबलंवि
द्धियतोवृत्तंमहेततः ५४ इत्युक्त्वाप्रययौतत्रयतोवृत्तंनराधिप ततःप्रभामयीदेवीशरीरात्तस्यनिर्य
यौ तामपृच्छत्सदैत्येन्द्रःसाश्रीरित्येनमब्रवीत् ५५ उषितास्मिस्वयंवीरत्वयिसत्यपराक्रम त्वया
त्यक्तागमिष्यामिबलंयत्रानुगताह्यहं ५६ ततोभयंप्रादुरासीत्प्रह्लादस्यमहात्मनः अपृच्छत्सत
तोभूयःक्वयासिकमलालये ५७ त्वंहिसत्यव्रतादेवीलोकस्यपरमेश्वरी कश्चासौब्राह्मणश्रे
ष्ठस्तत्त्वमिच्छामिवेदितुं ५८ श्रीरुवाच सशक्रोब्रह्मचारीयस्त्वत्तश्चैवोपशिक्षितः त्रैलोक्ये
तेयदैश्वर्यंतत्तेनापहृतंप्रभो ५९ शीलेनहित्रयोलोकास्त्वयाधर्मज्ञनिर्जिताः तद्विज्ञायसु
रेन्द्रेणतवशीलंहृतंप्रभो ६० ॥

२३५

६१ ६२ ६३ ६४ ६५ ६६ ६७ ६८ ६९ ७० अध्यायः १२४ शीलं १ ॥

धर्मः सत्यं तथा वृत्तं बलं चैव तथाप्यहं शीलमूला महाप्राज्ञ सदा नास्त्यत्र संशयः ६१ भीष्म उ॰
एवमुक्त्वा गता श्रीस्तु ते च सर्वे युधिष्ठिर दुर्योधनस्तु पितरं भूय एवाब्रवीद्वचः ६२ शीलस्य तत्त्वमि
च्छामि वेत्तुं कौरवनंदन प्राप्यते च यथा शीलं तं चोपायं वदस्व मे ६३ धृतराष्ट्र उ॰ सोपायं पूर्वमु
द्दिष्टं प्रह्लादेन महात्मना संक्षेपेण तु शीलस्य शृणु प्राप्तिं नरेश्वर ६४ अद्रोहः सर्वभूतेषु कर्मणा
मनसा गिरा अनुग्रहश्च दानं च शीलमेतत्प्रशस्यते ६५ यदन्येषां हितं न स्यादात्मनः कर्म पौरुषं
अपत्रपेत वा येन न तत्कुर्यात्कथंचन ६६ तत्तु कर्म तथा कुर्याद्येन श्लाघ्येत संसदि शीलं समा
सेनैतत्ते कथितं कुरुसत्तम ६७ यद्यप्यशीला नृपते प्राप्नुवंति श्रियं क्वचित् न भुंजते चिरं तात
समूलाश्च न संति ते ६८ धृतराष्ट्र उ॰ एतद्विदित्वा तत्त्वेन शीलवान्भव पुत्रक यदीच्छसि श्रियं
तात सुविशिष्टां युधिष्ठिर ६९ भीष्म उवाच एतत्कथितवान्पुत्रे धृतराष्ट्रो नराधिपः एतत्कु
रुष्व कौंतेय ततः प्राप्स्यसि तत्फलं ७० इति श्रीमहाभारते शांतौ राजधर्मे शीलवर्णनं नाम १२४
युधिष्ठिर उ॰ शीलं प्रधानं पुरुषे कथितं ते पितामह कथमाशा समुत्पन्ना या चाशा तद्वदस्व मे १

श्री॰
शां॰रा॰
टी॰
२३९

२ युक्तं युद्धं विनैव राज्यार्द्धदानं कर्ता करिष्यति ३ ५ पर्वतात् महत्तरा अप्रविचाल्यत्वेन द्रुमात् महत्तरा नवफलप्रदर्शकत्वेन ६

संशयो मे महानेष समुत्पन्नः पितामह छेत्ता च तस्य नान्योस्ति त्वत्तः परपुरंजय पितामहाशा म
हती ममासीद्धि सुयोधने प्राप्ते युद्धे तु यद्युक्तं तत्कर्तायमिति प्रभो २ सर्वस्याशा सुमहती पुरुष
स्योपजायते तस्यां विहन्यमानायां दुःखो मृत्युर्न संशयः ३ सोहं हताशो दुर्बुद्धिः कृतस्तेन दुरा
त्मना धार्तराष्ट्रेण राजेन्द्र पश्य मंदात्मतां मम ४ आशां महत्तरां मन्ये पर्वतादपि सद्रुमात् आका
शादपि वा राजन्नप्रमेयैव वा पुनः ५ एषा चैव कुरुश्रेष्ठ दुर्विचिंत्या सुदुर्लभा दुर्लभत्वाच्च पश्यामि
किमन्यद्दुर्लभं ततः ६ भीष्म उ॰ अत्र ते वर्तयिष्यामि युधिष्ठिर निबोध तत् इतिहासं सुमित्रस्य निर्वे
दमृषभस्य च ७ सुमित्रो नाम राजर्षिर्हैहयो मृगयां गतः ससार स मृगं विद्ध्वा बाणेनानतपर्वणा ८
स मृगो बाणमादाय ययावमितविक्रमः स च राजा बलात्तूर्णं ससार मृगमंतिकं ९ ततो निम्नं स्थ
लं चैव स मृगो द्रवदाशुगः मुहूर्तमेव राजेन्द्र समेन स पथागमत् १० ततः स राजा तारुण्यादौरसे
न बलेन च ससार बाणासनभृत् सखङ्गो हंसवत्तदा ११ तीर्त्वा नदान्नदीश्चैव पल्वलानि वना
नि च अतिक्रम्याभ्यतिक्रम्य ससारैको वनेचरः १२

दुर्लभा दुर्जयः ७ ९ बाणासनभृत् धनुर्द्धरः ११ १२ ॥

१४ समभ्यस्तो विद्वः १५ १६ पंचविंशतितमः २५ प्रविश्य १ २ ३ ४ देमद्र ५ ६ ॥

मतकामान्मृगो राजन्नासाद्यासाद्य तं नृपं पुनरभ्येति जवनो जवेन महता ततः १४ स तस्य
बाणैर्बहुभिः समभ्यस्तो वनेचरः अक्रीडन्निव राजेंद्र पुनरभ्येति चांतिकं १५ पुनश्च जवमा
स्थाय जवनो मृगयूथपः अतीत्यातीत्य राजेंद्र पुनरभ्येति चांतिकं १६ तस्य मर्मच्छिदं घो
रं तीक्ष्णं चामित्रकर्शनः समादाय शरं श्रेष्ठं कार्मुकेवततयासृजत् १७ ततो गव्यूतिमात्रे
मृगयूथपयूथपः तस्य बाणपथं मुक्त्वा तस्थिवान्प्रहसन्निव १८ तस्मिन्निपतिते बाणे
भूमौ ज्वलिततेजसि प्रविवेश महारण्यं मृगो राजाप्यथाद्रवत् १९ इति शांतौ राजधर्मे
ऋषभगीतासु १२५ भीष्म उ० प्रविश्य स महारण्यं तापसानामथाश्रमं आससाद ततो
राजा श्रांतश्चोपाविशत्तदा १ तं कार्मुकधरं दृष्ट्वा श्रमार्तं क्षुधितं तदा समेत्य ऋषयस्तस्मि
न्पूजां चक्रुर्यथाविधि २ स पूजामृषिभिर्दत्तां संप्रगृह्य नराधिपः अपृच्छत्तापसान्सर्वा
न्तपसो वृद्धिमुत्तमां ३ ते तस्य राज्ञो वचनं संप्रगृह्य तपोधनाः ऋषयो राजशार्दूलं तमपृच्छ
न्प्रयोजनं ४ केन भद्र सुखार्थेन संप्राप्तोसि तपोवनं पदातिर्बद्धनिस्त्रिंशो धन्वी बाणी नरेश्व
र ५ एतदिच्छाम हे श्रोतुं कुतः प्राप्तोसि मानद कस्मिन्कुले त्वं जातस्त्वं किंनामा चासि ब्रूहि

श्री·
शां·रा·
टी·
२३७

७ ११ पुरस्यचत्यागःइतिपदैकदेशोपितिलक्ष्यते आशामरगाशा १२ हिमवाञ्चतेनमहोदधिर्विस्तृततेनचगगनांतन्नान्वपद्येता

ततःसराजासर्वेभ्योद्विजेभ्यःपुरुषर्षभ आचचक्षेयथान्यायंपरिचर्यांचभारत ७ हैहयानांकु
लेजातःसुमित्रोमित्रनंदन चरामिमृगयूथानिनिघ्नन्बाणैःसहस्रशः ८ बलेनमहतागुप्तःसा
मात्यःसावरोधनः मृगस्तुविद्धोबाणेनमयासशरशल्यवान् ९ तंद्रवंतमनुप्राप्तोवनेतद्यदृच्छ
या भवत्सकाशंनष्टश्रीर्हताशःश्रमकर्शितः ० किंनुदुःखमतोन्यद्वैयदहंश्रमकर्शितः भ
वतामाश्रमंप्राप्तोहताशोभ्रष्टलक्षणः १ नराजलक्षणत्यागोनपुरस्यतपोधनाः दुःखंकरो
तितत्तीव्रंयथाशाविहताममः २ हिमवान्वामहाशैलःसमुद्रोवामहोदधिः महत्वान्नान्वपद्येतां
नभसोवांतरंतथा ३ आशायास्तपसिश्रेष्ठास्तथानांतमहंगतः भवतांविदितंसर्वंसर्वज्ञाहि
तपोधनाः ४ भवंतःसुमहाभागास्तस्मात्पृच्छामिसंशयं आशावान्पुरुषोयःस्यादंतरिक्षम
थापिवा ५ किंनुज्यायस्तरंलोकेमहत्त्वात्प्रतिभातिवः एतदिच्छामितत्वेनश्रोतुंकिमिहदुर्ल
भं ६ यदिगुह्यंतपोनित्यंनवोब्रूतमाचिरं नगुह्यंश्रोतुमिच्छामियुष्मत्तोद्विजसत्तमाः ७
भवत्तपोविघातोवायदिस्याद्विरमेततः यदिवास्तिकथायोगोयोयंप्रश्नोमयेरितः ८ ॥

तांतस्यततोप्युच्चत्वाद्धिततत्वाच्च अवांतरंपकाशमपि २ ४ आशावानआशायामहत्वेननतद्धतोपिमहत्त्वमंनरितवत् ५ ७ ८

१९ षट्विंशतिशततमः१२६ ततः १ २ वैहायसः विहायसागच्छंत्याः मंदाकिन्याः वैहायस्याश्रयं वैहायसः ३ ततो।
पततकारणसामर्थ्यं श्रोतुमिच्छामि तत्वतः भवंतो पितयो नित्यां ब्रूयुरेतत्समन्विताः
१९ इतिश्रीमहाभारते शांतौ राजधर्मे ऋषभगीतासु १२६ भीष्मउ० ततस्तेषां समस्
तानं ऋषीणामृषिसत्तमः ऋषिभो नाम विप्रर्षिर्विस्मयन्निदमब्रवीत् १ पुराहं राजशार्दूल
तीर्थान्यनुचरन्प्रभो समासादितवान् दिव्यं नरनारायणाश्रमं २ यत्र सा बदरी रम्या ह्रदो वैहा
यसस्तथा यत्र चाश्वशिरा राजन्वेदान्पठति शाश्वतान् ३ तस्मिन्सरसि कृत्वाहं विधिवत्तर्प
णं पुरा पितृणां देवतानां च ततो श्रममियां तदा ४ रेमाते यत्र तौ नित्यं नरनारायणावृषी
अदूरादाश्रमं कंचिद्वासार्थमगमं तदा तत्र चीराजिनधरं कृशमुच्चमतीव च अद्राक्षमृषि
मायांतं तनुं नाम तपोधनं अन्यैर्नरैर्महाबाहो वपुषाष्टगुणान्वितं कृशता चापि राजर्षे न
दृष्टा तादृशी क्वचित् ७ शरीरमपि राजेंद्र तस्य कानिष्ठिकासमं ग्रीवा बाहू तथा पादौ केशा
श्चाद्भुतदर्शना ८ शिरः कायानुरूपं च कर्णौ नेत्रे तथैव च तस्य वाक्चैव चेष्टा च सामान्ये
राजसत्तम ८ दृष्ट्वाहं तं कृशं विप्रं भीतः परमदुर्मनाः पादौ तस्याभिवाद्याथ स्थितः प्रांजलि
श्रमं तत आश्रमे मंडपं गतवानहं ४ ८ कायानुरूपस्यूरध्यतः १ निवेद्य नाम गोत्रे च पितरं चैव नरर्षभ प्रदिष्टे चास

११ १२ १३ १४ तेनतवपुत्रेणाभूरिद्युम्नेन २० २१ २२ एवंमुनिनोक्तः वीरद्युम्नः अवसीदत्नष्टप्रायोभूदित्यर्थः २३ ॥

ततः सकथयामासकथांधर्मार्थसंहितां ऋषिमध्येमहाराजतनुर्द्धर्मभृतांवरः तस्मिन्नकथयत्येवराजाराजीवलोचनः उपायाज्जवनैरश्वैः सबलः सावरोधनः १२ स्मरन्पुत्रमरण्येवैनष्टंपरमदुर्मनाः भूरिद्युम्नपिताश्रीमान्वीरद्युम्नोमहायशाः १३ इहद्रक्ष्यामितंपुत्रंद्रक्ष्यामीहेतिपार्थिवः एवमाशाकृतोराजाचरन्वनमिदंपुरा १४ दुर्लभः समयाद्रष्टुंनूनंपरमधार्मिकः एकः पुत्रोमहारण्ये नष्टश्चासकृत्तदा १५ दुर्लभः समयाद्रष्टुमाशाचमहतीमम तयापरीतगात्रोहंमुमूर्षुर्नात्रसंशयः १६ एतच्छ्रुत्वासभगवांस्तनुर्मुनिवरोत्तमः अवाक्शिराध्यानपरोमुहूर्तमिवतस्थिवान् १७ तमनुध्यान्तमालक्ष्यराजापरमदुर्मनाः उवाचवाक्यंदीनात्मामंदंमंदमिवासकृत् १८ दुर्लभंकिंनुदेवर्षेआशायाश्चैवकिंमहत् ब्रवीतुभगवानेतद्यदिगुह्यंनतेमयि १९ मुनिरुवाच महर्षिर्भगवांस्तेसर्वमासीद्विमानितः बालिशांबुद्धिमास्थायमंदभाग्यतयात्मनः २० अर्थयन्कलशंराजन्काञ्चनंवल्कलानिच अवज्ञापूर्वकेनापिनसंपादितवांस्ततः निर्विण्णः सतुराजर्षिर्निराशः समपद्यत एवमुक्तोऽभिवाद्याथतमृषिंलोकपूजितं २२ श्रांतोवसीदद्धर्मात्मायथात्वंनरसत्तम २३ ॥

२४ एवंमुनिनाराजपृष्टानंतरंआगताः किमर्थंआश्रमेत्वंप्रविष्टोसीत्यपृच्छन् २५ २६ सप्तविंशतितमः १२७ वीर १२

अर्घ्यंततः समानीयपाद्यंचैवमहानृषिः आरण्यकेनैवविधिनाराज्ञेसर्वंन्यवेदयत् २४ ततस्तेमु
नयः सर्वेपरिवार्यनरर्षभं उपाविशन्नरव्याघ्रंसप्तर्षयइवध्रुवं २५ अपृच्छंश्चैवतेतत्रराजानम
पराजितं प्रयोजनमिदंसर्वमाश्रमस्यनिवेशने २६ इतिश्रीमहाभारतेशांतिपर्वणिराजधर्मेऋष
भगीतासु १२७ राजोवाच वीरद्युम्नइतिख्यातोराजाहंदिक्षुविश्रुतः भूरिद्युम्नंसुतंनष्टमन्वेष्टुंवन
मागतः १ एकः पुत्रः सविप्राग्र्यबालएवचमेनघ नदृश्यतेवनेचास्मिंस्तमन्वेष्टुंचराम्यहं
२ ऋषभउ० इत्युक्तेवचनेतेनराज्ञामुनिरधोमुखः तूष्णीमेवाभवत्तत्रनचप्रत्युक्तवान्नृपं ३
सहितेनपुराविप्रोराज्ञानात्यर्थमानितः आशाकृतश्चराजेंद्रतपोदीर्घंसमास्थितः ४ प्रतिग्रह
महंराज्ञांनकरिष्येकथंचन अन्येषांचैववर्णानामितिकृत्वाधियंतदा ५ आशाहिपुरुषंबाल
मुत्थापयतितस्थुषी तामहंव्यपनेष्यामिइतिकृत्वाव्यवस्थितः वीरद्युम्नस्तुतंभूयः पप्रच्छमुनिस
त्तमं ६ राजोवाच आशायाः किंकृशत्वंचकिंचेहभुविदुर्लभं ब्रवीतुभगवानेतत्त्वंहिधर्मा
र्थदर्शिवान् ७ ततः संस्मृत्यतत्सर्वंस्मारयिष्यन्निवाब्रवीत् राजानंभगवान्विप्रस्ततः कृशतनु
स्तदा ८ ॥

३ आशाकृतःआशयाहतः कृतहिंसायामित्यस्यरूपं ४ ५ ६ ७ ८ ॥

श्री॰
शां॰ रा॰
टी॰
२३५

आशायाः आशावतः समं अन्यत्कृशत्वेन समं किमपि नास्ति तस्याः तद्वहीनस्यार्थस्य ५ कृशाकृशे यत्र आशाजितः सकृ
शः येनाशाजिता स उभयरूप इत्यर्थः तस्यैव आशाविषयस्यैव ६ १२ दुर्लभं किं नु इति पूर्वप्रश्नस्योत्तरमाह दुर्लभ इति १३ ततः

ऋषिरुवाच कृशत्वेन समं राजन्नाशाया विद्यते नृप तस्या वै दुर्लभत्वाच्च प्रार्थिताः पार्थिवा म
या ५ राजोवाच कृशाकृशे मया ब्रह्मन् गृहीतं वचनं तव दुर्लभत्वं च तस्यैव वेदवाक्यमिव द्वि
ज ६ संशयस्तु महाप्राज्ञ संजातो हृदये मम तन्मे सत्तम तत्त्वेन वक्तुमर्हसि पृच्छतः ९ त्वत्तः कृ
शतरं किं नु ब्रवीतु भगवानिदं यदि गुह्यं न ते किंचिद्विद्यते मुनिसत्तम १२ कृशउ॰ दुर्लभोऽप्यथवा
नास्ति योऽर्थी धृतिमवाप्नुयात् सुदुर्लभतरस्तात योऽर्थिनं नावमन्यते १३ सत्कृत्य नोपकृत्य ते प
रं शक्त्या यथार्हतः या सक्ता सर्वभूतेषु साशा कृशतरी मया १४ कृतघ्नेषु च या सक्ता नृशंसेष्वल
सेषु च अपकारिषु चासक्ता साशा कृशतरी मया १५ एकपुत्रः पिता पुत्रे नष्टे वा प्रोषिते पि वा प्र
वृत्तिं यो न जानाति साशा कृशतरी मया १७ प्रदाने कोविदानां च कन्यानां वयसि स्थिते श्रु
त्वा कथास्तथायुक्ताः साशा कृशतरी मया १८ ॥

कृशतरमित्युपपदोक्तस्योत्तरमाह सत्कृत्येति आदरेणाशां प्रदर्श्य योऽर्थिनं नोपकुरुते तत्र या आशा सा अतिकृशा मया मतः २३५
दीनत्वसंपादकत्वात् १४ १७ तथायुक्ताः प्रदाने स्थितमिति ग्राह्ययुक्ताः १८ ॥

१९ २१ उपालभ्यतत्रापवर्गंस्थापयित्वा २२ २६ ममममत्तः २७ अष्टाविंशतितमः १२८ ऋषभगीतासमाप्ता ना
स्तस्येति शीलवतोजितात्मनस्तस्ययत्कर्तव्यंतदत्रोच्यते पर्याप्तिरलंभावस्तदप्तिरितियावत् स्वात्महृत्तिस्थः समाधिस्थविनेवा
पतच्छ्रुत्वाततोराजन्सराजासावरोधनः संस्पृश्यपादौशिरसानिपपातद्विजर्षभे १९ राजो
वाच प्रसादयेत्वांभगवन्पुत्रेणाच्छामिसंगमं यदेतदुक्तंभवतासंप्रतिद्विजसत्तम २० सत्यमे
तन्नसंदेहोयदेवमाहृतंत्वया ततः प्रहस्यभगवांस्तनुर्धर्मभृतांवर २१ पुत्रमस्यानयत्क्षिप्रंतपसा
चश्रुतेनच समानीयततस्तंतमुपालभ्यपार्थिवं २२ आत्मानंदर्शयामासधर्मंधर्मभृतांवरः
संदर्शयित्वाचात्मानंदिव्यमद्भुतदर्शनं २३ विपाप्माविगतक्रोधश्चचारवनमंतिकात् पतदू
ष्टमयाराजंस्तथाचवचनंश्रुतं आशामपनयस्वाशुततःकृशतरीमिमां २४ भीष्मउ० सतथोक्त
स्तदाराजन्नृषभेणमहात्मना कृशमित्रापनयत्क्षिप्रमाशांकृशतरींततः २५ पवंत्वमपिकौन्ते
यश्रुत्वावाणीमिमांमम स्थिरोभवमहाराजहिमवानिवपर्वतः त्वंहिपृष्टावेश्रोताच कृच्छ्रेष्व
वगतेष्विह श्रुत्वाममहाराजनसंतप्तुमिहार्हसि २७ इतिशान्तेराजधर्मेऋषभगीतासमा
प्ता १२८ युधिष्ठिरउ० नामृतस्येवपर्याप्तिर्ममास्तिब्रुवतित्वयि यथाहिस्वात्महृत्तिस्थस्तथात्वंतृप्तो
स्मिभारत १ तस्मात्कथयभूयस्त्वंधर्ममेवपितामह नहितृप्तिमहंयामिपिबन्धर्मामृतंहित २
हमपित्वद्वागमृतेनतृप्तोस्मीत्यर्थः १ २ ॥

श्री·
शां·रा·
टी·
२९·

३ ४ धर्मेणमयातवकिंस्वित्क्रियतामितिब्रुवन्यमः न्यमंत्रयततंसम्युखोवोत्तनवान् ८ ९ अश्वमेधैरितिस्वधर्ममात्रस्याप
लनेन ११ नवविंशतिशततमः १२९ मित्रैरित्यध्यायः वक्ष्यमाणेनामापद्धर्मेणोपस्कृतमूत्तः तत्रसर्वप्रकारेणापदिआगतायाम्

भीष्मउ· अत्राप्युदाहरंतीममितिहासंपुरातनं गौतमस्यचसंवादंयमस्यचमहात्मनः १ पारि
यात्रेगिरिंप्राप्यगौतमस्याश्रमोमहान् उवासगौतमोयत्रकालंतमपिमेशृणु ४ षष्टिंवर्षसहस्राणि
सोतप्यद्गौतमस्तपः तमुग्रतपसंयुक्तंभावितंसुमहामुनिं ५ उपयातोनरव्याघ्रलोकपालोयमस्तदा
तमपश्यत्सुतपसमृषिंवैगौतमंतदा ६ संतंविदित्वाब्रह्मर्षिर्यममागतमोजसा प्रांजलिःप्रयतोभूत्वा
उपातिष्ठत्तपोधनः ७ तंधर्मराजोदृष्ट्वैवसत्कृत्यैवद्विजर्षभं न्यमंत्रयतधर्मेणक्रियतांकिमितिब्रुव
न् ८ गौतमउ· मातापितृभ्यामानृण्यंकिंकृत्वासमवाप्नुयात् कथंचलोकानाप्नोतिपुरुषोदुर्लभा
न्शुभान् ९ यमउ· तपःशौचवतानित्यंसत्यधर्मरतेनच मातापित्रोरहरहःपूजनंकार्यमंजसा
१० अश्वमेधैश्चयष्टव्यंबहुभिःस्वाप्तदक्षिणैः तेनलोकानवाप्नोतिपुरुषोद्भुतदर्शनात् ११ इतिश्री
महाभारतेशांतौराजधर्मे १२९ युधिष्ठिरउ· मित्रैःप्रहीयमाणस्यबह्वमित्रस्यकागतिः राज्ञः
क्षीणकोशस्यबलहीनस्यभारत १ दुष्टामात्यसहायस्यस्रुतमंत्रस्यसर्वशः राज्यात्प्रच्यवमान

धर्मेणप्रजापीडनेनापिकोशवृद्धिःकर्त्तव्यातेनैवसर्वाश्चापदस्तरतीतिश्लोकाद्यार्थः १ २ ॥ स्यगतिश्चामपश्यतः २

सर्वतः सर्वैः परस्य चक्रं राष्ट्रं प्रति अभियातस्य बलीयसा मर्दे १ असंविहितं सम्यगरक्षितं राष्ट्रं येन तस्य अतिपीडनात् परा
कीयामात्यादीनां भेदोपि अप्राप्यः तत्र अर्थ सान्त्वं जीवितं वा सुकृतं अर्थं स्यामा मार्गेणापि ग्राह्यः उतार्थं विना मरणं वाश्रयशतिस्मा
ईतप्रश्नः ४ मा मां अप्राक्षीः पृष्टवानसि ५ वचनात् शास्त्रात् धर्मं श्रुत्वा उपास्य चक्कापि देशे कश्चिदेव साधुर्भवति ६ आपत्का

परचक्राभियातस्य परराष्ट्राणि मृद्नतः विग्रहे वर्तमानस्य दुर्बलस्य बलीयसा १ असंविहि
तराष्ट्रस्य देशकालावजानतः अप्राप्यं च भवेत्सान्त्वं भेदो वाप्यतिपीडनात् २ जीवितं त्वर्थहेतोर्वा
तत्र किं सुकृतं भवेत् ३ भीष्म उ॰ गुह्यं धर्मं मा प्राक्षीरतीव भरतर्षभ अपृष्टो नोत्सहे वक्तुं धर्म
मेतं युधिष्ठिर ४ धर्मो ह्यणीयान्वचनाद्बुद्धेश्च भरतर्षभ श्रुत्वोपास्य सदाचारैः साधुर्भवति
स क्वचित् ५ कर्मणा बुद्धिपूर्वेण भवत्याढ्यो न वा पुनः तादृशोयमनुप्रश्नः स व्यवस्यः स्वयाधि
या ६ उपायं धर्मबहुलं यात्रार्थं शृणु भारत नाहमेतादृशं धर्मं बुभूषे धर्मकारणात् ७ ॥

लेयनार्थं प्रजाः कर्षन्नपि यत्नं लभते चेदापदं निस्तीर्य प्रजा अनुकंपयेत् न लभते चेत्तस्य प्रजानां च नाशो भवतीति विचार्य स्वस्य
प्रश्नस्योत्तरं स्वयमेव चिंतनीयमित्यर्थः ७ यात्रार्थं राज्ञां व्यवहारनिर्वाहार्थं धर्मो राज्ञामापद्धर्मस्तदर्थं त्वितनबहुलं उपायं शृणु
ए३ अहं तु न बुभूषे इति तस्य शास्त्रैरनादरणीयत्वं दर्शितं बुभूषे प्राप्तुमिच्छामि ८ ॥

श्री॰
शां॰ रा॰
टी॰
२४१

एष उपायो दुःखोदानः प्रजानां दुःखेन आदीयते भिक्षीक्रियते तत एव पश्चात्तापोपमः मत्स्यान्तल्पः प्रजापीडनसंता
पात्समुद्भूतो ऽङ्गताशनः राज्ञः प्राणान्बलं कोशं नादग्ध्वा विनिवर्तत इति अभिगम्य आश्रिताः मतयः श्रुता सा सेवा
सा प्रजानामितिवा ११ अथोगाउपायाभावः ११ १२ अनुवृत्तीयात्प्राकर्षिताः प्रजा इति शेषः उपाय धर्ममेव प्रथमं

दुःखोद्दानस्तदेवैषः स्यात्तपश्चात्तापोपमः अभिगम्यमतीनां हि सर्वासामेव निश्चयः ६
यथा यथा हि पुरुषो नित्यं शास्त्रमवेक्षते तथा तथा विजानाति विज्ञानमथ रोचते ९ अवि
ज्ञानादयोगो हि योगो भूतिकरः परः अशंकमानो वचनमनसूयुर्विदिष्टता ११ राज्ञः को
शात्तथादेवजायते बलमुत्तमः कोशं च जनयेद्राजा निर्जलेभ्यो यथा जलं १२ कालं प्रा
प्यानुवृत्तीयादेष धर्मः सनातनः उपायधर्मं प्राप्यैव पूर्वैराचरितं जनैः १३ अन्यो धर्मः स
मर्थानामापत्स्वन्यश्च भारत प्राक्कोशात्प्राप्यते धर्मो वृत्तिर्धर्माद्गरीयसी १४ धर्मं प्राप्या
यद्वृत्तिं न बलीयान्न विंदति यस्माद्बलस्यापपत्तिरेकान्तेन न विद्यते १५ ॥ ॥ ३ ॥ शान्तिपर्व...

अनुत्पन्ने धर्ममिति यावत्सार्धः
१३ प्राक्कोशात् विनापि कोशं तप आदिना धर्मः वृत्तिर्जीवनं तल्लोपप्रसक्तौ तु कोशसंचयविरोधीयधर्मो नादर्तव्य इत्यर्थः १४ नवलीयानो
कयेति वत्समासः दुर्बलो धर्मं प्राप्य अनुकृत्य न्याय वृत्तिं न्यायोपेतां श्रेष्ठां जीविकां न विदति यस्मात् यत्नाच्चावश्यं बलं भवतीति नियमोपि २४१

तस्मादापद्यधर्मोपिकर्तृत्वेनश्रूयते तत्रचयोधर्मलक्षणःधर्मःसअधर्मएवभवतीतिशास्त्रधर्मादेतिश्लोकद्वयार्थः
प्रजाकर्षणादिधर्मोप्यापदिधर्मएवाप्रकृतश्चात्मएवाधर्मइतिभावः १६ अनन्तरंआपन्निष्टम्भुत्तरं तत्रपूर्वोक्तायधर्मेकिंवि
विकित्स्यतेप्रायश्चित्तादिकंकरग्रहणादिकंचविधीयतेदोषपरिहारार्थमित्यर्थः फलितमाहयथेति १७ धर्मस्येतिक

तस्मादापत्स्वधर्मोपिश्रूयतेधर्मलक्षणः अधर्मोजायतेतस्मिन्नितिवैकवयोविदुः १६ अ
नन्तरंक्षत्रियस्यात्रकिंविचिकित्स्यते यथास्यधर्मोनग्लायेन्नेयाच्छत्रुवशंयथा तत्कर्तव्या
मिहेत्याहुर्नात्मानमवसादयेत् १७ सर्वात्मनैवधर्मस्यनपरस्यनचात्मनः सर्वोपायैरुज्जि
हीर्षेदात्मानमितिनिश्चयः १८ तत्रधर्मविदांतातनिश्चयोधर्मनैपुणात् उद्यमोजीवनंक्षत्रेबा
हुवीर्यादितिश्रुतिः क्षत्रियोवृत्तिसंरोधेकस्यनादातुमर्हति अन्यत्रतापसस्वाच्चब्राह्मणस्वा
च्चभारत २० यथावैब्राह्मणःसीदन्नयाज्यमपियाजयेत् अभोज्यान्नानिचाश्नीयात्तथेदंनात्र
संशयः २१ पीडितस्यकिमद्वारमुत्पथोविधृतस्यच अद्वारतःप्रद्रवतियदाभवतिपीडितः २२
यस्यकोशबलज्यान्यासर्वलोकपराभवः भैक्षचर्यानविहितानचविट्शूद्रजीविका २३

र्मणोपहर्तापरस्यधर्मेतोजिहीर्षेत्तेनापिआत्मनोधर्ममुज्जिहीर्षेदपितुआत्मानमेवउज्जिहीर्षेत्स्वपरस्यधर्मलोपेप्यात्मानमेवोद्ध
र्तुमिच्छेदित्यर्थः १८ २२ विधृतस्येतिरुद्धस्यकण्ठत्यथःनकोपिकिंतुयथाउत्पथेनापिप्रद्रवतितथायतितव्यमितिशेषः २३

श्री॰ नविहितायस्येत्यनुषज्यते स्वधर्मो विजयेन क्षत्रियस्य धनार्जनं तस्य अनन्तरा प्रत्यासन्ना स्वपरराष्ट्रावमर्देन धनार्जनं ते
शां॰ रा॰ न हृत्तिस्तस्य विहितेत्यनुषङ्गः जात्यान् सजातीयान् अनुपजीवतः अयाचमानस्य नित्यं प्रथमं कल्पं वदतो ऽपि आपदि
टी॰ अनुकल्पेन जीवनं युक्तमित्यर्थः २४ अन्यायेन विपर्ययेण भुञ्जीत ह्येतद्विप्रो धान्यमब्राह्मणाद्धरेदिति प्रतिग्रहालाभे
२५२ ब्राह्मणस्य यथा चौर्यं विहितं २५ एवं क्षत्रियो ऽप्यापदि विशिष्टेभ्यो बलादाददीतेत्यत्र संदेहः एवं न युक्त इत्यर्थः २६ २७

स्वधर्मान्ततरा हृत्तिर्जात्यानुपजीवितः वदतः प्रथमं कल्पमनुकल्पेन जीवनं २४
आपद्गतेन धर्माणामन्यायेनोपजीवनं अपि ह्येतद् ब्राह्मणेषु दृष्टं वृत्तिपरिक्षये २५ क्षत्रि
येभ्यश्च यः कस्मादित्येवं निश्चितं सदा आददीत विशिष्टेभ्यो नावसीदेत् कथंचन २६ ह
र्तारं रक्षितारं च प्रजानां क्षत्रियं विदुः तस्मात् संरक्षता कार्यमादानं क्षत्रबन्धुना २७ अन्य
त्र राजन् हिंसाया वृत्तिर्नेहास्ति कस्यचित् अप्यरण्यसमुत्थस्य एकस्य चरतो मुनेः २८ न
शङ्खलिखितां वृत्तिं शक्यमास्थाय जीवितुं विशेषतः कुरुश्रेष्ठ प्रजापालनमीप्सया २९

अस्यापवादमाहान्यत्रेति हिंसायाः क्लेशजननपीडामकृत्वेत्यर्थः इह हिंसायां कस्यचिदपि वृत्तिर्हिंसावृत्तिका न विहितास्तीति
नेत्यर्थः अरण्यसमुत्थस्य स्वेनेव तिष्ठतः २८ शङ्खललाटास्थि निलिखितां वृत्तिं दिष्टमात्रां लबिनारात्तां जीवितेन शङ्खं २५२
शङ्खः कम्बु ललाटास्थि इति विश्वलोचनः ईप्सया उत्कण्ठेन प्रजापालनं चिकीर्षतेति शेषः २९ ॥

१० ३१ अंतरं हरतः ३१ बीजं भक्तेन संपादितं चेदस्य भक्तदौर्लभ्यं यस्या भवति एवमल्पधनो राजा प्रजाभिर्न रक्षितो नश्यति न
श्चेत्तस्मिन्सर्वाः प्रजा अपि नश्यन्तीत्यर्थः एतत्सर्वं दीक्षितदर्शनं शास्त्रं ३२ अहत्याजीविकाया अभावेन यस्य राष्ट्रं अवसीदा
ति यो वा अन्यमनुष्यः परप्रेष्यः अल्पेति पाठे अल्पपरीवारः यो वा वैदेशिको देशान्तरोपजीवि तस्य राज्ञो जीवितं धिक् ३३ ॥

परस्परं हि संरक्षता राज्ञा राष्ट्रेण चापदि नित्यमेवेह कर्तव्या एष धर्मः सनातनः ३० राजा राष्ट्रस्य
यापत्सु द्रव्यैर्विविधैरभिरक्षति राष्ट्रेण राजा व्यसने रक्षितव्यस्तथा भवेत् ३१ कोशं दंडं बलं मित्रं यद
न्यदपि संचितं न कुर्वीतांतरं राष्ट्रे राजा परिगतः क्षुधा ३१ बीजं भक्तेन संपाद्यमिति धर्मविदो
विदुः अत्रैतत्प्रवदंतीमं महामायस्य दर्शनं ३२ धिक्तस्य जीवितं राज्ञो राष्ट्रं यस्यावसीदति
अवृत्त्यान्यमनुष्योपि यो वै देशिकरत्नपि ३३ राज्ञः कोशबलं मूलं कोशमूलं पुनर्बलं तन्मू
लं सर्वधर्माणां धर्ममूलाः पुनः प्रजाः ३४ नात्यावपीडयित्वेह कोशः शक्यः कुतो बलं तदा
र्थं पीडयित्वा च दोषं प्राप्तुं न सोऽर्हति ३५ अकार्यमपि यज्ञार्थं क्रियते यज्ञकर्मसु एतस्मात्कारा
णाद्राजा न दोषं प्राप्तुमर्हति ३६ ॥

तन्मूलं दीर्घकारणं कोशो बलं च तत्रापि कोशो बलस्य मूलं तत्र बलं धर्माणां मूलं धर्मश्च प्रजानां मूलं अतः सर्वस्य मूलभूतो
कोशो वर्द्धयेत् ३४ ३५ कारणांतरत्वांतात् राजा बलार्थं प्रजाः कर्षन्न दोषं प्राप्नोति ३६ ॥

श्री॰
शां॰ रा॰
टी॰
२५३

अन्यत आपदि प्रजापीडनमप्यर्थार्थं भवति अपरं अपीडनं विपरीतं अनर्थार्थं भवति यदप्यन्यत् अनर्थार्थं अर्थाभावार्थं कुंज
रपालनादि भवति तद्देवद्वार्थस्य कारणं उत्पादकं भवति एवमेतद्दपीत्याद्यर्द्धेन एवमिति सार्द्धः ३७ यत्रार्थमिति यथायथादि
कं यत्रार्थं यत्नश्च चित्तसंस्कारार्थः यथादिकं यत्नः संस्कारश्चेति तत्रयं अर्थार्थं मोदार्थं भवति एवंदंडः कोशार्थं कोशो बलार्थं बा

अर्थार्थमन्यद्भवति विपरीतमथापरं अनर्थार्थमथाप्यन्यत्तत्सर्वं ह्यर्थकारणं एवं बुद्ध्या सम्प्र
पश्येन्मेधावी कर्मनिश्चयं ३७ यत्रार्थमन्यद्भवति यत्रोन्यार्थस्तथापरः यत्तस्यार्थार्थमेवा
न्यत्तत्सर्वं यत्नसाधनं ३८ उपमामत्र वक्ष्यामि धर्मतत्त्वप्रकाशिनीं यूयं छिंदंति यत्रार्थं तत्रये परि
पंथिनः ३९ द्रुमाः केचन सामंताः फलवंतं छिंदंति तानपि नैवापि नपतंतोन्यान्निघ्नंत्येव वनस्पतीन्
४० एवं कोशस्य महतो ये नराः परिपंथिनः तानहत्वा न पश्यामि सिद्धिमत्र परंतप येनेन जयतो
लोकावुभौ परमिमं तथा सत्यं धर्मं वचनं यथा नास्त्यथनस्तथा ४२ सर्वोपायैरादधीत यनं यत्त
प्रयोजनं मतत्ल्पदोषः स्यादेवं कार्याकार्येषु भारत ४३ ॥

लंशाद्वपराभवार्थं कोशो बलं जयश्चेति त्रयं
राष्ट्रपुष्ट्यर्थमिति भावः ३८ ३९ सामंताः प्रतिपदभूताः ४० ४१ यथानास्त्यथनस्तथेतिजीवन्नसत्तमयनस्योक्तं ४२ यत्रार्थं
यत्नं सर्वैरप्यनिषिद्धैरुपायैरादधीत एवं तु कार्याकार्येषु विहितनिषिद्धेषु आपदि प्रजापीडने विहिते तद्वा नापदि निषिद्धं तथाभू
तेष्वर्थेषु तत्ल्पदोषा न स्यात् देशकालानुसारेणाकार्यं यस्य कार्यं भवत्यकार्यमपि कार्यं भवति तत्र विपरीतं न प्रतिपद्येतेति भावः ४२

श्री·
शां· रा·
टी·
२४४

पत्नीधनसंग्रहत्यागौ एकस्मिन्नहषेन संभवतः युगपत्तयोर्हि निर्नसिष्यति विरक्तेषु संग्रहासंभवात् ४४ अन्येषु त्यागासंभवमाह यदि
दमितितस्मादविरक्तानां ज्ञात्वा धनमेष्टव्यमेवेति भावः ४५ ननु किं पापमूलेन धनेन किंच तन्मूलेन राज्येनेत्याशंक्याह नचेति अनापा
द्येव राज्ञो बहुकरादानं पापमूलं आपदि तु न तत्तथा भवति अतो न पापमूलं धनेनापि तन्मूलं राज्यं हेयं अपितु धर्महेतुत्वादवश्य

नैतौ संभवतो राजन्कथंचिदपि पार्थिव न ह्यरण्येषु पश्यामि धनवृद्धानहं क्वचित् ४४ यदिदं
दृश्यते वित्तं पृथिव्यामिह किंचन ममेदं स्यान्ममेदं स्यादित्ययं कांक्षते जनः ४५ न च राज्यसमो
धर्मः कश्चिदस्ति परंतप धर्मः संशब्दितो राज्ञामापदर्थमतोन्यथा ४६ दानेन कर्मणा चान्ये त
पसान्ये तपस्विनः बुद्ध्या दाक्ष्येण चैवान्ये विंदंति धनसंचयान् ४७ अधनं दुर्बलं प्राहुर्धनेन बला
वान्भवेत् सर्वं धनवता प्राप्यं सर्वं तरति कोशवान् ४८ कोशेन धर्मः कामश्च परलोकस्तथाप्य
यं तं च धर्मेण लिप्सेत नाधर्मेण कदाचन ४९ इति श्रीमहाभारते शांतौ राजधर्माः समाप्ताइ
ति १३० ॥

कर्तव्यत्वमेवेत्यर्थः ४६ ४७ इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविंदसूरिसूनोः श्रीनीलकंठ ४४
स्य कृतौ भारतभावदीपे शांतौ राजधर्मार्थप्रकाशः समाप्तिमगमत् त्रिंशदधिकशततमोध्यायः १३० ॥